Barcode : 99999990291890
Title - Tattvachintamani Vol.II No.1291
Author - Bhattacharya,Gadhadhar
Language - sanskrit
Pages - 394
Publication Year - 1911
Barcode EAN.UCC-13



BIBLIOTHECA INDICA

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES No 1291.

तत्त्वचिन्तामणि-दीधिति-विवृति



TATTVACINTĀMANI DIDHITI-VIVRITI

BY

GADADHARA BHATTACHARYYA

WITH TATTVACINTAMANI AND DIDHITI

EDITED BY

MAHĀMAHOPĀDHYĀYA YADUNATH SARVABHAUMA

VOLUME II FASCICULUS I

Calcutta,

PRINTED BY UPENDRA NATHA CHAKRAVARTI AT THE SANSKRIT PRESS
6, Nandakumar Chawdhury's 2nd Lane

AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1 PARK STREET

1911.

ॐ रामः ।

अनुमानखण्डस्य

तत्त्वचिन्तामणिः ।

व्याप्त्यनन्तरं पक्षधर्मता निरूप्यते ।

तत्र न तावत् सन्दिग्धसाध्यधर्मत्वं पक्षत्वम् ।

तत्त्वचिन्तामणिदीधितिः ।

अनुमितिलक्षणैककार्य्यानुकूलतासङ्गत्या पक्षधर्मतां निरूपयितुमाह व्याप्तीति । सन्दिग्धेति । यत्र साध्यस्य यादृशसम्बन्धावगाहिनिर्णयनिवर्त्त्यो यः संशयस्तत्र स तादृशसम्बन्धेन साध्यानुमितौ पक्षते-

अनुमानगादाधर्य्यां

पक्षतानिरूपणम् ।

ॐ नमः शिवाय । मूले व्याप्तिपक्षधर्मतयोः सङ्गत्यप्रदर्शनपूर्वतां परिजिघृक्षुस्तयोरेककार्य्यकारित्वरूपसङ्गतिं दर्शयन् व्याप्त्यनन्तरमित्यादि मूलमवतारयति "अनुमितीति" अनुमितिलक्षणं अनुमिति स्वरूपं यदेककार्य्यं तदनुकूलत्वसङ्गत्या तत् प्रयोजकत्व-

त्यर्थः तेन न पक्षसाध्यविशेष्यकसंशयाननुगमो न वा सम्बन्धान्तरेण सन्देहेऽपि निर्णीतसम्बन्धेन पक्षत्वम् न वा तमः प्रभृतिषु समवायेन आकाशादिसाधने तद्वैकल्यम् ।

रूपमङ्गत्या, प्रयोजकत्वञ्च (१) कारणतावच्छेदकस्यापीति व्याप्ति पक्षधर्म्मतयोः परामर्शनिष्ठकारणतायामवच्छेदकत्वेन अनुमित्य जनकत्वेऽपि न क्षतिः । यद्यपि पक्षतायानकारणतावच्छेदकघट कत्वं (२) तामनल्पर्भाव्यपर्व्वतादिवृत्तित्वज्ञानत्वेनैवानुमितिजनक त्वात् तथापि पक्षतायां अनुमितौ स्वातन्त्र्येण कारणतया तदुपल क्षितधर्म्मिवृत्तितायाश्च कारणतावच्छेदकतया तद्वृत्तिविशिष्टस्यैक कार्य्यानुकूलत्वमक्षतमेवेति ध्येयम् । निरूपयितुमिति, निरूप प्रतिपक्ष्यनुकूलोव्यापारः एवञ्च पक्षधर्म्मताघटकपक्षतानिरूपक स्यापि पक्षधर्म्मताप्रतिपक्ष्यनुकूलत्वेन तन्निरूपणत्वमक्षतमिति मु पक्षतानिरूपणेऽपि पक्षधर्म्मतां निरूपयितुमित्यस्य नासङ्गतिः । पक्षे धर्म्मत्व यस्या वृत्ति व्युत्पत्त्या पक्षधर्म्मतापद पक्षीयधर्म्मविशेषरूप

---

(१) कारणतावच्छेदकाद्दत्त्यन्यथासिद्धिशून्यत्वे सति जनकजनकतावच्छेदकाधारत्वं प्रयोजकत्वमिति भावः ।

(२) अयमभिप्रायः व्याप्तिपक्षधर्म्मताज्ञानजन्यानुमितौ हेतुः तत्र पक्षांशे विशेषणविषयतासम्बन्धेन पक्षतायाः पक्षांशे प्रयोजनाभावसत्त्वात् तथापीत्यादिग्रन्थेन पक्षांशे पक्षतायाः उपलक्षणत्वं कल्पनीयमन्यथा पक्षतायाः अप्रवेशे पक्षतासामानाधिकरण्ये स्वरूपसत् पक्षतासत्त्वे अनुमित्यनुपपत्तेरिति ।

पक्षतानिरूपणम् ।

पक्षतापरमिति केचित् तच्चिन्त्यम्। तथात्वे लिखनसंक्षेपनिर्व्वन्धिनो दीधितिकारस्य पक्षतां निरूपयितुमित्यस्य उपेक्षायां वीजाभावात्। व्याप्तीतीति। व्याप्तिनिरूपणानन्तरमिति मूलपाठाभिप्रायेण व्याप्त्यनन्तरमितिपाठे च तत्रैकारामावात् प्रत्यक्षेत्यादौत्युपेक्ष्य प्रत्यक्षेत्यादि इति दीधाप्रत्यक्षोपजीवकत्वादित्यादिग्रन्थधारकस्य तथाविधलिखनासङ्गतेः। तत्रेति, मूले तत् पदं पक्षधर्म्मतापर सम्यर्थंश्च घटकत्व अन्वयस्य पक्षत्वमित्यत्रेत्यन्वेयम्। सन्दिग्धेत्यादि मूलग्रन्थस्य सन्दिग्धः साध्यरूपो धर्म्मो यत्रेति व्युत्पत्त्या विषयतया साध्यीभूतधर्म्मसन्देहवत्वं, तादृशसन्देहपर्य्यवसितं, पक्षतेत्यर्थः। तत्र साध्ये धर्म्मत्वनिवेशनमफल धर्म्मपदसार्थक्याय, स्वस्मिन् सन्दिग्धं साध्यधर्म्मत्वम्। साध्यं धर्म्मो यस्य इति बहुव्रीहिबलात्, साध्यनिरूपितधर्म्मित्वपर्य्यवसितं पक्षत्वमित्युक्तौ, साध्ये सन्दिग्धं स्वधर्म्मत्वं पक्षत्वमित्युक्तौ च साध्यनिरूपितधर्म्मित्वस्य पक्षनिरूपितधर्म्मत्वस्य चाप्रसिद्धिस्थले वक्ष्यमाणानुपपत्तिप्रयोजकं तत्। एव साध्यकोटिकसंशयस्य निवेशे साध्यं पक्षवृत्ति न वा, साध्यं पक्षनिष्ठाभावप्रतियोगि न वेतिसंशयासंग्रहः, तादृशसंशयोपादाने च, पक्षः साध्यवान्न वेति संशयादनुमित्यनुपपत्तिरतो धर्म्मत्वांशं परित्यज्य केवलान्वयिग्रन्थे मणिकृतैव वक्ष्यमाणतथाविधसकलसंशयानुगमप्रकारं दर्शयति "यत्रेति," यत्र इति यद्धर्म्मावच्छिन्ने, सम्यर्थश्च निर्णयान्वयिविशेष्यत्वं, साध्यस्य साध्यतावच्छेदकावच्छिन्नस्य, प्रकारत्वं, तस्यापि निर्णयेऽन्वयः, तत्र तद्धर्म्मावच्छिन्ने, सम्यर्थोऽनुमित्यन्वयिविशेष्यत्वं, तादृशसम्बन्धेन साध्यानुमितौ तादृशसम्बन्धावच्छिन्न-

साध्यतावच्छेदकावच्छिन्नविधेयताकानुमितौ जनकीभूतेत्यर्थः। पक्षविशेष्यकसाध्याभावविशिष्टबुद्धाविवसाध्यधर्मिकपक्षावृत्तित्वपक्षनिष्ठाभावप्रतियोगित्वविशिष्टबुद्धावपि पक्षः साध्यवानिति निश्चयस्य प्राचीनमते प्रतिबन्धकत्वात् साध्यं पक्षवृत्तिनवेत्यादिसंशयसत्त्वे। एवञ्च शुद्धपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितशुद्धसंयोगावच्छिन्नशुद्धवह्नित्वावच्छिन्नविधेयताकानुमितित्वावच्छिन्ने प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगसंसर्गावच्छिन्नवह्नित्वावच्छिन्नप्रकारतानिश्चयत्वावच्छिन्नप्रतिबन्धकताकसंशयो हेतुरिति पर्य्यवसितम्। तादृशनिश्चयप्रतिबध्यत्वस्य यथाश्रुतस्य घटादिविषयकसमूहालम्बनात्मकवह्निमत्त्वादिनिश्चयप्रतिबध्यघटादिसंशयसाधारण्यात् तादृशनिश्चयत्वावच्छिन्नप्रतिबन्धकतायाः प्रवेशः। अवच्छिन्नत्वञ्चान्यूनवृत्तित्वं न तु स्वरूपसम्बन्धविशेषः। तेन वह्निसामान्याभावविशिष्टबुद्धौ महानसीयत्वादिविषयतामनन्तर्भाव्य वह्निमान् महानसीयवह्निमानित्यादिशकलज्ञानसाधारण्यवह्नित्वावच्छिन्नवृत्तिनिश्चयत्वेनैव प्रतिबन्धकताकल्पनान्महानसीयवह्निमान् वह्निसामान्याभाववान् वा पक्ष इत्याकारकसंशयं प्रति महानसीयवह्नित्वावच्छिन्नप्रकारकनिश्चयत्वेनाप्रतिबन्धकत्वेऽपि न तथाविधसंशयस्य महानसीयवह्नित्वावच्छिन्नसाध्यकानुमितौ पक्षतात्वानुपपत्तिः (१)। न वा महानसीयवह्न्यभावादिविशिष्टबुद्धिप्रति

---

(१) नन्तु महानसीयवह्निमानिति निश्चयो महानसीयवह्न्यभाववानिति बुद्धिं प्रत्येव प्रतिबन्धकः न तु शुद्धमहानसीयवह्न्यभाववानिति बुद्धिं प्रति तथाच प्रतिबध्यादिधि ज्यभावप्रतियोगितावच्छेदककोटौ पर्य्याप्तिनिवेश तथाच पर्य्याप्ति-

बन्धकतावच्छेदककोटौ वह्नित्वावच्छिन्नप्रकारतात्वादेर्निविष्टत्वेऽपि, वह्निमानित्याद्यनुमितौ महानसीयवह्निमान्न वा पक्ष इत्यादि-संशयस्य पक्षतात्वापत्तिः(१) इत्यत्राहार्य्यस्य भ्रमत्वज्ञानाक्रन्दितस्य च निश्चयस्याप्रतिबन्धकतया अनाहार्य्यत्व भ्रमत्वज्ञानानाक्रन्दित-त्वञ्च निश्चयेविशेषणं देयमतो न तथाविधनिश्चयत्वान्यूनवृत्तिप्रति-बन्धकत्वाप्रसिद्धिः । पर्व्वतो वह्निमान्न वेत्यादेः कस्यापि संशयस्य धर्म्मान्तरावच्छिन्नविशेष्यताकान्यसंसर्गकान्यधर्म्मावच्छिन्नप्रकारक-निश्चयसाधारणसंयोगसंसर्गकवह्नित्वाद्यवच्छिन्नप्रकारकनिश्चयत्वा-द्यन्यूनवृत्तिप्रतिबन्धकताकत्वं न सम्भवतीति प्रकृतपक्षतावच्छेदका-

---

पर्य्यालोचनया महानसीयत्वनिष्ठावच्छेदकताभिन्नावती वह्नित्वनिष्ठावच्छेदकता भिन्ना यावच्छेदकता तदनिरूपकप्रतियोगिताकत्वनिवेशे वह्न्यभाववान् पक्ष इति बुद्धेरपि तादृशप्रतिबध्यत्वात् कथ पक्षतात्वानुपपत्तिरुक्तेतिचेन्न उक्तरूपेणप्रति बध्यत्वे महानसीयवह्निमानिति निश्चयस्य वह्निमहानसीयाभाववानिति बुद्धेरपि प्रतिबन्धकत्वापत्तेरिति ध्येयम ।

(१) न च साध्यतावच्छेदकतात्रयपर्य्याप्तावच्छेदकताकप्रकारतानालिनिश्चय-त्वावच्छिन्नप्रतिबन्धकताकं निवेशनीयं पर्य्याप्तिपर्य्यन्त उपलक्षणविधया निवेश्य तथाच वह्निमानिति निश्चयनिवर्त्त्यंतमादायमहानसीयवह्निमान् वह्निसामान्या-भाववान् वा इत्यादि संशयस्य समूह वह्निसाध्यकस्थले महानसीयवह्निमत्त्वे त्यादेर्न पक्षतापत्तिरिति किं व्यापकतारूपावच्छेदकतानिवेशनेनेति वाच्यं वह्निव्याप्यसाध्यकस्थले वह्निव्याप्यधूमवत्त्वेत्यादे पक्षतापत्तेः व्याप्यवत्तानिश्चयस्य व्याप्यधूमाभावप्रकारक ज्ञान प्रति बाधनिश्चयविषयाऽप्रतिबन्धकत्वेऽपि तादृशा-भावप्रत्यक्ष प्रति चक्षुर्भिन्नसामग्रीविषयाऽप्रतिबन्धकत्वात् व्यापकतानिवेशे च सामग्रीघटकप्रकारेणान्तरविरहस्थले तादृशनिश्चयस्याप्रतिबन्धकत्वात न तादृश निश्चयावव्यापकत्वमिति बोध्य यदि च ज्ञानत्वावच्छिन्नप्रतिबध्यतानिवेश्यते तदा नाय दोष इति ध्येयम् ।

वच्छिन्नविशेष्यतानिरूपितत्वादेः प्रकारतावि शेषणत्वम् । उपनीत-
भानात्मकबाधनिश्चयस्यापि साध्यवत्तानिश्चयसामान्यनिवर्त्तनीय-
तया, भ्रमत्वज्ञानाक्रन्दितस्य च तस्यानुमित्यविरोधितया, तथाविध
बाधदशायामनुमित्यापत्तिरतः संशयत्वनिवेशनम् । न च पक्षसाध्य
विशेष्यकसंशयसाधारण्यानतिप्रसक्तस्य संशयत्वस्य दुर्वचतया पुन-
रननुगमतादवस्थ्यमिति वाच्यं बाधनिश्चयनिवर्त्तनीयस्यैवात्र संशय-
पदेन विवक्षितत्वात् केवलान्वयिनि च, साध्ये पक्षनिष्ठाभावप्रति-
योगित्वनिश्चय एव सुलभो बाधः, एकविधबाधोपादानेनैव विविध-
संशयानुगमसम्भवात्तदननुगमो न दोषाय, अननुगमस्यापि कथञ्चित्
सम्भवात्(१)। यत्तु साध्यपक्षवैशिष्ट्यावगाहित्वमेव संशयपदेन विव-
क्षितमिति नाननुगमः । साध्यं पक्षवृत्ति न वेति साध्यविशेष्यक-
संशयस्यापि तथात्वादिति, तदसत्, तथा सति साध्यपक्षवैशिष्ट्यान-
वगाहिनः साध्यं पक्षनिष्ठाभावप्रतियोगि न वेति संशयस्यासंग्र-
हात् । न च केवलान्वयि स्थले साध्यं पक्षवृत्ति न वेत्येतादृग्
संशयादेवानुमित्युपपत्त्या तथाविधसंशयासंग्रहो न दोषाय इति
वाच्यं प्रमेयत्वं घटनिष्ठाभावप्रतियोगि न वेति संशयस्य केवला-
न्वयि ग्रन्थे मणिकृतैव संगृहीततया तद्विरोधात् । वस्तुतस्तु तादा
त्म्यसम्बन्धेन वाच्यसाध्यकप्रमेयपक्षकस्थले च तादृशसंशयाप्रसिद्धिः
तादात्म्यसम्बन्धेन पक्षसम्बन्धत्वाभावरूपकोट्यप्रसिद्धेः । न च साध्ये
पक्षनिष्ठाभावप्रतियोगित्वसंशयस्य पक्षतावेऽपि सत्तास्थले पक्षताव-

---

(१) पक्षे साध्यवत्त्वज्ञानविरोधिनिश्चयविषयत्वेन नानाविध बाधस्य तादृश-
त्वानविरोधिनिश्चयत्वेन विविधबाधनिश्चयस्य चानुगमसम्भवादिति भावः ।

च्छेदकसामानाधिकरण्यमात्रेणानुमितिरुद्देश्यत्वे पक्षतावच्छेदकावच्छेदेन वर्त्तमानभेदप्रतियोगित्वकोटिकसंशयस्यैव सामानाधिकरण्येन साध्यवत्तानिश्चयप्रतिबध्यतया पक्षतात्वमङ्गीकर्त्तव्यं तच्च न सम्भवति प्रमेयत्वाद्यवच्छेदेन वर्त्तमानभेदा-प्रसिद्धराकोट्य प्रसिद्धे-रिति वाच्यं, प्रमेयत्वाद्यवच्छेदेनवर्त्तमानस्य द्वित्वावच्छिन्नभेदस्यैव प्रसिद्धासाध्यतावच्छेदकावच्छिन्ने तादृशभेदप्रतियोगित्वकोटिक-संशयस्यैव तत्र पक्षतात्वसम्भवात् । तत्र पक्षतावच्छेदकावच्छिन्न-वृत्तिकाभावे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वतादात्म्य-सम्बन्धावच्छिन्नप्रतियोगिताकत्वोभयत्वावच्छिन्नतदभावकोटिकसं-शयस्य पक्षतात्वोपगमसम्भवाच्च, एवमप्रसिद्धसाध्यकव्यतिरिक्तमु-मानस्थले पक्षसाध्यवैशिष्ट्यावगाहिसंशयानुपपत्तेस्तत्तत्साध्यात्मका-भावप्रतियोगिन्नि पक्षसम्बन्धित्वसंशयस्य पृथिवीतरत् पक्षसम्बन्धि-न वेत्यारकस्यैव पक्षतात्वोपगन्तव्यतया पक्षसाध्यवैशिष्ट्यावगाहि-त्वनिवेशासम्भवात् । अथ वह्निव्याप्यसाध्यकस्थले महानसीयवह्नि-त्वाद्यवच्छिन्नसाध्यकस्थले च वह्निमान वा पक्ष इत्यादिसंशयस्य पक्ष-तात्वमस्तु: साध्यवत्तानिश्चयनिवर्त्तनीयत्वात् । न च सिद्धिकाले-ऽनुमितिवारणमेव पक्षताहेतुत्वकल्पनफलं एवञ्च उक्तसंशयस्यानु-मिति हेतुत्वोपगमेऽपि सिद्धिदशायां अनुमित्यापत्त्यसम्भवात् तस्य पक्षतात्वमिष्टमेव इति वाच्यं साध्यतावच्छेदकावच्छिन्नसाध्यतद-भावान्यतरस्मिन् पक्षसम्बन्धावगाहिसन्देहस्यैव प्राचीनैः पक्षतात्वो-पगमात् अन्यथा बाधसाधारणरूपेण पक्षतात्वोपगमेऽपि सिद्धिकाले-ऽनुमितिवारणसम्भवात् बाधवारकसंशयत्वनिवेशनस्यापि निष्प्रयो-

जनकतापत्तेः। न च तादृशभंगयस्य वह्निव्याप्याद्यभाववत्तानिश्चय-रूपबाधाप्रतिबध्यतया नातिप्रसङ्ग इति वाच्यं वह्निव्याप्याभावा-भाववान् पर्वतः पर्वतो वह्निमान्वा इति संशयस्य तादृशबाध-निश्चयप्रतिबध्यतया तावतापि तदारणासम्भवात्। यत्तु प्रकृत-साध्यतावच्छेदकावच्छिन्नविषयताघटितधर्मावच्छिन्नप्रतिबध्यता-निवेशान्नोक्तातिप्रसङ्गः, वह्न्यभावविशिष्टज्ञानत्वावच्छिन्नाया वह्नि-व्याप्यवत्तानिश्चयप्रतिबध्यताया अवच्छेदककोटौ वह्निव्याप्यत्वाव-च्छिन्नविषयताया अनन्तर्भावादिति तन्न वह्न्यभावादिसाध्यक-स्थले वह्निमान् वेत्यादिसंशयासंग्रहप्रसङ्गात्, वह्निविशिष्टबुद्धित्वा-वच्छिन्नाया वह्न्यभावादिनिश्चयप्रतिबध्यताया अवच्छेदकगर्भे वह्न्य-भावत्वावच्छिन्नविषयतायाः अनिवेशात्(१) यच्च च वह्निव्याप्यत्वाव-च्छिन्नस्यैव, पक्षत्वं साध्यत्वञ्च, तत्र वह्निव्याप्यो वह्निमान्न वेति संशयवारणस्याप्यशक्यत्वात्। यत्तु साध्यवत्ताज्ञानप्रतिबन्धकताव-च्छेदकविषयताघटितधर्म्मावच्छिन्नत्वेन प्रतिबध्यताया निवेश-नीयतया, वह्निव्याप्यवत्ताज्ञानं प्रति, वह्न्यभावादिनिश्चयत्वेनाप्रति-बन्धकतया तद्विषयतायाः साध्यवत्त्वज्ञानप्रतिबन्धकतावच्छेदकत्व-विरहेण नातिप्रसङ्गः। तदपि न तावतापि महानसीयवह्नित्वाव-च्छिन्नसाध्यकस्थले महानसीयवह्न्यभावाभाववान् पर्वतः स वह्नि-

---

(१) अत्रेदं बोध्यं पक्षसाध्यभेदेन पक्षतायां भिन्नत्वात् वह्न्यभावादि-साध्यक-स्थले साध्यतावच्छेदकविशिष्टविषयतादिकं न निवेश्यते वह्निव्याप्यकालीन. पर्वतो वह्निव्याप्यवानित्यनुमितौ वह्निव्याप्यकालीन पर्वतो वह्निमान्वेति संशयवारणाय पक्षतावच्छेदकविशिष्टपक्षविषयतावृत्तिभूतस्य साध्यविषयतायां निवेश्यते तदपि न निस्तारः वह्निव्याप्यत्वावच्छिन्नस्य पक्षत्वे साध्यत्वे च तदनिर्व्याहादिति।

मात्र वेतिसंशयवारणासम्भवात्(१) अत्रोच्यते, संशयत्वं, स्वनिष्ठविषयताघटितधर्म्मावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतात्राश्रितत्वं ज्ञानभेदेन विषयताभेदानभ्युपगमात् संशयनिष्ठ वह्निमत्पर्व्वतादिविषयताया अपि प्रत्येकं निश्चयवृत्तित्वात् प्रतिबन्धकतावच्छेदकघटकत्वोपपत्तिः वह्न्यादिसाध्यकस्थले, वह्न्यभाववान् पर्व्वतो घटवान्वेत्याकारकसंशयस्य तादृशधर्म्माक्रान्तस्य साध्यवत्त्वनिश्चयप्रतिबध्यस्य च वारणायसाध्यवत्तानिश्चयत्वावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकावच्छिन्नत्वेन निरुक्तसंशयत्वघटकप्रतिबध्यतानिरूपणीया, घटादिमत्ताज्ञानत्वावच्छिन्नप्रतिबध्यताया अतथात्वात् नातिप्रसङ्गः तत्र पक्षः वह्न्यभाववान्नवेति संशयस्य पक्षतात्वमिष्टमेव तस्य यद्धिः पक्षनिष्ठाभावप्रतियोगी न वेति संशयस्वभावत्वात् स्वनिष्ठविषयतायाश्च बाधप्रतिबध्यतावच्छेदकत्वं निवेशनीयत्वेन वह्निव्याप्यसाध्यकस्थले वह्निमान्न वा पक्ष इत्येतादृशसंशयस्य व्युदासः तत्र वह्निव्याप्याभावाभावत्वेन व्याप्यस्य पृथग्भानेऽपि(२) संशयत्वघटकीभूतत्वनिष्ठवह्निमत्पक्षविषयिताया वह्निव्याप्याभावनिश्चयप्रतिबध्यतावच्छेदकत्वविरहात्। एवञ्च शुद्धवह्निव्याप्यसाध्यकस्थले वह्न्यभाववान् पक्ष इत्येतादृशबाधनिश्चयप्रतिबध्यस्य महानसीयवह्निमान्वा पक्ष इत्येतादृशसंशयस्य पक्षतात्ववार-

---

(१) महानसीयवह्न्यभावाभाववान् पर्व्वतो वह्निमान्नवेति कचित् पाठ बाधनिश्चयप्रतिबध्यत्वप्रयोजकधर्म्मावच्छिन्नत्वेन महानसीयेत्यादिकं पक्षविशेषणं बोध्यम्।

(२) वह्निव्याप्याभावाभाववान् पक्ष वह्निमान् वा पक्ष इति संशयस्वरूपेऽपीत्यभाव।

णायसाध्यवत्तानिश्चय प्रतिबध्यतावच्छेदकावच्छिन्नत्वनिवेशन (१) मित्यवधेय, (२) एतेनावच्छेदकावच्छेदेनानुमितौपक्षतावच्छेदक-सामानाधिकरण्यमात्रेण कोटिद्वयावगाहिनोनियतस्यावच्छेदका वच्छेदेनसाध्यादिमत्तानिश्चयप्रतिबध्यत्वेपि निरुक्तसंशयत्वाभावेन न पक्षतात्वमितिसंक्षेप (३)। अयावच्छेदकावच्छेदेनकोटिद्वयावगाह-मानस्य कोटिद्वयावगाहिन समुच्चयस्य पक्षतात्वापत्ति तस्याप्युक्त रूपाक्रान्तत्वात्। न च विरोधावगाहित्वनिवेशेऽव्याप्तिरुक्तसंशय कुत्रचित् किञ्चित् प्रतियोगिकविरोधभानस्य समुच्चयेऽप्यक्षतत्वात् साध्यतदभावादिविरोधावगाहित्वस्य प्रत्येक सकलसंशयसाधारण्या सम्भवादिति चेन्न संयोगादेरव्याप्यवृत्तित्वज्ञानदशायान्तद्वत्वयच्च

---

(१) न च साध्य प्रतिबध्यतायां साध्यवत्तानिश्चयस्य व्यापक प्रतिबन्धकता निरूपितत्व साधनाभिप्रेत्य वह्निसाध्यकस्थले अङ्गारशीतवह्निज्ञानेति अयमस्य पक्षतात्व वारयितु शक्यते किमर्थं साध्य प्रतिबन्धकतानिरूपित प्रतिबध्यता-वच्छेदकावच्छिन्नस्य निवेशित इति वाच्य वह्नि पर्वतवृत्तित्वेति अयमस्य पक्षता त्वानुपपत्तेरेव पर्वतवृत्तित्वावच्छिन्नाभावावगाहित्वावच्छिन्न प्रतिबध्यताया बाध प्रतिबन्धकतावच्छेदकीभूतपर्वतवृत्तित्वावगाहित्वावच्छिन्न प्रतिबन्धकतानिरूपिताया साध्यवत्तानिश्चयप्रतिबन्धकतानिरूपितत्वाभावादिति।

(२) यावच्छेदकावच्छेदेन वह्निसाध्यकस्थले पर्वतत्व सामानाधिकरण्येन साध्या भावसंशयानस्य अङ्गारशीतवह्निकोटि सामानाधिकरण्येनावगाहमानस्य वह्न्यभाववान् पर्वत पर्वतो अङ्गारशीतवह्निमान्वा इत्याकारकसमूहालम्बनात्मक संशयस्य पक्षतात्व वारणाय यथाश्रुत साध्यनिश्चय प्रतिबध्यत्वमपहृत्य प्रतिबध्यता-वच्छेदकावच्छिन्नत्व निवेश्यमिति बोध्यम।

(३) तथाच सामानाधिकरण्येन कोटिद्वयावगाहिनिश्चयो य विषयतायाः [illegible] भाव।

विषयीभूतधर्म्मिणि तद्भावादिग्रहोत्पत्त्यातद्वत्ताग्रहस्य तदभावग्रहप्रतिबन्धकतायामव्याप्यवृत्तित्वज्ञानस्योत्तेजकतामपेक्ष्यव्याप्यवृत्तितावगाहित्वेनैव, प्रतिबन्धकतोपेयते । व्याप्यवृत्तित्वज्ञानवच्छिन्नाधारताकत्वं सर्व्वत्रप्रतिबन्धकज्ञाने तादृग्राधारतायाश्चन्तः संसर्गतयैव भानमुपेयते एवञ्च समुच्चयनिष्ठकोटिविषयिता न विपरीतधी प्रतिबन्धकतावच्छेदिका, व्याप्यवृत्तित्वविषयित्वानिरूपितत्वात् अत उक्तसंशयत्वनिरुक्तौ स्वपदेन समुच्चयोपादानासम्भवेन तस्य पक्षतात्वापत्तिविरहात् । अथवा स्वघटितधर्म्मावच्छिन्नप्रतिबन्धकतानिरूपित प्रतिबध्यतावच्छेदकीभूतायास्वावच्छेदकधर्म्मावच्छिन्ननिरूपितविरोधविषयितानिरूपिताप्रकारिता सामानाधिकरण्यसम्बन्धेन तद्विशिष्टप्रकारितैव संशयत्वं सच (१) समुच्चयव्याप्तं समुच्चये विरोधाभानेन कोटिद्वयविषयि-

---

(१) एवम्विध संशयत्वनिर्व्वचनपक्षेऽपि निरुक्तप्रतिबध्यतावच्छेदकीभूतायां प्रकारितायां साध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकत्वं निवेश्यं अन्यथा वह्निवह्नित्वावच्छिन्न साध्यकस्थले महानसीयवह्निमादवेत्यस्य पक्षतापत्तेः । एवं साध्यनिश्चयप्रतिबध्यतावच्छेदकत्वेन स्वघटितेत्यस्य स्वं विशेषणीयं, अन्यथा वह्निव्याप्यसाध्यकस्थले वह्निमाद्रवेत्यस्य पक्षतापत्तेः । नचैवं सति स्वघटितेत्यादि भूतार्न्तं व्यर्थं स्वनिरूपकतावच्छेदकेत्यस्य स्वं साधप्रतिबध्यतावच्छेदकत्वेन विशेष्यतां निरुक्तविरोधविषयतानिरूपितप्रकारितैव साध्यवत्तानिश्चयप्रतिबध्यतावच्छेदकतोपादीयतामिति वाच्यं, तथासति व्यवच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकसामानाधिकरण्येन कोटिद्वयवगाहिज्ञानस्य पर्व्वतो वह्निमानवह्निर्विरुद्धवह्नभावश्चेति समूहालम्बनस्य व्यवच्छेदकावच्छेदेन साध्यनिश्चयबाधनिश्चयप्रतिबध्यस्य पक्षतापत्तेः । भूताद्योपादाने च पर्व्वतत्वसामानाधिकरण्येन वह्नभावावगाहिताया: सामानाधिकरण्येन वह्नयवगाहितायाघटितधर्म्मावच्छिन्नप्रतिबन्ध-

लयोर्विरोधविषयित्वानिरूपितत्वात् भंगये चान्तत: कोटी: सप्तर्भलयापि परस्परविरोधभानोपगमेन सकलसंशयसंग्रह. । यदंशे संशयस्य तत्कोटिविरोधस्यैव उल्लेखेन उपादानसम्भवात् नवस्व-रूपविरोधभानमादायातिप्रसङ्ग:। केचित्तु साध्यनिश्चयसाध्याभाव-निश्चयप्रतिबध्यतावच्छेदकविशेष्यतालाभालिख समुदितार्थ: संशये

कतानिरूपितप्रतिबध्यतावच्छेदकता भावात् नतादृशापत्ति स्वरूपेण कोटिद्वयमवगाह्यमानिक्य संशयस्य पक्षतावारणाय स्वनिरूपकतावच्छेदकेत्यादि निरूपितान्वयमित्यादिक पूर्वोक्तादिदमेव बोध्यम। एवञ्च साध्यनिश्चयप्रतिबध्यता-वच्छेदकीभूत स्वघटितधर्मावच्छिन्नप्रतिबन्धकतानिरूपित प्रतिबध्यतावच्छेदिका यती साध्यवत्तानिश्चयतावच्छिन्नप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकीभूता या स्वनिरूपकतावच्छेदकधर्मावच्छिन्ननिरूपितविरोधविषयता निरूपितप्रकारिता-शालिज्ञानाधिकरणत्वसम्बन्धेन लक्षियत्वम। अयञ्च पर्वतो महानसीयवह्न्यभावत्वानित्यादौ पर्वतो महानसीयवह्निमान् वह्निसामान्याभाव-वान् वेति संशयस्य पक्षतापत्तिनिरासाय प्रतिबध्यता-वच्छेदकीभूत स्वनिरवह्निसामान्याभावतावच्छिन्न विषयतानिरूपितधर्मावच्छिन्न-प्रतिबन्धकतानिरूपित प्रतिबध्यतायां महानसीयवह्न्यभावत्वरूपसाध्यतावच्छे-दकावच्छिन्न प्रकारतायालिनिश्चयत्वव्यापक प्रतिबन्धकतानिरूपित प्रतिबध्यतावच्छे-दकीभूत महानसीयवह्निसामान्यावच्छिन्न प्रकारतायालिङ्गानित्यावच्छिन्नत्वाभावादिति चेन्न तादृश प्रतिबध्यतावच्छेदकावच्छेदेनैव तादृश प्रतिबध्यतावच्छेदकतासम्ब-न्धेनैव लक्षणार्थोपपत्ते: अन्यथा पर्वतो महानसीयवह्निमान् वह्निसामान्याभाववान् वा इति संशयस्य पक्षतापत्तिनिरासाय प्रतिबध्यतावच्छेदकावच्छिन्न प्रतिबध्यतायां प्रतिबध्यतावैयधिकरण्यं निवेश्य वैयधिकरण्यस्य स्वावच्छेदकतासम्बन्धावच्छेदकतात्व स्वसमानाधिकरणत्वसम्बन्धेन पर्वतो महानसीयवह्निमानिति ज्ञानस्यैव महानसीयवह्निमानिति ज्ञानविशेष प्रतिबध्यतासमानाधिकरणत्वेनैवोल्लेखात्तादृशातिप्रसङ्ग इति।

च धर्म्मिणि उभयप्रकारतानिरूपितैकविलक्षणविषयता, समुच्चय-वैलक्षण्यायोपगम्यते इति तादृशविषयतायां, विभिन्नरूपेण उभय-निश्चयप्रतिबध्यतावच्छेदकतयानासम्भव इत्याहुः । (१) तच्चिन्त्यं, प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतद्भावकोटिकज्ञान-त्वादिकमुपेक्ष्यनिरुक्तरूपेण संशयनिवेशस्य प्रयोजनं दर्शयति तेनेति । न पक्षेति । पक्षविशेष्यकस्य, पक्षः साध्यवानवेत्यस्य, साध्य विशेष्यकस्य, साध्यं पक्षवृत्तिनवेत्याकारकस्य, संशयस्य, नानुगमः तथा सति फलस्याविलक्षणतया व्यभिचारेण कारणताभज्येतेति भावः । इदमुपलक्षणं साध्यवत्तद्भेदकोटिकसंशयानुगमोपि बोध्यः । विशिष्यसम्बन्धनिवेशनप्रयोजनं दर्शयति नवेति । सम्ब-न्धान्तरेण तत्सम्बन्धातिरिक्तसम्बन्धेन, सन्देहे सन्देहदशायां, निर्णीतसम्बन्धेन पक्षांशे साध्यीयसम्बन्धविषया तत्कालीननिर्णय-विषयीभूत तत्सम्बन्धेन, एतदनन्तरमनुमितावित्ति पूरणीयं, तत्-सम्बन्धेन संशयासत्वेपि तत्सम्बन्धेन सिद्धिशून्यकाले इष्टापत्ति-सम्भवादिणीतित्युक्तं, सम्बन्धमनिवेश्यसाध्यनिर्णयसामान्यनिवर्त्यत्व-निवेशेऽप्रसिद्धिप्रसङ्गात् यत्किञ्चिद्विशेष्यनिवर्त्यत्वं यत्किञ्चित् संसर्ग-कनिर्णयसामान्यनिवर्त्यत्वं वा यदि निवेश्यते तदायमतिप्रसङ्गो बोध्यः । धर्म्मलांगपरित्यागप्रयोजनमाह न वा तमः प्रभृतिष्विति ।

---

(१) चिन्तायोजन्तु शोषपर्यंतो वह्निमान् पर्व्वतत्वावच्छेदेन पर्व्वतोवह्नि-भावगान् वा इति ज्ञानस्य पक्षानवीयवह्निमान् वह्निसामान्याभावगान् वा पर्व्वत इति संशयसमयोरस्य संशयत्वमुचित तदनुपपत्तिस्तत्र विशेष्यतावच्छेदकभेदेन विशेष्यता वा भेदादिति ।

तत्त्वचिन्तामणिः ।

सन्देहो हि न विशेषणं, परामर्शपूर्वं लिङ्गदर्शनव्याप्ति-स्मरणादिना तस्य नाशात् । नोपलक्षणम् अव्यावर्तक-

---

स्वधर्मत्वसंशयविषयसाध्यकत्वं पक्षत्वमित्युक्तौ धर्मत्वनिवेशेऽपवृत्ति साध्यकघटादिपक्षकस्थले, न पक्षतावैकल्यं, घटादिसमवेतत्वस्य प्रसिद्धया गगनादौ तत्संशयसम्भवादिति तमः प्रभृतिपर्य्यन्तस्य पक्षत्वानुसरणं, तथाच, साध्ये सम्बन्धान्तरेण पक्षवृत्तित्वसन्देह-दशाया निर्णीतसम्बन्धेनानुमिति वारणायप्रकृतसाध्यतावच्छेदक-सम्बन्धेन स्ववृत्तित्वसंशयस्यावश्यं निवेशनीयतया, तम.प्रभृतिसम-वेतत्वस्याप्रसिद्धयासाध्ये पक्षवृत्तित्वसंशयमादायापि, न तत्र पक्षतो-पपत्तिरिति भावः । स्वरूपसम्बन्धेन तमोवृत्तित्वस्य प्रसिद्धयातेन सम्बन्धेनानुमितौ नानुपपत्तिरतः समवायेनेति । पक्षे साध्यीय-साध्यतावच्छेदकसम्बन्धावच्छिन्नधर्मितासंशयस्य पक्षतात्वे, तमः प्रभृतिपु वृत्तिमत् साध्यसाधने नानुपपत्तिरत आकाशादीति । तदैकल्यं, पक्षतावैकल्यम् ।

सन्देहोऽनुमितौ हेतुः, विशेषणतया, पक्षधर्मताज्ञाननिष्ठा-नुमितिजनकतायामवच्छेदको वा । अथवा उपलक्षणतया-लाघवजनकतायामवच्छेदक स्तत्वादं पक्षद्वयं दूषयति मूले सन्देह इति, विशेषणं अपेक्षणीयानुमित्यव्यवहितप्राक्क्षणाव-सत् अनुमितिकारणं विशेषणविधयाकारणतावच्छेदकं वेति यावत् । परामर्शपूर्वं तस्य संशयस्य नाशादित्यन्वयः । यत्वादौ लिङ्गदर्शन तनो व्याप्तिस्मरणं तदभिप्रायेण लिङ्गदर्शनस्य, यत्न

तापत्तेः । नापि साधकबाधकप्रमाणाभावः, उभयाभावस्य प्रत्येकसत्त्वेऽपि सत्त्वात् नापि अभावद्वयं तया, बाधकप्रमाणाभावस्य व्यर्थत्वात्, ऋदादेः पक्षत्वेऽपि बाधहेत्वसिद्ध्यादेरावश्यकत्वेन अनुमित्यनुत्पादात् । नापि साधकप्रमाणाभावः श्रोतव्यो मन्तव्य इति श्रुत्या समानविषयकश्रवणानन्तरं मननबोधनात् । प्रत्यक्षदृष्टेऽप्यनुमानदर्शनात् । एकलिङ्गावगतेऽपि लिङ्गान्तरेण तदनुमानाच्च मन्तव्यश्चोपपत्तिभिरिति स्मरणात् ।

तत्त्वचिन्तामणिदीधितिः ।

संशययोग्यतां निरस्यति नापीति । साधकबाधकमाने सिद्धिबाधौ । केवलान्वयिनि च पक्षनिष्ठाभावप्रतियोगित्वधीरेव सुलभो बाधः ।

तयोर्विपरीतक्रमस्तादभिप्रायेण व्याप्तिस्मरणस्य नागकत्वमभिहितं, अत एकत्र उभयोर्नागकत्वासम्भवेऽपि न क्षतिः । आदिपदेन यत्र संशयानन्तरपक्षे व्याप्तिस्मरणायनुगुणज्ञानोत्पादस्तदनन्तरमेव व्याप्तिस्मरणादिः तत्त्यताद्दगज्ञानसंग्रहः । द्वितीयं दूषयति नोपलक्षणमिति । अव्याप्तिकतापत्तेः सिद्धिस्थलेऽनुमित्यवारकतापत्तेः । तत्कालीनपरामर्शस्याप्यि कालान्तरीयसंशयविषयधर्मिनिष्ठत्वावगाहितया तावता पक्षत्वादिति भावः । अथ साध्यसन्देहो-

नुमितौ हेतुरेव लिङ्गदर्शनादौ पूर्व्वोत्पन्नस्य संशयस्य तेन विनाशेऽपि तदनन्तर परामर्शाव्यवहितप्राक्क्षणजातसंशयान्त रादेवानुमितिरिति कल्पते न चानुत्पन्न एव संशये यत्न सामग्रीबलात् परामर्शोत्पत्तिस्तत्रानुमित्यनुदयप्रसङ्ग परा मर्शकाले तदुत्तरञ्च विशेषदर्शनरूपप्रतिबन्धकवशेन संशयोत्पादा सम्भवादिति वाच्य फलानुरोधेन सर्व्वत्रैवानुमित्युपधायकपरा-मर्शाव्यवहितप्राक्क्षणे संशयोत्पादकल्पनात्। यत्र संशयोत्पादहिती यक्षण एव परामर्शसामग्रीप्रमाणसिद्धा यत्र वा परामर्शसामग्री पूर्व्वक्षणे संशयजनकधर्म्मिज्ञानाद्यभाव प्रामाणिकस्तत्र परामर्शा नन्तरं साध्यस्य प्रत्यक्षनिश्चय एव उपगम्यते तत एव प्रत्याद्युप पत्ते तत्रानुमितीमीत्यनुव्यवसायस्याप्यगत्याभ्रमत्वमेव कल्पते अनुगतानुगतसिषाधयिषाभावकूटविशिष्टसिद्धभावस्यानुमिति-हेतुत्वापेक्षया संशयहेतुतायां लाघवात्। संशयहेतुत्वोपगमे, बाध निश्चयदशाया संशयाभावादेवानुमितिवारणसम्भवात् नाना विधबाधाभावस्यानुमितिहेतुत्वाकल्पनेनानुमितिसामग्रीप्रविष्टत्व कतायां तदनिवेशेन च लाघवात्। जनकज्ञानविरोधित्वेव च बाधादीना हेत्वाभासतोपपत्ते। संशयस्य च कार्य्यतावच्छेदककोटौ कारणवैशिष्ट्यं निवेश्य तादृशसंशयत्वेनैव हेतुतावाच्या, अतो दीधितिकारोक्तप्रकारस्य स्वत्वघटिततया, स्वत्वाननुगमेन, प्रति बध्यतादीना स्वस्वावच्छेदकभेदेन भिन्नानामननुगमेन च शब्दानु शमप्रमात्रप्रयोज्यत्वमानेऽपि न क्षति। संशयस्य, बाधसाधारणतद्भाव वत्ताज्ञानत्वेन कारणत्व न तु पक्षधर्म्मिकसाध्यतद्भावोभयज्ञान

स्वरूपसंशयत्वेन, गौरवात् । बाधनिश्चयदशायाञ्च नानुमित्यापत्ति-सम्भवः । प्रत्यक्षादिसाधारणलौकिकविशिष्टबुद्धित्वावच्छिन्नं प्रति बाधनिश्चयस्य प्रतिबन्धकतायाः आवश्यकत्वादिति तु न श्रद्धेयं बाधनिश्चयेऽप्रामाण्यग्रहसत्वेऽनुमित्यापत्तेः, अप्रामाण्यग्रहाभावस्य संशयजनकतायां प्रयोजनविरहेणानिवेशात्, साध्यसन्देहे अप्रामाण्यग्रहसत्वेऽप्यनुमित्युपगमे क्षतिविरहात्; संशयेऽप्रामाण्यनिश्चयेऽनुमित्यनुत्पादेऽपि संशये विषयसंशयस्याकिञ्चित्करत्वात्; तत्राप्रामाण्यनिश्चयत्वावच्छिन्नाभावस्यैव निवेशनीयतया अप्रामाण्यग्रहाक्रन्दितबाधनिश्चयादनुमित्यापत्तेर्दुर्वारतापत्तेरिति चेन्न, प्रत्यक्षादिना निर्णीतस्यापि साध्यस्यानुमित्सया अनुमितेरानुभविकत्वात् संशयस्य पक्षतात्वे तदनुपपत्तेरनुभवापलापे विशेषदर्शनमूलकप्रत्यक्षादेव सर्व्वत्रप्रत्यक्षादिसम्भवे अनुमानप्रामाण्यस्यैव विलयापत्तेः (१) संशयानन्तरजातसिद्धयात्मकपरामर्शादनुमित्यापत्तेय इति संक्षेपः । संशयनाशेऽपि यावन्निर्णयस्तावत्पर्य्यन्तं संशययोग्यतायाः अनपायात् तस्या एव पक्षतात्वं सम्भवतीति तन्निराकरणे मूलस्य न्यूनता, अतो नापीति मूलमेव संशययोग्यतानिराकरणपरतया व्याचष्टे संशययोग्यतामिति, साधकबाधकमानपदस्य सिद्धिबाधहेतुरूपयथाश्रुतार्थपरत्वे सर्व्वदैवानुमित्यनुपपत्तिः पक्षानुमितिपूर्व्वं सिद्धिबाधहेतुचक्षुरादेः सिद्धिहेतुपरामर्शस्य च सर्व्वदैव सत्वात् अतः तत्पदं सिद्धिबाधपरतया व्याचष्टे साधकेति। यद्यपि बाधकमानपदस्य बाधजनकतत्सामग्रीपरत्वेऽपि

---

(१) एवमप्रसिद्धसाध्यकस्थले सदबाधज्ञानादनुमित्यनुपपत्तेरिति पाठान्तरम् ।

तत्त्वचिन्तामणिः ।

अथ सिषाधयिषितसाध्यधर्माधर्मी पक्षः। तथाहि मुमुक्षो शब्दादात्मावगमेऽपि मननस्य मोक्षोपायत्वेन सिद्धि-विशेषानुमितीच्छया आत्मानुमानम् अतएव प्रत्यक्ष-परिकलितमपि अर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः। नहि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातार इति वाचस्पतिवचनयोरविरोधः अनुमित्सातद्विरहाभ्यां

न चेति. बाधसामग्र्यनन्तरक्षणे कदाप्यनुमितेरनुत्पादात्। तथापि बाधजनकत्वमात्रेण तत्सामग्र्यौपरत्वे तदवच्छिन्नाभावस्य हेतुता लभ्येत तत्र चोक्तैवानुपपत्तिः बाधसामग्र्यौत्वेन तत्परत्वञ्च विना लक्षणा न निर्व्वहति लक्षणाया आवश्यकत्वे बाध एव लक्षणो चिता इत्यभिप्रायेण इदम्।

ननु पक्षे साध्याभावनिश्चयस्य बाधतया केवलान्वयिनिसाध्या-भावाप्रसिद्धया बाधाप्रसिद्धितदभावघटितपक्षतावैकल्यम्, अत-आह केवलान्वयिनि चेति। पक्षनिष्ठेति, साध्य इत्यादिः, धीनिर्णय, सुलभो बाध इति। तथाच तादृशबाधाभावस्यैव पक्षताघटकत्वान्नानुपपत्तिरिति भावः। सुलभ इत्यनेन तत्ता भावाङ्गे साध्यीयत्वभ्रमात्मकबाधस्यापि, कदाचित् कस्यचित् पुरुषस्य प्रसिद्धया तदभावघटितत्वमपि पक्षतायाः सम्भवतीति सूचितम्।

तदुपपत्तेरिति चेन्न, सन्देहवत्यरामर्शपूर्वं सिषाधयिषाया अपि अभावात् योग्यतायाश्च अनिरूपणात्, सिषाधयिषाविरहेऽपि घनगर्जितेन मेघानुमानात्; स्वकारणाधीनतृतीयलिङ्गपरामर्शबलेन अनपेक्षितानुमानदर्शनाच्चेति। उच्यते सिषाधयिषाविरहसहकृतसाधकप्रमाणाभावो यत्रास्ति स पक्षः। तेन सिषाधयिषाविरहसहकृतं साधकप्रमाणं यत्रास्ति स न पक्षः। यत्र साधकप्रमाणे सति असति वा सिषाधयिषा, यत्र वा उभयाभावस्तत्र विशिष्टाभावात् पक्षत्वम्। यद्यपि पक्षत्वस्य केवलान्वयित्वात् नास्य भेदकत्वं, तथापि पक्षपदप्रवृत्तिनिमित्तमुक्तम्।

इति श्रीमन्महामहोपाध्याय श्रीगङ्गेशोपाध्याय विरचिता पक्षता समाप्ता।

तत्त्वचिन्तामणिदीधितिः।

ननु तत्रापि पुनरनुमित्सा, ततः परामर्शान्तरं, स्मरणात्मकाद्वा परामर्शादनुमितीष्टसाधनताविषयकादनुमित्सा, ततोऽनुमितिरिति फलबलात् कल्पनीयमित्यत आह सिषाधयिषेति। न च अनुमितिजनिकैवेच्छा

पत्तता । सा च क्वचित् स्वनिष्ठैव सर्वत्र ईश्वरनिष्ठैव सुलभेति वाच्यम् ? तस्यानित्यत्वेन सिद्धौ सत्यामपि पत्ततापसङ्गात् । न च तस्यास्तदानीं, न तज्ज्ञानकत्वं तद्धि, न तद्योग्यता, अनपायात् । न च तदुपधानम् अनुमितेः पूर्वं तदभावात् । न च तत्सामग्रीसमवधानम् । कारणमात्रस्य पक्षताकुक्षिनिक्षेपप्रसङ्गात्क्षेपवैयर्थ्यात् । तदानीं, सामग्रीविरहप्रयोजकव्यतिरेकप्रतियोगिनः कारणस्य वक्तव्यत्वापाताच्च ।

व्याप्तिस्मरणादिना पूर्व्वानुमित्यानाशस्यैऽनुमितिमुपपाद्य, सिषाधयिषाविरहेत्यादिग्रन्थमवतारयति नन्विति । तत्रापि, परामर्शपूर्व्वमनुमित्यानाशस्यैऽपि, पुनरनुमित्सा, परामर्शानन्तरमनुमित्सान्तरम् । ननु परामर्शानन्तरोत्पन्नेन इच्छाजनकज्ञानेन इच्छाजननसमकालं परामर्शस्य विनाशात्तादृशेच्छातः कथमनुमितिरित्यत आह ततः परामर्शान्तरमिति । विनश्यदवस्थानुमित्सयाऽनुमितिमुपपाद्याविनश्यदवस्थयाप्युपपादयति स्मरणात्मकाहेति । चानुपाद्यिपरामर्शस्यानुमित्यंशे इष्टसाधनताप्रकारकसमूहालम्बनत्वं नोपपद्यते स्वायोग्यमुख्यविशेष्यकज्ञाने बहिरिन्द्रियस्यासामर्थ्यादतस्तस्य तथात्वमुपेत्य, तन्मूलकव्याप्यवत्पक्षगोचरसंस्कारात् पूर्व्वानुमित्याजनकेष्टसाधनताज्ञानाहितसंस्कारसहकृतात्समूहालम्बनस्मरणात्मकपरामर्शान्तरस्यानुसरणं, स्मरणे-

त्युपलक्षणं, तथाविधमानसपरामर्शोऽपि बोध्यः । ननु कल्पका-
भावादैतादृशकल्पनासम्भव इत्याशङ्कां परिहरति, फलबला-
दिति । सिषाधयिषारूपकारणं विना अनुमित्यात्मककार्य्यानुप-
पत्तिबलादित्यर्थः । सिषाधयिषा विरहेऽपीति मूलस्यानुमानुरि-
त्यादिः, तेन ईश्वरस्य सिषाधयिषायास्तत्रावचनेऽपि न क्षतिः ।
इच्छारूपपक्षतायां आत्मनिष्ठप्रत्यासत्त्यैव हेतुता इत्यभिप्राये-
णेदम् । न च तत्रापि पूर्ववत्फलबलादनुमित्सां कल्पयित्वा
अनुमितिः शक्योपपत्तिका तत्र तदभावस्यानुभवसिद्धतया
कल्पनासम्भवात्, पूर्वं कदापि यस्य मेवानुमितिर्नासीत् तेन
तत्रेष्टसाधनतायाः अगृहीतत्वेन तद्गोचरस्मरणस्य तदनुभावकस्य
तदानीमभावेन तद्गोचरानुभवस्य चासम्भवेन तदनुमित्सासामग्रा
एव दुर्घटत्वाच्च, विषयनिष्ठप्रत्यासत्त्यैवानुमित्साया हेतुता वाच्या
इत्यभिप्रायेण उक्तस्थले पक्षतोपपत्तिं दीधितिकृदाशङ्कते न चानु-
मितौति । इच्छैव, समानाधिकरणव्यधिकरणसाधारणम् इच्छा-
मात्रमेव । स्वनिष्ठेवानुमाद्यसमवेतैव, तथा ईश्वरेच्छायाः ।
पक्षताप्रसङ्गादिति । तथाच सिद्धयनन्तरमनुमित्यापत्तिरित्यर्थः ।
तदानीं, सिद्धिदशायां, न तज्जनकत्वमिति । तथाचानुमिति
जनकत्वविशिष्टेच्छात्वेनैव हेतुता, कारणतावच्छेदकविशिष्टस्य
प्राक्त्वमेव फलोपधाने तन्त्वमिति नातिप्रसङ्ग इति भावः ।
जनकत्वेन जनकत्वे घातायसत्त्वेऽपि स्फुटत्वात्तमुपेक्ष्यदूषणान्तर-
माह तद्धीति । योग्यता, स्वरूपयोग्यता, घनपायादिति, कारण-
तावच्छेदकधर्मस्वरूपयोग्यतायाः सर्वदैव सत्त्वादित्यर्थः । तदुपधानं

तद्वैशिष्ट्यं, तदभावादनुमिति वैशिष्ट्याभावात्। तथाचानुमित्युत्पादनियामिकाया अनुमितिविशिष्टेच्छायाः प्रागसत्त्वादनुमितेरेवानुपपत्तिः। दृष्टमुपलक्षणम्। अनुमित्यन्तरमनुमित्यापत्तिरपि द्रष्टव्या।

नन्वनुमितिजनकतावच्छेदका यावन्तो धर्म्माः प्रत्येकं तद्वच्छिन्नकूटविशिष्टत्वरूपतत्सामग्रीसमवधानमेव इच्छाविशेषणं देयं तच्च कार्य्याव्यवहितप्राक्क्षण एव इति नातिप्रसङ्ग इति शङ्कां परिहरति, न तत्सामग्रीति। कारणमात्रस्येति। तथाच परामर्शाद्यसत्त्वदशायामीदृशपक्षताविरहादेवानुमितिवारणसम्भवात् परामर्शादीनां हेतुतावच्छेदनयप्रसङ्ग इति भावः। ननु सामग्रीसमवहितेच्छात्वेन न पक्षताया हेतुत्वमुपेयते सामग्रीघटकहेतूनां विशेष्यविशेषणभावे विनिगमनाविरहात् तेषां स्वतन्त्रकारणतयैषातिप्रसङ्गस्य वारितत्वात् किन्तु ईश्वरेच्छामादाय सिद्धिकाले पक्षताव्यवहारवारणाय पक्षपदप्रवृत्तिनिमित्तत्वमेव तादृप्येण उपेयते अतो नायं दोष इति दूषणान्तरमाह यैवेति। अनुमितिसामग्र्या एव पक्षतात्वसम्बन्धेन इच्छारूपविशेष्यभागनिवेशस्य निष्प्रयोजनकत्वादित्यर्थः। अनेष्टापत्तौ दूषणान्तरमाह तदानीमिति। तदानीं परामर्शादिसमवहितसिद्धिदशायाम्, अन्वयव्याप्य सामग्रीविरहेत्यनेन वक्तव्यतापातात्, सामग्रीमध्यनिवेशापातात्। तथाच तादृग्कारणं सिषाधयिषाविरहविशिष्टसिद्धभावएव। एवञ्च तस्यैव पक्षतात्वमस्तु अलङ्कारणान्तरस्य पक्षताकुक्षिनिवेशनेनेति सिद्धान्तलक्षण एव पर्य्यवसानमिति भावः।

तत्त्वचिन्तामणिदीधितिः ।

सिषाधयिषेति। यत्र अनुमित्सानन्तरं साध्यतद्व्याप्यवत्त्वविशिष्टपक्षस्मरणम्, अनुमितौष्टसाधनताविषयकतादृशस्मरणाद्वा अनुमित्सा, अनुमित्सापूर्व्वकालोत्पन्नविशेषणस्मरणात् वा अनुमित्साकालोत्पन्नेन्द्रियसन्निकर्षसहितात् साध्यतद्व्याप्यविशिष्टपक्षप्रत्यक्षं तदनन्तरं च अनुमितिस्तत्र पक्षतासम्पत्तये सहक्लृप्तान्तं साधकमानविशेषणम् ।

सिद्धान्तलक्षणे सिद्धुत्तरक्षणे सिषाधयिषाधीनानुमितिरूपपादनाय,सहक्लृप्तान्तविशेषणमुपात्तम्। तच्च तदैवोपपद्यते, यदि सिद्धिसिषाधयिषापरामर्शानां त्रयाणां अनुमित्यव्यवहितप्राक्क्षणेऽवस्थितिः सम्भवति, न चैवमुपपद्यते, आत्मसमवेतयोग्यविशेषगुणानां द्विक्षणस्थायितया त्रयाणां युगपदनवस्थानात्। न च यत्नापेक्षा बुद्ध्यात्मकपरामर्शस्य साध्यनिश्चयस्य वा प्रथममुत्पादस्तत्रैव तृतीयक्षणे त्रयाणामेवावस्थान सम्भवति इति वाच्यं अपेक्षाबुद्धेः, क्षणत्रयावस्थायित्वमङ्गीकुर्व्वाणे स्वव्यवहितोत्तरक्षणे तदधिकरणे विशेषगुणोत्पादानभ्युपगमात्। अन्यथा स्वसमानाधिकरण स्वानन्तरोत्पन्नविशेषगुणात्मकनाशकबलात् तस्या अपि तृतीयक्षणे विनाशापत्तेरित्याशङ्कां परिजिहीर्षया सिद्ध्यात्मकसमूहालम्बन-परामर्शस्थले तादृशविशेषणप्रयोजनं दर्शयति यत्रेत्यादिना । अनु-

मित्साव्यवहितोत्तरक्षणे विशिष्टपक्षप्रत्यक्षं न सम्भवति, इच्छोत्पत्ति-काले ज्ञानानुत्पत्त्याविशेषणज्ञानघटितसामग्रीविरहात्, इच्छा-पूर्व्वक्षणे लाङ्गसामग्रीसमवधाने इच्छासामग्र्यपेक्षयाप्रत्यक्ष-सामग्र्यावलवत्त्वेन तस्याएवोत्पादासम्भवइत्यतो विशिष्टस्मरणानु-धावनम्। न्यूनताभङ्गाय, परामर्शपूर्व्वोत्पन्नेच्छास्थले प्रयोजनमुक्त्वा तदनन्तरोत्पन्नेच्छास्थले तद्दर्शयति अनुमितीति। यत्नेत्यनुषज्यते। इच्छासामग्रीसम्पत्तयेऽनुमितीष्टसाधनताविषयकेति। लाङ्गस्मर-णात् साध्यतद्व्याप्यविशिष्टपक्षस्मरणात्। पूर्व्वोक्तयुक्त्या चानुमादि-परामर्शस्यानुमितावितिष्टसाधनतावगाहित्वासम्भवात्, यत्र परा-मर्शव्यवहितपूर्व्वक्षणे इष्टसाधनताज्ञानं, तत्र सत् पूर्व्वक्षणएव फलेच्छासम्भवेन तस्याः परामर्शोत्पत्तिसमये नाशात्। तदुत्तर-मनुमित्सायाः असम्भवेनेष्टसाधनताविषयकपरामर्शस्यावश्यकत्वात् स्मरणानुधावनम्। न्यूनतापरीहाराय प्रत्यक्षात्मकपरामर्शस्थले प्रयोजनमाहानुमित्सापूर्व्वेति। अत्रापि यत्नेत्यनुषज्यते। प्रत्यक्षा-त्मकधूमत्वादिविशेषणज्ञानस्थले तज्जनकसन्निकर्षादिसत्त्वोत्तर-क्षणे विशिष्टप्रत्यक्षमेव भविष्यति नत्विच्छा। विनष्टस्यसन्नि-कर्षादिविशेषणप्रत्यक्षानुधावने च प्रयासगौरवमतो विशेषण-स्मरणपर्य्यन्तानुधावनम्। अनुमित्सापूर्व्वकाले परामर्शजनक-सन्निकर्षसत्त्वे तस्या एव अनुपपत्तिरतोऽनुमित्साकालोत्पन्ने-न्द्रियसन्निकर्षसहितादिति। सङ्गतान्तं, सङ्गतान्तभागोप-स्थाप्यसिषाधयिषाविरहवैशिष्ट्यम्। तस्य अभावविशेषणत्वे, सिषा-धयिषादशायां तदभावविशिष्टस्य सिद्धभावस्यासम्भवात् सिद्धौ

तत्त्वचिन्तामणिदीधितिः ।

सिषाधयिषा च तत्साध्यविशिष्टतत्पक्षविषयत्व-
प्रकारिका अनुमितिविषयिणीच्छा यत्किञ्चिज्ज्ञानं
ज्ञानं जायतामितीच्छायामपि सिद्धिसत्त्वे अनुमित्य-
नुत्पादात् अनुमितित्वाप्रकारिकायामपि प्रत्यक्षाद्य-
तिरिक्तं पर्व्वते वह्निज्ञानं जायतामितीच्छायां प्रत्य-
क्षाद्यनन्तरमनुमित्युत्पादात् च यादृशयादृशेच्छासत्त्वे
सिद्धौ सत्यामनुमितिस्तत्तदिच्छाभावसमुदायस्य विशि-
षणत्वात् इच्छाया अननुगमेऽपि न क्षतिः ।

सत्यामसत्यां चानुमित्यनुपपत्तिरतः साधकमानविशेषणमिति । सिषाधयिषापदस्य सिद्धीच्छासामान्यपरत्वे प्रत्यक्षत्वादिप्रकारकेच्छाबलादसत्यां प्रत्यक्षादिसामग्र्यां सिद्धिदशायामनुमित्यापत्तिः अनुमितिगोचरेच्छापरत्वे यत्किञ्चिज्ज्ञानं जायतामितीच्छाबलात् सिद्धिकालेऽनुमित्यापत्तिः । नचानुमित्युत्पत्त्यापि तादृशेच्छाविषयसिद्धेस्तत्रानुमितिरिष्टैवेति वाच्यं, प्रक्षतानुमित्युत्पत्त्यैव यादृशेच्छाया विषयसिद्धिस्तादृशेच्छासत्त्वे एव सिद्धिकालेऽनुमितेरानुभविकत्वात् उक्तेच्छायाश्चान्तत उपस्थितपदार्थगोचरमानसज्ञानेनापि विषयसिद्धया अकिञ्चित्करत्वादित्यतः सिषाधयिषापदार्थं व्याचष्टे सिषाधयिषा चेति ।

घटविशिष्टपर्व्वतविषयकानुमितिर्जायतामित्येतादृशेच्छासत्त्वे

सिद्धिसत्त्वे वह्न्यनुमित्यनुत्पादात्तत्साध्यविशिष्टेति, तत्सम्बन्धेन तत्साध्यतावच्छेदकावच्छिन्नविशिष्टेत्यर्थः, तेन कालिकसम्बन्धेन वह्निविशिष्टपर्व्वतविषयकानुमितिर्जायतां द्रव्यत्वावच्छिन्नविशिष्ट-पर्व्वतविषयकानुमितिर्जायतामित्येतादृशेच्छासत्त्वेऽपि सिद्धिकाले संयोगादिना न वह्नित्वावच्छिन्नस्यानुमितिः। वह्निविशिष्टमहा-नसविषयकानुमितिर्जायतां वह्निविशिष्टद्रव्यत्वावच्छिन्नविषयकानु-मितिर्जायतामितीच्छाबलात् सिद्धिसत्त्वे पर्व्वतो वह्निमानित्यनु-मित्यनुत्पादात् तत्पदेति, तत्पदतावच्छेदकावच्छिन्नेत्यर्थः। नच यत्किञ्चिद्गोचरं ज्ञानं जायतामितीच्छाबलादिव आलोकवान् पर्व्वत इत्यादयनुमितिसामग्रीदशायां वह्निमत्पर्व्वतविषयकानु-मितिर्जायतामितीच्छाबलादपि सिद्धिसत्त्वे वह्निविधेयकानु-मितिर्न जायतेतत्कालीनसिद्धाप्रतिबध्यालोकाद्यनुमित्युत्पत्त्यैव तादृशेच्छाविषयवास्तववह्निमत्पर्व्वतविषयकानुमितिसिद्धेरित्युत्तरू-पेणापि इच्छाया उत्तेजकत्वं न सम्भवतीति वाच्यं, साध्यविशिष्ट-पक्षनिरूपितविलक्षणविषयिता-प्रकारकत्वेनैवेच्छाया उत्तेजकत्वो-पगमात्। आलोकवान् पर्व्वत इत्यादयनुमितेर्वह्निविशिष्टपक्ष-निरूपितविलक्षणविषयिताशून्यत्वेन तदुत्पत्त्या तादृशविषयिता-प्रकारकेच्छाविषयसिद्धासम्भवात्। साध्यविशिष्टपक्षनिरूपितत्व साध्यावच्छिन्नपक्षनिष्ठनिरूपकताकत्वमतो ह्रदोवह्निमानित्यादौ साध्यविशिष्टपक्षाप्रसिद्धावपि न तादृशविषयितायास्तत्प्रकारकानु-मितेरायाप्रसिद्धिः ह्रदादिनिष्ठस्य तादृशभ्रमवृत्तिविषयिता-निरूपकत्वस्यापि ह्रदादौ प्रकारीभूतपक्षतावच्छिन्नत्वात्।

वस्तुतस्तु तत्साध्यविशिष्टतत्पक्षविषयकत्वेत्यनेन तत्साध्यतावच्छेदकावच्छिन्नतत्संसर्गावच्छिन्नविधेयतानिरूपिततत्पक्षतावच्छेदकावच्छिन्नोद्देश्यताकत्वं विवक्षितं अतो वह्निमान् पर्वतो घटवानित्याद्यनुमितिसामग्रीदशायां पूर्वोक्तयुक्त्या वह्निमत्पर्वतविषयकानुमितिर्जायतामित्याकारकेच्छाबलात् पर्वतादिपक्षकवह्न्यादिविधेयकानुमित्यनुत्पादेऽपि न क्षतिः । तादृशोद्देश्यतात्वेन च तादृशोद्देश्यताकत्वप्रकारकत्वं विवक्षणीयं, तेन केवलपर्वतत्वाद्यवच्छिन्नोद्देश्यतात्वेन तादृशोद्देश्यताकत्वप्रकारकानुमित्यादृशायां पर्वते अन्यानुमितिसामग्रीसत्त्वे वह्नेः सिद्धिसत्त्वे न वह्न्यनुमित्यापत्तिः (१)। साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशप्रयोजनं दर्शयति यत्किञ्चिदिति। यत्किञ्चिद्विषयकत्वप्रकारकत्वं निवेश्यापि यत्किञ्चिज्ज्ञानं जायतामित्यादीच्छावारणं सम्भवतीति यत्किञ्चिन्नोचरत्वप्रकारकेच्छानुधावनम् । न चेच्छा पूर्वं यत्किञ्चिन्नोचरज्ञानस्यावश्यं सिद्धत्वात् तादृशेच्छैव न सम्भवति ज्ञानगोचरेच्छायां स्वरूपसत्त्वाः स्वविषयसिद्धेरेव विरोधित्वात् । तदुक्तं नहि ज्ञाने जाते ज्ञानेच्छाभवतीति वाच्यम् एतदुत्तरवर्त्ति यत्किञ्चिन्नीचरं ज्ञानं जायतामित्याद्याकारकेच्छाया

---

(१) एवं पक्षतावच्छेदकादिनिवेशनवच्छिन्नत्वावगाहित्वमविनिवेशनीयं अन्यथा जातिमान् वह्निव्याप्यवानिति परामर्शकाले पर्वतो वह्निमानिति सिद्धिसत्त्वेऽनवच्छिन्नत्वावगाहीच्छाकाले पर्वतो वह्निमानित्यनुमित्यापत्तिः, पर्वतो वह्निव्याप्यवानिति परामर्श-कालीनजातिमान् वह्निव्याप्यवानिति परामर्शोत्तरकालीनावच्छिन्नत्वानवगाहीच्छानाञ्च तत्तद्वह्नित्वेनोत्तेजकत्वं इति बोध्यमिति पाठः कचित् पुस्तके दृश्यते ।

विषयितत्वात् । नन्वनुमितित्वप्रकारकत्व निवेश्यैव तथाविधे च्छावारणसम्भवे किं गुरुतरसाध्यविशिष्टपक्षविषयकत्वप्रकारक-त्वनिवेशनेनेत्यत आह अनुमितित्वाप्रकारिकायामपीति । प्रत्यक्षा द्यात्मकसिद्धिदशाया पर्व्वते वह्निज्ञान आयतामित्याकारकेच्छा न सम्भवतीति तद्विषयीभूतप्रत्यक्षादिरूपसिद्धेरेव सत्वात्, अतः प्रत्यक्षाद्यतिरिक्तमिति । शाब्दादिरूपसिद्धौ सत्या प्रत्यक्षाद्यति रिक्तज्ञान जायतां इत्यादीच्छाया उत्पादासम्भवात् प्रत्यक्षाद्यनन्तर-मिति, प्रत्यक्षादिरूपसिद्धानन्तरमित्यर्थ । अनुमित्युत्पादाद्येति। तथाचानुमितित्वप्रकारकत्व निवेशयितुमशक्यमेव तादृशेच्छाना-मसत्यङ्गमसङ्गादितिभाव । इदमुपलक्षणम् । अनुमितित्वप्रकार-कत्वनिवेशेऽपि घटाद्यनुमितिर्जायतामित्यादीच्छाकाले सिद्धि-सत्त्वेवङ्गाद्यनुमितिवारणाय प्रकृतसाध्यादिविषयकत्वप्रकारकत्व-निवेशनमावश्यकम । न च प्रकृतसाध्यादिविषयिणी या अनुमिति-स्तद्विषयकत्वनिवेशेनापि दर्शितेच्छावारणसम्भव इति वाच्य, दर्शि तेच्छाया अपि घटाद्यनुमितित्वेन वह्न्यादिगोचरसम्मुहालम्बनानु-मिति विषयकत्वात्, न चानुमितित्वप्रकारकत्वानिवेशेऽपि अनु मितिरेव यत्र प्रत्यक्षत्वादिना इच्छाविषयस्तत्रानुमित्यापत्तिरिष्ट-त्वात् । अनुमितौ प्रत्यक्षत्वभ्रमदशायामेव तादृशेच्छाया उत्पादात् तथा अनुमितित्वप्रकारकेच्छासमर्थत्वादिति हृदयम् । नचानु मितित्वप्रकारकत्वस्यानिवेशे पर्व्वते वह्नौ प्रत्यक्षत सिद्धौ शाब्द-साभग्राच्च सत्या पर्व्वते प्रत्यक्षाद्यतिरिक्त वह्निज्ञान जायतामितीच्छासत्त्वेऽनुमित्यापत्तिरिति वाच्यम्, तत्र पक्षतासत्त्वेऽप्यनु-

मितित्व-प्रकारकेच्छाविरहविशिष्ट-समानविषयक-शाब्दसामग्रयाः प्रतिबन्धकत्वादेवानुमितिवारणसम्भवात् । अथ सिद्धिदशायां पर्व्वते वह्नरन्यज्ञान जायतामितीच्छासत्त्वेऽनुमित्यापत्तिस्तस्या अप्यनुमितिविषयकत्वात् । नचेष्टापत्तिः तदुत्तरं पर्व्वतो वह्निमान् इत्यादिमानसानुत्पत्त्यापीच्छाविषयसिद्धेस्तादृशेच्छाया यत्किञ्चिद्गोचरं ज्ञानं जायतामित्येतादृशेच्छातुल्यत्वात् । नच प्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीरूप -प्रतिबन्धकसत्त्वान्नापत्तिरिति-वाच्य, प्रत्यक्षत्वादिप्रकारकेच्छाविशिष्टाया एव मानसादि-सामग्र्या अनुमिति प्रतिबन्धकत्वात् । अन्यथा सिद्धिशून्यकालेऽपि तादृशेच्छासत्त्वेऽनुमित्यनुत्पादप्रसङ्गात् । नचोक्तयुक्त्या वह्नि-विधेयकत्वावगाहित्वनिवेशस्यावश्यकत्वात् वह्निप्रकारकत्वावगाहि-दर्शितेच्छाबलात् नानुमितिप्रसङ्ग. तद्विधेयकत्वावगाहीच्छा-दशायाश्च जायत एवानुमितिः विधेयतायाः प्रत्यक्षेऽप्रामा-णिकतया तत्प्रकारकेच्छाया अनुमित्युत्पत्त्यैव विषयसिद्धेरिति वाच्य, विधेयतायाः प्रत्यक्षव्याहत्तत्वे तत्प्रकारिकायाः प्रत्यक्षा-न्यत्वाप्रकारिकाया अपीच्छायाः प्रत्यक्षसिद्धिकाले सम्भवात्, प्रत्यक्षान्यत्वप्रकारकेच्छापर्य्यन्तानुसरणस्य निर्बीजत्वात् । न च विधेयताप्रत्यक्षव्याहत्तैव तदवगाहित्वसूचनायैवोपदर्शितेच्छाकारे प्रत्यक्षान्यत्वोल्लेख इति वाच्य, एवमपि वह्यमाणस्य शाब्द-सिद्धिकालेऽशाब्द ज्ञानं जायतामितीच्छाबलेनानुमितिर्जायते न तु प्रत्यक्षसामग्रीकाले इत्यस्य सङ्गमयितुमशक्यत्वात्, तादृशे-च्छायाः प्रत्यक्षव्याहत्तविधेयतावगाहित्वे प्रत्यक्षसामग्रीकाले-

ऽपि तद्ग्लादनुमित्युत्पत्त्यौचित्यात्। तदनवगाहित्वे सिद्धावप्युत्तेजकत्वात्। अत्रोच्यते। अनुमितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुमितिविषयकेच्छात्वेनैवानुगमः। पर्वते वह्नेरन्यज्ज्ञानं जायतामित्याद्याकारकेच्छाकाले सत्यां सिद्धौ तथाविधोपनीतभानसामग्र्याश्चानुमितिवारणाय तथाविधेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकता कल्प्यते इति न दोषः। नच तासां तत्तद्व्यक्तित्वेनानन्तप्रतिबन्धकताकल्पनापेक्षयानुमितित्वादि-रूपप्रकारविशेषमन्तर्भाव्यैवानुमितिसामान्यमुत्तेजकत्वमुचितमिति वाच्यम्, तथा सति पर्वते वह्नेरन्यज्ज्ञानं जायतामितीच्छाकाले तथाविधोपनीतभानविरोधिघटाद्यनुमितीच्छाविशिष्टतत्सामग्रीमत्त्वे सिद्धौ सत्यां वह्न्याद्यनुमित्युपपत्तये तादृशतादृशेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेन सिद्धावुत्तेजकत्वापत्त्या तदभावसहस्रस्य मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण सिद्धिप्रतिबन्धकतानन्त्यप्रसङ्गात्। ननु साध्यविधेयकत्वावच्छिन्नपक्षोद्देश्यकत्वप्रकारकेच्छाया उपादाने पक्षोद्देश्यकत्वावच्छिन्नसाध्यविधेयकत्वप्रकारकेच्छाया असंग्रहः, एवं विषयानुपरक्तानुमिति विषयिण्या अनुमितिर्जायतामितीच्छाया अपि निरुक्तरूपेणासंग्रहः, न च सा असंग्राह्यैव असिद्धसाध्यान्तरानुमितिसामग्र्यासत्यां तद्ग्लादपि सिद्धस्य प्रकृतसाध्यस्यानुमितेः तदिच्छाविषयसिद्धानुरोधेनावश्यकत्वादित्यत आह यादृशयादृशेति। असत्यां सिद्धौ यत्किञ्चिच्चिरं ज्ञानं जायतामित्यादीच्छासत्त्वेऽनुमित्युत्पादात् तासाध्वानुत्तेजकत्वात् सिद्धौ सत्यामिति। तत्-

दिच्छाभावसमुदायस्येति, साध्यविशेषविशिष्टपक्षविशेषाद्यवगाहि-
त्वप्रकारकेच्छाना तत्तदवगाहित्वप्रकारकानुमितिगोचरेच्छात्वेना-
नुगमय्य एकैकाभावा निवेश्यन्ते अतथाविधानाम् अनुमितिर्जायतां
प्रत्यक्षान्यज्ञानं जायतामित्याकारकेच्छानान्तु यद्यद्व्यक्तिसत्त्व
सिद्धिदशाया अनुमितिस्तत्तद्व्यक्तित्वावच्छिन्नाभावा एव नि-
वेशनीया: अन्यथा अतिप्रसङ्गात् सिद्धौ तत्कालीनसिद्धिभेदा एव वा ।
एतेन तत्कालीनसयोगविभागादिव्यक्तिविशेषाभावनिवेशमादाय-
विनिगमनाविरहोपि निरस्त: । सामानाधिकरण्यसम्बन्धेन तद-
त्यन्ताभाववैशिष्ट्यनिवेशापेक्षया तत्तत्सिद्धिभेदानां विशेषणता-
विशेषसम्बन्धेन वैशिष्ट्यनिवेशे प्रतियोगितावच्छेदकसम्बन्धानिवेशे
च लाघवम् । सिद्धुत्तर तथाविधेच्छोत्पत्तिकालेऽनुमित्यापत्तिस्तु
इच्छासामग्र्या अनुमितिविरोधित्वादेव न सम्भवतीति ध्येयम् ।
इदन्त्ववधेयम् । तादृशेच्छाभावसमुदायस्य न तत्समुदायत्वेन सिद्धौ
विशेषणत्व (१) किन्तु तत्तदभावत्वेनैव युगपत्तावदभावाना तथात्वं
तावदभावमात्रविषयकधीविषयत्वरूपस्य तावदभावसमुदायत्वस्य
तादृप्येण निवेशे तावदभावाना तत्तदभावत्वेन निवेशनीयतया
तत्तदभाववैशिष्ट्यनिवेशापेक्षया महागौरवात् ।

---

(१) तादृशेच्छाभावसमुदायत्वस्य दुर्ब्वचत्वात्, न च तावदभावमात्रविषयकधी
विषयत्वंतत्तावत्त्वस्य दुर्ब्वचत्वात्. तादृशभावविषयकत्वे तत्तदभावविषयकत्वेन
निवेशे तु तत्तदभावविशिष्टसिद्धेरेव निवेशयितुमुचितत्वात् तत्तदभावाना मिथो
विशेष्यविशेषणभावानापन्नानां निवेशे च प्रत्येकाभाववैशिष्ट्यस्यातिप्रसक्तत्वेनावच्छेद-
कत्वायोगादितिचेदेकविशिष्टापराभावत्वेनाभावाना निवेशनीयत्वात्। इति क्वाचित्
क पाठ ।

तादृश्या यत्किञ्चिद्विषयस्तत्तद्धर्मितया निवेशे तथाविधधीमहत्त्वस्य विनिगमनाविरहेण निवेशप्रसङ्गात्। यदि च मिथो विशेष्य-विशेषणभावानापन्नेषु नानाविशेषणेषु व्याप्यवृत्तिकमवच्छेदकं सिद्धान्तविरुद्धमितिमन्यते तदा एकाभावविशेषितापराभावस्यावच्छेदकत्वमुपेयम्। तत्र च विशेष्यविशेषणभावे विनिगमनाविरहेऽपि न क्षतिः गत्यन्तराभावात्। तत्तद्भावमात्रविषयकधीविषयत्वेन निवेशेऽपि भ्रानि तत्तद्भावविषयितानां एकविशिष्टापरत्वेनैव निवेशनीयतया विशेष्यविशेषणभावे विनिगमनाविरहस्यावश्यकत्वादिति। इच्छाया अननुगमेऽपि एकरूपेण सर्व्वासामिच्छानामुपादानासम्भवेऽपि न क्षतिः, न हि पाधियाविरहविशिष्टसिद्धभावस्यानुमितिहेतुत्वानुपपत्तिः। तावद्भावविशिष्टसिद्धभावस्यानुगतत्वादिति भावः।

इदं पुनरवावलोकनीयम्। वह्निविशिष्टपर्व्वतमहानसोभयानुमितिर्जायतामित्याकारकेच्छानामपि तत्साध्यविशिष्टतत्पक्षावगाहित्वप्रकारकतया पर्व्वते वह्नेः सिद्धिकाले महानसपक्षकानुमित्यादिसामग्रीसत्त्वात् तादृशेच्छाबलात् पर्व्वते वह्नानुमित्यापत्तिः, अनुमित्यंशे तत्साध्यविशिष्टतत्पक्षविषयकत्वान्यकिञ्चिद्विषयकत्वाप्रकारकत्वविशेषणस्य इच्छायां निवेशे वह्निविशिष्टपर्व्वतं महानसश्चानुमिनुयामित्यादिसमूहालम्बनेच्छाया असंग्रहप्रसङ्गः वह्निविशिष्टपर्व्वतविषयिणीमहानसादिविषयकानुमितिभिन्नानुमितिर्जायतामित्याकारकेच्छाबलात् उपदर्शितस्थलेऽतिप्रसङ्गस्यानिवारणात् चेतीच्छाविषयतावच्छेदकतायाः पर्य्याप्ति-

निवेशनमावश्यकम् । तथाच वह्निविशिष्टपर्व्वतानुमितिर्भवत्वि-
त्यादीच्छायास्तत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वपर्य्याप्तविष-
यतावच्छेदकताकेच्छात्वेनैव उत्तेजकत्व पर्य्यवसितम्, अनुमिति-
त्वानन्तर्भावे तादृशेच्छायास्तत्साध्यविशिष्टतत्पक्षविषयकत्वपरि-
समाप्त-विषयतावच्छेदकत्वाभावेनागत्यसंग्रहत्वात् । एवञ्चानु-
मितित्वप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानामनुमितिविषयकत्वरू-
पेण संग्रहाभिधानमसङ्गतम् । न च तत्तत्त्व परित्यज्यैव यादृश-
यादृश इत्याद्यभिधानम् इदानीमनुमितित्वप्रत्यक्षान्यज्ञानत्वादि-
प्रकारकेच्छानां पृथक्पृथगभावनिवेशनमेवाभिप्रेतमिति वाच्यं
पक्षान्तरसूचकवाकाराद्यभावात् । अथ अनुमितित्वप्रत्यक्षान्यज्ञान-
त्वादिप्रकारकेच्छानामनुगम एव सम्भवति, तथा हि तत्साध्यवि-
शिष्टतत्पक्षविषयकानुमितित्वपर्य्याप्तावच्छेदकताकत्वं तादृशधर्म्म-
घटकपरिसमाप्तावच्छेदकताकत्व तत्साध्यविशिष्टतत्पक्षविषयका-
नुमितित्वनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकविषयताक-
त्वमेव पर्य्यवसितम्, एवञ्च तत्साध्यविशिष्ट-तत्पक्षविषयकप्रत्यक्षा-
न्यज्ञानत्वादिनिष्ठावच्छेदकताभिन्नावच्छेदकत्वानिरूपकविषयता-
केच्छात्वादिना प्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छानां पृथगुत्तेजक-
त्वापेक्षया निरुक्तधर्म्मघटकानुमितित्वनिष्ठावच्छेदकताभिन्नावच्छे-
दकतायामेव प्रत्यक्षान्यज्ञानत्वादिनिष्ठावच्छेदकताभिन्नत्वनिवे-
शनमुचितं लाघवात्, इत्थञ्च तादृशरूपेणैव प्रत्यक्षान्यज्ञान-
त्वादिप्रकारकेच्छानामपि संग्रहः सम्भवति । न च वह्निविशिष्ट-
पर्व्वतविषयकं जायतामित्याकारकेच्छायाः सिद्धाधीनसंस्कारो-

त्यत्रैव चरितार्थतया वारणाय विषयतायामनुमितित्वावच्छिन्न-त्वनिवेशनस्यावश्यकतया न तत्संग्रह इति वाच्यं समवायेन किञ्चिदवच्छिन्नत्वं निवेश्यैव तादृशेच्छावारणसम्भवादिति चेत् तर्हि पक्षांशे साध्यावगाहित्वेनानुमितिविषयकेच्छानामुक्तरूप-समग्रीभिन्नरूपान्तरेण उत्तेजकत्वापेक्षया तादृशावच्छेदकतायामेव पक्षांशे साध्यावगाहित्वीयावच्छेदकताभिन्नत्वमपि निवेश्यतां तावतैव तत्संग्रहस्यापि सम्भवात् इच्छाया अननुगमाभिधाना-सङ्गतिः। न च विषयतायां साध्यविशिष्टपक्षावगाहित्वावच्छिन्नत्व-निवेशनमावश्यकम् अन्यथा अन्यानुमितिसामग्री-समवहितानामनुमितिर्जायतामित्याकारकविषयविशेषानुपरक्ता-नुमितीच्छानां वारणासम्भवादिति, अन्यानुमितिसामग्रीसमव-हितताद्रूप्येच्छानां तत्तद्व्यक्तित्वेनैवोत्तेजकत्वस्योपगन्तव्यतया उत्तेजकानामननुगमाभिधानसङ्गतिरिति वाच्यम्, तादृशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबन्धकतयैवातिप्रसङ्गवारणसम्भवेन तासाम् वारणानौचित्यात्। साध्यविशिष्टपक्षावगाहित्वावच्छिन्नत्वमधिक-मनुमितिनिष्ठविषयतायां निवेश्य दर्शितसामग्रीसमवहितताद्रूप्य-विशेच्छानां तत्तद्व्यक्तित्वेन उत्तेजकताकल्पने तत्तदिच्छाभावानां विशेष्यविशेषणभावे विनिगमनाविरहेण गौरवप्रसङ्गात्। अन्यानु-मितिसामग्रीकालीनताद्रूप्येच्छानां प्रतिबन्धकत्वे तत्कालीनवायु-संयोगावच्छिन्नानां विनिगमनाविरहेण प्रतिबन्धकतापसङ्गवत् तादृशसामग्र्यभावकालीनतया विशेच्छानां उत्तेजकतायामपि विनिगमनाविरहेऽपि तत्तदिच्छाकालीनसंयोगविशेषाणामुत्तेज-

कताप्रसङ्गस्य दुर्वारत्वात् । अथवोक्तानुगतरूपेणोत्तेजकीभूताया-मिच्छायामनुमितिर्जायतामित्याकारकान्यानुमितिसामग्रीसमव-हितेच्छाव्यक्तीनां भेदा एव निवेशनीया न तु तासामनुमिति प्रतिबन्धकत्वमिति, तत्तदिच्छाभेदनिवेशस्थले तत्कालीनवायुसंयो-गादिभेदनिवेशेन नोपपत्तिः, इच्छायां तत्तद्भेदस्याव्यावर्तकत्वात्त-त्तत्सयोगाभावानां वैशिष्ट्यनिवेशे च तादृशवैशिष्ट्यस्य सामाना-धिकरण्यरूपतया साक्षात् सम्बन्धेन इच्छाभेदनिवेशे लाघवस्यैव विनिगमकत्वात् । अन्ये तु ।

उत्तमकलेच्छानां निरुक्तरूपेणानुगमेऽपि एतत्क्षणानन्तर-क्षणेऽनुमितिर्भवत्वित्याकारकेच्छानामेव निरुक्तरूपेणासंग्रहात्तत्त-द्व्यक्तित्वेन पृथगभावा निवेशनीयाः तादृशक्षणवृत्तित्वाद्यवच्छेदक-तामेदं उक्तावच्छेदकतायां निवेश्य संग्रहे कालान्तरेऽपि तथाविधे-च्छाबलात् अनुमित्यापत्तेः, कालान्तरे अनुमित्युत्पत्त्या च तादृ-शानुमित्साविषयासिद्धेरिष्टापत्त्ययोगादित्यननुगमाभिधानसङ्गतिः । न च कालान्तरीणतादृशेच्छानां तत्तद्व्यक्तित्वेन प्रतिबन्धकतया तादृशेच्छाबलादनुमित्यापत्तिवारणसम्भव इति वाच्यम् उपदर्शि-तैकैकधर्मप्रकारकैकानुमित्साव्यक्तीनां तत्तद्व्यक्तित्वेनोत्तेजकत्वा-पेक्षया तत्समानप्रकारककालान्तरीणबहुतरेच्छानां तत्तद्व्यक्ति-त्वेन प्रतिबन्धकत्वे गौरवात् । न चैवमपि प्राथमिकस्य साध्य-विशिष्ट-पक्षविषयित्व-प्रकारकत्वविशेषणस्याभिधानासङ्गतिर्दुर्वारे-वेति वाच्यम् अनुमितिनिष्ठविषयतायां साध्यविशिष्टपक्ष-विषयकत्वान्यप्रकारकत्वानवच्छिन्नत्वनिवेश एव तत्तात्पर्यात् ।

तत्त्वचिन्तामणिदीधितिः ।

धूमेन अनुमिनुयामितीच्छायामालोकपरामर्शाद-
सत्यामपि सिद्धौ यदि न अनुमितिस्तदा अन्यमात्रलिङ्ग-
कानुमितीच्छाकामिनीजिज्ञासादिवत् पृथक् प्रति-
बन्धिका यदि च तत्र अनुमितिस्तदा सिद्धिसत्त्वे तत्र
अनुमितिवारणाय तल्लिङ्गकानुमितीच्छा तदन्यमात्र-
लिङ्गकानुमितीच्छातिरिक्तानुमितीच्छा वा वाच्या ।

वस्तुतः साध्यविशिष्टपक्षविषयकत्वप्रकारकत्वनिवेशनमप्यावश्यकम्, अन्यथा किञ्चिज्ज्ञानं जायतां यत्किञ्चिदीचरं ज्ञानं जायतामितीच्छावारणासम्भवात् तत्सद्ग्रहे तादृशीनां सर्वासामिच्छानां तत्तदानन्तर्येणैव प्रतिबन्धकत्वे गौरवात् । अनुमितिर्जायतामित्यादीच्छानाञ्च पृथगनुमितित्वादिपर्य्याप्तविषयतावच्छेदकताकेच्छात्वेनैवोत्तेजकता अन्यानुमितिसामग्रीसमवहिततादृशेच्छानाञ्च तत्तदानन्तर्येण प्रतिबन्धकत्वमिति सर्वं समञ्जसम् ।

ननु धूमेन पर्वते वह्निमनुमिनुयामित्याकारकेच्छावन्नाहमा-दिलिङ्गकानुमित्युत्पत्त्यै तत्साधारणरूपेणैव सिषाधयिषाणां सिद्धा-वुत्तेजकताया आवश्यकत्वात् तत्तत्सिद्धिकालेऽसत्यपि धूमपरामर्श-आलोकादिपरामर्शादनुमित्यापत्तिः पक्षतायां अक्षतत्वादित्यत-आह धूमेनेति, भिन्नलिङ्गकेच्छासत्वेऽपि सिद्धिदशायामेव यदि नानुमितिस्तदा तादृशेच्छायाः प्रतिबन्धकत्वं न सम्भवतीत्यतो-

ऽसत्यामपि सिद्धाविति, तत्रानुमितेः सन्दिग्धतया यदीति। तदेति। तल्लिङ्गकानुमिताविति शेषः। अन्यमात्रेति । तदन्यमात्रलिङ्गकत्व-प्रकारकसिद्धीच्छेत्यर्थः। धूमलिङ्गकानुमितिरालोकलिङ्गकानुमि-तिश्च जायतामित्यादाकारकसमूहालम्बनेच्छाकाले आलोकादि-परामर्शादनुमित्युपपत्तये मात्रेति तदन्यमात्रलिङ्गकत्वप्रकारक-त्वञ्च तल्लिङ्गकत्वाप्रकारकत्वे सति किञ्चिल्लिङ्गकत्वप्रकारकत्वम् अतः प्रमेयसामान्यलिङ्गकस्थले तदन्याप्रसिद्धावपि न दोषः। तल्लिङ्गकत्वाप्रकारकत्वञ्च तल्लिङ्गकत्वप्रकारतानिरूपिततत्साध्य-विशिष्ट तत्पक्षविषयकत्वावच्छिन्नानुमितिनिष्ठविशेष्यताकान्यत्वम् अत आलोकेनेन्धनं धूमेन तु वह्निमनुमिनुयामित्यादीच्छादशाया-मालोकादिलिङ्गकवह्न्यादयनुमितेर्नापत्तिः। आलोकलिङ्गकत्व-प्रकारताशरीरे च वास्तवालोकादिप्रकारता न निवेशनीया किन्तु आलोकत्वादयवच्छिन्नप्रकारतैव अन्यथा आलोकत्वादिना धूमत्वादिना च धूमादिकमालोकादिकमवगाहमानयोरि-च्छयोरालोकलिङ्गकानुमित्यादौ प्रतिबन्धकत्वतदभावयोरापत्तेः द्रव्येणानुमिनुयामित्यादीच्छाया आलोकादिलिङ्गकानुमित्य-विरोधित्वोपपत्तये चालोकत्वादयवच्छिन्नत्वस्थले आलोकादिवृत्ति-त्वेनाज्ञायमानधर्मावच्छिन्नत्वमेव निवेश्यं द्रव्यत्वादेरालोकत्वादि-विरुद्धत्वभ्रमदशायां तादृशेच्छाया विरोधित्वोपपादनायालोकत्वा-देरालोकादिवृत्तित्वज्ञानशून्यकालीनाया आलोकेनानुमिनुया-मित्यादीच्छाया अविरोधित्वोपपत्तये च वास्तवालोकादिवृत्तित्वस्य तेन रूपेण ज्ञायमानत्वस्यचोपेक्षणम्। धूमत्वादेरालोकादिवृत्ति-

लग्रहदशायां धूमेनानुमिनुयामित्यादीच्छाया आलोकादिलिङ्ग-
कानुमित्यविरोधित्वमिष्टमेव, विरोधित्वञ्च लाङ्गेच्छाया धूमत्वा-
देरालोकत्वादिविरुद्धत्वग्रहदशायामेव। वस्तुतस्तु द्रव्यं नालोक-
त्वादिज्ञानगुण्यकालीनानां आलोको द्रव्यमित्यादिज्ञानकाली-
नानां वा इच्छानां तत्तदवच्छिन्नत्वेन भेदकूट एव स्वातन्त्र्येण प्रति-
बन्धकतावच्छेदकोऽनुप्रवेशनीयः तेन उक्तकक्षे कालान्तरीणपुरुषा-
न्तरीयज्ञानवारणाय स्वसमानकालीनत्वस्वसमानाधिकरणत्वयो-
र्ज्ञानविशेषणता धौव्ये स्वपदेन फलीभूतानुमित्युपादाने यादृशा-
नुमितिदशायां क्वचिदपि धर्म्मे नालोकादावृत्तित्वज्ञानं प्रसिध्यति
तत्र स्वसमानाधिकरणस्वसमानकालीनालोकत्वादिविरुद्धत्वज्ञाना-
विषयधर्म्मावच्छिन्नकत्वप्रकारकानुमित्साभिवानुमित्साभावरूपकार-
णाप्रसिद्धिः स्वत्वाननुगमेन कार्य्यकारणभावस्य तत्तदनुमितिव्यक्ति-
विश्रामश्च। भेदप्रतियोग्यनुमित्सोपादानेचालोकेन द्रव्येण वानु-
मितुयामित्याद्याकारकयादृशेच्छासमानाधिकरणसमानकालीन-
तादृशज्ञानाप्रसिद्धिस्तादृशेच्छायास्तथाविधस्वभिन्नत्वेनालोकादि-
लिङ्गकानुमितिप्रतिबन्धकत्वापत्तिरिति परास्तम्। यद्वा आलोको
द्रव्यमित्यादिज्ञानविशिष्टत्वेनालोको न द्रव्यमित्यादिज्ञानविरु-
द्धविशिष्टत्वेनेव वा द्रव्यत्वादिमच्छिन्नकत्वप्रकारकेच्छा अनुगमय-
तट्टेदा एव प्रतिबन्धकतावच्छेदककोटौ निवेशनीयाः भेदस्य
कालिकाद्याप्यवृत्तित्वोपगमात्तादृशज्ञानगुण्यकालीनानां द्रव्येणा-
नुमिनुयामित्यादीच्छानां विशिष्टभिन्नतया प्रतिबन्धकत्वो-
पपत्तिः। सामानाधिकरण्यसम्बन्धेन वैशिष्ट्यनिवेशात्पुरुषान्त-

दीक्षज्ञानादिकमादाय दोषः । द्रव्यत्वावच्छिन्नेनानुमिनुयामित्याद्याकारिकाणां द्रव्यत्वांशे लिङ्गतावच्छेदकत्वावगाहिनीनामिच्छानान्तु न द्रव्यत्वादिमद्विषयकपरामर्शजन्यत्वरूपद्रव्यत्वादिमल्लिङ्गकत्वप्रकारकत्वं विषयितायामेव तत्र द्रव्यत्वावच्छिन्नत्वभानात् लिङ्गांशे द्रव्यत्वाद्यनवगाहनादतस्तथाविधेच्छानाम् आलोकत्वाद्यवच्छिन्नलिङ्गकानुमितिविरोधित्वमक्षतमेव आलोकत्वावच्छिन्नेनानुमिनुयामित्यादीच्छानां तादृशानुमित्यविरोधित्वोपपत्तयेचालोकलिङ्गकत्वाद्यप्रकारकत्ववदालोकत्वाद्यवच्छिन्नलिङ्गकत्वाद्यप्रकारकत्वमप्यालोकत्वाद्यवच्छिन्न-लिङ्गकानुमितिप्रतिबन्धकतायां निवेशनीयं पर्वते वह्निमनुमिनुयामित्याद्याकारकलिङ्गविशेषजन्यत्वानवगाहिनीनामिच्छाना अविरोधित्वोपपत्तये किञ्चिल्लिङ्गकत्वप्रकारकत्वनिवेशः तदर्थञ्च किञ्चिल्लिङ्गकत्वप्रकारतानिरूपिततत्तत्साध्यविशिष्टतत्पक्षविषयकत्वावच्छिन्नविशेष्यताकत्वं अतो धूमेन इन्धनमनुमिनुयाम् इत्याद्याकारकेच्छानां नालोकादिलिङ्गकवह्न्यादयनुमितिविरोधित्वम् । इदमत्रावधेयम् । आलोकलिङ्गकधूमलिङ्गकानुमितिर्जायतामित्याद्याकारकेच्छाकाले केवलालोकलिङ्गकपरामर्शादनुमितिर्न जायते तथाविधानुमितेस्तादृशेच्छाया अविषयत्वात्, उभयादिलिङ्गकानुमितेरेव तद्विषयत्वात्, एवं धूमलिङ्गकवह्न्यनुमितिरालोकलिङ्गक-वह्नि-घटोभयानुमितिश्च जायतामित्याद्याकारकेच्छाकाले घटाद्यनुमितिसामग्रीसत्त्वां आलोकपरामर्शात् वह्न्यनुमितिर्न जायते घटाद्यविषयकानुमितिरुत्पत्त्या तादृशेच्छा-

विषयतानिरूपितविशेष्यतावच्छेदकतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावाभावत्वं तत्तत्साध्यविशिष्टतत्पक्षविषयकत्वं तत्तत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वं तत्तत्साध्यविशिष्टतत्पक्षविषयकानुमितिसामान्यं वा। तत्तत्साध्यविशिष्टतत्पक्षविषयकानुमितिसामान्यं तत्तत्साध्यविशिष्टतत्पक्षविषयकानुमितिविशेषश्च

प्रकारत्वानिरूपितविशेष्यताकत्वमेव विशेष्यदलेन विवक्षणीयम् । धूमेन घटमनुमिनुयामितीच्छावत् धूमेन वह्निघटोभयमनुमिनुयामित्यादीच्छाया अपि आलोकलिङ्गकवह्न्याद्यनुमित्यविरोधित्वमिष्टमेव सिद्धौ तादृशेच्छाया अनुत्तेजकतया सिद्धिकाले तादृशेच्छाबलादसत्यामालोकलिङ्गकानुमितीच्छायां न तादृशानुमितिरितिदिक् । एकलिङ्गकेच्छाकालीनोभयलिङ्गकपरामर्शजन्यानुमितौ व्यभिचारवारणप्रकारः पुनरग्रे प्रदर्शयिष्यते । ननु स्वविषयसजातीयज्ञाने इच्छायाविरोधित्वमदृष्टचरमित्यत आह कामिनीजिज्ञासादिवदिति । यथा कामिनीदिदृक्षा घटादिविषयकचाक्षुषादिप्रतिबन्धिका तथेत्यर्थः । पृथक्प्रतिबन्धिकेति ; पक्षतासमवधानदशायामनुमित्यनुत्पादप्रयोजिकेत्यर्थः, तथाचोक्तस्थले पक्षतासत्त्वे च तिविरहात्तदिष्टमेवेति भावः । ननु कामिनीजिज्ञासास्थले कामिनीभिन्नविषयकज्ञानानुत्पादस्य सर्वानुभवसिद्धतया तत्र तस्याप्रतिबन्धकत्वमस्तु, सिद्धासत्त्वे धूमादिलिङ्गकानुमित्यादशायां आलोकलिङ्गकवह्न्यनुमित्यनुत्पादस्तु नानुभविकः । तथा सति तुल्ययुक्त्या घटाद्यनुमित्साप्रत्यक्षादिगोचरेच्छादशायामपि तदनुत्पादस्य तथात्वप्रसक्तेः । नह्येकमपि विशेषमीक्षामहे इत्यभिसन्धाय उक्तापत्तिवारकतत्तदन्तरमनुसरति यदि चेति । तथाचान्यलिङ्गकानुमित्साया: प्रतिबन्धकत्वमसम्भावितमेवेति भावः । तत्रेति, अन्यलिङ्गकानुमित्सास्थले इत्यर्थः, तल्लिङ्गकानुमितीच्छा तल्लिङ्गकत्वप्रकारतानिरूपिततत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वावच्छिन्नविशेष्यताकेच्छा सिषाधयिषापदेन विवक्षणीयेत्यर्थः ।

नन्वेवं लिङ्गविशेषानुपरक्तानुमितीच्छाकाले सिद्धौ सत्यामनुमित्यनुपपत्तिरत आह तदन्यमात्रलिङ्गकेति। धूमेनालोकेन चानुमिनुयामित्यादिसमूहालम्बनेच्छाकाले आलोकादिलिङ्गकानुमित्युपपत्तये मात्रेति। तथाच तल्लिङ्गकतत्साध्यविशिष्टतत्पक्षविषयकानुमितिप्रकारिकामती या किञ्चिल्लिङ्गकतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्व-प्रकारिकेच्छा तदन्यतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादिप्रकारिकेत्यर्थः।

लिङ्गविशेषोपरक्तानुमितीच्छासंग्रहाय सत्यन्तम्। आलोकेनेन्धनमनुमिनुयां, धूमेन च वह्निमनुमिनुयामित्याद्याकारकेच्छाबलादालोकलिङ्गकवह्न्यादनुमित्यापत्तिवारणाय तत्र साध्यादिनिवेशः। लिङ्गविशेषानुपरक्तानुमितीच्छाकाले पर्वते वह्निमनुमिनुयां धूमेनेन्धनमनुमिनुयामित्याद्याकारकसमूहालम्बनेच्छाकाले चालोकलिङ्गकानुमित्युपपत्तये तद्विशेष्यदलम्। यत्किञ्चिल्लोचरं ज्ञानं जायतामित्यादीच्छावारणाय चरमदलम्। यद्यपि आलोकधूमोभयलिङ्गकवह्निविशिष्टपर्वतविषयकानुमितिर्जायतामालोकेन वह्निघटोभयविशिष्टपक्षविषयकानुमितिर्धूमेन वह्निविशिष्टपर्वतमहानसोभयविषयकानुमितिश्च जायतामित्यादीच्छावारणाय तल्लिङ्गकत्वतत्साध्यविशिष्टतत्पक्षविषयकानुमितित्वादि-प्रकारतानिरूपित-विशेष्यता-काऽन्यत्वमेव सत्यन्तदलेन विवक्षणीयम्। तथाच लिङ्गविशेषानुपरक्तानुमितीच्छानां तादृशविशेष्यताकान्यत्वविरहात्किञ्चिल्लिङ्गकत्वादि-प्रकारतानिवेशनमफलमेवेति, तथाविधविशेष्यतागर्भितेनैवेच्छायाः

लिङ्गविशेषेणापि च नियन्त्रितं पक्षत्वम् । तल्लिङ्गकानुमितीच्छाविरहविशिष्टान्यलिङ्गकानुमितीच्छा एव वा प्रतिबन्धिका ।

उत्तेजकत्वमुचित, तथापि तादृशविशेष्यताशालीच्छायामेव तदन्यमात्रेत्यादिग्रन्थतात्पर्य्यमिति, शेषं पूर्वोक्तदिशावसेयम् ।

नन्वेवं धूमालोकादिलिङ्गकानुमितिसाधारणैकपक्षत्वासम्भवइत्यत्र इष्टापत्तिमाह लिङ्गविशेषेणापीति, लिङ्गभेदेनापि, पक्षत्वं भिन्नमेवेत्यर्थः । अपिः साध्यादिभेदसमुच्चायकः । तत्प्रदर्शनञ्च इष्टान्तार्थम् । तथाच साध्यादिभेदेनेव लिङ्गभेदेनापि पक्षताभेदो न क्षतिकर इति भावः । नन्वेवं लिङ्गभेदेन पक्षताया अननुगमात् तस्या व्यभिचारेणानुमितिरूपानुगतकार्य्ये हेतुत्वासम्भवः । न च तत्तत्साध्यकत्वादिवत्तत्तल्लिङ्गकत्वस्यापि कार्य्यतावच्छेदके निवेशान्न व्यभिचार इति वाच्यम् । तावतापि आलोकादिलिङ्गकानुमितीच्छाधीनधूमालोकोभयादिविषयक-समूहालम्बन-परामर्शजन्यानुमितौ धूमादिलिङ्गकानुमितीच्छाविरहविशिष्टसिद्धभाव-व्यभिचारस्य दुर्व्वारत्वात्तादृशानुमितावपि धूमादिलिङ्गकपरामर्शजन्यत्वरूप-धूमलिङ्गकत्वस्याक्षतत्वात् । न च यत्र धूमलिङ्गकानुमितीच्छाया उत्तेजकता तत्रालोकलिङ्गकानुमितीच्छानामपि तत्तल्लिङ्गकपरामर्शविशिष्टानामुत्तेजकत्वोपगमान्नोक्तस्थले व्यभिचार इति वाच्यम् । तथासति तत्र धूमलिङ्गकेच्छायाः अपि धूमलिङ्गक-परामर्शविशिष्टाया एवोत्तेजकत्वौचित्यात्, सर्व्व-

साधारणैक-पक्षतायां एव सुवचतया लिङ्गविशेषणार्पीतिं व्यर्था-सङ्गतिरिति चेन्न, धूमलिङ्गकेच्छाविरहविशिष्ट-सिद्धिविशिष्टान्यानुमितित्वमेव तादृशसिद्धाभावजन्यतावच्छेदकम्। तादृशसिद्धि-विशिष्टत्वञ्च, स्वसामानाधिकरण्यावच्छिन्न-स्वाव्यवहितोत्तरोत्पत्ति-कत्वसम्बन्धेन, उत्तरसमूहालम्बनस्थलीयानुमितिसत्ताविधसिद्धि-विशिष्टैवेति तत्र न व्यभिचारः। सिद्धिकालेऽसत्यां तल्लिङ्गक-मितावधियायामुत्तरस्थल इव न धूमपरामर्शादनुमित्यापत्तिः, धूमादिलिङ्गकेच्छाविरहविशिष्टसिद्धाभावादिघटितस्यैव धूमादि-परामर्शघटितकारणसमूहस्य कार्योत्पत्तिप्रयोजकत्वोपगमात्। समूहालम्बनस्थले आलोकपरामर्शादिघटितसामग्रीत एव कार्यो-त्पत्तिनिर्वाहात्। अथाव्यवहितोत्तरत्वमवश्यं तृतीयक्षण-साधारणं, स्वध्वंसाधिकरण-कालध्वंसानधिकरणत्वे सति स्वा-धिकरणकालध्वंसाधिकरणत्वरूपं वाच्यम्। अन्यथा यत्र क्रमेण सिद्धात्मकधूमालोकोभयलिङ्गकपरामर्शालोकलिङ्गकेच्छा-नुमितयस्तत्रानुमित्युत्पत्त्यधिकरणक्षणस्य धूमलिङ्गकेच्छाविरह-विशिष्ट-सिद्ध्यधिकरणक्षण-ध्वंसाधिकरणक्षण-ध्वंसाधिकरणत्वेन तदुत्पत्तिकानुमितिकक्षणसम्बन्धेन तादृशसिद्धिविशिष्टान्यत्वात् तादृश-सिद्धाभावस्य व्यभिचारतादवस्थ्यात्। एवञ्च, यत्र क्रमेण सिद्धात्मकधूमपरामर्श-धूमलिङ्गकेच्छानुमितयस्तत्रत्यानुमितेर्धूम-लिङ्गकेच्छाविरहविशिष्टसिद्धिविशिष्टत्वेन पक्षतोत्कार्यत्वानुपपत्ति-रितिचेन्न। तादृशसिद्धिविशिष्टत्वं स्वाधिकरणक्षणध्वंसोत्पत्य-धिकरणक्षणोत्पत्तिकत्वसम्बन्धेन वाच्यम्। उत्तरसमूहालम्बन-

स्थले अनुमित्यव्यवहितपूर्ववर्त्तिनस्यापि धूमलिङ्गकेच्छाविरहविशिष्ट-सिद्धाधिकरणत्वात्तादृशक्षणध्वंसोत्पत्त्यधिकरणक्षणोत्पत्तिकत्वमनुमितेरिति न व्यभिचारः । एवं सिद्धात्मक-धूममात्र-परामर्शजन्यानुमितेर्धूमलिङ्गकेच्छाविरहविशिष्ट-सिद्धाधिकरण-प्रथमक्षणध्वंसोत्पत्त्यधिकरणक्षणोत्पत्तिकत्वाभावात् पक्षताकार्य्यत्व-निर्व्वाहः । अथवा स्वाव्यवहितपूर्वकालावच्छिन्नतल्लिङ्गकेच्छा-विरहविशिष्टसिद्धाभावाधिकरणताविशिष्टसमवाय एव तादृश-सिद्धाभावकार्य्यतावच्छेदकसम्बन्ध इति न कोपि दोषः । अथवा स्वज्ञप्तिक्षतिमत्त्व-स्वज्ञप्तिप्रागभावप्रतियोगित्व-स्वसामानाधिकरण्ये-तादृशतितयसम्बन्धेन तादृशसिद्धिविशिष्टान्यत्वं, तादृशसिद्धाभाव-जन्यतावच्छेदकमिति न कोपि दोषः । अथवा तादृशसिद्धि-विशिष्टत्वं, तादृशस्वाधिकरणक्षणत्वावच्छिन्नध्वंसाधिकरणक्षणध्वंसा-नधिकरणं यस्तादृशस्वाधिकरणक्षणध्वंसाधिकरणक्षणस्तदुत्पत्ति-कत्वसम्बन्धेन वाच्यम् । उक्तसमूहालम्बनस्थले च, तादृशसिद्धाधि-करणक्षणत्वावच्छिन्नध्वंसाधिकरणमनुमित्युत्पत्तिक्षण एवेति तद्-ध्वंसानधिकरणक्षणोत्पत्तिकत्वमनुमितेरिति न व्यभिचारः । सिद्धात्मकधूममात्र परामर्श-जन्यानुमिते-र्धूमलिङ्गकेच्छा-विरहवि-शिष्टसिद्धाधिकरणक्षणत्वावच्छिन्नध्वंसाधिकरणद्वितीयक्षणध्वंसान-धिकरणक्षणोत्पत्तिकत्वविरहात्, विशिष्टसिद्धिविशिष्टान्यत्वमव्या-हतमिति । एवं यत्र धूमपरामर्शः, तदुत्तरं तद्गतप्रामाण्यज्ञाना-लोकपरामर्शस्तदुत्तरमनुमितिस्तत्रानुमितेरप्रामाण्यज्ञानाभाव-विशिष्टधूमपरामर्शविशिष्टत्वरूपाप्रामाण्य-ज्ञानाभावविशिष्ट--धूम-

परामर्शजन्यतावच्छेदकाक्रान्तत्वात्, अव्यवहितपूर्ववर्त्तिचाप्रामाण्यज्ञानाभावविशिष्टधूमपरामर्शत्वेन प्रयुक्तस्य व्यभिचारस्य एतादृशैर्वह्निभिः प्रकारैरेव वारणमवसेयम्। लिङ्गोपधानमते च न काचिदनुपपत्तिः। तन्मते धूमविशिष्टपर्व्वतत्वादवच्छिन्नविशेष्यताकवह्न्यनुमितित्वादेव धूमलिङ्गकेच्छाविरहविशिष्टसिद्धाभावादिजन्यता-वच्छेदकत्वादुक्त-समूहा- लम्बनस्थलेचालोकघान् पर्व्वतो वह्निमानित्याद्याकारकानुमितेरेवोपगमेन, व्यभिचारानवकाशादिति। धूमेनानुमिनुयामालोकेनानुमिनुयामित्यादिसकलेच्छासाधारणरूपेणैव सिषाधयिषाणां सिद्धावुत्तेजकत्वम्। तथाच धूमालोकादिलिङ्गकनिखिलानुमितिसाधारणी एकैवपक्षता। उक्तस्थलेऽतिप्रसङ्गभङ्गाय च प्रतिबन्धकान्तरमेव कल्पनत्याशयेनाह तल्लिङ्गकेति। असत्यां सिद्धावन्यलिङ्गकानुमितीच्छासत्त्वेऽनुमित्युपपत्तये, सिद्धिकालीनेति। सामानाधिकरण्यसम्बन्धेन सिद्धिविशिष्टेत्यर्थः। समूहालम्बनेच्छाकाले सिद्धिसत्त्वेऽनुमित्युपपत्तये तल्लिङ्गकानुमितीच्छाविरहविशिष्टेति। धूमलिङ्गकत्वादि-प्रकारतान्य-प्रकारत्वानिरूपितविशेष्यताकेच्छाविरहविशिष्टेत्यर्थकम्। तेन न धूमालोकोभयलिङ्गकवह्न्यनुमितिर्जायतामित्याकारकेच्छाबलात् सिद्धिकाले केवलालोकलिङ्गकानुमितिप्रसङ्गः। न वालोकेन सङ्घिघटोभयानुमितिर्धूमेन वह्न्यनुमितिर्जायतामित्येतादृशेच्छाकाले सिद्धिसत्त्वे केवलालोकादिपरामर्शात् केवलवह्न्याद्यनुमित्यापत्तिः। यद्यपि तादृशप्रकारत्वानिरूपितविशेष्यताकान्यत्वस्य इच्छाविशेषणत्वोपगम-

एव, समूहालम्बनेच्छास्थलेऽनुमिति रूपपादयितुं शक्यते ; तथापि ज्ञानेच्छयोर्युगपदुत्पादमङ्गीकुर्व्वतां नवीनानां मते, यत्र सिद्धुत्पत्तिकाले धूमादिलिङ्गकानुमितीच्छायास्तद्वितीयक्षणे चालोकलिङ्गकानुमितीच्छाया उत्पादस्तत्रालोकलिङ्गकानुमित्युपपत्तये ताट्टशविशेष्यतायालीच्छाविरहवैशिष्ट्यपर्य्यन्तानुसरणम् । लिङ्गविशेषानुपरक्तानुमितीच्छानामपि निरुक्तोत्तेजकतावच्छेदकाक्रान्ततया ताट्टशेच्छायाः प्रतिबन्धकत्वाप्रसक्तेरन्यलिङ्गकेति सम्प्रदायतम् । सिद्धिविशिष्टेच्छामात्रस्य प्रतिबन्धकत्वे सिद्धिविशिष्ट-घटतदनुमित्यादि-गोचरेच्छाकालीनाननुगतेच्छाव्यक्तीनां तत्तद्व्यक्तित्वेनाभावानां निवेशनीयतया महागौरवमिति तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रकारकानुमितीच्छात्वेनैव विशेषीभूतेच्छानिवेशोवोध्यः । वस्तुतस्तु तत्साध्यविशिष्टतत्पक्षविषयकत्वप्रकारकत्वमप्यन्यलिङ्गकानुमित्सायां न निवेश्यं घटादीच्छाकालीनाननुगतेच्छानां भवन्मतेऽपि सिद्धावुत्तेजकतायावक्तव्यतया तन्मते तत्र घटादीच्छासाधारणरूपेणैवानुमित्साया-उत्तेजकत्वोपगमादुक्तस्थले पक्षतानिर्व्वाहेण ताट्टशाननुगतेच्छानामन्यलिङ्गकेच्छायामेवोत्तेजकत्वात् । अत्र चैताट्टशगुरुधर्म्मावच्छिन्नाभावस्य लिङ्गभेदेनानन्तकारणतानां पक्षताकारणतान्तरस्य च कल्पनामपेक्ष्यलिङ्गभेदेन सत्तल्लिङ्गकानुमितीच्छाविरहविशिष्टसिद्धित्वरूपलघुधर्म्मावच्छिन्नाभावहेतुताकल्पनस्यैव साधुत्वेन पूर्व्वमतस्यैव सम्यक्तया वाकारोऽनिर्भरसूचनायेति वदन्ति ।

परे तु अन्यलिङ्कत्व-प्रकारकानुगतानुमित्साक्षमवहित-सिद्धिदशायामननुगतानुमित्साबलात्तलिङ्कानुमित्युपपत्तये सिद्धौ तादृगेच्छाभावकूटवैशिष्ट्यनिवेशेन पूर्वमते गौरवमेतन्मते चान्यलिङ्कानुगतानुमित्साकृपोत्तेजकबलादेव तत्तानुमित्युपपत्तेः। सिद्धौ तासामभावानिवेशात्। न चैतन्मतेऽप्यन्यलिङ्कानुमित्साप्रतिबन्धकतायामेव तासामुत्तेजकत्वस्यावश्यकतया साम्यमिति वाच्यम्। यतो यत्तानुगतसाध्यानुमित्सात्मकसमूहालम्बनरूपान्यलिङ्कानुमितीच्छास्तत्तान्यलिङ्कानुमितीच्छायां तादृगेच्छाव्यक्तिभेदा एव निवेशनीयाः। सिद्धौ तु सामानाधिकरण्यसम्बन्धेन तत्तदत्यन्ताभावास्तत्र च तत्कालीनसंयोगाद्यभावानां निवेशमादाय विनिगमनाविरहेण गौरवम्। न च पूर्वमतेऽपि तत्तत्सिद्धिव्यक्तिभेदा एव सिद्धौ निवेशनीया न तु तत्तदिच्छाभावा इति न विनिगमनाविरहावकाश इति वाच्यम्। सिद्धेरनन्तरं यत्र तादृशसमूहालम्बनेच्छाव्यक्तीनामुत्पत्तिस्तत्र तादृशसिद्धिभेदानां सिद्धौ निवेशे इच्छोत्पत्तिकालेऽनुमित्युपपत्तेः। ज्ञानेच्छयोर्युगपदुत्पादमते इच्छासामग्र्या ज्ञानाविरोधित्वात्। तादृशस्थले च सिद्धिजननकाले प्रतिबन्धकोत्तेजकेच्छयोरेकस्याऽपरव्यक्तेरेव तत्पूर्वमुत्पत्तिः, तत्र द्वितीयक्षणेऽनुमित्युपपत्तये एतन्मतेऽपि, तत्तत्सिद्धिभेदा अन्यलिङ्केच्छाविशेषणीभूतसिद्धांशे-निवेश्या नत्वन्यलिङ्केच्छायां, तद्विशेषणीभूतसिद्धौ वा तदिच्छात्यन्ताभावा अतो न तत्कालीनसंयोगादिव्यक्त्यभावनिवेशमादाय विनिगमनाविरहप्रसङ्ग इत्याहुः।

साधकमानं, साध्यवत्त्वनिश्चयः । पाषाणमयत्वा-दिना पर्वते तेजस्त्वादिना च वह्नेः सिद्धावपि पर्वतत्वेन तच्च वह्नित्वेन च तस्य अनुमितेर्धर्म्मित्वसाध्यत्वयोरव-च्छेदकौ अनुप्रवेशनीयौ ।

साधकमानपदस्य सिद्धिकारणपरत्वे पूर्व्वोक्तदोषप्रसङ्गात् तदाचष्टे साधकेति । साध्यवत्त्वनिश्चय प्रकृतसाध्यपक्षवैशिष्ट्या-वगाहिनिश्चय । पाषाणमयोवह्निमान् पर्व्वतस्तेजस्वीत्याद्या-कारकासमानप्रकारकनिश्चयदशाया पर्व्वतो वह्निमानित्या-द्याकारकानुमितेरानुभविकतया यथाश्रुते तदनुपपत्तेः प्रकार-विशेष निवेशयति पाषाणमयत्वादिनेति । तच्च पर्व्वते, तस्य वह्नेः, धर्म्मित्वसाध्यत्वयो उद्देश्यत्वविधेयत्वयो, अनुप्रवेशनीया वित्यस्य, पक्षताशरीर इत्यादि । तथाच पर्व्वतत्वावच्छिन्नोद्देश्यता-निरूपितसंयोगादिसंसर्गावच्छिन्न वह्नित्वावच्छिन्नविधेयताकानु मिति प्रति तद्रूपावच्छिन्नविशेष्यतानिरूपिततत्सम्बन्धावच्छिन्न तद्धर्म्मावच्छिन्नप्रकारतानिरूपितत्वावच्छिन्नस्य सिषाधयिषा-विरहविशिष्टस्याभावो हेतुरिति पर्य्यवसितम् ।

पर्व्वतो वह्निमानित्यादिसिद्धिदशाया वह्निमान् पर्व्वतो घटवानित्याद्यनुमित्युदयात्, तत्प्रतिबध्यतावच्छेदककोटौ प्रका-रतामुपेत्य विधेयतानिवेशन। विधेयता च, वह्निमनुमिनोमीत्यनु-व्यवसाय नियामक-पक्षतावच्छेदक-व्याप्तत्वो विषयतताविशेष ।

यद्वि च पर्वतत्वसामानाधिकरण्येनैकत्व साध्यसिद्धावपि विनाप्यनुमित्सामन्यव तादृशानुमितिरानुभविकी तदा धर्म्मिविशेषोऽपि निवेश्यो नान्यथा।

स्वरूपतः पर्व्वतत्ववह्नित्वादिप्रकारकसिद्धिदशायां जातिमान् वह्निमान् पर्व्वतो जातिमत्वानित्यादयनुमित्युत्पत्तेः, शुद्धपर्व्वतत्ववह्नित्वादिप्रकारकसिद्धिदशायां अधिकविषयिण्याः सुन्दरः पर्व्वतः सुन्दरवह्निमानित्यादयनुमितेरुत्पत्त्याच प्रतिबध्यदिशि पर्व्वतत्वावच्छिन्नेत्यादिना किञ्चिदविशेषितपर्व्वतत्वादिपर्य्याप्तावच्छेदकतावच्छेदकत्वमेव विवक्षणीयम्। तदर्थश्च, पर्व्वतत्वादिनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपकत्वम्। पर्व्वतो वह्निमानित्यादयनुमितौ जातिमान् वह्निमान् पर्व्वतो जातिमत्वानित्यादिसिद्धेरप्रतिबन्धकतया, प्रतिबन्धकदिशयपि पर्व्वतत्वावच्छिन्नित्यादिना किञ्चिदविशेषिततदवच्छिन्नत्वमेव विवक्षणीयम्। तदर्थश्च निरवच्छिन्न तद्वृत्त्यवच्छेदकताकत्वमिति ध्येयम्।

ननु पर्व्वतत्वादयवच्छिन्नविशेष्यताकानुमितौ पर्व्वतत्वावच्छिन्न विशेष्यताकसिद्धेः प्रतिबन्धकत्वे पर्व्वतत्वैनैकपर्व्वतविशेष्यकसिद्धिदशायां तेन रूपेणान्यपर्व्वतेऽपि साध्यानुमित्यनुदयापत्तिरत आह यदि चेति। पर्व्वतत्वांशेऽवच्छेदकत्वावगाहियत्किञ्चिद्वह्निविशेष्यकसिद्धिदशायां, तेन रूपेण धर्म्मान्तरेऽनुमित्यनुत्पादस्य निर्विवादतया, सामानाधिकरण्येनेति। एकत्र एकधर्म्मिणि, अनुमित्सासत्वे

विशेषणाभावादेव विशिष्टाभावनिर्व्वाहात् धर्म्मिविशेषनिवेशन-
मफल अतो विनाप्यनुमित्सामिति । अन्यत्र अन्यधर्म्मिणि, धर्म्मि-
विशेषानन्तर्भावेऽपि वक्ष्यमाणरीत्या सामानाधिकरण्येन सिद्धि-
दशाया, अवच्छेदकावच्छेदेनानुमितौ वाधकाभावात् तादृशेति,
सामानाधिकरण्यमात्रावगाह्नीत्यर्थ. । धर्म्मिविशेषोऽपीति । तथाच
पर्व्वतत्वाद्यवच्छिन्नतत्पर्व्वतादिनिष्ठोद्देश्यताकानुमितौ पर्व्वतत्वाद्य-
वच्छिन्नतत्पर्व्वतादिविशेष्यकसाध्यवत्तानिश्चयत्वेन प्रतिबन्धकत्वं
कल्प्यमितिभाव: । अन्यथा, तदानीं, तादृशानुमितेरानुभवि-
कत्वविरहे, न, धर्म्मिविशेषोनिवेश्य इत्यनुपज्जते । अनुमिति-
र्द्विविधा, पक्षतावच्छेदकसाध्ययो. सामानाधिकरण्यमात्राव
गाहिनी, तयोरवच्छेद्यावच्छेदकभावावगाहिनी च ; अवच्छेद्याव-
च्छेदकभावोपि क्वचित् स्वरूपसम्बन्धविशेष ; यथा मूलाव-
च्छिन्नोवृक्ष: संयोगीत्यादौ मूलादिसंयोगाद्यो: । अत्र अन्याट्टश्यस्य
तस्य दुर्व्वचत्वात्। (१) क्वचिच्च व्याप्यव्यापकभाव: । यथा पृथिवी-
रूपवतीत्यादौ पृथिवीत्वरूपादयो. । तत्र साध्यांशे पक्षविशेषणता
पन्नस्य पक्षतावच्छेदकस्यावच्छेद्यतासम्बन्धेन प्रकारत्व, पक्षता-
वच्छेदकावच्छिन्नत्वेन तद्विशिष्टसाध्येन वा विशेषितस्य संयोगादे:
पक्षांशे साध्यसंसर्गत्वमित्यन्यदेतत् ।

---

(१) तदवगाहिन्यामेव चानुमितौ पक्षतावच्छेदकदेशकालावच्छेदेन वाध-
ग्रहस्य विरोधितया वाधशङ्काविरहेव्यभिचाराग्रहेर मखिलद्रव्यस्थापयिष्यति
क्वचित् कोऽय पाठ ।

पक्षतावच्छेदकस्य सामानाधिकरण्येनैकत्र साध्यसिद्धावपि, तदवच्छेदेनानुमितिदर्शनात्, पक्षतावच्छेदकावच्छेदेनानुमितिं प्रति, तदवच्छेदेन सिद्धिसत्त्वसामानाधिकरण्यमात्रेणानुमितिं प्रति तु, सिद्धिमात्रस्य विरोधित्वम् ।

तादृशी चानुमितिः पक्षतावच्छेदकसामानाधिकरण्यमात्रावगाहिसिद्धिदशायां जायते, न्यूनविषयकसिद्धिदशायां अनुमितेः सर्व्वानुभवसिद्धत्वात् । अतएव यत्रावच्छेदकावच्छेदेनानुमितिरुद्देश्या, तत्र नांशतः सिद्धसाधनं दोष इत्यतस्तदेवोपपादयति पक्षतावच्छेदकस्येति । सामानाधिकरण्येन सामानाधिकरण्यसम्बन्धेन, तदवच्छेदेन, पक्षतावच्छेदकावच्छेदेन । सिद्धेः, सिद्धेरेव सामानाधिकरण्यमात्रावगाहिसिद्धेः प्रतिबन्धकत्वमेवकारव्यवच्छेद्यम् ।

अयमाशयः । पर्व्वतो वह्निमानित्यादिसिद्धिदशायां पर्व्वतः सुन्दरवह्निमानित्याकारकानुमितिरूपत्वा विधेयतावच्छेदकतायाः पर्य्याप्तिः प्रतिबध्यतावच्छेदककोटौ निवेशनीया । एवं संयोगादिना साध्यस्य दण्डोपलक्षितपुरुषादेः सिद्धावपि, विशिष्टनिरूपितसंयोगादिना दण्डिपुरुषाद्यनुमित्युत्पत्त्या संसर्गतावच्छेदकतायां अपि पर्य्याप्तिर्निवेशनीया । एवञ्चावच्छेदकावच्छेदेनानुमितौ, शुद्धवह्नित्वादौ शुद्धसंयोगत्वादौ वा, विधेयतावच्छेदकतायाः

संसर्गतावच्छेदकताया वा अपर्याप्ततया, तादृशानुमिते र्न सामानाधिकरण्यमात्रावगाहिसिद्धिप्रतिबध्यत्वमिति।

प्राञ्चस्तु व्यापकतायाः संसर्गतया भाने मानाभावात् पक्षतावच्छेदकाक्रान्तयावद्वह्निविषयकानुमितिरेव, पक्षतावच्छेदकावच्छेदेनानुमितिरिति। (१) तत्र सामानाधिकरण्यमात्रावगाहिन्याः सिद्धेरविरोधितया, पक्षतावच्छेदकव्यापकोद्देश्यताकान्यत्वमेव सिद्धिसामान्यप्रतिबध्यतावच्छेदककोटौ निवेश्यतीयम्। नच विषयभेदेन विषयताभेदात्पक्षतावच्छेदकावच्छेदेनानुमितेर्विषयतानामपि, नानाव्यक्तिपक्षकस्थले, प्रत्येकं पक्षतावच्छेदकाव्यापकत्वमेवेति, तत्र पक्षतावच्छेदकव्यापकोद्देश्यताया अप्रसिद्धिरिति वाच्यम्। उद्देश्यतासम्बन्धेन पक्षतावच्छेदकव्यापकान्यत्वस्यैवानुमितिविशेषणत्वोपगमेन, निर्व्वाहादिति वदन्ति। दीधितिकारस्य तु, अवच्छेदकावच्छेदेनानुमितौ, अवच्छेद्यावच्छेदकभावस्य स्वरूपसम्बन्धात्मकस्येव, व्याप्यव्यापकभावरूपस्यापि तस्य भानमनुमत्भागासिद्धेर्दौषत्वनिर्व्वाहार्थं पक्षतावच्छेदकावच्छेदेनानुमितौ; पक्षतावच्छेदकावच्छेदेन हेतुमत्ताज्ञानकारणताया आवश्यकत्वात्। शिखरविशिष्टः पर्व्वतो वह्निमान् धूमादित्यादौ शिखरे हेतोस्तत्सम्बन्धस्य चावच्छेदकताविरहेण हेत्वसिद्देरावश्यकतेत्यागह्य पक्षतावच्छेदके अनतिरिक्तवृत्तित्वरूपावच्छेदक-

---

(१) तन्मते मणिकारोक्तन्यायेनांशतः सिद्धसाधनस्यानुगतरूपावच्छिन्ननानाव्यक्तिपक्षकानुमितावदोषत्वे इति तु पाठान्तरम्।

त्वावगाहिन्यामनुमितौ, तदवच्छेदेन हेतुमत्ताज्ञानस्य हेतुतायाभागासिद्धेरौपयिकत्वार्थमुपगमेऽपि ; स्वरूपसम्बन्धरूपावच्छेदकत्वावगाहिन्यामनुमितौ पक्षतावच्छेदकावच्छेदेन हेतुमत्ताज्ञानापेक्षा नोपेयत इतिसमाधानस्य स्वय अवच्छेदकत्वयोर्व्यभिचारेदित्यनेनाग्रे वक्ष्यमाणत्वात् । एव व्यापकत्वभानस्य तदननुमतत्वे पर्व्वतत्वसामानाधिकरण्येनैकतेत्यत्र, एकत्र साध्यसिद्धाविति यनैवावच्छेदकावच्छेदेन या सिद्धिस्तदभावज्ञाने तज्ज्ञानप्रयोजनकस्य सामानाधिकरण्येनेत्युपादानव्यर्थत्वाच्च । युज्यते चैतदेवमतम् । प्राचीनमतेऽपि । उक्तयुक्त्याविधेयतावच्छेदकत्वादिपर्य्याप्तिनिवेशस्यावश्यकत्वात्, तादृगोद्देश्यताकान्यत्वस्याधिकस्य निवेशनीयतया गौरवात् । एवं सिद्धिसामान्याभावघटितावच्छेदकावच्छेदेनानुमितावुत्पद्यमानायां, सिद्धाभावबलात् तत्तत्कार्य्यतावच्छेदकीभूतपक्षतावच्छेदकव्यापकान्यानुमितित्वावच्छिन्नस्यापत्तेः ।

अत्रान्वये च सिद्धिसामान्याभावकालीनायामवच्छेदकावच्छेदेनानुमितौ, विशिष्टवह्नित्वे विशिष्टसंयोगित्वं वा, पर्य्याप्तविषयतानिरूपकत्वं, शुद्धवह्नित्वे शुद्धसंयोगित्वं वा पर्य्याप्तो विषयतानिरूपकः स्वीक्रियते । एकज्ञानस्यैकत्र विषये विषयतादयोपगमे क्षतिविरहादिति सिद्धिसामान्याभावकार्य्यतावच्छेदकावच्छिन्नोत्पत्तिरिष्टैव । न चावच्छेदकावच्छेदेनानुमितौ व्यापकताया: संसर्गतया भानोपगमे, तादृगानुमितौ अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानस्य, पृथक् कारणताकल्पने गौरवं, एतन्मते, तत्तत्पर्व्वतोद्देश्यकानुमितौ, तत्तत्पर्व्वतविशेष्यकपरामर्शस्य हेतुतयार्थवशादेव यावत्पर्व्वतविशे-

एकपरामर्शात्तथाविधानुमितेरुत्पादात्, तादृशानुमितौ परामर्शस्य स्वतन्त्रहेतुत्वाकल्पनात्, व्यापकतायाश्च संसर्गविधयाभानस्य क्वचिदप्यनभ्युपगमादिति वाच्यम् । यच्चैकः परामर्शः कतिपयपर्व्वतविषयकः, अन्यश्च तदितरयावत्पर्व्वतविषकस्तत्रापि अवच्छेदकावच्छेदेनानुमितेरुत्पादापत्तेः । न चेष्टापत्तिः, अवच्छेदकावच्छेदेन हेतुमत्ताज्ञानं विनाऽवच्छेदकावच्छेदेनानुमित्यनुत्पादस्य सर्व्वसम्मतत्वात् । तत्र च कस्यापि परामर्शस्य, भवन्मतसिद्धाया-अवच्छेदकावच्छेदेन हेतुमत्तावगाहिताया असम्भव. । एव यत्र पक्षतावच्छेदकताघटकसम्बन्धेन पक्षतावच्छेदकमवृत्ति तत्र तेन सम्बन्धेन पक्षतावच्छेदकाक्रान्ताप्रसिद्धा अनुमितिर्द्वैविध्यानुपपत्तिश्च । तन्मतेऽपि चावच्छेदकावच्छेदेनानुमितौ, अवच्छेदावच्छेदकभावरूपाधिकविषयानवगाहने, सामानाधिकरण्यमात्रेण सिद्धिदशायां, तादृशानुमित्युत्पत्तौ बीजाभावः । सिद्धविषयीभूतधर्म्मिविषयकत्वस्य तद्बीजत्वे, तथाविधसिद्धिदशायां, सिद्धविषयीभूतकतिपयपर्व्वतादिविषयकानुमितेरप्युत्पादौचित्यात् ।

अथ मणिकृता पक्षतावच्छेदकैक्येऽगत. सिद्धसाधनस्यादोषत्वोपगमेऽपि, तदितरप्राचीनैरनुमितिमात्र एवागत. सिद्धसाधनस्यापि दोषत्वमुपेयते, अतएव चैतेषां मतमालम्ब्यमणिकृतापि शब्दानित्यत्वाद्यनुमाने ध्वन्यादावगत' सिद्धसाधनवारणाय वर्णात्मकत्वादिविशेषण पक्षे निवेशितम् । अतएव गन्धादिपक्षतावच्छेदकस्य, पृथिवीतरभेदादौ साध्ये, हेतुता नाचार्यैरनुमन्यते । व्याप्तिग्रह एव हेतुरूपपक्षतावच्छेदकसाध्ययोः सामाधि-

कारणभानेन सिद्धसाधनात्। सकलपृथिवीविषयकानुमितेरप्य योगात्। नचांशे साध्यसिद्धावपि, अधिकधर्मिविषयतया, यावत् पर्वतादिविषयकानुमित्युत्पाद उचितः। अधिकधर्मि-विषयकानुमितेः सिद्धिदशायां उत्पादे, वायोऽनित्या इत्यादि-सिद्धिदशाया, अनित्ये वाह्यनसौत्यादिसमूहालम्बनानुमित्युत्पाद स्याप्यौचित्यात्। नहि तत्र कस्याप्यनुमितिः, नवीनैरपि पक्षतावच्छेदकैक्य एवाश्रयः सिद्धिसाधनस्यादोषत्वस्वीकारात्। एवञ्च नवीनमत एव अवच्छेदकावच्छिन्नत्वावगाहि तदनवगाह्यनुमिति भेदेन पक्षताभेदस्य स्वीकरणीयतया गौरवम्। न च विशिष्टबुद्धौ धर्मितावच्छेदकव्यापकत्वभानानुपगमे, पक्षतावच्छेदकसामानाधि करण्यमात्रावगाहि बाधदशायां तत्सामानाधिकरण्येन तादृश-बाधविषयधर्मिविषयिण्याः कतिपयधर्मिविशेष्यकानुमितेरिव; सकल धर्मि विशेष्यकानुमितेरप्युत्पादौचित्यादवच्छेदकावच्छेदेना-नुमिताबुद्देश्यायामप्यंशतो बाधस्यादोषतापत्तिरिति वाच्यम्। सामानाधिकरण्यमात्रावगाहिन्या विशिष्टबुद्धौ, समानविषयक-तथाविध विपरीतनिश्चयप्रतिबन्धकतायाः, प्राचामनुभवतयांशतो-बाधस्य दोषतोपपत्तेः। एवञ्च यावत्पक्षविषयकानुमितौयाव-त्पक्षविषयकहेतुमत्ताज्ञानापेक्षया तद्विरोधितया भागासिद्धे-रपि दोषतानिर्वाहः। यच्च सकलपर्वतानां नैकपरामर्श-विषयता, अपि तु परामर्शत्रयविषयता, तच्च यावत्पर्वतविषयकानु-मितिरूपावच्छेदकावच्छेदेनानुमितिः प्राचीनमते दृष्टैव। नवीन मतेऽपि तच्च तादृशानुमितेरावश्यकत्वादित्यवच्छेदकावच्छेदेनानु

मितौ तादृशपरामर्शस्य हेतुत्वाकल्पनेनापि तन्मते लाघवम् । मैवं अवच्छेदकावच्छेदेन विशिष्टबुद्धौ व्यापकत्वभानानुपगमे व्यापकत्वभानस्य विपरीतज्ञानप्रतिबन्धकत्वप्रयोजकत्वासम्भवेन तत्प्रयोजकत्वस्य दुर्निर्व्वचतापत्तेः । न चैकरूपेण समानधर्म्मिविषयकत्वमेव विपरीतज्ञानविरोधित्वे बीजम् । तथासति पार्थिवगन्धत्वावच्छेदेन जलावृत्तित्वादिनिश्चयस्यापि द्रवगन्धत्वावच्छेदेन तन्निश्चयस्यैव, गन्धो जलवृत्तिर्नवेत्यादौ गन्धत्वादिसामानाधिकरण्यमात्रेण जलवृत्तित्वादिसंशये विरोधितापत्तेः । उभयोरेव निश्चययोर्गन्धत्वाश्रययावद्धर्म्मिणि ग्राह्यभावावगाहितयाऽविशेषात् । विरोधिविषयकत्वाविशेषे धर्म्मितावच्छेदककोटावधिकभानस्याविरोधिता बीजत्वाभावात् ।

नव्यमते, उभयनिश्चयविषयव्यापकतयोर्भेदादविशेषसम्भवात् । एतेनावच्छेदकावच्छेदेनानुमितौ व्यापकत्वभानापेक्षया लाघवाद्यावद्धर्म्मिद्वयखण्डैकविषयत्वाभ्युपगम एवोचित. । तदन्यविषयतैव सिद्धिसामान्यप्रतिबध्यतावच्छेदिका, सिद्धिसामान्याभावकालीनानुमितावेतादृश्यैकैकधर्म्मिविषयता अपीयत इति परास्तम् ।

पक्षतावच्छेदकसामानाधिकरण्येन तदवच्छेदेन च सिद्धिदशायां सामानाधिकरण्यमात्रावगाहिन्यनुमितिर्न जायते, उभयोरेव सिद्धोः पक्षतावच्छेदकवति साध्यसम्बन्धरूपतदुभयसामानाधिकरण्यावगाहितया तादृशानुमिते. तदतिरिक्तानवगाहित्वात्, अतस्तथाविधानुमितौ उभयविधसिद्धीरेव प्रतिबन्धकत्व दर्शयति तत्सामानाधिकरण्येनेति । तत्सामानाधिकरण्यमात्रेण पक्षता

यच्छेदकसामानाधिकरण्यमात्रेण, अवच्छेदकावच्छेदेनानुमितावपि सामानाधिकरण्यावगाहितया तद्भावसंलाभावच्छेद्यावच्छेदकभावावगाहित्वव्यवच्छेदार्थं मात्रपदम्। अवच्छेद्यावच्छेदकभावानवगाहित्वञ्च न सिद्धाभावजन्यलावच्छेदककोटौ निवेशनीयम्। उक्तदिशा आपत्तिसम्भवात्, पर्य्याप्तिनिवेशादेवोपपत्तेश्चैयर्य्यापत्तेश्चेत्यवधेयम्।

सिद्धिमात्रस्येति। मात्रपदं छत्स्नार्थकम्। तथाच पक्षतावच्छेदकसामानाधिकरण्येन तदवच्छेदेन च सिद्धेरित्यर्थः। प्रतिबन्धकता चोभयविधसिद्धयोः संसर्गादीनां पर्य्याप्तिनिवेश्यैकरूपेणैव यदुभयसाधारणं निश्चयत्वं शक्यते निर्व्वक्तुं, अन्यथा पुनः पृथक् पृथगेवेतिध्येयम्।

यत्तु सामानाधिकरण्येनानुमितौ तथाविधसिद्धेरवच्छेदकावच्छेदेन सिद्धिव्याप्यत्वरूपेण प्रतिबन्धकत्वेऽपि तत्तावच्छेदकावच्छेदेन सिद्धेर्न प्रतिबन्धकताधिक्यं अवच्छेदकावच्छेदेनानुमितौ तस्याः प्रतिबन्धकत्वे कल्पनीये, अवच्छिन्न संयोगादि पर्य्याप्तसंसर्गतात्वस्य प्रतिबध्यतावच्छेदकैक्यं निवेशनीयतया अवच्छिन्नत्वातिरिक्त-धर्म्मानवच्छिन्न-संयोगादि-निष्ठसंसर्गतात्वस्यैव च तदर्थतया तस्य शुद्धसंयोगादिसंसर्गकानुमितिसाधारण्येन तादृशप्रतिबन्धकतयैवोपपत्तेरिति तदसत्, सामानाधिकरण्येनानुमितुयामवच्छेदकावच्छेदेनानुमितुया मित्याद्याकारकेच्छानां पृथक् पृथगुत्तेजकतया वक्ष्यमाणतया पृथक् पृथक् प्रतिबन्धकतावश्यकत्वात्।

इत्यच्च लिङ्गभेदन्यायोऽनुसरणीयः। साध्यविशेष्यकसिद्धानन्तरं पक्षविशेष्यकानुमितेः प्रामाणिकत्वे तां प्रति पक्षविशेष्यिकैव सिद्धिर्विरोधिनी।

ननु ताट्स्थ्यसिद्धिदशायां पक्षतावच्छेदकावच्छेदेनानुमित्या-मित्याकारक-सिषाधयिषासत्त्वऽसतिचावच्छेदकावच्छेदेन हेतु-मत्तापरामर्शे, सामानाधिकरण्य मात्रावगाहि-परामर्शात्ताट्स्थ्या-नुमितेरापत्तिः, तथाविधसिषाधयिषासत्त्वेन पक्षताया अक्षतत्वादि-त्यत आह इत्यच्चेति। इत्यच्च तुल्ययुक्त्या पक्षतावच्छेदकावच्छिन्न-त्वतत्सामानाधिकरण्यमात्रावगाह्यनुमित्योः सिद्धेः पृथक् पृथक् प्रतिबन्धकत्वे च। लिङ्गभेदन्याय इति। यथा तत्तल्लिङ्गकानुमितौ सिद्धेः प्रतिबन्धकतायां तत्तल्लिङ्गकानुमितीच्छैवोत्तेजिका, नत्व्य-लिङ्गकानुमितीच्छापि, तथा पक्षतावच्छेदकसामानाधिकरण्य-मात्रावगाहिनीमनुमितिं प्रति सिद्धेः प्रतिबन्धकतायां ताट्स्थ्यानु-मितीच्छैवोत्तेजिका, नत्व्यविधानुमितीच्छेति स्वीकरणीयमिति नातिप्रसङ्ग इत्यर्थः। यदि पर्व्वते वह्निरित्याद्याकारकसाध्यनि-श्चयानन्तर पर्व्वतो वह्निमानित्याद्याकारकानुमितिर्जायते, तदा साध्यविशेष्यकानुमितौ साध्यविशेष्यकसिद्धिरेव प्रतिबन्धकत्वेन सामान्यतः साध्यपक्षवैशिष्ट्यावगाह्यनुमितौ ताट्स्थ्यसिद्धित्वेन नैकं प्रतिबन्धकत्वं कल्पनीयम्। अपि तु विशिष्यैव प्रतिबन्धकताद्वयं, अगत्या गौरवस्यादोषत्वादित्याशयवानाहसाध्यविशेष्यकेति। द्वयोः समानविषयकत्व विशेष्यविशेषणभाववैपरीत्यमकिञ्चित्करमित्यभि-

एवञ्च पक्षविशेष्यकसिद्धानन्तरमपि साध्यविशेष्यकानुमितिर्जायते, तुल्यन्यायात् समानाकारायाः सिद्धेः प्रतिबन्धकत्वे पर्य्यवसानात्। तादृशानुमितिं प्रायेणानिर्भरसूचनायप्रामाणिकत्व इत्युक्तम्। पक्षविशेष्यिकैवेति। तथाच प्रकारतावि[शे]ष्यते निवेश्यैव प्रतिबध्यप्रतिबन्धकभावः कल्पनीय इति भावः। तत्र तादृशानुमित्यभावस्य प्रामाणिकत्वे तु, उभयविध-ज्ञानसाधारण-पक्षसाध्यवैशिष्ट्यावगाहि-नियतत्व-स्यानतिप्रसक्तस्य सुवचत्वे, उभयविधसिद्धीरनुगतरूपेणैव प्रतिबन्धकता, प्रतिबध्यतावच्छेदकन्तु पक्षविशेष्यकसाध्यप्रकारकानुमितित्वादिकमेव नवनुगतम्। पक्षविशेष्यकसाध्यप्रकारकानुमितिर्जायतां साध्यविशेष्यकपक्षप्रकारकानुमितिर्जायतामित्याकारिकयोरिच्छयोः पृथक् पृथगुत्तेजकत्वानुरोधात्।

एवञ्च, साध्यविशेष्यकसिद्धानन्तरं पक्षविशेष्यकानुमित्युत्पत्तेः प्रामाणिकत्वे च। तुल्यन्यायादिति। पर्य्यवसानादित्यन्तस्य हेतुः। समानाकारायाः सिद्धेरिति, अन्यूनाकारसिद्धेरित्यर्थः। पर्व्वतः सुन्दरवह्निमानित्यादिसिद्धिदशायामपि न्यूनविषयिण्याः पर्व्वतो वह्निमानित्याद्यनुमितेरनुत्पादात्। अधिकविषयकसिद्धेरधिरोधित्वेऽवच्छेदकावच्छेदेन सिद्धेः सामानाधिकरण्येनानुमितौ प्रतिबन्धकतानिवेशनस्यामङ्गतेः। एवं जातिमत्तिघादे गोत्वत्वेन गोवृत्तित्वानुमानं सिद्धसाधनान्न सम्भवतीति अविशिष्टहेतुना विशिष्टसाध्यसाधन एव सिद्धसाधनानवकाशो न तु विशिष्टेनाविशिष्ट-

प्रति सिद्धिमात्रं विरोधि साध्यप्रसिद्धिरेव वा । अत-
एव प्रसिद्धसाध्यकस्थले पक्षविशेष्यिकैवानुमितिरनुभू-
यते इति ।

साधनेऽपीति जात्या व्यक्त्यनुमानपक्षमाक्षिप्य मिश्रा अर्थापत्त्या
वा तत्सिद्धिरिति मूलमवतारयामासुः । ननु साध्यविशेष्यकानु-
मितिस्तावन्न सर्व्वानुभवसिद्धा पर्व्वतो वह्निमानित्याद्याकारिकाया
एवानुमितेरनुभवात् किन्त्वप्रसिद्धसाध्यकस्थले विशेषणज्ञानादि-
विरहेण साध्यविशेषणकानुमितेरनुपपत्त्या साध्यविशेष्यकानुमिति
रूपेयते एवञ्च पक्षविशेष्यकसिद्धिदशायामपि तादृशानुमितेर-
प्रामाणिकतया तदनभ्युपगमेऽपि चतिविरहात् । तां प्रति साध्य-
पक्षवैशिष्ट्यावगाहि ज्ञानत्वेनोभयविधसिद्धिसाधारणेनापि प्रति-
बन्धकत्वं सम्भवतीत्यभिप्रेत्य मतान्तरमाह तादृशानुमितिमिति ।
साध्यविशेष्यकानुमितिमित्यर्थः, सिद्धिमात्रं, पक्षविशेष्यिका साध्य-
विशेषिका च सिद्धिरित्यर्थः । ननूच्छूङ्खलसाध्यज्ञानदशायामपि
साध्यविशेष्यिकानुमितिरप्रामाणिकी, तत्र साध्यविशेषणकानु-
मितेरेव सम्भवादिति, तादृशानुमितिप्रतिबन्धकतायां पक्षादि-
विषयतायाः सिषाधयिषाविरहस्य निश्चयत्वस्य च निवेशनं
गौरवायेत्यभिसन्धायाह साध्यप्रसिद्धिरिति । साध्यतावच्छेदकप्रका-
रकज्ञानमित्यर्थः । तेनेतरव्यावृत्तीभूताभावप्रतियोगिपृथिवीत्ववती
पृथिवीत्यादिपरामर्शाङ्गेदत्वादिना साध्यज्ञानसत्त्वेऽपि पृथिव्या-
मितरभेद इत्याद्याकारकानुमितेर्नानुपपत्तिः । न च तत्र पृथिवी

इतरभिन्ना इत्येतादृशानुमितेः सम्भवः, विशेषणतावच्छेदकीभूतेतरभेदत्वादिप्रकारकज्ञानविरहात् । अथेतरभेदत्वादिप्रकारकज्ञानस्य यदीतरभेदत्वाद्यवच्छिन्न मुख्यविशेष्यकज्ञानत्वं प्रतिबध्यतावच्छेदकं, तदा तथाविधज्ञानदशायां इतरभेदादिपक्षकप्रमेयत्वानुमितेरनुपपत्तिः । तद्धर्मावच्छिन्नविधेयकत्वस्याधिकरणनिर्विशेषेऽपि इतरभेदः प्रमेयः पृथिवी इतरभिन्नेत्यादिसमूहालम्बनानुमितेर्गोत्वाभावो गोत्वाभाववानित्याद्यनुमितेश्चानुपपत्तिः। अत्र केचित् पृथिवी इतरभिन्नेत्यादिसाध्यविशेषणकानुमितौ तथाविधप्रत्यक्षादिसाधारणी विशेष्यत्वाद्यवच्छेदकतामिवा प्रकारतैव विधेयता साध्यविशेष्यकानुमितौ च तत्तोऽन्या तथाच प्रकारतान्नविधेयतैव साध्यप्रसिद्धिप्रतिबध्यतावच्छेदिकेति नानुपपत्तिरित्याहुः ।

तद्धप्रकारताविशेषस्य विधेयतात्वोपगमे जलभेदे तेजोभेदः इत्याद्याकारक तेजोभेदादिसाध्यविशेष्यकानुमितेर्जलभेदादिविधेयकत्वापातात् । नचाधेयतासम्बन्धावच्छिन्नप्रकारतात्वाद्दोषः तदिति वाच्यम् । तथा सत्याधेयतासम्बन्धेन जलभेदादिसाध्यकतादृशानुमितेरपि तद्विधेयकत्वानुपपत्तेः । यदि च यत्राधेयत्व साध्यतावच्छेदकसम्बन्धस्तत्र विधेयत्वमतिरिक्तमित्युच्यते, तदा तत्सम्बन्धेन जलभेदसाध्यकानुमितौ प्रकारतामिवविधेयतापत्तिर्यां साध्यप्रसिद्धाभावव्यभिचारो दुर्वारः ।

वस्तुतस्तु तद्धर्मावच्छिन्नाप्रकारकत्वे सति तद्धर्मावच्छिन्नविधेयकानुमितित्वमेव तद्धर्मप्रकारकज्ञानप्रतिबध्यतावच्छेदकं,

साध्यप्रसिद्धिस्थले च साध्यप्रकारिका एवानुमितिर्जायते न तु तदप्रकारिकेति न तत्र व्यभिचारः । अतएव, साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेः प्रतिबन्धकत्वादेव। प्रसिद्धसाध्यकस्थले, अभावरूपसाध्यप्रसिद्धिस्थले, न तु भावसाध्यकस्थले इत्यर्थः। तत्र परामर्शस्य नियमतः साध्यघटितव्याप्तिविषयकतया साध्यविशेष्यकानुमितेरप्रसिद्धया साध्यप्रसिद्धिप्रतिबन्धकतायाः कल्पयितुमशक्यत्वात् उपष्टम्भकत्वासङ्गतेः, स्वनिरूपितप्रकारतानवच्छेदकत्वविशिष्टविधेयतावच्छेदकतापर्य्याप्त्याश्रयत्वसम्बन्धेनानुमितिं प्रति, विषयतावच्छेदकतारूपविषयनिष्ठप्रत्यासत्या ज्ञानस्य सर्व्वसाधारणेन प्रतिबन्धकताया आपातत उक्तिसम्भवेऽपि ; साध्याघटितव्यतिरेकव्याप्तिविषयकपरामर्शघटितसामग्र्या एव साध्यविशेष्यकानुमित्युत्पादप्रयोजकतायाः कृतत्वाद्भावसाध्यकस्थले साध्यविशेष्यकानुमितेरप्रसक्त्या, अनुमितेः साध्यविशेष्यकत्वे तादृशप्रतिबन्धकताया अप्रयोजकत्वात्, उपष्टम्भासङ्गतितादवस्थ्यात् ।

यत्तु यत्र महानसीयवह्निमात्रविषयकः परामर्शः तत्र पक्षधर्म्मताबलात्, पर्व्वते पर्व्वतीयवह्निर्भासमानः विशेषणज्ञानविरहेण विशेष्यतयैव भासत इति भावसाध्यकस्थलेऽपि साध्यविशेष्यकानुमितिसम्भव इति तत्तुच्छं ; सामान्यलक्षणायाः प्रत्यासत्तित्वमते महानसीयवह्निविषयकपरामर्शे पर्व्वतीयवह्निभानप्रयोजकस्य दुर्लभत्वात् । न च स्मरणात्मकपरामर्शे कदाचिदुद्बोधकविरहात्तदभानसम्भव इति वाच्यं, उद्बोधकस्य फलबलकल्पत्वाद्विशिष्टविशेषणबुद्धौ विशेषणज्ञानहेतुताया निर्य्युक्तिकत्वात्, विशेषणताव-

च्छेदकप्रकारकज्ञानस्य चाध्यत्वात्, पर्वतीयवह्नित्वविषयकपरामर्शादपि वह्नित्वेन तद्विशिष्टविशेषणकानुमितिसम्भवाच्च ।

इदमवधेयं, साध्यप्रसिद्धिप्रतिबन्धकतायामपि साध्यविशेष्यकानुमितित्वप्रकारकेच्छाया उत्तेजकत्वमावश्यकम् । अन्यथा पक्षविशेष्यकसिद्धिदशाया लाङ्गलेच्छासत्त्वे साध्यविशेष्यकानुमित्यापत्तेः । सिद्धासम्भवद्धितसाध्यप्रसिद्धिदशायां साध्यविशेषणकानुमितेः सम्भवेन, तत एव उद्देश्यसंशयनिवृत्त्यादिसम्भवे साध्यविशेष्यकानुमित्यनभ्युपगमेऽपि न क्षतिरत इत्यभिप्रेत्यैव साध्यप्रसिद्धेस्तद्विरोधित्वमुररीकृतं ग्रन्थकृता । प्रकृते च साध्यविशेषणकानुमित्युत्पादासम्भवेन लाङ्गानुमित्यापत्तौचित्यात् । तथाच यत्र सिद्धासम्भवद्धिता साध्यप्रसिद्धिदशायामनुमित्सा तत्र व्यतिरेकिपरामर्शात्, साध्यविशेषणिका तद्विशेषणिका चानुमितिरापद्येत । नच्चैकविधादेव परामर्शादेकदा द्विविधानुमितिरानुभविकी तस्माद्व्यतिरेकिपरामर्शात्, साध्यप्रसिद्धिदशायामपि साध्यविशेषिकाया एवानुमितेः स्वीकारः समुचितः । सिद्धिप्रतिबन्धकतापेक्षया साध्यप्रसिद्धिप्रतिबन्धकतायामवच्छेदकलाघवमप्यकिञ्चित्करमेव, व्यतिरेकिपरामर्शात् क्वचित्साध्यविशेषणकानुमितिस्वीकारे लाङ्गानुमितिं प्रति व्यतिरेकिलिङ्गकत्वान्वयिलिङ्गकत्वप्रकारकानुमित्सां प्रत्युत्तेजकौचित्य सिद्धेः प्रतिबन्धकताद्वयेनैव गौरवात् ।

परे तु अप्रसिद्धसाध्यकस्थलेऽपि साध्यविशेषणिकैवानुमितिर्जायते इतरभेदत्वादिरूपविशेषणतावच्छेदकप्रकारकज्ञानविरहेण

विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति न्यायेनैव पृथिवीतरभिन्नेत्यादयनुमितिसम्भवात् । न च लाघवानवकाशः तादृशानुमितिं प्रत्येव साध्यप्रसिद्धिप्रतिबन्धकताया अवश्यकल्पनीयत्वादिति वाच्यम् । तथाविधानुमितौ यादृशी विषयता तस्याः साध्यप्रसिद्धिकालीन-विशिष्टवैशिष्ट्यावगाह्यनुमिति साधारणोपगमात्, साध्यविशेष्यकानुमित्यनुपगमेन साध्यप्रसिद्धिप्रतिबन्धकताया एव कल्पनात् । न च सिद्धिकाले तथाविधानुमितेर्व्वारणाय तत्र सिद्धेः प्रतिबन्धकताकल्पनाधिक्यमावश्यकमिति वाच्यम् । विशिष्टवैशिष्ट्यावगाह्यनुमितिस्थलीयसिद्धिप्रतिबन्धकतयैवोपपत्तेः । इतरभेदत्वादिना इतरभेदादिविधेयकानुमितित्वस्य तत्स्थलीयप्रतिबध्यतावच्छेदकस्योभयसाधारणत्वादिति ।

यत्तु विशिष्टवैशिष्ट्यावगाह्यनुमितौ विशिष्टवैशिष्ट्यावगाहिनी सिद्धिरेव विरोधिनी न तु केवलं विशेष्ये विशेषणम्, तत्र च विशेषणान्तरमिति रीत्या जायमानापि सा तथा । तस्याः संसर्गांशे विशिष्टनिरूपितत्वानवगाहितया न्यूनविषयकत्वात् । एवञ्च केवलं विशेष्ये विशेषणमिति न्यायेनानुमितेरुपगमे, तादृशसिद्धिदशायां तस्या वारणाय तत्र तादृशसिद्धेर्विरोधित्वकल्पनाधिक्यमावश्यकमेवेति किमपराद्धं साध्यविशेष्यकानुमितिस्वीकारिणः । विशिष्टवैशिष्ट्यानवगाहिसाध्यविशेषणकानुमितिरनभ्युपगमेन प्रतिबध्यप्रतिबन्धकभावसाम्यादिति तदपि तुच्छम् । विशिष्टवैशिष्ट्यभानमात्रविरोधिबाधादिकाले केवलं विशेष्ये विशेषणमित्यादिन्यायेनानुमितेः सर्व्वसम्मततया, तत्र तादृशसिद्धेः प्रतिबन्धकताया आव-

यकत्वेन साध्यविशेष्यकानुमितिमीकर्तुरधिकप्रतिबन्धकताकल्पनस्य दुर्वारत्वादिति। यदि च विशिष्टप्रतियोगिकविलक्षणवैशिष्ट्यावगाहिन्यपि विशिष्टविशेषणज्ञानमपेक्षितं, तदा तुल्ययुक्त्या विशिष्टविशेष्यकज्ञानेऽपि विशिष्टविशेष्यज्ञानहेतुतया साध्यतावच्छेदकविशिष्टविशेष्यकानुमितिरप्रसिद्धसाध्यकस्थले न सम्भवति। न च विशेष्यज्ञानस्य विशिष्टबुद्धौ हेतुतया तद्विशेषस्यापि न तद्विशेषहेतुतेति वाच्यम्। सामान्यप्रत्यासत्तिजन्यज्ञाने विशेष्यज्ञानस्य व्यभिचारेण सामान्यहेतुत्वासम्भवेऽपि तुल्यरूपोभयविशेषणावगाहिज्ञानस्यापि एकविशिष्टापरविशेषणकत्ववारणाय विशेषहेतुतायाः आवश्यकत्वात्, अन्यथा विशेषणज्ञानस्यापि विशेषहेतुतायाः उच्छेदात्। अतएव विशिष्टवाक्यार्थविशेष्यकशाब्दबोधे अवान्तरवाक्यार्थज्ञानापेक्षा। न च साध्यविशेष्यकानुमितौ तुल्यरूपयोरेव पक्षविशेषतावच्छेदकयोः साध्यांशे प्रकारता नत्वेकविशिष्टांशेऽपरस्येति न विशिष्टसाध्यज्ञानापेक्षेति वाच्यम्। निर्विशेष्यतावच्छेदकानुमितेरनुभवविरुद्धत्वात्, प्रत्यक्षस्य च निर्धर्मितावच्छेदकत्वाभ्युपगमात् प्राथमिकाभावप्रत्यक्षे प्रतियोग्यधिकरणयोरभावविशेषणतया भानोपपत्तिः। तथाच साध्यविशेष्यकानुमितिर्निर्युक्तिकैवेति वदन्ति।

अथ जलव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्यादिपरामर्शोद्भेदत्वरूपविशेषणज्ञानं विना स्वरूपतस्तत्प्रकारिका पृथिव्यां जलभेद इत्याद्याकारिका अनुमितिरेव कथमुत्पद्यत इति चेत्। कथञ्चित्तत्र जलीयत्वादिमात्रपुरस्कारेणैवाभावानुमित्युपगमादिति क्षतं पल्लवितेन।

अत्र च व्याप्तिस्मरणादिना पूर्व्वानुमित्सानाशे परामर्शकाले च सिद्धिसत्त्वे ऽनुमित्सान्तरोत्पत्त्यैव अनुमितिस्तयैव कारणीभूतस्य विशिष्टाभावस्य सम्पत्तिरित्युपाध्यायाः ।

ननु सिषाधयिषाविरहविशिष्टसिद्धभाधस्य पक्षतात्वेऽपि सन्देहवत्परामर्शपूर्व्वमित्यादिग्रन्थेन सिषाधयिषापक्षतापक्षोक्तस्य व्यभिचारस्य सिद्धिकालीनानुमितिस्थले तादवस्थ्यम् । सिषाधयिषानाशे विशिष्टप्रतिबन्धकस्यानुमित्यव्यवहितप्राक्कालेऽक्षतत्वादित्यादेपे यज्ञपतिसमाधानमाहाच्च चेति । व्याप्तिस्मरणादीत्यादिनाऽनुमित्सादितीयक्षणे यत्र पक्षधर्म्मताज्ञानं तत्स्थलीयतादृग्ज्ञानपरिग्रहः । पूर्व्वेति । व्याप्तिस्मरणादिपूर्व्वकालीनेत्यर्थः । परामर्शदशायामसत्यां सिद्धौ विशेष्याभावादेव विशिष्टाभावनिर्व्वाहेण नानुमित्यनुपपत्तिरतः, परामर्शकाले च सिद्धिसत्त्वे इति । अनुमित्सान्तरेति । परामर्शद्वितीयक्षणे तदव्यवहितप्राक्क्षणवेत्यादिः, तदुत्पत्तिप्रकारस्याधस्ताद्वर्णितः । एवञ्च सिषाधयिषापक्षतापक्षः, सिषाधयिषाविरहेपीत्यादिदोषादेव हेय इति भावः ।

ननु सर्व्वत्र पुनरनुमित्सोत्पत्तौ मानाभाव इत्यत आह तथैवेति । अनुमित्सान्तरोत्पत्त्यैवेत्यर्थः । कारणीभूतस्येति । तथाच तादृगविशिष्टाभावात्मककारणं विनानुपपत्तिरेव सिद्धिस्थलीयविशिष्टाभावनिर्व्वाहकानुमित्सान्तरोत्पत्तौ मानमिति भावः ।

अन्ये तु द्विक्षणान्तरितायामपि अनुमित्सायामनुमितिदर्शनात्, अनुमित्सा योग्यता वाच्या। सा च न स्वोत्पत्त्यनन्तरं स्वविषयसिद्धानुत्पादः। अनुमित्सानन्तरं सिषाधयिषोत्पत्तिक्षणमारभ्य-क्षणचतुष्टयात्मककालस्यैव विवक्षणीयतया त्रिक्षणान्तरानुमित्साख्येऽनुमित्यनिर्व्याहेति दूरणहयानवकाशः। एवञ्चानुमितिदर्शनादित्यस्यानुमित्सोत्पत्ते चतुर्थक्षणे पञ्चमक्षणे वा अनुमितिदर्शनादित्यर्थः। वाच्या सिषाधयिषापदेन विवक्षणीया। सा च, योग्यता च। स्वोत्पत्त्यनन्तरमिति, स्वप्रागभावोत्तरमित्यर्थः। स्वोत्पत्तिर्यत्नादिति व्युत्पत्त्या स्वोत्पत्तिपदस्य प्रागभावपरत्वात्, अन्यथा सिषाधयिषोत्पत्तिकाले योग्यतानुपपत्त्या तद्वितीयक्षणे अनुमितेरनिर्व्याहात्। सिद्धानुत्पादः, सिद्धिप्रागभावः, तथाच स्वप्रागभावध्वंसविशिष्ट स्वविषयसिद्धिप्रागभाव एवानुमित्सायोग्यतेति पर्य्यवसितम्। अनुमित्सापूर्व्वं तद्विषयीभूतसिद्धानन्तरत्वानुमितिवारणायदलद्वयोपादानम्। न चानागतानां यावदनुमितीनामेवानुमित्साविषयत्वसम्भवात्

एतन्मते एव दीधितिकृतोऽपि निर्भरः मिश्रादिमतस्य गौरवकवलितत्वादिति ध्येयम्।

मिश्रमतमाह अन्येत्विति। द्विक्षणान्तरितायामपीति। द्विक्षणव्यवहितायां क्षणत्रयव्यवहितायाश्चेत्यर्थः। अनुमित्सायां अनुमित्सोत्पत्तौ। तेन एकक्षणान्तरितायामप्यनुमित्सायां यत्रानुमितिस्तत्राप्यनुपपत्तिसत्त्वेन तदनभिधाने न्यूनता। एवं प्रथमक्षणे सिषाधयिषोत्पत्तिक्षणमारभ्य-क्षणचतुष्टयात्मककालस्यैव विवक्षणीयतया त्रिक्षणान्तरानुमित्साख्येऽनुमित्यनिर्व्याहेति दूरणहयानवकाशः। एवञ्चानुमितिदर्शनादित्यस्यानुमित्सोत्पत्ते चतुर्थक्षणे पञ्चमक्षणे वा अनुमितिदर्शनादित्यर्थः। वाच्या सिषाधयिषापदेन विवक्षणीया। सा च, योग्यता च। स्वोत्पत्त्यनन्तरमिति, स्वप्रागभावोत्तरमित्यर्थः। स्वोत्पत्तिर्यत्नादिति व्युत्पत्त्या स्वोत्पत्तिपदस्य प्रागभावपरत्वात्, अन्यथा सिषाधयिषोत्पत्तिकाले योग्यतानुपपत्त्या तद्वितीयक्षणे अनुमितेरनिर्व्याहात्। सिद्धानुत्पादः, सिद्धिप्रागभावः, तथाच स्वप्रागभावध्वंसविशिष्ट स्वविषयसिद्धिप्रागभाव एवानुमित्सायोग्यतेति पर्य्यवसितम्। अनुमित्सापूर्व्वं तद्विषयीभूतसिद्धानन्तरत्वानुमितिवारणायदलद्वयोपादानम्। न चानागतानां यावदनुमितीनामेवानुमित्साविषयत्वसम्भवात्

ल्तरमन्तरानुमित्यनुत्पादे दिवसादिविलम्बेनेन्द्रियादिना निर्णीतेऽपि साध्ये, लिङ्गपरामर्शादनुमितिप्रसङ्गात्। किन्तु अनुमित्यानन्तर लिङ्गदर्शनादिक्रमेण यावता

स्वविषयीभूतैकानुमितावुत्पन्नायामपि भाविव्यक्त्यन्तरप्रागभाव मादाय योग्यताप्रसङ्ग इति वाच्यम्। स्वविषयसिद्धित्वावच्छिन्न-प्रागभावस्य विवक्षितत्वात्। अतएव स्वविषयेत्युक्त, यत्किञ्चिद्धि शेषध्वसवति काले सामान्यधर्मावच्छिन्नप्रागभावासभवेन सिद्धि त्वावच्छिन्नप्रागभावस्य कदाप्यसत्त्वात्। सामान्यधर्मस्य प्राग भावप्रतियोगितावच्छेदकत्वानङ्गीकारे पुन स्वविषयसिद्धसमान-कालीनत्वमेव प्रागभावे विशेषण देयम। वह्न्यनुमितिर्घटानुमितिश्च जायतामित्यादीच्छानन्तरं घटानुमित्यादिरूपविषयसिद्धावपि वह्न्याद्यनुमित्युत्पत्त्या सिद्धौति, प्रकृतसाध्यपक्षवैशिष्ट्यावगाहिनिश्च यार्थकम्। अनुमित्योत्तर दिवसादिविलम्बनाप्यनुमितिप्रसङ्गादि त्यन्वय । अन्तरानुमित्युत्पादे स्वविषयसिद्धित्वावच्छिन्नप्रागभावा सत्त्वेन योग्यताच्चते र्नापत्तिसम्भव इत्यतोऽन्तरानुमित्यनुत्पाद इति। द्विचित्रणादिविलम्बेनानुमितेरिष्टत्वात्, दिवसादिविलम्ब नेति। सिद्धासत्त्वे अनुमितेरिष्टत्वादिन्द्रियादिना निर्णीत इति। लिङ्गेन निर्णीते साध्येऽन्तरानुमित्यनुत्पाद एव न सम्भवतीत्यत इन्द्रियादिनेति। आदिनाशब्दादिपरिग्रह । अनुमित्सेति। अनु मित्साधिकरणक्षणाव्यवहितोत्तरक्षणे क्रमेण पक्षविषयकलिङ्गज्ञान व्याप्तिस्मरणयोरुत्पत्तौ सत्यामुत्सर्गतोयावता कालेन परामर्शो

मित्यनुत्पादोऽनुभवसिद्धस्तदा, सिद्धापि तावानेव समय उपलक्षणीयः। विशिष्यक्षणनियमस्त्ववहितैः करणीय इति वदन्ति।

अनुमित्योत्तरमनुमित्यन्तरोत्पत्त्या दिवसादिविलम्बेनापि सिद्धानन्तरमनुमित्युत्पत्त्या तावत्कालस्य चानुत्तेजकत्वादनुमित्यनागेऽपीति। अनागनुमितायामसत्यामपीत्यर्थः। असत्यां सिद्धौ अनुमित्योत्तरं दिवसादिविलम्बेनाप्यनुमित्युदयात्, सिद्धौ सत्यामिति। प्रागित्यादिः। यावत्कालमध्ये, यावत्क्षणानन्तरक्षणे, तावानेव कालः। तावत्क्षणाधिकक्षणानवस्थायीस्थूलकालः। अनुमितस्या, अनुमितसार्थकसिद्धाधियायादेन। उपलक्षितः, विवक्षितः। अनुमित्यायोग्यतायां उत्तेजकत्ववत् तृप्त्युत्पत्त्या सिद्धियोग्यतायां अपि प्रतिबन्धकत्वमुचितमित्याशयेनाह यदि वेति। सिद्धानन्तरमिवेति शेषः। तेन नाम्य वेत्यर्थं द्विक्षणमध्ये इति द्विक्षणमध्ये त्रिक्षणमध्ये वेत्यर्थः। सिद्धेयतुर्थक्षणे पञ्चमक्षणे वेति फलितम्। सिद्धापि, सिद्धिपदेन तावान् तदाधानन्तरमपि द्विक्षणस्थायी त्रिक्षणस्थायी वा उपलक्षणीयः विवक्षणीयः।

ननु सिद्धुत्तरं कियत्क्षणमध्ये अनुमितिर्न जायते कियत् क्षणानन्तरं वा जायत इत्यस्य विशिष्यनिर्णेतुमशक्यतया कालस्य प्रतिबन्धकत्वकल्पनमसङ्गति। एवमुत्तेजककालस्यापि विशिष्य निर्णेतुमशक्यतया तदुत्तेजकत्वमपि तथैवास्त आह विशिष्येति अवहितैः सावधानैः नियमो निर्णयः। तथाच येषां विशि

अत्र च यत्र साध्यनिर्णयेच्छानन्तरं पूर्वोक्तन्यायेन

तावत्कालनिर्णयो भवति, तेषामेव तत्र विशिष्य प्रतिबन्धकत्वाव-गमो भविष्यति, अन्येषां तु सामान्यत एवेति भावः ।

केचित्तु ननु कालविशेषाणां सिद्धिसिषाधयिषाधिकरणकाल-त्वेन चेत्प्रतिबन्धकोत्तेजकभावः । तदा अधिकाधिककालस्यापि तथात्वप्रसङ्गः, अनतिप्रसक्तानुगतधर्म्मान्तरञ्च दुर्व्वचमेवेत्यत आह विशिष्येति । अनतिप्रसक्तानुगतविशेषणविशेषं निवेश्येत्यर्थः । क्षणनियमः । कतिपयक्षणानामेव तथात्वं, नत्वधिकाधिकक्ष-णानामितिनियमनिर्व्वाहः । अवहितैः, निरुक्तिकुशलैः । सिद्धा-द्युत्पत्तिक्षणमारभ्य क्षणचतुष्टयादेः स्वप्रागभावानधिकरणत्वस्वना-गाधिकरणसमयनाद्याधिकरणसमयनागानधिकरणत्वोभयसम्बन्धेन सिद्धादिमत्त्वमेवानुगमकमनतिप्रसक्तञ्चेति भावः । इति व्याच-क्षते । वदन्तीत्यस्वरसस्चनाय । स च उक्तपरम्पराया: सम्बन्ध-त्वे मानाभावात् । तत्तद्व्यक्तित्वेन उत्तेजकत्वाभ्युपगमे च उक्त-दोषापातादिति ।

इच्छायाविषयसिद्धौ सत्यां चरितार्थतया नोत्तरकालमनु-मितिर्जन्यत इति तद्वारणाय स्वविषयसिद्धयनुपस्थितत्वेनेच्छा विशे षणीया । तत्र, तद्विषयसिद्धिदशायाम् ।

परामर्शानुसित्सासमवधानसम्भव एव तद्विशेषणमर्थवद्भवति, तच्च आपाततो न घटते इच्छापरामर्शयोर्युगपदुत्पादासम्भवेनानु-मितिकाले एकतरविनाशावश्यकत्वादित्यतस्तदुघटयति अत्र

योग्यताविवक्षणे तु सुतरामेवेति । तदिच्छाविषय-सिद्ध्यनुपहितत्वं तद्विशेषणम् ।

यानुमिति-निष्ठेष्टसाधनता-विषयकत्वानुसरणम् । साध्यानुमिते-स्तदनन्तरं पुनस्तदनुमित्यापत्तेश्च सम्पादनाय, साध्यानुमित्याया: साध्यव्याप्यस्यापि निश्चितया तदनुमितेः सम्पादनाय च, साध्यव्याप्यानुमित्यास्तत्तत्स्थलीयादिनानुसरणम् । अनुमित्या-द्वितीयक्षणे साध्यस्याननुमितौ तदनन्तर तदनुमितिरिष्टैवेति । साध्यव्याप्यस्याननुमितौ च परामर्शाभावान्नापत्तिसम्भव इत्यत-स्तदनन्तरमुभयानुमित्यनुसरणम् ।

अनुमित्योत्पत्ति-क्षणावधिक-क्षणचतुष्टयादिरूप-योग्यताया उत्तेजकत्वमते, यत्र पर्वते वह्निमनुमिनुयामितीच्छा ततो वह्नि-व्याप्यवान् पर्वत इति परामर्शस्तदनन्तरञ्च पर्वतो वह्निमानि-त्यनुमितिस्तत्रापि तादृशानुमित्यापत्तिः सम्भवतीत्याह योग्य-तेति । तदिच्छाविषयसिद्ध्यनुपहितत्वं तदिच्छाया विशेषण देय-मिति शेषः । प्रत्यक्षात्मकसिद्धि-समवहितानुमितित्व-प्रत्य-क्षान्यज्ञानत्वादिप्रकारकेच्छाबलादेवानुमित्युत्पत्त्या तदिच्छाविष-येति सिद्धिविशेषणं, विशेष्यतयाऽभिमता या इच्छा तद्विषयेत्यर्थः । अथ तादृशेच्छाया उत्तेजकीभूतसकलेच्छासाधारणेनानुमिति-गोचरेच्छात्वेन निवेशे, प्रत्यक्षात्मकसिद्धेरपि निर्णयत्वादिप्रका-रकानुमित्साविषयतया विषयान्तरव्यावर्त्तकतापत्तिः । तत्त-द्व्यक्तित्वेन निवेशे च उत्तेजकीभूतेच्छाव्यक्तिसमसंख्याभावाना

पक्षसाध्यभेदेन च पक्षताया भेदात्, पृथक् पृथगेव कार्य्यकारणभावः । तथाच यत्र सिद्धानन्तरं बाधाप्यनु-

---

सिद्धौ विशेषणतया गौरवम् । तच्चादिच्छाविषयसिद्धरनुपस्थितत्व-दिच्छात्वेनोत्तेजकतामपेक्ष्य लाघवात् तत्तत्त्वावच्छेदेच्छात्वेन तथात्वकल्पनाप्रसङ्गश्चेति चेन्न । प्रागुक्तयुक्त्या इच्छाविषयतावच्छेदकतायाः प्रकृतसाध्यविशिष्टप्रकृतपक्षविषयकानुमितित्वादि-पर्य्याप्तिनिवेशस्यावश्यकतया इच्छाविषयतावच्छेदकतापर्य्याप्त्यधि-करणरूपभेदेनेच्छायाः पृथक् पृथगुत्तेजकताया आवश्यकत्वात् । तत्तद्धर्मावच्छिन्नानुपस्थितत्व तत्तद्धर्मप्रकारकेच्छायां निवेशनीय-मित्यत्रैव तात्पर्य्यात् । अतएव चानुमितिश्चयं जायतामित्ये ताहशेच्छाबलात् क्रमिकानुमितिद्वयमुत्पद्यते, एकानुमित्युपधान-दशायामपि द्वितीयेच्छानुपस्थितत्वस्याक्षतत्वात् । अथवा स्वविषयकत्व-स्वसामानाधिकरण्योभयसम्बन्धेन प्रकृतपक्षधर्मिक-प्रकृतसाध्यनियतविशिष्टान्यत्वमेवानुपस्थितत्वान्तार्थः । भेदस्या व्याप्यवृत्तितया यत्रानुमितिदशायामिच्छायाः सिद्धिविशिष्टत्वेऽपि, तत्रूर्वं विशिष्टान्यत्वमप्यव्याहतं प्रकृतपक्षकप्रकृतसाध्यकानुमिति-विषयकस्मूहालम्बनेच्छायां यत्रान्यपक्षकानुमितेरन्यसाध्यकानु-मितेर्वा विषयता, तत्र तत्तदन्यानुमित्यनन्तरं प्रकृतानुमिति-निर्व्वाहाय, प्रकृतपक्षप्रकृतसाध्यावगाहित्वं नियतविशेषणम् । एत-द्विशेषणमनन्तर्भाव्य द्वित्वादिप्रकारकेच्छायाः पृथगुत्तेजकत्वाङ्गी-कारात्रताहशेच्छाबलादनुमित्यनन्तरमनुमित्यनुपपत्तिः । द्वित्व-

मितिर्न जाता, तत्र सिद्धाभावमात्रं कारणं, न तु तत्र इच्छानिवेशोऽपि, गौरवात् प्रयोजनाभावाच्च । तेन यत्पक्षयत्साध्यकानुमितौ कस्यापि इच्छा न जाता,

---

कारकेच्छाबलाच्च नानुमितिद्वयानन्तरमनुमित्यन्तरं तावत्पर्यन्तमिच्छाया एवानवस्थानात् । योग्यताया उत्तेजकतामते च, द्विवादिप्रकारकेच्छायोग्यताया द्विवाद्यवच्छिन्नानुपस्थितत्वेन एव पृथगुत्तेजकता वाच्या इति ह्रतं विस्तरेण ।

नन्विच्छाया इच्छाघटितनिरूप्तायोग्यताया वा अभावेन विशिष्टायाः सिद्धेरभावस्य पक्षतात्व, यत्साध्यकयत्पक्षकस्थले कदाचिदपि कस्यचिदिच्छा न जाता, तत्र पक्षत्वाप्रसिद्धिरित्याशङ्कायां विश्वविषयिनीं भगवदिच्छामादाय, केषाञ्चित् समाधानमाचेष्टे, तादृशस्थले इच्छाविरहाविशेषितः सिद्धाभाव एव पक्षतेति समाधत्ते पक्षसाध्येति । पक्षतावच्छेदकसाध्यतावच्छेदकादिभेदेनित्यर्थः । पक्षताभेदादिति । सिद्धिपदार्थस्य प्रकृतपक्षतावच्छेदकादिघटितत्वादिति भावः । यत्रेति, यादृशपक्षक यादृशसाध्यकस्थले इत्यर्थः । सिद्धानन्तरं कदाप्यनुमितिर्न जातेति, सिद्धिकाले परामर्शादिसत्त्वेऽनुमित्साया असमवधानादिति भावः । सिद्धाभावमात्रमिति । इच्छाभावाविशेषितायां एव सिद्धेरभाव इत्यर्थः । सिद्धिकालीनानुमित्यनुरोधेनैव विशिष्टसिद्धाभावस्य पक्षतात्वोपगमादितिभावः । तेनेति, यत्रानुमित्युत्पत्तिरप्रसिद्धा प्रसिद्धापि वा नानुमित्युत्पादोपयोगिनी, तत्र विशिष्टाभावस्य पक्षतात्व-

तव उक्तिसाधारण्यमात्रसम्पादनाय, ईश्वरेच्छानिं नायासो नोपादेयः ।

यत्तु सिषाधयिषाविरहविशिष्टस्वज्ञानाव्यवहि

त्वीकारप्रयोजनविरहेणित्यर्थः । उक्ति साधारण्येति । सर्व पक्षतायाः सिषाधयिषाविरहविशिष्टसिद्धभावपदार्थत्वसम्भाद येत्यर्थः । नोपादेय इति । शब्दैकस्यानुपादेयतया कारणत च्छेदकगौरवसहिष्णुतायाः अन्याय्यत्वादिति भावः ।

परामर्शपूर्वकालीनसकलानुमितिसामान्यं प्रत्यनुमितित्वरूपेण योग्यतायाश्चोत्तेजकत्वमनादृत्यानुमितिमुपपादयतः सार्वभौम मतमाह यत्विति । सिषाधयिषानाशे सति याद्दशसिद्धानन्त मनुमितिस्थलस्याः सिषाधयिषाविरहविशिष्ट-स्वज्ञानाव्यवहितो त्तर-क्षणोत्पत्तिकानुमितिकतया सिद्धान्तनिवेशात्तदप्रतिबन्ध कत्वोपपत्तिः । सिषाधयिषाविरहविशिष्टत्वं स्वज्ञानस्य स्वावि करणदेशावच्छेदेन बोध्यम् । तेन सिषाधयिषावतोऽपि काल सिषाधयिषानधिकरणदेशावच्छेदेन सिषाधयिषाविरहविशिष्ट तया, यत्र क्रमेण सिषाधयिषामद्विपरामर्शानुमितिश्चक्तत्र सिष धयिषा-विरहविशिष्टत्वविशेषणेनोपपाद्यस्यानुमित्युत्पत्तिक्षणाव्यव धानस्यैवानुपपत्तितादवस्थ्य निरस्तं । स्वपदेनापि भेदप्रतियोगिनं सिद्धिर्वोपादेया । प्रतियोगिवैयधिकरण्यस्याभावविशेषणता माहत्य सिषाधयिषाधिकरणक्षणवारणं पुनरनुपादेयम् । प्रति

त्तरक्षणोत्पत्तिकानुमितिकभिन्ना या सिद्धिः, सिषाधयिषाविरहविशिष्टायास्तस्या अभावः पक्षता ।

योगिपदेन सिषाधयिषाविरहप्रतियोगिन एव विवक्षणीयतया सिषाधयिषायाः सिषाधयिषात्वेन निवेशनमुपेक्ष्य सिषाधयिषा विरहप्रतियोगित्वेन निवेशस्य शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वात् । सिषाधयिषानधिकरणत्वनिवेशनेच, सिषाधयिषाविरहांशवैयर्थ्याद्दृश्यमाणक्षणत्वनिवेशनव्याहत्यसङ्गतेः । सर्वेषामेव क्षणानां सिषाधयिषा विरहविशिष्ट-पूर्वपूर्वक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणतया तादृशध्वंसानधिकरणत्वरूपाव्यवहितत्वाश्रयक्षणाप्रसिद्धितः, सिषाधयिषाविरहविशिष्टक्षणे स्वाधिकरणत्वनिवेशः । स्वपदं, भेदप्रतियोगितत्तत्सिद्धिव्यक्तिपरम् । सिद्धिसामान्यपरत्वे पूर्वसिद्ध्यधिकरणकालध्वंसानधिकरणकालतया पूर्ववदप्रसिद्ध्यापत्तेः । इच्छाविरहविशिष्ट स्वक्षणाव्यवहितोत्तरत्वनिवेशे, ज्ञानेच्छयोर्युगपदुत्पादमते यत्राऽनुमित्साद्वितीयक्षणे घटेच्छासिद्ध्यात्मकपरामर्शः, तदुत्तरत्वानुमितिस्तत्र तादृशसिद्धेरिच्छाविरहविशिष्ट-स्वाधिकरण-क्षणाप्रसिद्ध्या ; इच्छाविरहविशिष्टस्वाधिकरणक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नैव सासिद्धिः । अनुमित्साविरहविशिष्टतदभावस्य परामर्शक्षणेऽसत्वात्तदुत्तरमनुमित्यनुपपत्तिरतः, सिषाधयिषापर्य्याप्तानुसरणम् । अथवा ज्ञानेच्छायोर्युगपदानभ्युपगमे, इच्छासामान्यनिवेशे यत्र घटेच्छानन्तरक्षणे सिद्ध्यात्मकपरामर्शस्तदनन्तरक्षणे सिद्धावप्रामाण्य-

ग्रहस्तदनन्तरमनुमितिः सिद्धेरप्रामाण्यज्ञानानाक्रन्दितायां एवानुमितिप्रतिबन्धकत्वात्तत्र तादृशानुमित्युत्पत्तिक्षणस्य सिषाधयिषाविरहविशिष्टसिद्धिद्वितीयक्षणाव्यवहितोत्तरतया सिद्धेः स्वपदेनोपादानसम्बन्धेनाविरोधितयाऽप्रामाण्यग्रहकालेऽनुमितिवारणाय सिषाधयिषापदम्। तथासति अनुमित्युत्पादक्षणस्य सिषाधयिषाविरहविशिष्टसिद्ध्युत्पादक्षणव्यवहितत्वान्नापत्तिः। ज्ञानेच्छयोर्योगपद्यानुपगमे, यत्रानुमित्साद्वितीयक्षणे सिद्ध्यात्मकपरामर्शस्तदनन्तरं घटेच्छा, तत्र तादृशसिद्धाधिकरणस्य कस्यापि क्षणस्येच्छाविरहविशिष्टत्वाभावात्; स्वपदेनोपादानसम्बन्धतया सिषाधयिषा-विरहविशिष्ट-तदभावीनानुमित्यव्यवहित-पूर्वक्षणे इति तत्रानुमितिनिर्व्वाहाय इच्छासामान्योपेक्षणम् इति तु न साधीयः। घटेच्छोत्पत्तिर्यत्रक्षणे दर्शिता तत्पूर्व्वमनुमितिसामग्रीसत्त्वे तदानीमनुमित्यनुत्पादबीजस्य दुर्घटत्वात्। न चानुमित्साप्रयोजकपूर्व्वकालोत्पन्नापेक्षाबुद्ध्यात्मक बाधादिवशात्तदानीमनुमित्यनुत्पादसम्भवः। अपेक्षाबुद्ध्यनन्तरक्षणे विशेषगुणानुत्पत्तावेवं तथाः क्षणत्रयावस्थानसम्भवात्।

यत्तु यत्रानुमित्यनन्तरं घटेच्छातदनन्तरं सिद्ध्यात्मकपरामर्शस्तदनन्तरञ्चानुमितिस्तत्रानुमित्युत्पादक्षणेनेच्छा-विरह-विशिष्ट-सिद्ध्यधिकरणक्षणाव्यवहितोत्तर इति तादृशसिद्धेस्तदनुमित्यप्रतिबन्धकत्वाय सिषाधयिषापर्य्यन्तानुसरणमिति। तदप्यसत्। इच्छाविरहविशिष्ट-स्वक्षणाव्यवहितोत्तरत्वशरीरे, अव्यवधानप्रतियोगिस्वक्षण एवेच्छाविरहविशिष्टत्वनिवेशस्य प्रयोजनसत्त्वया, तदुक्त-

रत्वप्रतियोगिनि क्षणे तद्विशिष्टत्वस्यानिवेशनीयतया, उक्तानुमित्युत्पत्तिक्षणस्य, इच्छाविरहविशिष्टतत्सिद्ध्यधिकरणक्षणाव्यवहितत्तया, तादृशसिद्ध्युत्पादक्षणोत्तरतया च, तादृशसिद्धेरिच्छाविरहविशिष्टक्षणाव्यवहितोत्तरक्षणोत्पन्नानुमितिकतया, अनुमित्यनिर्व्वाहविरहात् । प्रथमविशिष्टान्तव्यावृत्तिस्थले, सिषाधयिषापूर्व्वस्थायिनः कस्यचित् स्थूलकालस्य परामर्शोत्पत्तिकाले विनाशे, पूर्व्वकालावच्छेदेन सिषाधयिषाविरहविशिष्टसिद्ध्यधिकरणतादृशकालध्वंसाधिकरण-परामर्शोत्पत्तिक्षणध्वंसाधिकरणस्यानुमित्युत्पत्तिक्षणस्य, सिषाधयिषाविरहविशिष्टसिद्ध्यधिकरणकालाव्यवहितोत्तरत्वानुपपत्तिरतः, कालपदमुपेक्ष्य क्षणपदोपादानम् । न च सिषाधयिषाविरहविशिष्ट-स्वनिरूपिताधिकरणत्वनिवेशेऽपि उक्तस्थूलकालस्य विभिन्नक्षणावच्छेदेन सिषाधयिषाविरहसिद्ध्युभयाधिकरणत्वेऽपि, सर्व्वदैव विशेष्याभावविशेषणाभावान्यतरप्रयुक्तविशिष्टाभाववत्तया विशिष्टाधिकरणत्वासम्भवात् क्षणत्वनिवेशमन्तरेणैव व्यावृत्तिः सम्भवतीति वाच्यम् । सिषाधयिषापूर्व्वक्षणादेः, सिद्धिक्षणादेश्च प्रत्येकं विशिष्टाभावावच्छेदकत्वेऽपि, तदुभयानुगमकान्यतरत्वावच्छिन्नस्य एकक्षणावच्छिन्नत्वाविशेषितसामानाधिकरण्यसम्बन्धेन सिषाधयिषाविरहविशिष्टायाः, सिद्धेरधिकरणतावच्छेदकत्वे बाधकाभावात् । एकरूपावच्छिन्नस्यैव विरुद्धद्वयावच्छेदकत्वविरहात् । न च सिद्ध्यनधिकरणक्षणस्य स्थूलकाले सिद्धिवृत्तौ तावच्छेदकतासम्भवः देशे वृत्तौ कालस्यैव काले वृत्ताववान्तरकालस्याप्यधिकरणीभूतस्यैवावच्छेदकत्वात् ।

तथाच विशेष्यीभूतसिद्धानवच्छेदकस्य विशिष्टसिद्धानवच्छेदकतया तत्साधारणरूपावच्छिन्नावच्छेदेन मूलकालस्य विशिष्टाधिकरणत्वं न सम्भवतीति वाच्यम्। एवं सति विभिन्नावच्छेदेन उभयवर्तिकाले उभयत्वविशिष्टवत्ताया अपि दुर्घटत्वापत्तेः। प्रत्येकाधिकरणक्षणस्य उभयत्वविशिष्टानधिकरणत्वेन उभयत्वविशिष्टावच्छेदकत्वासम्भवात्, प्रत्येकाधिकरणक्षणयोरनुगतरूपेणाप्यवच्छेदकत्वानुपपत्तेः। न हि एकरूपावच्छिन्नस्य तत्साधिकरण रूपान्तरावच्छिन्नस्य तत्सानधिकरणमप्यवच्छेदकं भवितुमर्हति, दण्डाद्यनधिकरणपुरुषावधिकरणदिवसाद्यवच्छेदेन मामादौ दण्डविशिष्टपुरुषत्वाद्यवच्छिन्नस्याहत्तित्वात्। यदि चागत्या उभयत्वविशिष्टानधिकरणयोरपि प्रत्येकाधिकरणयोरनुगतरूपेण उभयत्वविशिष्टावच्छेदकत्वमुपेयते। तदा उक्तस्थले सिषाधयिषा-विरहक्षणसिद्धिक्षणोभयान्यतरावच्छेदेन सिषाधयिषाविरहसिद्धाभयाधिकरणतायतः मूलकालस्य, तदवच्छेदेन सिषाधयिषाविरहविशिष्टसिद्धाधिकरणत्वमनपायादेव, उभयाधिकरणत्वस्यैव लाघवेन एकविशिष्टापराधिकरणतारूपत्वोपगमात्। अत्र विभिन्नकालावच्छेदेन उभयाधिकरणे विशेष्यमात्रसत्त्व एव न केवलमामानाधिकरण्यसम्बन्धेन एकविशिष्टापराभावः। अपि तु एकक्षणावच्छिन्नमामानाधिकरण्यसम्बन्धेन एकविशिष्टापराभावः, अत एकक्षणावच्छेदेनैकाश्रयवृत्तित्वं सिषाधयिषाभावस्य सिद्धौ वैशिष्ट्यमित्यग्रिमदीधितिकारोक्तिरपि सङ्गच्छते। एकक्षणावच्छिन्नत्वनिवेशेनैव सिषाधयिषाकाले सिद्धिसत्त्वे सिषाधयिषा

भावविशिष्टसिद्धभावनिर्व्वाहात् । नचैवं विशिष्टाभावस्यानतिरिक्ततामते, केवलसामानाधिकरण्यसम्बन्धेन एकविशिष्टापराभावस्य विशेषणाभावसत्त्वेप्यसत्त्वादसौ विशेष्याभावरूप एव वाच्यः । तथाच तादृशसम्बन्धेन रूपादिविशिष्टद्रव्यत्वाद्यभावः, पवनादौ मावर्त्तिष्ट, विशेष्याभावासत्त्वादिति वाच्यम् । तादृशद्रव्यत्वाभावस्यानतिरिक्तत्वमतेऽपि तस्य रूपादिमन्निष्ठद्रव्यत्वाद्यधिकरणत्वाभावरूपतायां एवोपगमेन नीरूपद्रव्यादौ तत्सत्त्वनिर्व्वाहात् । एवञ्च उक्तस्थूलकाले केवलसामानाधिकरण्यसम्बन्धेन सिषाधयिषाविरहविशिष्टसिद्धाभावासत्त्वात्, विशिष्टसिद्धिसत्वमव्याहतमेव । एकक्षणावच्छिन्नसामानाधिकरण्यसम्बन्धेन विशिष्टस्याधिकरणत्वनिवेशापेक्षया च सिषाधयिषाविरहविशिष्टे सिद्धाधिकरणकाले क्षणत्वनिवेशनमेव सम्यगित्यपि प्रतिभाति ।

यद्यपि सिषाधयिषाविरहवैशिष्ट्यावच्छेदेन स्वाधिकरणत्वनिवेशेऽपि, तादृशकाले कालान्तरीणसिषाधयिषाविरहवैशिष्ट्यस्य, तन्निष्ठसिद्धाधिकरणतानवच्छेदकत्वादेतादृशकालमादाय, उक्तदूषणस्यानवकाशस्तथापि सिषाधयिषाविरहवैशिष्ट्योपलक्षिते सिद्धाधिकरणत्वनिवेशाभिप्रायेण क्षणत्वोपादानम् । यद्यपि क्रियादिरूपतादृशस्थूलकालस्याप्यन्त्यक्षणावच्छिन्नस्य क्षणतया क्षणत्वनिवेशेऽपि नष्टोपतादवस्थ्यं । तथापि स्वहत्तियावद्ध्वंसविशिष्टत्वरूपक्षणत्वावच्छेदेन सिषाधयिषाविरहविशिष्टत्वनिवेशनान्न दोषः । सिषाधयिषाविरहविशिष्टक्षणे स्वाधिकरणत्वमवश्यं सिषाधयिषाविरहवैशिष्ट्यावच्छिन्नम् । स्थूलकाले स्वाधिकरणत्वस्य च न तद-

वच्छिन्नत्वनियम इति, सिषाधयिषाविरहविशिष्टावच्छेदेन स्वाधिकरणत्वलाभायैव क्षणपदोपादानं ; न तु क्षणत्वमपि निविष्टमिति तु तत्त्वम् ।

अव्यवहितोत्तरक्षणोत्पत्तिः स्वाधिकरणावच्छेदेन बोध्या । अनुमितिपदं वा स्वसमानाधिकरणानुमितिपरम् । तेन महाप्रलयानभ्युपगमे, सकलसिद्धीनामुत्तरमेवासंख्यानामात्मनां कश्चिंत्सिद्धिरवश्यमनुमित्युत्पत्त्या, सिषाधयिषाविरहविशिष्टताद्दग्क्षणानन्तरक्षणोत्पन्नानुमितिकभिन्ना सिषाधयिषाद्यत्पत्तिमध्यमक्षणोत्पन्ना ईश्वरीया च सिद्धिरेव । सिषाधयिषाविरहविशिष्टतदधिकरणक्षणाप्रसिद्धा स्वपदेन तस्या एवोपादानसम्भवत्वात्तस्याश्च सिषाधयिषाविरहविशिष्टत्वाभावात् । सिषाधयिषाविरहविशिष्टनिरवच्छिन्नसिद्धिभिन्नसिद्धेरप्रसिद्धेर्महाप्रलयस्य प्रामाणिकत्वे तु, यदुत्तरमनुमितिः क्वचिदपि नोत्पत्स्यते । तादृशाश्वरमसिद्धेरेव प्रतिबन्धकत्वं न त्वन्यस्येत्यनुपपत्तेर्नावकाशः । अव्यवधानांशनिवेशात्, प्रतिबन्धकसिद्धिनाशोत्तरं तदधिकरणे अनुमित्युत्पत्तावपि न तस्याः प्रतिबन्धकत्वानुपपत्तिः । स्वपूर्वसकलक्षणानामेव स्वाधिकरणक्षणध्वंसाधिकरण-क्षणध्वंसानधिकरणत्वरूप-स्वक्षणाव्यवहितत्वात्काल-तया अनादौ संसारे सर्वासामेव सिद्धीना पूर्वं कदाचित् स्वाधिकरणे अनुमित्युत्पत्त्या सिषाधयिषयोरन्तरोत्पन्नसिद्धिरेव सिषाधयिषाविरह-विशिष्ट स्वक्षणाव्यवहितक्षणोत्पन्नानुमितिकभिन्ना । तस्याश्च सिषाधयिषाविरहविशिष्टत्वाभावादप्रसिद्धिरत एवोक्तरीति, स्वाधिकरणक्षणध्वंसाधिकरणार्थकम् । सकलसिद्धीनामेव

स्वक्षणव्यवहितोत्तरत्वाक्रान्त-स्वतृतीयक्षणविनष्टानुमित्युत्पत्तिक्षणपर्य्यन्तस्वपूर्व्वस्थायिस्थूलकालोत्पन्नानुमितिकतया, पूर्व्ववदप्रसिद्धिरिति द्वितीयक्षणपदम् । अनुमित्यात्मकसिद्धीनां स्वाव्यवहितोत्तरक्षणवृत्तिस्वात्मकानुमितिकतया, अप्रतिबन्धकत्वापत्तिरत उत्पत्तिनिवेशः । यद्यपि स्वान्यत्वस्यानुमितिविशेषणत्वेऽप्येतद्दोषवारणसम्भवः । तथाप्यपेक्षाबुद्धेः क्षणत्वयावस्थायित्वस्य तदुत्तरं समानाधिकरणविशेषगुणान्तरोत्पादस्य चोपगमे यत्तापेक्षाबुद्ध्यात्मकानुमितिद्वितीयक्षणे तादृशी प्रत्यक्षादिरूपसिद्धिस्तस्याश्चतुर्थक्षणेऽनुमित्युत्पादवारकं तत्प्रतिबन्धकत्वं नोपपद्येतेतिगुरुशरीरायाः अपुत्पत्तेर्निवेशनम् । अथानुमित्यव्यवहितपूर्व्वक्षणवृत्तिसिद्धिभिन्नत्वं, निरुक्तक्षणोत्पत्तिकानुमितिकसिद्धिभिन्नत्वापेक्षया लघोयः, कथमुपेक्षितमिति चेत्तथा सति यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र इच्छाजनकसामग्र्या अनुमितिप्रतिबन्धकत्वेनैव ; इच्छोत्पत्तिक्षणेऽनुमितिवारणसम्भवादव्यवहितपूर्व्वत्वघटकानुमित्युत्पत्तिक्षणे तदव्यवहितप्राक्क्षणे वा, सिषाधयिषाविरहविशिष्टत्वस्य तद्वारणानुरोधेन निवेशवैयर्थ्यात् । तादृशस्यलीयसिद्धेस्तृतीयक्षणेऽनुमित्युत्पत्त्यविरोधितायाः सिद्धौ सिषाधयिषाविरहवैशिष्ट्यनिवेशनमन्तरेणैवोपपत्तेः । मूलोपात्तं सिद्धिविशेषणं सङ्गतान्तं निष्प्रयोजनकं स्यादिति मूलविरोधः । तथाचेच्छाजनकसामग्र्या अनुमितिप्रतिबन्धकत्वमतेऽपि, मूलाविरोधोपपादनायोक्तगुरुरीतेरादरः । अत्र कल्पे वक्ष्यमाणानुपपत्तिं तृतीयक्षणसाधारणाव्यवहितोत्तरत्वं विनिवेश्योद्धर्तुकामस्वगत्या इच्छा-

अथ तृतीयक्षणव्यवधायकद्वितीयक्षण एव अव्यवहितत्वपर्य्यवसानात्, यत्र अविलक्षमेण सिद्धिसिषाधयिषानुमितयस्तत्र द्वितीयक्षणे पक्षतासम्पत्तये, द्वितीयः सिषाधयिषाविरहो विशेषणमस्तु सिद्धेः, प्राय-

---

सामग्या अनुमित्यप्रतिबन्धकत्वमतमाश्रित्यैव मूलोपात्त सहकतान्त सार्थकयिष्यतीत्यवधेयम्।

अनुमितेर्व्यवहितपूर्व्वोत्पन्नत्वाव्यवहितपूर्व्वक्षणवर्त्तिनो घटज्ञानादेरविरोधित्वोपपत्तये सिद्धिपदम्।

अवगतद्वितीयसिषाधयिषाविरहविशेषणप्रयोजनं तत्र मतिपत्तिं (१) प्रदर्शयन् प्रथमसिषाधयिषाविरहविशेषणप्रयोजनं पृच्छति अथेति। तृतीयक्षणे स्वाधिकरणकालध्वसाधिकरण कालध्वसाधिकरणत्वसामान्याभावरूपाव्यवधानाभावस्फुटीकरणाय तृतीयक्षणव्यवधायकत्वं द्वितीयक्षणस्याभिहितम्। तृतीयक्षणव्यवधायकत्वम्। तृतीयक्षणवृत्तिध्वसप्रतियोगित्वे सति स्वाधिकरण क्षणध्वसाधिकरणत्वम्। सिद्धिनाम्नि सिषाधयिषोत्पत्तौ सिद्धुत्तरसिषाधयिषानाम्नि क्षणेऽनुमित्युत्पत्तौ वा, विशेष्याभावादिदानुसिते पूर्व्वं पक्षता निर्व्वहति, अतोऽविरुद्धेति। पक्षताधम्मत्तयवृत्ति। सिद्धौ सिषाधयिषाविरहस्याविशेषणत्वे उक्तस्थले सिद्धेर्द्वितीयक्षणेऽनुमित्यनुत्पत्त्या तत्राः स्वक्षणाव्यवहितोत्तरक्षणो-

---

(१) स व्याहत्तिविधर्य्यं।

मिकस्तु स्वक्षणस्य किमर्थमिति चेत्? यत्र क्रमेण सिषाधयिषाप्रात्यक्षिकसिद्धिपरामर्शानुमितयस्तत्र तृतीयक्षणे पक्षतासम्पत्त्यर्थमिति। तन्न। यत्र अनुमित्सा-

---

त्यक्षिकानुमितिकभिन्नत्वेन, सिषाधयिषोत्पत्तिक्षणेऽपि च तादृशसिद्धिसत्त्वेन तदभावरूपपक्षतायाः अनिर्व्वाहादिति भावः। प्रात्यक्षिकस्विति। सिषाधयिषाविरह इत्यनुषज्यते। स्वक्षणस्येति। विशेषणमित्यनुषज्यते। उत्तरयति यत्रेति। ज्ञानेच्छयोर्युगपदुत्पादमते सिषाधयिषोत्पत्तिकाले सिद्ध्युत्पादे, सिद्धेर्वा परामर्शरूपत्वे, परामर्शोत्पत्तिकाले सिषाधयिषासत्त्वादेव विशिष्टाभावोनिर्व्वहतीति क्रमेणेति, अविरलक्रमेणेत्यर्थः। सिषाधयिषासिद्धयोरन्तरा क्षणैकविलम्बे सिषाधयिषाविरहेण क्षणं विशेषापि पक्षतानिर्वाहस्य वक्ष्यमाणत्वात्। सिद्धिपरामर्शयोः परामर्शानुमित्योर्वा कालव्यवधानेनोत्पत्तौ विशेष्याभावादेव विशिष्टाभावसम्पत्तेश्च। सिषाधयिषा, अनुमितित्वप्रकारिकेच्छा। अनुमित्यात्मकसिद्धाविच्छायाः स्वविषयसिद्ध्युपहितत्वात् तदुत्तरानुमित्युत्पत्तिरेव न सम्भवतीति प्रात्यक्षिकेति। पक्षतासम्पत्त्यर्थमिति। सिषाधयिषाविरहस्य स्वविशेषणस्यानुपादाने तत्रानुमित्युत्पादक्षणस्य सिद्धिक्षणध्वंसाधिकरणपरामर्शोत्पत्तिक्षणध्वंसाधिकरणत्वेन सिद्धिक्षणाव्यवहितत्वविरहात्तादृशसिद्धिरपि प्रतिबन्धकतापत्त्या पक्षतानुपपत्तिः। तद्विशेषणोपादाने च सिद्ध्युत्पत्तिक्षणस्य सिषाधयिषाविशिष्टतया सिषाधयिषाविरहविशिष्ट-

नाशकाले प्रात्यक्षिकी सिद्धिरथ च परामर्शानुमितौ तत्र पक्षताविरहप्रसङ्गात् ।

अथ प्रथमक्षणमपेक्ष्य द्वितीयस्यैव द्वितीयमपेक्ष्य तृतीयस्यापि अव्यवहितोत्तरत्वम् । ध्वंसाधिकरण-

---

क्षणः परामर्शोत्पत्तिक्षण एव ; तद्ध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपमव्यवधानमनुमित्युत्पादक्षणस्याक्षतमेवेति पक्षतोपपत्तिरिति भावः । यत्र परामर्शात्मकसिद्धानन्तरं घटेच्छा, तत्रानुमितिवारणाय, पक्षतासामान्यमुपेक्ष्य द्वितीयसिषाधयिषाया उपादानम् । पक्षताविरहेति । सिद्ध्युत्पादक्षणस्यापि सिषाधयिषाविरहविशिष्टतयानुमित्युत्पादक्षणस्य, तादृशक्षणध्वंसाधिकरण-कालध्वंसाधिकरणतया, तत्तासामान्याभावात्मकताहशक्षणाव्यवधानविरहादिति भावः । यद्यपि सिषाधयिषाविरहविशिष्टानुमित्यवच्छितपूर्ववर्तिक्षणाहत्तिसिद्धिभिन्नत्वविशिष्टसिद्धाभावस्य पक्षतात्वमङ्गीकृत्याप्युक्तानुपपत्तिः शक्यते वारयितुं, तथापि अव्यवहितोत्तरक्षणोत्पत्तिघटितपक्षतापक्ष्यापिनत्वात्तत्रैव दीपोद्धारः ।

तृतीयक्षणसाधारणमव्यवधानं निवेश्य गृह्यते अर्थेति । तृतीयस्यापि क्षणस्याव्यवहितोत्तरत्वमिति क्षणद्वयानुगमकध्वंसत्वेन क्षणमनगम्भीय प्रातिस्विकरूपेण क्षणस्याव्यवधानमात्रे निवेशनीयत्वात् । तृतीयक्षणे च स्वोत्पत्तिक्षणध्वंसाधिकरणद्वितीयक्षणध्वंसाधिकरणत्वेऽपि स्वाधिकरणद्वितीयक्षणध्वंसाधिकरण-

कालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वंसा-
धिकरणत्वं वा तादृशाव्यवहितोत्तरत्वं वाच्यम् ।

कालध्वंसानधिकरणत्वेन स्वक्षणाव्यवधानस्याक्षतत्वमिति भावः ।
द्वितीयतृतीयचणसाधारणस्वक्षणध्वंसाधिकरणकालध्वंसाधिकरण-
कालध्वंसानधिकरणत्वरूपानुगताव्यवधाननिवेशनं न सम्भ-
वति । अपेचाबुद्धिजन्यकसिद्धिचतुर्थचणसिषाधयिषापञ्चमचणोत्प-
त्त्यनुमितौ (१) व्यभिचारतादवस्थात् । चतुर्थचणसाधारणानुगता
व्यवहितोत्तरत्वस्य कथञ्चिन्निवेशे चतुर्थचणोत्पन्नानुमितिकापे-
चाबुद्धिजन्यकसिद्धेरप्रतिबन्धकत्वापत्तेरिति ध्येयम् ।

अपेचाबुद्धिद्वितीयचणावधिकचणत्वयतदितरबुद्धिद्वितीयतृतीय-
चणसाधारणमनुगताव्यवहितोत्तरत्वं प्रकारान्तरेण निर्व्वक्ति स्वध्वं-
सेति । उभयत्रकालपदं कालिकसम्बन्धेन स्वध्वंसवत्त्वलाभाय ।
तेन सर्व्वस्यैव चणस्य स्वनाशविषयकपूर्व्वपूर्व्वज्ञाननाशवत्त्वेऽपि न
सत्यन्ताप्रसिद्धिः । न वा स्वपूर्व्वकालस्य तत्पूर्व्वकालीन-स्वविष-
यकज्ञाननाशवत्त्वेऽप्युत्तरत्वस्य तत्साधारणप्रसङ्गः । एवं सति यत्र
सिषाधयिषाविरहविशेषणमन्तरेणापि अव्यवहितोत्तर-
चणोत्पन्नानुमितिकत्वनिर्व्वाहादुक्तप्रयमविशिष्टान्तव्याहत्यसङ्गतेः ।

---

(१) द्वितीयचणसाधारण्याव्यवहितोत्तरत्वकल्पे उत्तरचणे एव सिषाधविषा
विरहविशेषणादिति भावः ।

तथाच यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र प्रथमक्षणे पक्षतावारणाय उत्तरक्षणस्य विशेषणं प्रथमं विशिष्टानं। द्वितीयन्तु सिद्धस्तत्रैव द्वितीयक्षणे पक्षता-

---

स्थलान्तरे तदाह्लत्तिमाह तथाचेति। प्रथमक्षणे पक्षतावारणायेति। तादृशसिद्धेस्तृतीयक्षणोत्पत्त्यानुमितिकतया निरङ्कुशसिद्धिमिच्छत-विरहेण पक्षताप्रसक्तेरिति भावः। प्रथमक्षणे पूर्व्वोक्तसिषाधयिषा-विरहविशिष्टसिद्धेरपि, स्वनाशाधिकरणकालध्वंसानधिकरणत्व-घटिताव्यवहितोत्तरत्वनिवेशकले नोक्तातिप्रसङ्गवारणसम्भवः ? अनुमित्युत्पत्तिक्षणे तत्सिद्धिनाशाधिकरणकालध्वंसानधिकरणत्वस्य सिषाधयिषाविरहविशिष्टतत्सिद्धाधिकरणप्रथमक्षणध्वंसाधिकरण-त्वस्य च सत्त्वादतोऽव्यवहितोत्तरक्षणे तस्य विशेषणतामाह उत्त-रेति। तथाच उक्तस्थले सिद्धव्यवहितोत्तरत्वतोयक्षणेऽपि सिषा-धयिषासत्त्वात्, सिषाधयिषाविरहविशिष्टतादृशक्षणोत्पत्तिकत्व नानुमितेरिति तादृशसिद्धेरनुमितिप्रतिबन्धकत्वनिर्व्वाहः। द्वितीय विशिष्टान्तस्य यद्विशेषणत्वं यत्प्रयोजनकत्वं वा प्रागभिहित, इदानीमपि तस्य तद्विशेषणत्वं तत्प्रयोजनकत्वं, न तु प्रथम. विशिष्टान्तवदन्याहृश्यमिति दर्शयितुं, पूर्व्वोक्तमप्यनुवदति द्वितीय-न्विति। सिद्धेर्द्वितीयेषणमित्यनुषज्यते। तत्रैवेति। यत्र क्रमेण सिद्धिसिषाधयिषानुमितय. तत्रैवेत्यर्थः। द्वितीयक्षण इति। तृतीयक्षणेऽनुमितिनिर्व्वाहार्थमित्यादिः। पक्षतासम्पत्तय इति।

सम्पत्तये । यदि पुनरिच्छाजनिका सामग्री प्रतिबध्नात्यनुमितिं । तदानुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्न-सिद्धाभावमात्रं पक्षतेति चेत् ।

विशेषणाभावेन विशिष्टाभावरूपपक्षतानिर्व्वाहायेत्यर्थः । अन्यथा उक्तक्रमेण तादृशसिद्धेर्निरुक्तसिद्धिभिन्नतया विशेष्यसत्त्वेन पक्षतानुपपत्तेरिति भावः ।

ननु दर्शितस्थले प्रथमक्षणे पक्षतासत्त्वेऽपि न क्षतिः । सिषाधयिषाकालेऽनुमित्युत्पादस्य इच्छासामग्र्याः प्रतिबन्धेनाप्यसम्भवात् । इत्थञ्च निष्प्रयोजनकतया प्रथमविशिष्टान्तानुपादाने द्वितीयमपि निष्प्रयोजनकं, तादृशसिद्धेः स्वाव्यवहितोत्तरतृतीयक्षणोत्पन्नानुमितिकतयैवाप्रतिबन्धकत्वेन, तृतीयक्षणोत्पन्नानुमितिनिर्व्वाहादित्याशयेन, इच्छासामग्र्या अनुमितिप्रतिबन्धकत्वमते तदुभयं परित्यजति यदि चेति । इच्छासामग्र्यपेक्षयाऽनुमितिसामग्र्या हीनबलत्वेऽपि अनुमित्साविशिष्टाया अनुमितिसामग्र्या इच्छां प्रति प्रतिबन्धकताकल्पनस्यावश्यकतया तस्या एव बलवत्त्वकल्पनमुचितं, अन्यथा इच्छासामग्र्यपेक्षया बाधादिरूपानेकप्रतिबन्धकाभावघटिततया, गुरुशरीराया अपि अनुमितिसामग्र्याः प्रतिबन्धकतायामिच्छानिवेशेन गौरवादितियुक्त्या, ज्ञानेच्छयोर्यौगपद्यस्वीकारसम्भवेन च इच्छासामग्र्या अनुमितिविरोधितास्वीकारस्य न सम्भवतीत्याशयेन यदि चेत्युक्तं । सिषाधयिषाविरहदशायां निष्प्रयोजनकत्वेऽनुमित्यव्यवहितपूर्ववर्त्तित्वं परित्यज्याव-

स्थितीत्तरक्षणोत्पत्तिकानुमितिकत्व-रूपगुरुविशेषणोपादानमनु चितमित्यागयेनाह्यानुमित्यव्यवहितेति । अनुमितिपदम्, स्वसमानाधिरकणानुमितिपरं । अतो व्यधिकरणानुमित्यव्यवहितपूर्व्ववर्त्तिसिद्धेरप्यनुमित्यनुत्पादोपपादकतानिर्व्वाहः । यद्यागानत्वमनुमितिरूपस्यते, तादृशसिद्धेरप्रतिबन्धकतावारणाय अव्यवहितत्वोपादानम् । तच्चानुमितिपूर्व्वकालीनध्वंसप्रतियोगित्वरूपं पूर्व्वक्षणे सिद्धावेव वा विशेषणं । पूर्व्वकालीनत्वञ्च कालिकसम्बन्धेन प्रागभावत्वमेव । ध्वंसस्य कालोपाधित्वा तदुपपत्तिः । सर्व्वासामेव सिद्धीनां पूर्व्वजातकिञ्चिदनुमितिनिरूपितनिरूपकत्वं, व्यवधानवत्तयानुमित्यव्यवहितसिद्धिभिन्नसिद्धत्वमिद्धिरतः, पूर्व्वक्षणवृत्तित्वं विशेषणं । पूर्व्वत्व प्रागभावत्वम् । अनुमित्यादिपर्य्यन्तावस्थायि-स्थूलकालमहाकालसाधारणमित्युक्तदोषतादवस्थ्यमतः क्षणत्वपर्य्यन्तनिवेशः । प्रागभावावच्छिन्नवृत्तित्वनिवेशे च, क्षणत्वमनुपादेयमेव । जन्यमानस्य कालोपाधित्वे तु कालिकसम्बन्धेन प्रागभावत्वं सिद्धेरेव विशेषणं देयं । प्रागभावानभ्युपगमे, वक्ष्यमाणं तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वरूपमव्यवहितपूर्व्वत्वमेव क्षणविशेषणं, तदुघटकदलानां व्याहृत्तिरत्ये व्यर्थीभविष्यति । अनुमित्यव्यवहितपूर्व्ववर्त्तिनोमनोयोगादेस्तादृशसिद्धिभिन्नतया प्रसक्तप्रतिबन्धकतावारकद्वितीयसिद्धिपदसार्थक्याय प्रथमसिद्धिपदम् । न च प्रचालनलाहीत्यादिन्यायेन उभयपरित्याग उचित इति वाच्यम् । तथासति बाधबुद्धादेरपि निरुक्तरूपेणैव प्रतिबन्धकतया स्वतन्त्रप्रतिबन्धकताव्याघातात् । न

तादृशसिद्धीनां तत्तद्व्यक्तित्वेनाभावः कारणं,

च व्याहन्यतां प्रतिबन्धकत्वान्तरं, न हि तत्त्वतिभावहति। किन्तु तावता लाघवमेवेति वैयर्थ्यदोषो दुर्वार एवेति वाचम्। एतद्दोषस्य वैयर्थ्याच्च सिद्धेरित्यनेन स्वयं दर्शनीयत्वात्। यद्यप्येवं प्रथमसिद्धयनुपादानेऽपि बाधादेव स्वतन्त्रप्रतिबन्धकताविलोपभीरूणां द्वितीयसिद्धिपदोपादानं न विरुद्धयते, अखण्डाभावसम्पादकत्वेन लक्षणदोषासंस्पर्शात्, इति प्रथमतदुपादानमनुचितं। तथापि अनुभित्यव्यवहितपूर्ववर्त्तिना स्वस्वघटितत्वेन, निरुक्तरूपेणानुगमासम्भवेन तत्तद्व्यक्तित्वेन भेदकूटस्य निवेश्यनीयतया सिद्धौ सिद्धयतिरिक्तलाक्षणपदार्थभेदानामव्यावर्त्तकानां निवेशे गौरवात्। सिद्धिव्यक्तीनामेव भेदा निवेशनीया इत्येतत्सूचनाय प्रथमसिद्धिपदोपादानं। अतएव तत्तद्व्यक्तित्वेन सिद्धिव्यक्तीनां भेदनिवेशे च, भेदानां विशेष्यविशेषणभावे विनिगमनाविरहेण महागौरवात्। फलानुत्पादनियतसिद्धिव्यक्तीनां तत्तद्व्यक्तित्वेन प्रतिबन्धकतापक्ष एव साधीयान्, सिषाधयिषाविरहविशेषणपरित्यागस्यानुचितः। सिषाधयिषाकालीनसिद्धिव्यक्तीनां अनन्तानां तत्तद्व्यक्तित्वावच्छिन्नभेदकूटनिवेशापेक्षया तद्विशेषणदानस्यैव युक्तत्वादिति कथञ्चिदनुगमप्रकारः परिचिन्तनीय इति।

सिद्धेर्वैयर्थ्यमित्याशयेन वैयर्थ्याच्च सिद्धेरिति वक्ष्यति। तादृशसिद्धीनां, भिन्नान्तपरिचेयसिद्धिव्यक्तीनां। निरुक्तरूपेति, निरुक्तसिद्धिभिन्नत्वविशिष्टसिद्धित्वेनेत्यर्थः। अगत्या कार्यकारणभावान-

निरुक्तरूपविशिष्टत्वेन वा । नाद्यः अनन्तकार्य्यकारण भावप्रसङ्गात् । तादृशसकलसिद्धौ अनुमित्साविरहविशेषणादानस्य वैयर्थ्यात् । तत्तत्समयसम्बन्धव्यक्तीनां तत्तत्समयावच्छिन्नतत्तन्मनोयोगादीनां वा, प्रतिबन्धकत्वप्रसङ्गाच्च ।

न्यूनदोषायेत्यत आह तादृशेति । तत्तद्व्यक्तित्वेन कल्पमानप्रतिबन्धकतायेत्यर्थः । यादृशमिङुत्तरं सिषाधयिषोत्पत्तावनुमिति. सिषाधयिषोत्पत्तिक्षणेऽनुमितिवारणायकल्पनीयप्रतिबन्धकताक-तादृशव्यक्तौ सिषाधयिषाविरहवैशिष्ट्यनिवेशस्यावश्यकतया मकलेति ।

ननु क्वचित् सिषाधयिषाविरहविशेषणस्यावश्यकतया तदभिप्रायेणैव मूलोक्ततदुपादानसङ्गतिरतो दूषणान्तरमाह तत्तत्समयेति । तत्तदात्मनिष्ठा याः सिद्धभावातिरिक्तसकलकारणसमवधानाधिकरणीभूतक्षणसम्बन्धव्यक्तयः, तासां विलिगमनाविरहेण क्रमिकसिद्धिसिषाधयिषाऽनुमित्युत्पत्तिस्थले सिषाधयिषोत्पत्तिक्षणेऽनुमितिवारणाय, सिद्धेः सिषाधयिषाविरहविशिष्टतद्व्यक्तित्वेन प्रतिबन्धकत्वापेक्षया लाघवेन च प्रतिबन्धकतापत्तेरित्यर्थः । तथाच मूलोक्तस्य सिषाधयिषाविरहविशिष्टसिद्धभावस्य पक्षतात्व व्याघात इति भावः ।

ननु तत्तत्समये: सम तत्तदात्मना सम्बन्धाः स्वरूपानतिरिक्ताः

नान्यः सत्यपि परामर्शादौ कस्याश्चित्सिद्धेरनन्तर-
मनुमितिः, कस्याश्चिन्नेत्यत्र नियामकाभावात्। न वा

त्याच तत्तदात्मस्वरूपस्य तत्तत्समयस्वरूपस्य वा सम्बन्धस्य प्रति-
बन्धकत्वे तत्तदात्मन्यन्यदा तत्तत्समये चान्यत्रात्मनि अनुमित्यनुप-
पत्तिरताऽन्यस्य प्रतिबन्धकतां प्रसञ्जयति तत्तत्समयेति। सिद्ध
नन्तरं सिषाधयिषाद्वितीयक्षणेऽनुमितिस्थल इत्यादिः। सिषाधयि-
षाविरहविशिष्टसिद्धभावेतरसकलकारणाधिकरणतत्तत्क्षणावच्छि-
न्नानां तत्तदात्मनिष्ठतत्तन्मनोयोगादिव्यक्तीनामित्यर्थः। सामाना-
धिकरण्यसम्बन्धेन सिषाधयिषाविरहावच्छिन्नायास्तत्तत्सिद्धिव्यक्तेः
प्रतिबन्धकत्वापेक्षया लाघवादिति भावः।

नियामकाभावात्, नियामकाभावप्रसङ्गात्। सिषाधयिषा-
विरहविशिष्टसिद्धिसत्वे द्वितीयक्षणेऽनुमित्युत्पत्तिनिर्बाध्याया
निरुक्तसिद्धिभिन्नसिद्धभावरूपपक्षताया अनुमित्यनुत्पादनि-
र्व्याह्यतदभावस्य चान्योन्याश्रयभियाऽनुमित्युत्पादानुत्पादप्रयो-
जकत्वासम्भवादिति भावः। इष्टान्योन्याश्रयस्यादोषतावादिनं
प्रतिबन्ध्या निरस्यति नवेत्यादिना। एवार्थे वा। कार्योत्पत्तेः
कारणतावच्छेदकावच्छिन्नसमवधानाधीनत्वकथनेन, तस्याः कार-
णतावच्छेदककुक्षिनिवेशेऽन्योन्याश्रयः सूचितः। तथासति
प्रायगः कारणतावच्छेदकावच्छिन्नसमवधानस्याप्रयत्नकार्यो-
त्पत्त्यधीनत्वापातात् निखिले निवियमानमदूषणावहम्। अथवा
उक्तपक्षतायाः कार्योत्पत्तिनियामकत्वमेव नवेत्यादिना निरा-

BIBLIOTHECA INDICA

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL

NEW SERIES, No 1350.

तत्त्वचिन्तामणि-दीधिति विवृतिः

SIR WILLIAM JONES



MDCCXLVI-MDCCXCIV

TATTVACINTĀMANI DIDHITI-VIVRITI

OR

A Sub commentary on Tattvacintamani

BY

GADADHARA BHATTACHARYYA

WITH TATTVACINTAMANI AND DIDHITI

EDITED BY

MAHĀMAHOPĀDHYĀYA YADUNATH SARVABHAUMA,

VOLUME II FASCICULUS II

Calcutta

PRINTED BY UPENDRANATHA CHAKRAVARTI AT THE SANSKRIT PRESS,
5, Nandakumar Chawdhury's 2nd Lane

AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1 PARK STREET

1912

तथा सति उत्पत्तिकालावच्छिन्नत्वविशेषितेन, स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकस्वसमानाधिकरणानुमितिकसविषयकत्वेन। स्वसमानाधिकरणानुमित्यव्यवहितपूर्वक्षणोत्पन्नसविषयकत्वेन, स्वक्षणाव्यवहितो-

---

अत्रान्योन्याश्रयदोषं प्रतिबन्ध्या स्वीकारयति तथासतीति। अनुमित्यव्यवहित--पूर्वोत्पन्नपरामर्शादितोऽनुमित्युत्तरमनुमित्यापत्तेर्वारणाय उत्पत्ति-कालावच्छिन्नत्वविशेषितेनेति। स्वाधिकरणसमयध्वसवदन्यकाल सम्बन्धविशेषितेनेत्यर्थः। तादृशध्वंसवत्त्वं कालिकसम्बन्धेन। तेन उत्पत्तिक्षणस्यापि प्रतियोगित्वादिसम्बन्धेन स्वाधिकरणकाल-ध्वंसावच्छिन्नत्वेऽपि न क्षतिः। एवञ्च कालिकसम्बन्धेन तादृश-ध्वसवदन्यात्मसम्बन्धविशिष्टस्य ज्ञाना-द्वितीयादिक्षणे सत्ता-दुक्तातिप्रसङ्गतादवस्थ्यमतः कालपदम्। तादृशकालसम्बन्धस्य उपलक्षणविधयाऽवच्छेदकत्वे सएव दोष इत्यतो विशेषण-विधया तथात्वलाभाय उक्तरीत्यनुपपत्तेश्चावच्छिन्नान्तस्य कर्मधारयमध्ये प्रक्षेपमुपेक्यावच्छिन्नत्वविशेषितेनेत्युक्तम्। विशेषणत्वञ्चास्य सामानाधिकरण्यसम्बन्धेन बोध्यम्। धर्मिणो विशेष्यत्वात्। कालान्तरीयानुमितिसमानाधिकरण-घटज्ञानादितोऽनुमित्यापत्तिवारणाय स्वक्षणाव्यवहितोत्तरक्षणोत्पन्नत्वमनुमितिविशेषणम्। तदर्थस्य स्वाधिकरणकालध्वसाधिकरणकालध्वंसानधिकरणत्वे सति स्वाधिकरणकालध्वसाधिकरणं यः क्षणस्तदुत्पन्नत्वम्। सत्यन्तनिवेशात् स्वोत्तरदिवसाद्यन्तरितक्षणो-

क्षरत्वगानुत्पत्तिकस्वसमानाधिकरणानुमितिकभिन्नस्व विषयकत्वेन वा। किं वा स्वसमानाधिकरणानुमित्य व्यवहित-पूर्वक्षणोत्पत्तित्वविशिष्टज्ञानत्वादिना कार णत्व स्यात्।

त्पन्नानुमितिकज्ञानादितरद्वितीयक्षणे नातिप्रसङ्गः। तादृशानु मितिकसंस्कारद्वितीयक्षणेऽनुमितिवारणाय स्वाधिकरणत्वे सती-त्युपेक्षितं हृतौयादिक्षणस्य प्रागाद्यनधिकरणत्वेऽपि मस्कारादा धिकरणत्वाच्चेतिः। तादृशापेक्षाबुद्धिद्वितीयक्षणेऽनुमितिवारणानु-रोधस्तु न तदुपेक्षायोजम्। तदानीं समानाधिकरणविशेषगुणा-न्तरस्याप्यनुत्पत्त्या तन्नयोजकादेवानुमित्यनुत्पादोपपत्तेः। अपेक्षा-बुद्धिद्वितीयक्षणे समानाधिकरणविशेषगुणोत्पादोपगमे त्वपेक्षाबु-द्धेस्तृतीयक्षणावस्थायितायां एवानुपपत्तेः।

वस्तुतस्त्वपेक्षाबुद्धेर्द्वितीयक्षणावस्थायितामतएवैतत्प्रतिबन्धि-प्रदर्शनम्। अन्यथा सिद्धादिद्वितीयक्षणोत्पन्नापेक्षाबुद्धात्मकपरा-मर्शतृतीयक्षणेऽनुमित्यनुपपत्तेः। तस्यास्तृतीयक्षणपर्य्यन्तावस्थान-मते तद्वितीयक्षणे विशेषगुणानुत्पत्त्या तदानीमुत्पत्तिकालाव-च्छिन्नविषयकत्वस्य दुर्घटत्वादित्यवधेयम्।

अनुमितेः स्वसमानाधिकरणानुमित्युत्तरोत्पन्नज्ञानान्तरा द्वानुमितिप्रसङ्गवारणायाधिकरणान्तं स्वविशेषणम्। स्वपूर्वका लोत्पन्नानुमितिरपि स्वाव्यवहितोत्तरत्वाक्रान्त स्वद्वितीयक्षणपर्य्यं

स्थायिस्थूलकालोत्पन्नतया तद्दोषतादवस्थ्यमतः क्षणत्वनिवेशः नुमितेः स्वक्षणाव्यवहितोत्तरक्षणवृत्तिस्वसमानाधिकरणस्वा-कानुमितिकतया तद्दारणायोत्पत्तिनिवेशः ।

वस्तुतस्त्वपेक्षाबुद्धिद्वितीयक्षणे विशेषगुणानुत्पादेन अनुमितौ न्यत्वस्य निवेशादपि उत्पत्तिनिवेशप्रयोजननिर्व्वाहो बोध्यः । था सति अपेक्षाबुद्ध्यात्मकानुमित्यनन्तरोत्पन्नज्ञानादनुमित्याप-क्तेरसम्भवात् । पुरुषान्तरीयानुमित्यव्यवहितपूर्व्वोत्पन्नज्ञानात्तद्वतः पुंसोऽनुमितेर्व्वारणाय स्वसमानाधिकरणस्वमनुमितिविशेषणं, एक-पुरुषीयानुमित्यव्यवहितपूर्व्वोत्पन्नत्विष्टादितस्तद्वतः, पुरुषान्तर-स्यानुमितेर्व्वारणाय सविषयकत्वनिवेशनम् । अनुमित्यव्यवहित-पूर्व्वक्षणे ज्ञानोत्पत्त्यनियमाशङ्कया ज्ञानत्वमुपेक्षितं । व्यक्तीभविष्यति चेदमुपरिष्टात् ।

बहुव्रीहि प्रतिपाद्यसम्बन्धांशस्याधिकस्यात्र निवेशाद्बहुव्रीहिं परित्यज्यलघुरूपान्तरमाह स्वसमानाधिकरणेति । अत्रापि उत्पत्ति-कालावच्छिन्नत्वविशेषितेनेत्यनुषज्यते । अन्यथानुमित्यव्यवहित-पूर्व्वोत्पन्नज्ञानादिरनुमित्युत्पत्त्यधिकरणक्षणोऽपि सत्वात् तदनन्तर-मप्यनुमित्यत्तरापत्तेः । नचानुमित्यव्यवहितपूर्व्वक्षणोत्पत्तेर्विशेष-णतयैव सामञ्जस्ये उत्पत्तिकालावच्छिन्नत्वस्य पृथग्विशेषणत्वम-नुपयुक्तमिति वाच्यम् । अव्यवहितपूर्व्वक्षणोत्पत्तेर्विशेषणत्वे दृढ-घटकह्रस्वांशस्य विशेषणतयैव सामञ्जस्ये लक्षणे स्वाधिकरणकालध्वं-सानधिकरणरूपस्य उत्पत्तिघटकांशस्य वैयर्थ्यापातात्प्रचालनादीति न्यायेन तदंशमपि परित्यज्य स्वसमानाधिकरणानुमित्यव्यवहित-

पूर्वक्षणवृत्तित्वविशिष्टज्ञानत्वेन कारणताप्रसङ्गोऽपि प्रदर्शित एव। तदनुमितौ भूमानाधिकरण्यविशेषण प्रयोजनं पूर्ववत्। अनुमित्यव्यवहितपूर्वत्वं प्रागभावसत्त्वे तत्प्रागभावाधिकरणकालप्रागभावानधिकरणत्वे सति तत्प्रागभाववत्त्वम्। अनुमितिपूर्वविनष्टस्य तदुत्तरोत्पन्नस्य च घटज्ञानादेर्वारणाय दलद्वयम्। अव्यवहितोत्तरत्वघटकस्वाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपमत्यन्तादेतदीयमत्यन्तस्य लघुत्वादप्येतत्कल्पे लाघवं बोध्यम्।

प्रागभावानङ्गीकारे तदघटितवक्ष्यमाणाव्यवहितपूर्वत्वमेव निवेश्यं अनुमित्यव्यवहितपूर्वोत्पन्नतदुत्तरस्थायि स्मृतकाले अनुमित्युत्तरमुत्पन्नस्य घटादिज्ञानस्य वारणाय क्षणत्वनिवेशनम् अनुमितिप्रागभावविशिष्टोत्पत्तिकत्वविवक्षणे क्षणपद कालपरमेव अनुमित्यव्यवहितपूर्वक्षणपर्य्यन्तस्थायिनस्तत्पूर्वजात-घटज्ञानादितोऽनुमितिपूर्वमनुमितेर्वारणाय उत्पन्नत्वनिवेशनम्। पूर्ववदुद्वित्वादिवारणाय स्वविषयकत्वनिवेशनम्। ज्ञानत्वोपादानबीजमपि पूर्ववद्बोध्यम्।

अत्रोभयत्र स्वघटितत्वेन तत्तद्व्याप्तिविश्रामादननुगम इति प्रतियोगिनिरवच्छिन्नाभाव्यानुगतमेककूटघटितधर्मेण कारणतां प्रसञ्जयति स्वक्षणेति। स्वक्षणाव्यवहितोत्तर क्षणानुत्पत्तिक स्वसमानाधिकरणानुमितिकं त्वं अनुमितिसामग्रीसमवधानक्षणोत्पन्नं घटादिज्ञानादिकमेव तदन्यस्वविषयकोऽनुमित्यव्यवहितपूर्वोत्पन्न तत्समानाधिकरणपरामर्शादिस्ततोऽनुमित्युपपत्तिः। तादृशादेव

32021

परामर्शादनुमित्यनन्तरमनुमित्यन्तरवारणायात्रापि उत्पत्तिकालावच्छिन्नत्वविशेषितेनित्यनुषज्यते । नचैवं स्वोत्पत्तिक्षणावच्छिन्नत्वस्यानुयोगिनि निवेशेनाननुगमस्यावश्यकतया प्रयासोऽयमफल इति वाच्यम् । तत्तद्वस्तुनिष्ठतत्तदधिकरणसमयध्वंसाधिकरणसमयसम्बन्धानामभावकूटविशिष्टत्वस्यैवात्र उत्पत्तिकालावच्छिन्नत्वार्थकत्वात्, तादृशस्य चानुगतत्वात्, स्वसमानाधिकरणानुमितित्वावच्छेदेन स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकत्वं विवक्षणीयमतोऽनुमित्युत्पादकपरामर्शादधिकरणक्षणानुत्पत्तिकत्वस्य तत्परामर्शसमानाधिकरणकालान्तरीणानुमितौ सत्त्वेऽपि न जन्यसविषयकेभेदकूटाप्रसिद्धिः । स्वक्षणाव्यवहितोत्तरत्वं पूर्व्वनिरुक्तं ग्राह्यम् । तत्पुरुषीययाट्टशघटज्ञानाद्युत्तरं तदीयानुमितावनुत्पन्नायामेव तस्य पुंसो मुक्तिस्ताट्टशघटज्ञानादिकं स्वाधिकरणसमयोत्तरक्षणानुत्पत्तिकस्वसमानाधिकरणानुमितिसामान्यकमिति परामर्शाद्यसमवहितात्तदन्यघटज्ञानादितोऽनुमित्यापत्तिः, तस्य स्वपदेनोपादानासम्भवादतोऽव्यवधाननिवेशः । निरुक्ताव्यवधानस्यानुमित्यनुत्पादकघटज्ञानादेः पूर्व्वं कदाचिदुत्पन्नायाश्चाप्यनुमितेरुत्पत्त्यधिकरणक्षणे, अव्यवहितोत्तरत्वस्य च ताट्टशानुमित्युत्पत्तिमति ताट्टशघटज्ञानादिद्वितीयक्षणपर्य्यन्तस्थायिस्थूलकाले, सत्त्वात् ताट्टशं स्वमप्रसिद्धमेव स्यादत उत्तरत्वक्षणत्वयोर्निवेशनम्। अनुमितेः स्वाव्यवहितोत्तरक्षणवृत्तिस्वात्मकानुमितिकतया, स्वपदेन उपादानासम्भवात् ततोऽनुमित्यन्तरापत्तिरत उत्पत्तिनिवेशः । व्यधिकरणानुमित्यव्यवहितपूर्व्वक्षणोत्पन्नघटज्ञानादिवारणाय सामानाधिकरण्य-

पूर्वक्षणवृत्तित्वविशिष्टज्ञानत्वेन कारणतायाम्प्रवेशोऽग्रे प्रदर्शयिष्यत एव। तदनुमितौ सामानाधिकरण्यविशेषण प्रयोजनं पूर्ववत्। अनुमित्यव्यवहितपूर्वत्वं प्रागभावसत्त्वे तत्प्रागभावाधिकरणकालप्रागभावानधिकरणत्वे सति तत्प्रागभाववत्त्वम्। अनुमितिपूर्वध्वंसिनष्टस्य तदुत्तरोत्पन्नस्य च घटज्ञानादेर्वारणाय दलद्वयम्। अव्यवहितोत्तरत्वघटकस्वाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्वरूपमत्यन्तादेतदीयसत्यन्तस्य लघुत्वादप्येतत्कल्पे लाघवं बोध्यम्।

प्रागभावानङ्गीकारे तदघटितवक्ष्यमाणाव्यवहितपूर्वत्वमेव निवेश्यं अनुमित्यव्यवहितपूर्वोत्पन्नतदुत्तरस्थायि स्थूलकाले अनुमित्युत्तरमुत्पन्नस्य घटादिज्ञानस्य वारणाय क्षणत्वनिवेशनम् अनुमितिप्रागभावविशिष्टोत्पत्तिकत्वविवक्षणे क्षणपद कालपरमेव अनुमित्यव्यवहितपूर्वक्षणपर्यन्तस्थायिनस्तत्पूर्वजात-घटज्ञानादिलोऽनुमितिपूर्वमनुमितेर्वारणाय उत्पन्नत्वनिवेशनम्। पूर्ववदुद्वित्वादिवारणाय स्वविषयकत्वनिवेशनम्। ज्ञानत्वोपेक्षाबीजमपि पूर्ववद्बोध्यम्।

अत्रोभयत्र स्वघटितत्वेन तत्तच्छक्तिविश्रामादननुगम इति प्रतियोगिनिरूप्यमन्तर्भाव्यानुगतभेदकूटघटितधर्मेण कारणतां प्रसञ्जयति स्वक्षणेति। स्वक्षणाव्यवहितोत्तर क्षणानुत्पत्तिक स्वसमानाधिकरणानुमितिकं स्वं अनुमितिसामग्रीसमवधानक्षणोत्पन्न घटादिज्ञानादिकमेव तदन्यसविषयकोऽनुमित्यव्यवहितपूर्वोत्पन्नस्तत्समानाधिकरणपरामर्शादिस्ततोऽनुमित्युपपत्तिः। तादृशां

32021

परामर्शादनुमित्यनन्तरमनुमित्यन्तरवारणायावापुत्पत्तिकालाव-
च्छिन्नत्वविशेषितेनित्यनुषज्यते । नचैवं स्वोत्पत्तिक्षणावच्छिन्नत्व-
स्यानुयोगिनि निवेशेनाननुगमस्यावश्यकतया प्रयासोऽयमफल
इति वाच्यम् । तत्तदनुनिष्ठतत्तदधिकरणसमयध्वंसाधिकरणसम-
यसम्बन्धानामभावकूटविशिष्टत्वस्यैवात्र उत्पत्तिकालावच्छिन्नत्वा-
र्थकत्वात्, तादृशस्य चानुगतत्वात्, स्वसमानाधिकरणानुमितित्वा-
वच्छेदेन स्वक्षणाव्यवहितोत्तरक्षणानुत्पत्तिकत्वं विवक्षणीयमतो-
ऽनुमित्युत्पादकपरामर्शाद्यधिकरणक्षणानुत्पत्तिकत्वस्य तत्परामर्श-
समानाधिकरणकालान्तरीयानुमितौ सत्त्वेऽपि न जन्यसविषयके-
भेदकूटाप्रसिद्धिः । स्वक्षणाव्यवहितोत्तरत्वं पूर्वनिरुक्तं ग्राह्यम् ।
तत्पुरुषीययादृशघटज्ञानाद्युत्तरं तदीयानुमितावनुत्पन्नायामेव तस्य
पुंसो मुक्तिस्तादृशघटज्ञानादिकं स्वाधिकरणसमयोत्तरक्षणानुत्प-
त्तिकस्वसमानाधिकरणानुमितिसामान्यकमिति परामर्शाद्यसम्भव-
द्धितात्तदन्यघटज्ञानादितोऽनुमित्यापत्तिः, तस्य स्वपदेनोपादाना-
सम्भवादतोऽव्यवधाननिवेशः । निरुक्ताव्यवधानस्यानुमित्यनुत्पाद-
कघटज्ञानादेः पूर्वं कदाचिदुत्पन्नायाश्चाप्यनुमितेरुत्पत्त्यधिकरण-
क्षणे, अव्यवहितोत्तरत्वस्य च तादृशानुमित्युत्पत्तिमति तादृशघट-
ज्ञानादिद्वितीयक्षणपर्यन्तस्थायिस्थूलकाले, सत्त्वात् तादृशं स्वम-
प्रसिद्धमेव स्यादत उत्तरक्षणत्वयोर्निवेशनम् । अनुमितेः स्वाव्यव-
हितोत्तरक्षणवृत्तिस्वात्मकानुमितिकतया, स्वपदेन उपादानासम्भ-
वात् ततोऽनुमित्यन्तरापत्तिरत उत्पत्तिनिवेशः । व्यधिकरणानु-
मित्यव्यवहितपूर्वक्षणोत्पन्नघटज्ञानादिवारणाय सामानाधिकरण्य-

अव्यवहितोत्तरत्व द्वितीय क्षण एवेति नाति-
प्रसङ्गः। न च आदिमेषु परामर्शस्थितिक्षणे यत्

मनुमितिविशेषणम्। द्वितीयकल्पेऽनुमित्यव्यवहितपूर्ववर्तिक्षणोपल-
क्षणीकृत्य पृथगुत्पत्तिकालस्य विशेषणतया निवेशापेक्षया-
तादृशक्षणोत्पत्तिघटकतादृशक्षणवृत्तित्वस्य विशेषणतया निवे-
शनमेवोचितं, तावतैवातिप्रसङ्गभङ्गादित्याशयेनाह किञ्चेति। पद-
व्याहृत्तिः स्फुटैव। यादृशपरामर्शद्वितीयक्षणे किमपि ज्ञानं नोत्पन्नं
द्वितीयक्षणेऽप्यनुमितिर्जाता तत्र परामर्शोत्पन्नज्ञानस्यैवानुमित्य-
व्यवहितपूर्वक्षणवृत्तित्वविशिष्टत्वादनुमित्यव्यवहितपूर्वक्षणे सत्त्वात्
ज्ञानत्वमुपेत्य सविषयकत्वनिवेशनमफलमित्यतो ज्ञानत्वमेवात्र
निवेशितम्। तत्रानुयोगिनि स्वत्वान्तर्भावेनानुगमस्तु नाशङ्कनीय.।
पूर्वकल्पद्वयेऽपि तत् सत्त्वात् गौरवस्य चाधिक्यात्। अननुगमासहि-
ष्णुतायाश्च तत्तदनुनिष्ठतत्तदनुभवमानाधिकरणानुमित्यव्यवहित-
पूर्ववानधिकरणक्षणसम्बन्धानामभावकूटविशिष्टज्ञानत्वेन कार-
णत्वप्रणतिर्वोध्या। न चोपदर्शितसकलरूपापेक्षया लिङ्गपरा-
मर्शत्वस्य लघुतया तेनैव रूपेण परामर्शहेतुत्वमुचितमिति न प्रति-
षेध्यवकाश इति वाच्यम्। उक्तरूपेण हेतुत्वे कारणान्तरविरह-
दशायाम् उक्तरूपावच्छिन्नत्वविरहेणानुमितिवारणसम्भवात् कार-
णान्तरस्याकल्पनीयतया लिङ्गपरामर्शत्वापेक्षया तत्तच्छरीरगौर-
वस्याकिञ्चित्करत्वात्।

ननु यत्र घटज्ञानादिद्वितीयक्षणे लिङ्गपरामर्शस्तदुत्तरमनु-

विरोधिसिद्ध्यादिविनाशस्तव उत्तरक्षणेऽनुमितिर्न स्यात् परामर्शस्य अतथात्वादिति वाच्यम् अनुमिति-सामग्र्या विरोधिन्या विरहेण तदानीमुत्पन्नादनुव्य-

---

मितिस्तव परामर्शोत्पत्तिक्षणेऽप्यनुमितिप्रसङ्गः । प्रथमक्षणमपेक्ष्य द्वितीयस्येव, द्वितीयक्षणमपेक्ष्य तृतीयस्यापि क्षणस्याव्यवहितोत्तर-त्वेन, तादृशघटज्ञानादेः स्वक्षणाव्यवहितोत्तरक्षणोत्पन्नानुमिति-कत्वादित्यत आह अव्यवहितोत्तरस्येति । द्वितीयक्षण एवेति । अव्यवहितोत्तरत्वमध्ये स्वक्षणस्य न प्रातिस्विकरूपेण निवेशः । किन्तु स्वाधिकरणकालत्वेन, तथाच स्वाधिकरणकालध्वसा-धिकरणत्वसामान्याभावस्य स्वतृतीयक्षणेऽसत्त्वान्न तस्याव्यवहितो-त्तरत्वमिति भावः । पूर्वैकल्पत्वये ज्ञानत्वमुपेक्ष्य सविषयकत्व-निवेशनप्रयोजन स्फुटयितुमाशङ्कते नचादिमेष्विति । शेषकल्पे विनश्यदवस्थपरामर्शजन्यानुमितिस्थलेऽप्यव्यवहितपूर्वक्षणवृत्तित्व-विशिष्टपरामर्शस्यैवानुमित्यव्यवहितपूर्वक्षणे सत्त्वान्नानुपपत्तिरि-त्यत आदिमेष्वित्युक्तम् । अतथात्वादिति । द्वितीयक्षणेऽनुमित्यनुत्-पत्त्या तत्कारणतावच्छेदकानाक्रान्तत्वादुत्पत्तिक्षणावच्छिन्नस्यानु-मित्यव्यवहितप्राक्क्षणेऽसत्त्वाच्चेत्यर्थः । अनुमित्युत्पत्तिक्षण इव दर्शितस्थलेऽनुमितिपूर्वमपि परामर्शेन प्रतिबन्धादनुव्यवसायादि-र्नोत्पत्तुमर्हतीति शङ्कानिरासायानुमितिसामग्र्या विरोधिन्या-विरहेणेति । परामर्शमात्रं न प्रतिबन्धकम् अपि त्वनुमितिसाम-

वसायादेरन्ततः संस्कारात् वा तत् सम्भवात्। संस्कार-जन्यत्वेन स्मृतित्वस्य द्वारैव निरासात्।

यैव, तदानीन्तु न तत्सामग्री। तस्याः फलाव्यवहितप्राक्क्षण एव सत्त्वादिति। तदार्नीं तादृशपरामर्शद्वितीयक्षणेन अनुव्यवसायादेरित्यादिना सन्निकृष्टवस्त्वन्तरज्ञानपरिग्रहः। ननु यत्र परामर्शोत्पत्तिकाले समानविषये लौकिकचाक्षुषादिप्रत्यक्षस्य, भिन्नविषये च शाब्दबोधस्य सामग्र्यासीत्तत्र द्वितीयक्षणे विनिगमनाविरहेण किमपि ज्ञानं न जायते सकलज्ञानसामग्रीप्रतिबन्धकसमवधानस्य तुल्यत्वादतस्तद्वितीयक्षणे प्रत्यक्षादिसामग्रीविरहेऽपि तृतीयक्षणे नानुमितिः स्यात्। उक्तकारणतावच्छेदकाक्रान्तज्ञानाभावादित्यत आहालत इति। कथञ्चिज्ज्ञानानुत्पादेऽपीत्यर्थः। लक्षारादिति। तस्यापि सन्निधयक्षत्वघटितलक्षकारणतावच्छेदकाक्रान्तत्वादिति भावः। न च यत्र परामर्शादिरुपेक्षात्मकस्तत्र का गतिरिति वाच्यम्। फलानुरोधेन तत्र संस्कारकल्पनाया आवश्यकत्वेन परामर्शादेरुपेक्षात्वयैवासिद्धेः। नन्वनुमितेः संस्कारजन्यत्वोपगमे तस्याः स्मृतित्वापत्तिः, संस्कारजन्यज्ञानत्वस्य स्मृतित्वप्रयोजकत्वादत आह संस्कारजन्यत्वेनेति। निरासादिति। संस्कारत्वेन संस्कारजन्यत्वस्यैव स्मृतित्वप्रयोजकत्वात्, अन्यथा कालोपाधिविधया घटान्तरेऽपि, क्षायमाणलिङ्गकरणतामते संस्कारलिङ्गकानुमितौ च संस्कारस्य जनकत्वेनातिप्रसङ्गादिति भावः।

स्यात् वा स्वसमानाधिकरणानुमित्यव्यवहितपूर्व-क्षणवृत्तिभिन्नत्वेन, स्वसमानाधिकरणानुमित्यव्यवहित-पूर्वत्वानधिकरणक्षणवृत्तित्वविशिष्टत्वेन वा स्वसमाना-

---

प्रकृतसाध्याय कार्य्यानुत्पत्तिनिर्व्याह्यतावच्छेदकरूपेण प्रति-बन्धकत्वमेव प्रसञ्जयति स्वसमानाधिकरणेति । पदव्याहृत्तिरनुमि-त्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नसिद्धभावपक्षतावद्बोध्या । सिद्धा-त्मकपरामर्शानन्तरसिषाधयिषोत्पत्तिकाले सर्व्वत्र तत्तदाक-समवेतधर्म्मनाशस्याप्रामाणिकत्वे, यत्र न तन्नाशस्तत्र प्रथमक्ष-णेऽप्युक्तप्रतिबन्धकतावच्छेदकावच्छिन्नस्यासत्त्वेनातिप्रसङ्गसम्भवात् कल्पान्तरमाह स्वसमानाधिकरणेति । उक्तस्थले परामर्शादे-रनुमित्यव्यवहितपूर्व्वक्षणवृत्तित्वेऽपि तदुत्पादक्षणस्यानुमित्यव्यव-हितपूर्व्वत्वानधिकरणतया तद्वृत्तित्वविशिष्टत्वेन परामर्शादेरेव प्रतिबन्धकत्वान्नाप्त कल्पे तादृशस्थले सिषाधयिषोत्पादकाले-ऽनुमितिप्रसङ्ग इति भावः । अत्रानुमितिरव्यवहितपूर्व्वत्वं वक्ष्य-माणतदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वम् । तत्र क्षणत्वा-निवेशेऽनुमित्युत्पत्त्यधिकरणमहाकालादुत्पत्तिकध्वंसमादायाति-प्रसक्तमिति क्षणत्वनिवेशनमावश्यकम् । एवञ्च एतदपेक्षया तादृशानुमित्युत्पत्त्यनधिकरणसमयोत्पत्तिकध्वंसप्रतियोगित्वक्ष-णवृत्तित्वविशिष्टत्वेन प्रतिबन्धकत्वमेवोचितम्, अनुमित्युत्पत्त्यनधि-करणसमयस्य क्षणत्वेनानिवेशेऽपि क्षतिविरहात् । अनुमित्युत्-पत्त्यनधिकरणस्थूलकालोत्पन्नध्वंसप्रतियोगित्वस्यानुमित्यव्यवहित-

धिकरणानुमित्युत्पत्त्यनधिकरणसमयाव्यवहितपूर्वक्षण-
वृत्तित्वविशिष्टत्वेन वा प्रतिबन्धकत्वम् ।

पूर्वक्षणभिन्नक्षण एव सम्भवात् । घरमक्षणत्वनिवेशनञ्च उभयत्रैवा-
वश्यकम् । अनुमित्यव्यवहितप्राक्क्षणेऽपि तदुत्पत्तिक्षणोत्पत्ति-
ध्वंसप्रतियोगित्वानधिकरणमहाकालादिवृत्तित्वविशिष्टसत्त्वेना-
नुमित्युत्पत्त्यनधिकरणसमयोत्पन्नध्वंसप्रतियोगिस्थूलकालविशेष-
वृत्तित्वविशिष्टसत्त्वेन चानुमितिमात्रानुत्पत्तेरित्याशयेनाह स-
मसमानाधिकरणेति । यदि च पूर्वंकल्पे क्षणत्वानिवेशेऽनु-
मित्युत्पत्त्युपलक्षितकालोत्पत्तिकत्वनिवेशन एवान्यकालावच्छे-
देनानुमित्युत्पत्त्यधिकरण-महाकालाद्युत्पत्तिकध्वंसमादायाति-
प्रसङ्गः, न तु तदुत्पत्तिविशिष्टसमयोत्पत्तिकत्वनिवेशे, तथाच
क्षणत्वमुत्पत्त्यधिकरणकाले न निवेश्यमेवेत्युच्यते । तथापि उपल-
क्षितोत्पत्तिकत्वापेक्षया तदुत्पत्तिकत्वविशिष्टोत्पत्तिकत्वस्य गुरु-
शरीरतयैव कल्पान्तरानुसरणसङ्गतिः । नचैतत्कल्पेऽप्यनुमित्यु-
त्पत्त्यभावविशिष्टसमयोत्पत्तिकत्वमेव ध्वंसे निवेश्यम्, अनुमित्यु-
त्पत्त्यधिकरणभिन्नोत्पत्तिकत्वनिवेशे यत्रानुमित्यात्मकपरामर्शा-
नन्तरजातानुमित्यन्तरेच्छाबलात् पुनरनुमितिः । तत्रानुमित्युत्-
पादकालस्य तत्पूर्वं परतो वाऽवश्यानावश्यकतयाऽनुमित्युत्पत्त्य-
धिकरणत्वनियमेन प्रथमानुमित्युत्तिक्षणस्यानुमित्युत्पत्त्यनधि-
करणसमयोत्पन्नध्वंसप्रतियोगितायां दुर्घटतयाऽनुमित्युत्पत्ति-
कालेऽनुमित्यापत्तेः । अनुमित्युत्पत्त्यभावोपलक्षितसमयोत्पत्तिक-

तदव्यवहितपूर्वत्वञ्च तदुत्पत्तिक्षणोत्पत्तिकध्वंस-
प्रतियोगित्वम्।

त्वनिवेशेऽनुमित्यव्यवहितप्राक्क्षणस्यापि तदुत्पत्त्यभावाधिकरण-
स्थूलकालोत्पत्तिकध्वंसप्रतियोगितया तद्वृत्तिपरामर्शादनुमिति-
विरोधितापत्तेः, तयाच्च साम्यमिति वाच्यम्। क्षणिकक्षणाभ्यु-
पगमेऽनुमित्युत्पत्त्यनधिकरणत्वोपलक्षितसमयोत्पत्तिकत्वनिवेशे-
ऽपि दर्शितस्थलेऽनुमित्युत्पत्तिक्षणस्यानुमित्युत्पादानधिकरण-
तयोक्तदोषानवकाशेन तत्कल्पे लाघवसम्भवात्। अनुमित्यन-
धिकरणत्वस्य समयविशेषणत्वेऽनुमित्युत्पत्तिक्षणस्याप्यनुमित्यधि-
करणसमयविशेषं प्रत्येवाव्यवहितपूर्व्वतया तदुत्तरमनुमित्यापत्ति-
रतस्तदुत्पत्त्यनधिकरणत्वपर्य्यन्तनिवेशः।

समयाव्यवहितपूर्व्वत्वं, समयोत्पत्तिध्वंसप्रतियोगित्वमेव। न
तु वक्ष्यमाणतदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगित्वम्। तदुत्पत्ति-
क्षणनिवेशे प्रयोजनाभावात्। प्रागभावानभ्युपगन्तृनये, तदुत्पत्ति-
कालीनध्वंसप्रतियोगित्वं तत्पूर्व्वत्वम्। तथाच तदुत्पत्तिकालीन-
ध्वंसप्रतियोगिकालवृत्तिध्वंसाप्रतियोगित्वरूपाव्यवहितत्वस्य स्वात-
न्त्र्येण निवेशनमफलम्। तदुत्पत्तिकालीनत्वस्थले तदुत्पत्तिका-
लोत्पत्तिकत्वनिवेशन एव व्यवहितपूर्व्वकालवारणसम्भवात्, इत्या-
शयेनानुमित्यव्यवहितपूर्व्वत्वमनुमित्युत्पत्तिक्षणोत्पत्तिकध्वंसप्रति-
योगित्वरूपमेव वाच्यमित्याह तदव्यवहितेति। अनुमितिस्थिति-
कालोत्पन्नध्वंसप्रतियोगित्वमनुमित्युत्पत्तिक्षणसाधारणमतस्तद्वृत्ति-

न चाव प्रयसे यव सिद्धात्मकपरामर्शानन्तरं सिषाधयिषाया उत्पत्तिकाले तत्पुरुषीयस्य कस्यापि धर्मस्य न विनाशोऽनन्तरं पुनरनुमितिः, तव तदुत्पत्तिसमयेऽपि सा स्यात्, तत्पूर्वकालीनानां सर्वेषां लाघवपूर्ववर्त्तित्वेन अविरोधित्वादिति वाच्यम् अनवरतपरिस्यन्दमानापरिमितपवनादिपरमाणुचेतनसंयो-

---

त्वविशिष्टस्य विरोधित्वोपपत्तये प्रथमोत्पत्तिनिवेशः। उत्पत्तिविशिष्टोत्पत्तिकत्वनिवेशे तत्लाभायैवचरमपदम्।

द्वितीयकल्पानुसरणबीजीभूतप्रथमकल्पटोपं कथञ्चिदुद्धर्तुमाशङ्कते न चावेति। सिषाधयिषोत्पत्तिकाले कस्यचित्तादात्म्यसम्बन्धस्य नाशे तस्यैवानुमितिपूर्ववर्त्तिमित्रत्वेन विरोधितया न सिषाधयिषोत्पादकालेऽनुमित्यापत्तिसम्भव इति तदविनाशस्थलानुधावनम्। अन्यदीयधर्म्मनाशेऽपि तेन धर्म्मेणाप्रत्यासन्नतया अन्यदीयानुमितिप्रतिबन्धासम्भवात्तत्पुरुषीयस्येत्युक्तम्। यद्यपि परामर्शानन्तरं सिषाधयिषोत्पादस्थले परामर्शव्यवहितक्षणे फलेच्छावश्यमेव स्वीकार्य्या, तथाच तथा एव सिषाधयिषोत्पत्तिकाले अवश्य विनाशस्तथाप्यपेक्षाबुद्धात्मकफलज्ञानात् यदि परामर्शोत्पत्तिकाले फलेच्छा स्वीक्रियते, तदा परामर्शोत्पत्तिद्वितीयक्षणे न आत्मधर्म्मविनाशः सम्भवतीत्यभिप्रायेणेदम्। अनुमितौ सुखत्वभ्रमदशायां फलान्तरेच्छामन्तरेणैव सुखत्वप्रकारेणानुमित्यासम्भवती-

गसन्तानान्तः-पातिव्यक्तीनामविरतमेवोपरमात् फलानुत्पादवलेनापि तादृशकल्पनासम्भवात् कारणान्तरकल्पने गौरवाच्च अन्वयव्यभिचारसन्देहस्य च कारणत्वग्रहाविरोधित्वात्।

त्यभिप्रायेण वा। सिषाधयिषानन्तरमनुमित्यनुत्पादे तत्पूर्वोत्पन्नपरामर्शादिरेवानुमित्यव्यवहितपूर्ववर्त्तिभिन्नतया विरोधित्वेनापत्यसम्भव इत्यतोऽनन्तरमनुमितिरित्युक्तम्। अनवरतेति। अनवरतपरिस्पन्दमानानामपरिमितपरमाणूनां चेतनेनात्मना सह यः संयोगसन्तानः संयोगधारा, तदन्तर्गतव्यक्तीनां प्रतिक्षणमेव नाशादित्यर्थः। अपरिमितानामपि घटादीनामिव स्थिरत्वे, सदागतिस्वभावानामपि एकद्वयादिरूपत्वे प्रतिक्षणं न संयोगोत्पादविनाशसम्भव इत्यपरिमितान्तम्। प्रतिक्षणमात्मसमवेतसंयोगादिनाशस्य सम्भवेऽपि न प्रामाणिकतेत्यागृह्यफलानुत्पादेति। कल्पनाप्रसवादिति अनुमित्युत्पत्तेरुक्तकारणसत्त्वस्यावश्यकतया तदनुत्पादस्य तादृशसंयोगादिनाशमन्तरेणानुपपद्यमानत्वादिति भावः।

ननु तत्रानुमित्यनुत्पादनिर्व्वाहाय सिद्धत्वभावादिरूपकारणान्तरमेव कल्पतां तद्विरहेणापि तव तदुपपत्तेरित्यत आह कारणान्तरेति। ननु अनुमितिपूर्व्ववर्त्तिनिश्चितत्वावच्छिन्नाभावस्य कारणतासिद्धौ उक्तस्थलेऽनुमित्यनुत्पादनिर्व्वाहाय तादृशकारणाभावोपपादकसंयोगादिविनाशः कल्पनीयः। प्रयत्नस्य तादृशग्रह

उपादीयन्तां वा तत्तदात्मसमवायविशेषसम्बन्धा एव तादृशपूर्ववर्त्तिभिन्नाः। भवेद्वा तत्तत्पुरुषीयानुमितिं प्रति तत्तदीयानुमित्यव्यवहितपूर्वक्षणत्वादिना तादृशक्षणवर्त्तित्वविशिष्टत्वादिना वा कारणत्वं। तथाच

एव न सम्भवति उक्तस्थले तदानीं तादृशाभावरूपकारणसत्त्वस्य सन्दिग्धतया अन्वयव्यभिचारसन्देहादित्यतग्राहान्वयव्यभिचारेति। कारणत्वग्रहाविरोधित्वादिति। कारणताया: कार्य्यव्यापकतागर्भीया ग्रहे याह्याभावावगाहितया व्यतिरेकव्यभिचारग्रहस्यैव विरोधित्वात्, सामग्रीनिष्ठकार्य्यव्यासेय कार्य्यकारणभावघटकतया तादृशव्याप्तिविरोध्यन्वयव्यभिचारग्रहस्य कार्य्यकारणभावग्रहविरोधित्वे मानाभावादिति भावः।

ननु प्रतिक्षणमात्मनि संयोगादिविनाशेऽपि यत्र दर्शितस्थले सिद्धिरनुमितिरूपा, तत्र तद्वितीयक्षणविनष्टसंयोगादेरनुमितिपूर्वत्वमपि सत्त्वेनाविरोधितया उक्तापत्तिस्तदवस्थेवेत्यत आह उपादीयन्तामिति। प्रतिबन्धकतया स्वीक्रियन्तामित्यर्थः। 'समवायविशेषः' यदा तत्रात्मनि अनुमितिर्नोत्पद्यते तत्क्षणाव्यवहितपूर्वक्षणरूपः। तत्सम्बन्धस्यानुमित्यव्यवहितपूर्वत्वभावात्। एव सति प्रतिबन्धकता स्वरूपसम्बन्धेनैव वाच्या। सर्वत्रक्षणविशेषसम्बन्धस्यैव प्रतिबन्धकतासम्भवेन सिद्धादिसाधारण्यविरहेऽपि क्षतिविरहात् क्षणसम्बन्धस्य स्वरूपातिरिक्तत्वमभ्युपेत्येदम्। अनतिरिक्तत्वाभि-

उपमानादेः प्रमाणान्तरत्वं भज्येत सर्वत्र अनुमितिसामग्रीसम्भवात् ।

विलीयेत च परामर्शत्वादिना कारणत्वं बाधत्वादिना च प्रतिबन्धकत्वम् । अनयैव रीत्या कार्य्यान्त-

---

रायेणानुगतेन भेदकूटाघटितलघुरूपान्तरेण कारणतां प्रसञ्जयति भवेदिति । एकपुरुषीयानुमित्युत्पादक्षणे सर्व्वात्मन्यनुमित्यापत्तेर्व्वारणाय तत्तत्पुरुषीयत्वनिवेशः । क्षणस्य कारणता च यदा तादृशक्षणः तदुत्तरं कार्य्यमिति कालिकप्रत्यासत्या बोध्या । परामर्शसाधारण्यानुरोधेनाह तादृशेति । तदीयानुमित्यव्यवहितपूर्ब्ववर्त्तीत्यर्थः । यद्यप्यत्र पूर्ब्वोपदर्शित स्वसामानाधिकरण्यस्यानुमितिविशेषणतयाप्यतिप्रसङ्गः प्रकृतवारण स्तथापि तत्र स्वत्वान्तर्भावेनाननुगममाशङ्क्य तत्पुरुषीयघटिते तत्कल्पानुसरणं बोध्यम् । न चैवं पुरुषभेदेन कारणताभेदात् सामानाधिकरण्यमत्यासत्या लिङ्गपरामर्शत्वसिद्धरभावत्वादिना कारणताकल्पनमेवोचितमिति वाच्यम् । लिङ्गपरामर्शादेरपि लिङ्गादिभेदेन कारणताभेदस्यावश्यकत्वात् पुरुषापेक्षया लिङ्गादीनामेवभूयस्त्वात् । उक्तरूपेण-कारणता स्वीकारे अनिष्टं प्रदर्शयति तथा चेति । उपमानादेरित्यादिना शब्दपरिग्रहः । प्रमाणान्तरत्वमनुमिति बहिर्भूतप्रमाणत्वम् । सर्व्वत्रैवेति । उपमानादिस्थले लिङ्गपरामर्शादिघटितानुमितिसामग्रीनियमात् तत्र प्रमित्यन्तरमुपेयते अत उपमानादेः प्रमाणान्तरता अनुमित्युत्पत्तिमात्रनिर्व्वाह्यस्य उक्तकारणस्या-

भावे विनिगमनाविरहादेवेत्यर्थः । एतन्मते अधिकदूषणमाह वैयर्थ्याच्चेति । अनुमित्यव्यवहितपूर्ववर्त्तिभिन्नत्वावच्छिन्नाभावस्यैव कारणत्वसम्भवात्, बाधबुद्धादेरभावस्य परामर्शादेश्च कारणतान्तर-विलयप्रसङ्गस्येष्टत्वादिति भावः । एतन्मत एव दर्शित तृतीयचण-साधारणाव्यवहितोत्तरत्वघटितस्वरूपाव्यवहितोत्तरक्षणोत्पत्तिका-नुमितिकभिन्नसिद्धाभावरूपपक्षतापक्षेऽपि पूर्वोक्तसिद्धिपदव्याव-त्यसङ्गतेस्तद्वैयर्थ्यं बोध्यम् । न च ज्ञानेच्छयोर्योगपद्ये सिषा-धयिषाकालोत्पन्नानुमितिपूर्ववर्त्तिपरामर्शादेः सिषाधयिषाविर-हविशिष्टाव्यवहितोत्तरक्षणोत्पन्नानुमितिकभिन्नतया पूर्वं सि-षाधयिषाविरहविशिष्टतया चानुमितिविरोधिता स्यादिति तत्-सार्थकता इति वाच्यम्, ज्ञानेच्छयोर्योगपद्ये सिद्ध्युपादानेऽपि यत्र पूर्वोत्पन्नसिषाधयिषाचतुर्थक्षणे सिद्धयनन्तर पुनः सिषा-धयिषाऽनुमितिरेव युगपत्तत्र सिद्धिविरोधितापत्ते र्दुर्व्वारत्वात् । न च तत्र सिद्ध्यनुपादाने सिषाधयिषाविरहविशेषणस्यापि वैयर्थ्य-मापादितं यत्र क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र सिद्धेरनु-मित्यविरोधित्वेऽपि सिषाधयिषोत्पत्तिकालविनष्टफलेच्छादीना विरोधितयैव सिषाधयिषोत्पत्तिक्षणेऽनुमितिवारणसम्भवादिति वाच्यम्, सिद्धेरनुमितिरूपत्वे इच्छाकालविनष्टफलेच्छादेरनुमित्य-व्यवहितपूर्ववर्त्तितया विरोधित्वासम्भवादिति ।

समानविषयकप्रत्यक्षसामग्रीकाले पक्षताविरहेणानुमितिं वारयतो, मूलस्यसाधकमानपदं सिद्धिसाधकमानविशेषान्यतर-परतया वर्णयत, उपाध्यायस्य मतमाह "सिषाधयिषेति" ।

सिषाधयिषाविरहविशिष्टस्य सिद्धानुमानातिरिक्तसाधकमानयोरन्यतरस्याभाव. कारणमिति तु केचित्तन्न, साधक हि मान सिद्धिस्वरूपयोग्यं तद्रूपस्थितं तत्सामग्री वा, नाद्यः, चक्षुरादिमत्त्वे विनानुमित्सामनुमित्यभावप्रसङ्गात्। न द्वितीय, सिद्धेः पूर्वं

सिद्धाविव साधकमानेऽपि अनुमित्सायां उत्तेजकत्वात् प्रत्येकं तदभावविशेषणत्वे गौरवमित्यन्यतरत्वावच्छिन्ने सकृद्विशेषणता लाभायसमास उपेक्षित । अनुमितिपूर्वमनुमानरूपस्यैव साधकमानस्य नियमेन सत्त्वात् सिषाधयिषा विना कदाप्यनुमितिर्न स्यादित्यनुमानातिरिक्तत्व साधकमानविशेषण, साधकमानपदा यैघटकसिद्धावनुमित्यन्यत्वविशेषण पर्य्यवसित, इदञ्च लाघवमाद्धायैव निराकार्य्यम् । साधकमानपदार्थं वितर्कं दूषयति "साधक ज्ञीति । तदुपस्थिति स्वजन्यसिद्धिविशिष्टम । तत्सामग्री सिद्धेकारणसमुदाय । अनुमित्सासत्त्वे तदभावविशिष्टसाधकमानाभावस्य सत्त्वादिनानुमित्सामिति । अनुमित्यभावप्रसङ्गादिति कालिकप्रत्यासत्त्या प्रतिबन्धकत्वाभिप्रायेण । समवायेन प्रतिबन्धकत्वे आत्मनि सर्व्वदैव चक्षुरादिप्रमाणाभावादतिप्रसङ्गो बोध्य । प्रत्यक्षसामग्रीसत्त्वे, अनुत्पत्ते प्रत्यक्ष इति शेष ।

ननु लक्षानुमितिवारणायान्यदेव प्रतिबन्धकमाद्येय सिद्धा भावपक्षलाघवेऽपि तदावश्यकत्वादित्यत आह्वानुमानातिरिक्तेति। तथासति पक्षतावच्छरीरेऽनुमानातिरिक्तसाधकमानान्तर्भावस्य नि

तदुपहितत्वाभावेन प्रत्यक्षसामग्रीसत्त्वेऽप्यनुमित्यापत्तेः, अनुमानातिरिक्तेत्यस्य वैयर्थ्याच्च। न तृतीयः, अनुमितिसामग्रभावत्वेन प्रत्यक्षकारणत्वम् अनुमित्सा-विरहविशिष्टप्रत्यक्षसामग्रभावत्वेन चानुमितिकारण-त्वमित्यन्योऽन्याश्रयात् ।

फलत्वादित्यर्थः । सिद्धसमवहितप्रत्यक्षादिसामग्रीदशाया अनुमितिवारणस्यैव तत्फलत्वात, साधकमानपदेन सिद्धुपहित विवक्षणे च तदनिर्व्वाहादिति भाव ।

केचित्तु "यथाश्रुतानुरोधेनानुमानातिरिक्तेति तन्नात्र परमेव । न च सामग्रा पृथक्प्रतिबन्धकत्वे साधकमानपदार्थस्य सिद्धुपहितस्यापि निवेशनमफलमेवेति वाच्यम् यत्र विषये प्रत्यक्षाद्युपहितसन्निकर्षादिघटितप्रत्यक्षादिसामग्रीदशायामेव परा-मर्शादिसमवधान तत्रानुमितिवारणाय तादृशसाधकमानस्यैव पक्षताया निवेशयितुमुचितत्वात् । न च तत्रापि सिद्धिप्रति-बन्धकतयैव उपपत्तौ सिद्धुपहितनिवेशनमफलमिति वाच्यम्, शाब्दसिद्धिकाले अशाब्द ज्ञान जायतामितीच्छाबलादनुमित्यु पत्तये सिद्धौ तादृशेच्छाया अवश्यमुत्तेजकत्वोपगमात् । तथाविधे च्छाबलादुपदर्शित प्रत्यक्ष सामग्रानन्तरमनुमितिर्व्वारणाय साधक-मानान्तर्भावसार्थक्यात् । न च सिद्धुपहितचक्षुसंयोगादिसत्त्वे आलोकसमवधानासत्त्वे (१) तादृशेच्छाबलात् अनुमित्युत्पत्त्या

---

(१) आलोकसमवधानाद्यसत्त्वे इत्यपि पुस्तकान्तरीयपाठ ।

साधकमानेऽपि तादृशेच्छाया उत्तेजकतायाः आवश्यकत्वात् प्रज्ञतायाः तदन्तर्भावेऽपि उक्तापत्तिवारणायावश्यं इति वाच्यम्, यत्र प्रत्यक्षोपस्थितवस्तु संयोगादिमत्त्वे इतरकारणसमुदायसत्त्व एव शाब्द ज्ञान जायतमिलोच्छा न तु इतरकारणाभावविशिष्टवस्तु संयोगादिसत्त्वे, तत्र तादृशेच्छाभावस्य प्रत्यक्षोपस्थितवच्च संयोगादिरूपसाधकमानविशेषणत्वानुपगमात् तादृशविषयविशेषीयपक्षतायामेव तथाविधसाधकमानान्तर्भावस्य सार्थकत्वादित्याहुः'। "अनुमितिसामग्र्याभावत्वेन प्रत्यक्षकारणत्वमिति' अन्यथा अनुमित्याधीनानुमित्युत्पत्तिकाले प्रत्यक्षापत्तेरिति भावः। प्रत्यक्ष सामग्र्याभावत्वेन, सिद्धिप्रत्यक्षसामग्र्यन्यतराभावत्वेन। 'अन्योन्याश्रयादिति' अनुमितिसामग्र्याभाव प्रत्यक्षकारणकलापान्तर्गतस्य ज्ञात्वाप्रत्यक्षसामग्र्या अज्ञानात् तज्ज्ञाने च तदभावघटितानुमितिसामग्र्या अज्ञानात् तदभावादिज्ञानाभावादितिभावः। अथवा कारणसमुदायत्वेन सामग्र्या निवेशे समुदायभेदस्य प्रत्येक सकलकारणेष्वेव सत्त्वात व्यावज्यवृत्तिधर्मावच्छिन्नानुयोगितासाकाङ्क्षानुपगमे सामग्र्या (१) सामग्रीभिन्नभिन्नत्व दुर्घटमिति काय्यो व्यवहितप्राक्क्षणावच्छिन्नत्वेनैव सा निवेश्या, अथाव्यवृत्तिधर्मावच्छिन्न भेदस्याश्रयवृत्तितामभ्युपेत्य अन्यदाकार्य्योव्यवहितपूर्वक्षणावच्छिन्नभेदवत्त्व, कार्य्योव्यवहितप्राक्क्षणे च तादृशभेदावच्छिन्नभेदवत्त्व, फलोपधायकत्वोपपादनीयम्। तथाच परामर्शसत्त्वे प्रत्यक्षोत्पत्तिकालेऽनुमित्युत्पाद प्रत्यक्षोत्पादनिर्व्याह, उक्तानुमिति

(1) सामग्र्या मिति पाठ दर्शनिनू पुस्तके नास्ति।

स्थाणुत्वाभावव्याप्यदर्शनक्षणे प्रतियोग्यारोपविरहेणाभावप्रत्यक्षसामग्रीविरहात् पक्षतासत्त्वे स्थाणुत्वारोपक्षणे तदभावानुमित्यापत्तेरित्यपि कश्चित्।

प्रतिबन्धकत्वस्य प्रत्यक्षोत्पत्तिमन्तरेणानिर्वाहात् प्रत्यक्षोत्पत्तिरपि अनुमित्यनुत्पादमपेक्षते, तदुत्पादे अनुमित्यव्यवहितप्राक्क्षणावच्छिन्नस्य प्रत्यक्षप्रतिबन्धकस्यावश्यं सत्त्वादित्यन्योन्याश्रयइति भावः। अत्रैव कल्पे अन्येषां दूषणमुपन्यस्यति "स्थाणुत्वाभावेति।"

स्वोक्तदोषस्याप्येतदनुमततया चकारसङ्गतिः (१)। यत्र विशेषदर्शनानन्तरक्षणजातप्रतियोग्यारोपात् स्थाणुत्वाद्यभावप्रत्यक्षं तत्रेत्यादिः। तदभावानुमित्यापत्तेः स्थाणुत्वाभावानुमित्यापत्तेः। तथाचानुमित्यन्यसिद्धिसामग्रभावस्य कार्यकालवृत्तितया पृथगेव कारणत्वमावश्यकमिति भावः। न च प्रतियोग्यारोपस्याभावप्रत्यक्षकारणतामते यत्र विशेषदर्शनकाले तत्पूर्वं वा प्रतियोग्यारोपस्तत्रैव विशेषदर्शनाधीनमभावप्रत्यक्षं न तु विशेषदर्शनोत्तरप्रतियोग्यारोपानन्तरमिति वाच्यम्, प्रतियोग्यारोपस्य हेतुतामते विशेषदर्शनपर्यन्तं प्रतियोग्यारोपानुत्पादस्थले विशेषदर्शनोत्तरमभावप्रत्यक्षोत्पत्त्या फलसाम्याय तद्धेतुतामतेऽपि क्षणैकव्याजेनाभावप्रत्यक्षस्वीकारस्यावश्यकतेत्याशयात्। न च विशेषदर्शनानन्तरमाहार्य्य एव प्रतियोग्यारोपो भविष्यति तत् सामग्र्याश्चेच्छाघटितायां बलवत्त्वान्नोक्तस्थलेऽनुमित्यापत्तिरिति वाच्यम्,

---

(१) दीधितौ 'इत्यपि इत्यत्र 'इति च' इति पाठाभिप्रायेण व्याख्यातम्।

धर्मितावच्छेदक सामानाधिकरण्यमावगाहि विशेषदर्शनोत्तरमिच्छा विशेष प्रतियोग्यारोपसम्भवात्(१)। प्रतियोग्यारोपकारणतायाः स्वासम्मततया "कचिदिति"(२)। अनु पक्षताघटकप्रत्यक्षसामग्री नानुमितिसामग्रभावघटितकारणसमुदायरूपा, अपि तु तदतिरिक्ता प्रत्यक्षसामान्यकारणसमुदायरूपैव वाच्या, अनुमित्साविशिष्टसमानविषयकानुमितिसामग्रीदशायां मिथोविरोधिरूपोत्तेजकबलादेवानुमित्युपपत्ते.। एवं प्रत्यक्षं प्रत्यनुमितिसामग्रीप्रतिबध्यकतायामपि निरूक्तपक्षता न निवेश्यते, अपि तु लाघवादनुमित्सावैशिष्ट्यमेव, असत्यामनुमित्सायां समानविषये प्रत्यक्षोत्पत्तेरावश्यकत्वात्तस्मिंश्च पक्षतायाः अपि आवश्यकत्वात्। तथाच न प्रथमोक्तान्योन्याश्रयावकाशः, एव सामग्र्याः कार्योन्मुखत्वावच्छिन्नत्वेन प्रतिबन्धकत्वेऽपि समानविषयकप्रत्यक्षं प्रति प्रतिबन्धकतायामनुमित्सावैशिष्ट्यं निवेश्यते। तथाचोक्तरीत्या प्रत्यक्षोत्पत्तिर्नानुमित्यनुत्पादमुपजीवति अनुमित्युत्पादेऽप्यनुमित्साविरहेण प्रत्यक्षप्रतिबन्धकाभावत्वात् अपितु अनुमित्साविरहमेवेति-नापरोऽप्यन्योन्याश्रयः। अन्यथा सामग्र्याः पक्षतायामनन्तर्भावेऽपि पृथक्प्रतिबन्धकतायाः आवश्यकत्वेनानिस्तारादित्यत आह "यमुतद्विति"।

---

(१) "न च प्रतियोग्यारोपस्य त्यादि." प्रतियोग्यारोपसम्भवा दित्यस्मा दाकरु कर्त्तव्यिकरु पुस्तके न दृश्यते।

(२) टीपिनी "कचित्." एतस्य केचिदित्येव पाठो भट्टाचार्यसम्मत पुस्तकेषु केचिदित्यीयुक्तम्।

वस्तुतस्तु स्वतन्त्रान्वयव्यतिरेकशालित्वान्नियमेन प्रथमोपस्थितत्वाल्लाघवाच्च प्रत्येकमेव तथात्वमन्यथा बाधादेरपि अत्रैवान्तर्भावप्रसङ्गात्, न चानुमित्साविर-

---

स्वतन्त्रान्वयव्यतिरेकशालित्वं, सिद्धित्वादिरूपप्रत्येकवृत्तिधर्मावच्छेदेन कार्य्यानुत्पादंप्रत्यन्वयव्यतिरेकानुविधायित्वम्। ननु अन्यतरत्वेन प्रतिबन्धकत्वेऽपि तन्नियतसिद्धित्वाद्यवच्छिन्नस्य कार्य्यानुत्पादान्वयनियतत्वं तदवच्छिन्नव्यतिरेकस्य च कारणान्तरपरामर्शादिसहितस्य कार्य्योत्पादनियतत्वं सम्भवति इति न तावतासिद्धित्वादिना प्रतिबन्धकतासिद्धिरित्यतो हेत्वन्तरमाह "नियमेनेति"। प्रथमोपस्थितत्वात्, प्रत्येकरूपावच्छिन्नस्य तदवच्छिन्नान्यतरत्वापेक्षया प्रथममुपस्थितत्वात्। उपस्थितिलाघवमुक्त्वाशरीरलाघवमाह "लाघवादिति"। उक्तरूपद्वयमपेक्ष्य तदुभयघटितस्याधिकभेदादिघटिततया गुरुत्वादिति भावः। प्रत्येकं, सिद्धित्वादिना। तथात्वं, प्रतिबन्धकत्वम्। अन्यथा, प्रतिबन्धकत्वैक्यानुरोधेन नानाधर्मावच्छिन्नानां तत्तदवच्छिन्नभिन्नभिन्नत्वेन प्रतिबन्धकत्वे। बाधादेरित्यादिना सत्प्रतिपक्षादिग्रहपरिग्रहः,(१) अत्रैव, पक्षतायामेव। अन्तर्भावप्रसङ्गात्, घटकताप्रसङ्गात्। सिद्धिबाधसामग्रीविशेषान्यतमत्वावच्छिन्नाभावस्य पक्षतात्वप्रसङ्गादिति समुदायार्थः। अन्यथा बाधबुद्ध्याद्यभावस्य कारणतान्तरकल्पनापत्तेरिति भावः। न च वह्न्यादिनिश्चयाप्रतिबध्यायामपि वह्निमान् पर्व्वतो घट-

---

(१) सत्प्रतिपक्षादिपरिग्रह इत्यपि क्वचित् कः पाठः।

इत्य प्रत्येकविशेषणत्वे गौरव शाब्दसिद्धौ सत्यामशाब्दं ज्ञानं जायतामितीच्छायामनुमितेरुत्पादात् सिद्धावनुमितिविषयेच्छाविरहस्य, प्रत्यक्षसामग्रीसत्त्वे च ताद-

---

वानित्यनुमितौ वह्नयभावादिनिश्चयस्य प्रतिबन्धकतया वह्न्यादि-प्रकारतावटितरूपावच्छिन्न प्रति वह्न्यभावादिनिश्चयस्य प्रति बन्धकतान्तरकल्पनमावश्यकमिति कथ साध्यतदभावादिनिश्चया नामेकरूपेण प्रतिबन्धकतासम्भवेति चाद्यम, वह्न्यादिप्रकार कानुमितौ वह्न्यभावादिनिश्चयस्य पृथक्प्रतिबन्धकत्वेऽपि वह्निमान् पर्व्वतो धूमवान् इत्याद्यनुमितिहेतुपक्षतायानाद्यसिद्धयादिनिश्च यात्तभावेणैव ताद्दशनिश्चयदशाया तथाविधानुमितिवारणसम्भवात्, अवच्छेदकगौरवस्य तावतैवाप्रयोजकीभूतत्वात् । न च तथापि बाधकाले प्रत्यक्षादेरप्युत्पत्त्या विशिष्टबुद्धिसामान्य प्रति बाधस्य प्रतिबन्धकतान्तरकल्पनमावश्यकमिति पक्षताया तदन्तर्भावो निरर्थक इति वाच्य, तथापि भिन्नविषयकानुमितिसामग्र्यादीनामवश्यकल्पनीयप्रतिबन्धकताया बाधसाधारण्यान्तरत्वादेरवच्छेदक तयैवोपपत्तेर्बाधबुद्धे सामान्यप्रतिबन्धकत्वोभिधे, प्रत्यक्षस्थले इच्छालानुत्तेजकतयापि तदसिद्धे । केचित्तु "अयमेव, दृष्टप्रतिबन्धकतायामेव, प्रतिबन्धकान्तरसाधारण्यान्तरावच्छिन्नप्रतिबन्धकताग्रहामेवेति यावत् । यत्तभावग्रहात्, अवच्छेदकघटकताग्रहात्। तदभावव्याप्यवत्ताग्रहादिसाधारण्यान्यतरेणैव बाधादे इति बन्धकतामहादिति समुदायार्थ । तथाच यत्तायां याधात्तभाव

शेच्छायामप्यनुमित्यनुत्पादात् साधकमाने अनुमिति-
त्वादिप्रकारकेच्छाविरहस्य, पृथगेव विशेषणतायास्त्व-
यापि वाच्यत्वात् ।

परत्वाभावान्नोक्ता सङ्गतिरिति व्याचक्षुः । केचित्तु "तदभावनिश्चय-
दशायां यादृशाङ्कुरविशेषधर्मिताव च्छेदकत्वादनुमितेः कारणान्त-
रविरहादेव नियमतोऽनुत्पादस्तत्साध्यकस्थलाभिप्रायकोऽयं ग्रन्थ
इत्याहुः"। ननु सिद्धिसामग्रीविशेषयोरुभयोरेवानुमिति साया उत्ते-
जकतया तयोरनुगतरूपेण प्रतिबन्धकत्वे अनुमित्साविरहस्यान्य-
तरत्वावच्छिन्ने सकृद्विशेषणतया लाघवम्, अनुमित्साविरहविशिष्ट-
सिद्धिसामग्यन्यतरत्वापेक्षया तद्विशिष्टसिद्धित्वतद्विशिष्टसामग्री-
त्वयोरेकस्यापि विशेषणस्य द्विधानिवेशेन गौरवात्, अन्यतरत्वघट-
कांशापेक्षया सिषाधयिषाविरहांशस्य गुरुतायाः स्फुटत्वात् । अत-
एव बाधान्तर्भावप्रतिबन्धेरपि नावकाशः । बाधसिद्धितद्विशेष-
सामग्रन्यतमत्वेन प्रतिबन्धकत्वे अनुगतरूपावच्छिन्नाये सिषा-
धयिषाविरहविशेषणतायां सिद्ध्यादिकाल इव बाधकालेऽपि अनु-
मित्साबलादनुमित्यापत्तेः, सिद्धित्वादिवच्छिन्न एव पृथक् तद्विशे-
षणतया उक्तलाघवानवकाशात्। विशिष्टबुद्धिसामान्ये बाधतदभाव-
व्याप्यवत्ताज्ञानादीनामेकरूपेण प्रतिबन्धकत्वे उक्तदिशा लाघवा-
सम्भवेनावच्छेदकगौरवस्य दुष्परिहरत्वात् । न च प्रत्यक्षस्थले
बाधबुद्धौ तदभावव्याप्यवत्ताबुद्धौ च इच्छाया उत्तेजकतया तत्ता-
नुगतरूपेण तयोः प्रतिबन्धकत्वे इच्छाविरहस्य सकृद्विशेषणतया

स्वनिवर्त्तकप्रत्यक्षादिसामग्रीसमवहितान्यत्वादिना

लाघवमप्युक्तमेवेति वाच्यं, बाधादौ प्रत्यक्षेच्छाया उत्तेजकत्वे नाना-प्रतिबन्धकताप्रसङ्गेन तदनभ्युपगमात्, अनाहार्य्यत्वस्य प्रतिबध्यता-वच्छेदकत्वमङ्गीकृत्यैव बाधादिसमये आहार्य्यप्रत्यक्षस्योपपादनीय-त्वादित्याशङ्क्य निरस्यति "न चैत्यादिना"। गौरवमित्यन्तेनाशङ्का। अनुमितेरुत्पादादिति, प्रत्यक्षसामग्रामत्वेनुमित्युत्पत्त्यैव तादृशेच्छा-विषयसिद्धेरिति भाव.। अनुमितिविषयकेच्छाविरहस्य, अनुमिति-त्वोपकारकतादृशेच्छासाधारणानुगतरूपावच्छिन्नविरहस्य। तादृशश्च रूपं प्रागेवावेदितम्। 'अनुमित्यनुत्पादादिति" प्रत्यक्षोत्पत्त्या तादृशे-च्छाविषयसिद्धरिति भाव:। अनुमितित्वादिप्रकारकेच्छाविरहस्य, अनुमितिसाप्रत्यक्षान्यज्ञानत्वादिप्रकारकेच्छाविरहस्य। पृथगेव, यथा-योगं सिद्धित्वप्रत्यक्षसामग्रीत्वाद्यवच्छिन्न एव। ननु अनुमिति-त्वादिप्रकारकेच्छातत्प्रकारकेच्छानामनुगतरूपावच्छिन्नाभाव एवा-न्यतरत्वावच्छिन्ने विशेषणं वाच्यं, प्रत्यक्षादिसामग्रीदशायामुक्तेच्छा-बलादनुमितेर्व्वारणाय चानुमितिभिन्नालौकिकप्रत्यक्षान्यस्वविषय-तावच्छेदकावच्छिन्नसामग्रीसमवहितान्यत्वेनेच्छाविशेषणीया। अनु-मितिसामग्रया उपनीतभानसामग्रया च समवहिताया इच्छाया: संग्रहाय भेदद्वयमवच्छिन्नान्तविशेषणम्। अनुमितित्वादिप्रकारि-काया. प्रत्यक्षादिसामग्रीसमवहितेच्छाया: संग्रहायावच्छिन्नान्तं, एवञ्चोक्तलाघवमप्युक्तमेवेत्यत आह "स्वनिवर्त्तकेति'।

निवर्त्तकत्वं विषयतया बोध्यम्। "अतीव गौरवमिति"

च तादृशैक्ययोरनुगमेऽतीव गौरवम्, अन्यतरत्वघटकयो-
रन्योऽन्याभावयोर्मिथोविशेषणविशेष्यभावे विनिगम-
का(१)भावश्च । आत्मनिष्ठश्च समवायेन सिद्धिरभावः
कारणं, भिन्नभिन्नेन च सम्बन्धेन तत्तदसाधारणकारण-

तिगुरुशरीरतादृशेच्छाविशेषणस्याधिकस्य निवेशादिति भावः । नन्वेवमपि प्रतिबन्धकतैक्यनिबन्धन लाघव दुर्व्वारमेव प्रतिबन्धकत्वान्तराकल्पने एकत्रावच्छेदकगौरवस्याकिञ्चित्करत्वात् । अनेकत्र पक्षताहेतुतायाम् एकैकविधवह्नभावादिनिश्चयानामन्तर्भावेऽनन्तस्थले अवच्छेदकगौरवात् स्वातन्त्र्येण एकैकप्रतिबन्धकताकल्पनस्यौचिततया बाधादेः पक्षतान्तर्भावप्रतिबन्ध्यनवकाशात् प्रतिबन्धेरनुत्तरत्वाच्चेत्याशयेनान्यतरत्वेन प्रतिबन्धकत्वमतेऽपि विनिगमनाविरहेण प्रतिबन्धकताद्वयमापादयति "अन्यतरत्वेति" । अन्योन्याभावयोः, सिद्धिभेदसामग्रीभेदयोः । तथाच सिद्धिभेदविशिष्टसामग्रीभेदावच्छिन्नभेदः सामग्रीभेदविशिष्टसिद्धिभेदावच्छिन्न-भेदश्च विनिगमनाविरहात् प्रतिबन्धकतावच्छेदक इत्यवच्छेदक-भेदात् प्रतिबन्धकताभेद आवश्यकः । न च तादृशभेदयोः समनियतयोरभेदान्नावच्छेदकभेद इति वाच्यम्, तादृशभेदाभेदेऽपि तस्य सिद्धिभेदविशिष्टसामग्रीभेदावच्छिन्नभेदत्वेन सामग्रीभेदविशिष्ट-सिद्धिभेदावच्छिन्नभेदत्वेन च विनिगमनाविरहेणावच्छेदकतायाः स्वीकरणीयतया विशिष्टस्यावच्छेदकस्यावश्यं भेदात् । नचाखण्डस्य

---

(१) एकतरपक्षपातिनीयुक्तिर्विनिगमना तद्बोधकं वाक्यं विनिगमकम् ।

रूपायास्तत्सामग्र्याः, मणिविशिष्टस्य वह्नेरिव दृतरविशिष्टस्य मनोयोगादेः प्रतिबन्धकत्वायोगात्। तथा च कथमनुगतरूपेण तयोरभावः कारणम्, एवं सिद्धेः सिषाधयिषाविरहेण वैशिष्ट्यमेककालावच्छेदेनैकात्म-

---

तस्य स्वरूपत एवावच्छेदकतानभ्युपादुक्तविशेषणपुरस्कारेण नावच्छेदकत्वमिति कथं विनिगमनाविरह इति वाच्यम्, अभावस्याखण्डत्वेऽपि स्वरूपतोऽवच्छेदकतायाः सिद्धान्तविरुद्धत्वात्, यस्य स्वरूपतो भानं तस्यैव तथावच्छेदकतायाः सिद्धान्तसिद्धत्वात्, विशेषणपुरस्कारेणोपस्थितेऽवच्छेदकत्वग्रहस्य विशेषणावच्छिन्ने अवच्छेदकतावगाहित्वनियमात् स्वरूपतो (१) ऽभासमाने स्वरूपतोऽवच्छेदकत्वस्य प्रमाणेनासम्भाच्च। न च तद्वत्तित्वेनैव भेदस्यावच्छेदकत्व स्वीकरणीयं न तु स्वरूपतः, तथाच नोपदर्शितविनिगमनाविरहावकाश इति वाच्यम्, भेदनिष्ठ तद्वत्तित्वस्य भेदस्वरूपातिरिक्तस्य दुर्वचत्वात्, भेदरूपस्य च तस्य स्वरूपतो विशेषणत्वासम्भवात्। एतेनाखण्डस्यान्यतरत्वावच्छिन्नाभावस्य तद्वत्तित्वेनैव हेतुत्वमित्यपि परास्तम्। यत्तु सिद्धिभेदसामग्रीभेदयोः सामानाधिकरण्येन मिथो विशेष्यविशेषणभावापन्नयोर्न भेदप्रतियोगितावच्छेदकत्व येन विनिगमनाविरहः स्यात्, अपि तु धर्मिविशेषणतापन्नयोरेव, व्याप्यवृत्त्यवच्छेदकत्वं तथाविधयोरप्यवच्छेदकता-

---

(१) किञ्चिदूनेणाभासमान इत्यपि पुस्तकान्तरीयपाठः।

वृत्तित्वं प्रत्यक्षादिकारणचक्षुःसंयोगादिस्त्वन्याहृशमिति-
सामग्रीविशेषाभावस्य हेतुत्वेऽपि लाघवात् सिद्धाभाव
एव पक्षव्यवहारनिमित्तम्, एतदेवाभिसन्धाय प्रवृत्ति-
निमित्तमुक्तमिति वक्ष्यति ।

पर्य्यासेर्महानसीयवह्निर्नास्तीति प्रतीत्यावगाहनादिति, तदपि,
न, महानसीयवह्निर्नास्तीत्यादिबुद्धौ वह्नित्वायेकधर्मिंतावच्छेदका-
वच्छिन्न एव महानसीयत्वाद्यपरविशेषणभान नियम इत्येकत्वा-
नेकेषामवच्छेदकत्वे ग्राह्ये धर्मिंतावच्छेदकावच्छिन्नविशेषण-
तापन्नस्यैवावच्छेदकत्वग्रहो न तु धर्मिंतावच्छेदकावच्छिन्नविशेषण-
तानापन्नस्यावच्छेदकताग्रह इतिनियमेन प्रकृते कस्य धर्मिंता-
वच्छेदकतापन्नस्य कस्य वा तदवच्छिन्नविशेषणतापन्नस्यावच्छेदक-
त्वमित्यत्र विनिगमनाविरहेणावच्छेदकताभेदस्यावश्यकत्वादवच्छे-
दकविषयतावैलक्षण्यस्यावच्छेदकतावैलक्षण्यनियतत्वादित्यन्यच्च वि-
स्तरः । अन्यतरत्वेन उभयोरनुगमेऽपि प्रतियोगितावच्छेदकसम्ब-
न्धानुगमान्नतयोरेकाभावस्य कारणतासम्भव इत्याह "आत्मनिष्ठ-
येति ।" समवायसम्बन्धावच्छिन्नप्रतियोगिताकः सिद्धाभाव आत्म-
प्रत्यासत्तया कारणम्, प्रत्यक्षासाधारणकारणचक्षुःसंयोगादिरूप
सामग्रीस्तु स्वाश्रयसंयुक्तमनःसंयोगादिरूपपरम्पराघटकभिन्नभिन्न-
सम्बन्धावच्छिन्नाभाव आत्मप्रत्यासत्तया कारणं वाच्यमित्यर्थः ।
विषयचक्षुःसंयोगादेः समवायेनाभावस्य सर्व्वदैवात्मनि सत्त्वात्

साट्यभावकारणतया प्रतिप्रसङ्गावारकत्वादिति (१) भावः। ननु विषयचक्षुःसंयोगादेर्न प्रतिबन्धकत्वं स्वीक्रियते येन सम्बन्धानुगमः स्यात्, किन्तु चक्षुःसंयोगादिविशिष्टस्य मनोयोगस्यैव समवायेन प्रतिबन्धकत्वं वाच्यमित्यत आह "मणोति" वह्नेरित्यनन्तरं दाहं प्रतीति, मनोयोगादेरित्यनन्तरं प्रकृते इति, पूरणीयम्। "प्रतिबन्धकत्वायोगादिति" मनोयोगस्यानुमितावपि हेतुत्वात् कारणस्य प्रतिबन्धकत्वायोगादिति भावः। यद्यपि कारणस्यापि रूपान्तरेण प्रतिबन्धकत्वे क्षतिर्विरहः, दाहप्रतिबन्धकत्वे वह्नेः प्रयोजनविरहादेवानिवेशः, प्रकृते तु सम्बन्धैक्यानुरोधादेव मनोयोगादेरनुप्रवेश इत्यकिञ्चित्करमेतत्, तथापि, मनोयोगस्याधिक्य निवेशनीयतया गौरवमेव बाधक बोध्यम्। न च सामग्याः स्वतन्त्रप्रतिबन्धकतामतेऽप्यात्मनिष्ठतासम्पत्तये चक्षुः संयोगादेः सम्बन्धतया मनोयोगादिप्रवेशस्यावश्यकत्वाच्चाधिक्यमेतन्मतेऽपि ज्ञानिष्ठतया सामग्रीभावहेतुत्वे तत्तत्पुरुषीयत्वनिवेशस्यावश्यकतया गौरवादिति वाच्यं, तथापि मनोयोगादिसम्बन्धस्याधिक्यस्य निवेशनीयतया गौरवस्य दुर्वारत्वात्, विषयभेदेन प्रतिबन्धकतानामेदविरहानुरोधेन विषयत्वासत्वतया चक्षुः संयोगादिप्रतिबन्धकतावच्छेदकस्यैव स्वतन्त्रसामग्रीप्रतिबन्धकत्वावादिभिरत्ययगौरवतया तत्र मनोयोगादेर्निवेशाभावाच्च। "तथाचेति" एवं रीत्या प्रतिबन्धकतावच्छेदकसम्बन्धभेदस्यावश्यकत्वे च फलितमाह। पूर्वं प्रतियोगितावच्छेदकभेदेन सिद्धिसामग्रीविशेष-

(१) व्यभिचारज्ञानबोधकत्वादित्यपि प्रकृतकालरीत्य पाठः।

णयोः सिषाधयिषाविरहपदार्थयोर्भेदात्तद्विशेषणप्रवेशपार्थक्यं व्यवस्थापितं इदानीं सम्बन्धभेदेन तद्विशेषणतामेदं व्यवस्थापयति "एककालेति"। एकक्षणावच्छिन्नमेकात्मसमवेतत्वमित्यर्थः। यद्यपि सम्बन्धमध्ये एकक्षणावच्छिन्नत्वानन्तर्भावेऽपि सिषाधयिषाकाले तद्विरहरूपविशेषणाभावाद्विशिष्टाभावोऽक्षत एव। न च तत्र कालानन्तर्भावे सिषाधयिषाकालेऽपि सिद्धौ कालान्तरावच्छिन्न-तद्विरहवत्यात्मनि वृत्तित्वरूपवैशिष्ट्यं वर्त्तते अन्यात्मनि घटादौ च तादृशविशेषणत्वेति विशिष्टसिद्धिसत्त्वमव्याहतमिति कथं विशिष्टाभावेन वर्त्तितव्यं कालान्तर्भावे तु तादृशकालाभावान्न तदानीं तद्घटितवैशिष्ट्यमिति विशिष्टाभावोऽक्षत इति वाच्य, सिषाधयिषाकालस्य तदधिकरणनिष्ठतदभावाधिकरणतानवच्छेदकतया तादृशाधिकरणताघटित सामानाधिकरण्यरूप-तदिच्छासमानाधिकरण-सिद्धिनिष्ठ-वैशिष्ट्येऽप्यनवच्छेदकत्वात् तत्तत्कालावच्छेदेन सिद्धिमत्यपि तदिच्छाधिकरणे इच्छाविरहविशिष्टसिद्धिसत्त्वानुपपत्तेः। अन्यथा स्वाधिकरणकालावच्छिन्नत्वस्य स्वाधिकरणवृत्तितावि-शेषणत्वेऽपि तत्कालस्याप्यन्याधिकरणावच्छिन्नस्वाधिकरणतया कालविरहप्रयुक्तवैशिष्ट्यविरहस्यानिर्व्वाहात्। विशेष्यीभूततत्तत्-सिद्ध्यधिकरणावच्छिन्नस्वाधिकरणकालत्वेन कालस्य सम्बन्धघट-कत्वे चाननुगमादिति। तथापि विभिन्नकाले विशेषणविशेष्ययोः सामानाधिकरण्यसत्त्वेऽपि एकक्षणावच्छेदेन सामानाधिकरण्यस्यैव-विशिष्टसत्त्वनिर्व्वाहकत्वमित्येतत्सूचनायैव एककालावच्छिन्नत्वक-थनम्। केचित्तु "कालस्य विशिष्टाभावप्रतियोगितावच्छेदकत्वघट-

फलानुपहितसिद्धौ क्षाविरहविशिष्टसिद्धभावापे-

कमुभयव्याघटकत्वे तदुपलक्षिताभावाप्रसिद्धिविशिष्टाभाववैलक्षण्यात्, प्रतियोगितावच्छेदकावैलक्षण्यात् सर्वदा दण्डरहितपुरुषाधिकरणभूते दण्डोपलक्षितपुरुषाभावस्य सत्त्वेन पुरुषत्वादिभावस्य तत्प्रतियोगितावच्छेदकत्वासम्भवात् तादृशपुरुषान्तरव्यावर्त्तकानुगतधर्म्मान्तरविरहेण, सत्त्वे वा प्रतियोगिकोटौ तस्याभानेन, प्रतियोगितावच्छेदके तदन्तर्भावासम्भवादित्याहुः" तच्चिन्त्यम्। अन्याङ्गमिति।" स्वाश्रयीभूतान्यूनपरम्परासम्बन्धेन सम्बद्धत्वमित्यर्थः। ननु पक्षतादृशरीरे प्रत्यक्षादिसामग्र्यन्तर्भावे तदभावस्यानुमितौ स्वतन्त्रहेतुताकल्पनमावश्यकं, तथाच तस्यैव पक्षपदप्रवृत्तिनिमित्तता स्वीक्रियता न तु सिद्धभावस्य, तथाच पक्षपदप्रवृत्तिनिमित्तमिदमिति मूलविरोध इत्यत आह "सामग्रीति"। हेतुत्वेऽपि अनुमित्यसाधारणकारणत्वेऽपि। लाघवात् लघुशरीरत्वात्। ननु लाघवस्य पक्षपदप्रवृत्तिनिमित्ततीपष्टम्भकत्वे बाधाभावस्यैव तथात्वमुचितं तच्च सिद्धसाधनविषयाविरहाप्रवेशात्, यदि च सिद्धसाधनस्थले पक्षव्यवहारो नास्तीति सिद्धभावस्य तथात्वमुच्यते, तदा बाधदशायामपि तदविरहात् सोऽपि निविशतामित्यत आह "फलानुपहितेति"।

(१) स्वविषयसिद्धयनुपहितेत्यर्थः। एतच्चातिगौरवभूयस्त्वाय। सिद्धसाधनस्थले, साध्यनिश्चयदशायाम्। पक्षव्यवहारविरहेण, पक्षव्य-

---

(१) फलानुपहितदलस्यार्थमाह स्वविषयेति।

क्षया बाधाभावस्य लघुत्वेऽपि सिद्धसाधनस्थलेपक्षव्यव-
हारविरहेण तादृशसिद्धाभावस्यावश्यकत्वे बाधाभावो
न निविशते गौरवात्।

विशिष्टसिद्धाभावस्य चात्मनिष्ठस्यैवानुमितिहेतु-
त्वेऽपि तस्य परम्परासम्बन्धादेव पर्व्वतादौ पक्षव्यवहार
इति ध्येयम्।

हारविरहस्य सर्व्ववादिसिद्धत्वेन (१)। गौरवादिति"। बाधस्थले पक्षव्यवहारस्य सविवादतया गौरवसहिष्णुताया अन्याय्यत्वादिति भावः। ननु समवायसम्बन्धावच्छिन्नसिद्धाभावस्यात्मप्रत्यासन्न-तयैवानुमिति हेतुतया तस्य पक्षपदप्रवृत्तिनिमित्तत्वे आत्मन्येव पक्षव्यवहारप्रसङ्ग इत्यत आह "विशिष्टेति"।

साध्याधिकरणविरहविशिष्टेत्यर्थः। एतदभिधानञ्च सिद्धेः पक्षनिष्ठाया उद्देश्यतासम्बन्धेनानुमितिं प्रति प्रतिबन्धकत्वासम्भवप्र-दर्शनाय, पर्व्वते वह्निमनुमिनुयां महानसे वह्निमनुमिनुयामित्या-कारिकाणामनुमित्सानामेकतोत्तेजकत्वेऽतिप्रसङ्गेन पृथगेवोत्तेजक-तया पक्षभेदेन कारणताभेदस्यावश्यकतया आत्मनिष्ठप्रत्यासत्तेरु-चितत्वात्। अन्यथा पुरुषविशेषाणामल्पभावनीयतापत्त्या गौर-वात् समानप्रकारिकाया असमानविशेष्यकसिद्धेरनुमितिप्रतिबन्ध-कतयापि पक्षनिष्ठप्रत्यासत्त्यसम्भवो बोध्यः (२)। "परम्परासम्बन्धा-

---

(१) पक्षव्यवहारस्य सर्व्ववादिसिद्धत्वेनेत्यपि पुस्तकान्तरीयपाठः।

(२) सामानाधिकरण्येनानुमितौ धर्म्मेऽनधिकरणविशेष्यकसिद्धेरपि प्रतिबन्धकत्वमिति भावः।

एकस्य पुंसोऽनुमित्सांसत्त्वेऽपि अन्यस्य तद्विरहिणः प्रत्यक्षादिसामग्रीसत्त्वेऽनुमित्यनुत्पादात् तत्-

---

दिति" स्वप्रतियोगितावच्छेदककोटिप्रविष्टविशेषतावच्छेदकवत्त्व-रूपादित्यादिः। न च सिद्धिकालेऽपि एतादृशसम्बन्धेन पक्षे सिद्धाभावो वर्त्ततेऽत्यन्ताभावस्यनित्यत्वादित्यतिप्रसङ्ग इति वाच्यं, तत्तदाश्रयत्वविशिष्टस्यैव सिद्धाभावस्य तादृशसम्बन्धेन तत्पुरुषं प्रति पक्षव्यवहारनियामकत्वात्। ननु विषयचक्षुःसंयोगादिरूपायाः प्रत्यक्षसामग्र्या आत्मनिष्ठप्रत्यासत्त्या न प्रतिबन्धकताग्रहस्य तत्-परम्परया अतिप्रसक्तत्वात् सम्बन्धले मानाभावाच्च, तथाच यदा तादृशसामग्री तदुत्तरक्षणे नानुमितिरिति कालिकप्रत्यासत्त्यैव प्रतिबन्धकत्वं कल्पनीयं, तथाच पुरुषान्तरीयप्रत्यक्षसामग्र्यापि पुरु-षान्तरीयानुमिति प्रतिबन्धः स्यात्, एवं कालिकसम्बन्धावच्छिन्नानुमितिविरहस्यैव दैशिकसम्बन्धघटितसामानाधिकरण्यसम्बन्धेन सामग्रां विशेषणत्वं स्वीकार्यं, तथाच पुरुषान्तरीयानुमिति-कालीनाया अपि पुरुषान्तरीयप्रत्यक्षसामग्यास्तादृशानुमित्यप्रति-बन्धकत्वापत्तिरित्याशङ्क्य चक्षुःसंयोगादौ तत्पुरुषीयत्वमन्तर्भाव्य निराकरोति "एकस्येति"।

अनुमित्यनुत्पादादित्यनुपलक्षणम्, अन्यस्य प्रत्यक्षसामग्री-सत्त्वेऽन्यस्यतद्विरहिणोऽनुमित्युत्पादाच्चेत्यपि द्रष्टव्यम् (१)।

---

(१) "अन्यथा प्रत्यक्षापादकीयत्वे अन्यस्य तद्विरहेणानुमित्युत्पादाच्चेत्यपि द्रष्टव्य" मित्यन्यथापाठोऽप्यत्रास्ति।

पुरुषीयानुमितिं प्रति तत्पुरुषीयानुमित्साविरहकालीनतत्पुरुषीयसिद्धिसामग्रीविशेषविरहोऽनन्यगतिकत्वेन हेतुरुपेतव्य इति वदन्ति ।

तत्पुरुषीयानुमित्सायाः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्य दैशिकसम्बन्धेनाधिकरणं यः कालस्तत्र कालिकसम्बन्धेन वर्त्तमानत्वं कालीनान्तार्थः सामग्रीविशेषणम् । अथवा समवायसम्बन्धावच्छिन्नप्रतियोगिताकतदात्मवृत्तित्वविशिष्टाभावावच्छेदकक्षणे कालिकसम्बन्धेन वृत्तित्वमेव तदर्थः । तेन तत्पुरुषीयानुमित्यारक्षणस्यापि अन्यदेशावच्छेदेन दैशिकसम्बन्धेन (१) कालिकसम्बन्धावच्छिन्नतदिच्छाभाववत्त्वेऽपि न क्षतिः । "तत्पुरुषीयसिद्धिसामग्रीविशेषविरह इति"। कालिकसम्बन्धावच्छिन्नप्रतियोगिताकः पक्षनिष्ठतदीयेन्द्रियसन्निकर्षादिविशिष्टसाध्यनिष्ठतदीयेन्द्रियसन्निकर्षादिविरह इत्यर्थः। वैशिष्ट्यमेककालीनत्वमेव। विशेष्यविशेषणभावे विनिगमनाविरहाद्वाक्याकारणताकल्पनमगत्या न दोषाय। यावत्त्वेन तदसाधारणकारणसमुदायस्य प्रतिबन्धकत्वं पुनरनुपादेयमेव यावत्त्वस्य दुर्व्वचत्वात्। पर्व्वतो वह्निमानित्यादावनुमितिसमानविषयचाक्षुषादिसामग्र्याः प्रतिबन्धकतायां रूपादिकं नान्तर्भावनीयं तत्र साध्यपक्षयो रूपादिमत्तानियमेन तन्निवेशे प्रयोजनाभावात्, किन्तु पर्व्वतो द्रव्यवान्, द्रव्यं वह्निमत्, द्रव्यं द्रव्यवदित्यादावनुमितौ चाक्षुषादीन्द्रियसन्निकर्षस्याविरोधितोपपत्तये

---

(१) दैशिकविशेषणतासम्बन्धेनेत्यर्थः ।

यथायोग्यं साध्यपक्षादौ रूपादिसत्त्वं निवेशनीयम्। अथ प्रतिबन्धकसामग्रीमत्वपि काले तदनधिकरणदेशावच्छेदेन तदभावस्य सौलभ्यादनुमित्यापत्तिः? न च प्रतिबन्धकमत्तायाः कार्य्यानुत्पादप्रयोजकत्वात् तत्सत्त्वे कथं कार्य्यापत्ति(१)रिति वाच्यं,सामग्र्याः कार्य्योत्पत्तिप्रयोजिकायाः प्रतिबन्धकसत्त्वेऽपि तदभावसत्त्वेनाघतत्वं कार्य्योत्पत्तेर्दुर्व्वारत्वादिति चेन्न, यादृशकारणताघटकनियमे देशान्तरावच्छेदेन कार्य्यसमानाधिकरणकारणाभावव्यावर्त्तकं देशभेदानवच्छिन्नत्वमन्यद्वा विशेषणमभावे निविशते, यथा समवायादिसम्बन्धावच्छिन्नसंयोगज्ञानादिनिष्ठकारणताघटकनियमे तदन्यकारणतावच्छेदकावच्छिन्नस्य,देशभेदानवच्छिन्नवृत्तिरेवाधिकरणे कार्य्योत्पत्तिप्रयोजिका उक्तप्रतिबन्धकाभावस्य च कारणता न तादृशी, किञ्चिदवच्छेदेन तत्प्रतिबन्धकसत्त्व एव तत्र कार्य्यानुत्पत्त्या तादृशाभावे विशेषणप्रवेशे प्रयोजनाभावात्, तथाच देशभेदावच्छिन्नप्रतिबन्धकाभाववलाद्यानुमित्यापत्तिः। एतेनात्मनि शरीरविशेषावच्छेदेन शिक्षादिरूपप्रतिबन्धकसत्त्वे घटाद्यवच्छिन्नतदभाववलादनुमित्यापत्तिरपि निरस्ता। न च सिक्षादिमत्यात्मनि तत्काले घटाद्यवच्छिन्ना या तदभावधृत्ति स्तदन्यदेशभेदानवच्छिन्नतद्वृत्तेरप्रामाणिकतया सिक्षाद्यभावेऽप्यनुमित्यनुपपत्तिरिति वाच्यं, तादृशवृत्त्यनभ्युपगमे सिक्षाद्यसत्त्वदशायां तदभावस्यात्मनि दैशिकव्याप्यवृत्तितायाः सर्व्वानुभवसिद्धाया अनुपपत्तेः। यदि च कार्य्यव्यूहस्थले एकत्रात्मनि शरीरान्तरावच्छेदेन सिक्षाभावाद्यभावस्य

(1) "कार्य्योत्पत्ति"रित्यपि मुक्तावलीयपाठः।

अथ सिद्धोत्तरानुमितौ सिषाधयिषाहेतुरस्तु ? नचैवं मण्यादिस्थलीयदाहं प्रति उत्तेजकस्य हेतुत्वापत्तिः, उत्तेजकानामननुगतत्वात्, तावदभावविशिष्टमण्याद्यभावस्य चानुगतत्वादिति चेत्, दृष्टान्तदर्शितो-ऽननुगमः सिषाधयिषायाः ।

सिद्धादेः सत्त्वेऽपि अन्यशरीरावच्छेदेनानुमित्याद्युत्पत्तिः प्रामाणिकी, तदा,सिद्धाद्यभावनिष्ठकारणतावटकनियमशरीरेऽभावांशे उक्तविशेषणप्रवेशस्यावश्यकत्वात् घटाद्यवच्छिन्नसिद्धाभावबलात् सिद्धादिदशायामनुमित्यापत्तेर्वारणाय गत्यन्तरमेवानुसरणीयमिति दिक् । उत्तेजकत्वा(१)भिमतसिषाधयिषाकारणता खीकृत्य सिद्धाभावस्य कारणतामाक्षिपति "अथेत्यादिना, चेदित्यन्तेन" ।

एतावतैव विना सिषाधयिषा सिद्धानन्तरमनुमितिवारणसम्भवादिति भावः । प्रतिबन्दिमाशङ्कते "न चैवमिति" । उत्तेजकस्य,मन्त्रौषधिविशेषादेः । प्रतिबन्दिमुद्धरति"उत्तेजकानामिति" । मण्यादिस्थलीयोत्तेजकमन्त्रौषधिविशेषादीनामित्यर्थः । "अननुगतत्वादिति" । तथाचानुगतकार्य्यं प्रति व्यभिचारेण कारणत्वासम्भवादिति भावः । दृष्टापि, सिद्धिस्थलेऽपि । "दर्शित इति" याहशयाहशेच्छासत्त्व इत्यादिनेत्यादिः । "सिषाधयिषाया इति" उत्तेजकीभूताया इत्यादिः । तथाच तुल्ययुक्त्या उत्तेजकाभावकूटविशिष्टाया सिद्धेरभाव एव दाहादौ मण्याद्यभाववद्धेतुर्भविष्य-

---

(१) प्रतिबन्धकतावच्छेदकीभूताभावप्रतियोगितम उत्तेजकत्वम ।

सिद्धान्तरानुमितित्वञ्च अनुगतानतिप्रसक्तं दुर्वचं, सिद्धिस्थितिकालीनां स्वेतरसिद्धिकालीनां वानुमितिं प्रति हेतुत्वकल्पने च विनापि सिषाधयिषां सिद्धिनाशकालेऽनुमित्युत्पादो दुर्वारः, एकस्य च पुंसः सिद्धि-

---

तीति भावः। ननु तावदभावकूटविशिष्टसाध्यनिश्चयाभावत्वापेक्षया लघीयसा अन्ततस्तावदन्यतमत्वेनैवा(१)नुगमः सम्भवति सिषाधयिषाणामित्यत आह "सिद्धान्तरानुमितित्वञ्चेति"।

अनुगतस्य तस्य सिद्धिसमानकालीनप्रागभावप्रतियोगित्वरूपस्यानति प्रसक्तस्य च तत्तत्सिद्धिनाशकालीनप्रागभावप्रतियोगित्वे सति तत्तत्सिद्धिसमानकालीनप्रागभावप्रतियोगित्वात्मकस्यैव सम्भवादनुगतानतिप्रसक्तेरुभयमुपात्तम्। तथाच प्रथमधर्मस्य कार्यतावच्छेदकत्वे सिषाधयिषामन्तरेण सिद्धिनाशोत्तरकाले जायमानायामनुमितौ सिषाधयिषाव्यभिचारः, उत्तरस्य तथात्वे चानन्तकार्यकारणभावप्रसङ्ग इति भावः। "सिद्धिस्थितिकालीनामिति" स्वक्षणवृत्तिप्रागभावप्रतियोगित्व स्वक्षणवृत्तित्वोभयसम्बन्धेन सिद्धावच्छिन्नामित्यर्थः। लघवादाह "स्वेतरेति" स्वभिन्नत्व स्वक्षणवृत्तित्वोभयसम्बन्धेन सिद्धावच्छिन्नामित्यर्थः। स्वलक्षयत्वांशवृत्तिषु स्फुटम्। सम्बन्धविधया स्वक्षणवृत्तित्वादीनां निवेशाच्चस्वलक्षणानुगमनिबन्धनो दोषः, सम्बन्धमध्ये स्वपदार्थानिवेशेऽप्यन्याधिकरणवृत्तित्वादेरन्य-

---

(१) अनुगतत्वाच्चस्येनैवेत्यपि क्वचित् क० पाठः।

सर्वेऽन्यस्य सिषाधयिषाशून्यस्यानुमित्यनुत्पादप्रसङ्गः, तत्तत्पुरुषीयतादृशानुमितिं प्रति तत्तत्पुरुषीय सिषाधयिषाया हेतुत्वेऽनन्तकार्य्यकारणभावप्रसङ्गः । अपि च सिद्धौ सत्यां विनापि सिषाधयिषां सामान्यसामग्रीतोऽनुमितिसामान्योत्पत्तिप्रसङ्गात् ।

सम्बन्धत्वाभावेनातिप्रसङ्गविरहात् (१) । यदि च उत्पत्तिमध्ये स्वपदार्थविशेषणान्तर्भावस्याप्रसिद्धिवारणायावश्यकतया अननुगमः शङ्क्यते, तदा, स्वहत्तिप्रागभावप्रतियोगित्व स्वचणहत्तित्वोभयसम्बन्धेन सिद्धिविशिष्टत्वम् अनुमितौ प्रवेश्यम्(२) । नाशकाले, नाशोत्पत्तिक्षणे । "अनुमित्युत्पादो दुर्वार इति" सिद्धिनाशसमयोत्पन्नाया अनुमितेः उक्तसिषाधयिषाकार्य्यतावच्छेदकानाक्रान्तत्वादिति भावः । ननु स्वचणहत्तिप्रागभावप्रतियोगित्व स्वनाशचण-हत्तिप्रागभावाप्रतियोगित्वोभयसम्बन्धेन सिद्धयवच्छिन्नानुमितित्वमेव सिषाधयिषाजन्यतावच्छेदकं वाच्यम् ? एतच्च सिद्धिनाशकालोत्पन्नानुमितिसाधारणमेवेति नातिप्रसङ्गः, न च सामान्यतो नाशचणहत्तिप्रागभावाप्रतियोगित्वं जन्यमात्रस्यैव न सम्भवतीति यदधिकरणचणहत्तिप्रागभावप्रतियोगित्वं तदधिकनाश एव विशेष्य निवेश्य दृत्यननुगमतादवस्थ्यमितिवाच्यं, सम्बन्धाननुगमस्यादोषत्वात्, स्वहत्तिप्रागभावप्रतियोगित्व स्वहत्तिसकृतिमत्त्वोभयसम्बन्धेन

---

(१) अष्टसम्बन्धाभावेनातिप्रसङ्गविरहादित्यपि मुद्रितकाशीयपाठः ।

(२) यदिषेत्यादि प्रवेश्यमित्यन्त पाठस्तु सर्वत्रैव मुद्रितके न दृश्यते ।

न हि ईदृशविशेषसामग्रीं विना सामान्यसामग्र्या अनुमितिजनकत्वं नास्ति, न चान्यत्रापि विशेषसामग्यन्तरमस्ति तत्कल्पने चातिगौरवम्। दृढ जाय-

---

सिद्धिविशिष्टत्वेन कथञ्चिदनुगमस्यापि सम्भवाच्चेत्यतो दोषान्तरमाह "एकस्येति"। सिद्धिसत्त्व इति"। अव्यवहितपूर्वकाल इत्यादिः। अनुमित्यनुत्पादमसङ्ग इति"। पुरुषान्तरीयसिद्धाव्यवहितोत्तरोत्पन्न-पुरुषान्तरीयानुमितेरप्युक्तसिषाधयिषाजन्यतावच्छेदकधर्मावाक्रान्तत्वादिति भावः। सामानाधिकरण्यस्याधिकस्य दर्शितकार्यतावच्छेदकताघटकसम्बन्धमध्येनिवेशेन पुरुषान्तरीयसिद्धानन्तरोत्पन्नानुमितौ सिषाधयिषाया व्यभिचारवारणसम्भवात् दोषान्तरमाहापिचैति"। सामान्यसामग्रीतः, अनुमितिसामान्यहेतुभूतपरामर्शादितः। ननु विशेषसामग्रीसहितायां एव सामान्यसामग्र्याः कार्योत्पादकत्वान्नापत्तिसम्भव इत्याशङ्कायामाह "न हीति"।

ईदृशेति"। सिषाधयिषारूपेत्यर्थः। जनकत्वम् उपधायकत्वम्। नास्तीति" न हीत्यन्वयः। सिद्धासत्त्वे सिषाधयिषां विनापि परामर्शादेरनुमित्युत्पादकत्वादिति भावः। तथाच तत्रैव सिद्धिदशायामपि परामर्शादिसत्त्वे सिषाधयिषाविरहो नानुमित्यनुत्पादप्रयोजको भवेदिति पर्यवसितम्। ननु विशेषसामग्रीविरहकूट एव सामान्यसामग्रीदशायां सामान्यकार्यानुत्पादप्रयोजकः, सिद्धासत्त्वस्यलीयविशेषसामग्रीविरहघटितस्य कूटस्य च सि-

माना सा सिद्धावस्थैव स्यात्, सा च न जायते कारणाभावादिति चेत् सा माजनिष्ट अनुमितिसामान्यन्तु स्यादेव, कार्य्यानुत्पादस्य विना कारणविरहमसम्भवात्।

साधयिषाविरहसहकृतसिद्धिस्थल एव सत्त्वं, न तु सिद्धसत्त्वस्थले, इति न दोष इत्यत आह "न चेति"। अन्यत्रापि सिद्धसत्त्वस्थलेऽपि। विशेषसामग्यन्तरमिति"। सिद्धभावस्यैतन्मतेऽहेतुत्वादिति भावः। तत्तदनुमितिव्यक्त्युत्पादकतत्तत्परामर्शव्यक्तौना विशेषसामग्रीत्वेऽपि अनुमित्युत्पत्तिकालेऽपि सत्त्वेन तदनन्तरमनुमित्यनुत्पादे प्रयोजकविरहः, तत्तद्व्यक्तिविरहाणामनन्तानां सामान्यकार्य्यानुत्पादप्रयोजकत्वे गौरवञ्च, अन्यथा बहुतरसामान्यकारणताया उच्छेदप्रसङ्ग इत्याशयः। अत्राहुः, सिद्धानुमितौ सिद्धभावस्य हेतुत्वान्तरकल्पनयैव इष्टव्याप्तिप्रसङ्गवारणसम्भवात् विशिष्टसिद्धभावहेतुत्वमयुक्तं, सिद्धिसिषाधयिषाविरहयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण प्रतिबन्धकताद्वयस्य तन्मतेऽप्यावश्यकत्वात्, प्रतिबन्धकतावच्छेदकगौरवस्याधिक्यात्। न च (१) सिषाधयिषाहेतुतापक्षेऽपि कार्य्यतावच्छेदककोटौ अव्यवहितोत्तरत्वादिनिवेशाधिक्येन गौरवमित्याशङ्क्य, तत्सिद्ध्यनिच्छाविरहविशिष्टसिद्धभावस्य पूर्व्वोपदर्शितसमूहालम्बनजन्यानुमितौ व्यभिचारवारणायाव्यवहितोत्तरत्वसम्बन्धेन तादृशसिद्धभानवच्छिन्नानुमितिं प्रत्येव हेतुतायां भवतापि वाच्यत्वादिति सिद्धिस्थले विनापि सिषाधयिषां

(१) नचेत्यस्य इत्याशङ्क्यमित्युत्तरेणान्वयः।

कारणव्यापारत्वेनावश्यककारणभावस्य परामर्शस्य कारणतावच्छेदिका पक्षता न कारणमिति तु भ्रमः,

---

सामान्यकार्योत्पत्तावपि तादृशकार्यस्योक्तविशेषसामग्रीकार्यता-वच्छेदकाक्रान्तताख्यात्. तथाच विशेषसामग्रीं विना तदुत्पत्तौ तस्याव्यभिचारात् कारणमेव व्याहन्यत इति न तत्र तदुत्पत्त्यापत्तिरिति मङ्गते "इच्छेति"। कार्योत्पादप्रयोजकसामग्रीसत्त्वे प्रयोजनवत्तिर्नकार्योत्पत्तिं विरुणद्धि, तथाच प्रकृते सिषाधयिषाऽघटितायाः सामान्यकार्यप्रयोजकसामग्र्याः सिद्धिकोटेऽपि सत्त्वे विशेषसामग्रीविरहेण तत्कार्यतावच्छेदकावच्छिन्नापत्त्यसम्भवेऽपि सामान्यधर्मावच्छिन्नापत्तिर्दुर्वारेत्यत आह "सा माऽनिष्टेति"। सा सिद्धवत्तरानुमितिः। कार्योत्पादस्य, तद्धर्मावच्छिन्नोत्पादस्य। विना कारणविरहं, तद्धर्मावच्छिन्नोत्पादप्रयोजकसामग्री-विरहं विना। अनुमितिं प्रति पक्षतासहितपरामर्शत्वेनैव हेतुता, न तु पक्षतापरामर्शयोः पृथक्कारणत्वाद्यं, गौरवात्। न च विशे-षणविशेष्यभावे विनिगमनाविरह. परामर्शस्यैव हेतुत्वे तस्य व्याप्ति-ज्ञानरूपकरणव्यापारत्वासम्भवात्, व्यापारतायाः फलजनकता-गर्भत्वात्, इत्यस्यैव विनिगमकस्य सम्भवादिति केषाञ्चिन्मतं दूषयति "करणेत्यादिना"।

परामर्शस्येति" षष्ठ्यर्थो हेत्विच्छायाः कारणतायामन्वयः। निमित्तकारणस्य दण्डादेः। समवायिकारणत्वेति। कपालादिनि-ष्ठत्वाद्यवच्छिन्नकारणत्वेत्यर्थः। समवाय नियमाय तत्कारणतायाः

प्रतिवन्धकान्तराभाववदन्वयव्यतिरेकशालित्वेन हेतुत्वात् । अन्यथा यथासम्भवं निमित्तकारणस्य समवायिकारणत्वाद्यवच्छेदकत्वप्रसङ्गात् ।

अथानुमितिसाधारणसिद्धेः प्रतिवन्धकत्वे तदभावस्य मण्याद्यभाववत् प्रतिवन्धकाभावत्वेन कार्य्यकालवृत्तेरेव हेतुत्वात् अनुमितिकाले च तदसम्भवात्

आवश्यकत्वादिति भावः । जन्यसत्त्वाद्यवच्छिन्ननिरूपितायाश्च समवायिकारणतायां दण्डादेर्व्यभिचारेण प्रवेशासम्भवाद्यथासम्भवमित्युक्तम् । कारणता तदवच्छेदकत्वयोरुक्तविनिगमकत्वेन नियतत्वेऽपि सिद्धभावसाहित्यपरामर्शत्वयोरेकविशिष्टस्यैव एकविशेयतावच्छेदकतापन्नस्यैव वाऽपरस्यावच्छेदकत्वं वाच्यम्, तच्च विनिगमनाविरहो दुर्व्वार इति तु तत्त्वम् । ननु सिद्धभावस्यानुमितिहेतुत्वेऽनुमित्सां विना कदाप्यनुमितिर्नोपपद्येत मणिसमवधानोत्पत्तिकाले दाहानुत्पत्त्या प्रतिबन्धकाभावस्य कार्य्यकालसत्तायाः फलोपधानप्रयोजकत्वात्, अनुमितिकाले च सिद्धभावासत्त्वादित्यगत्या तस्य कारणतावच्छेदकत्वमेव, न तु कारणत्वमिति शङ्कते "अथेति" ।

कार्य्योत्पत्तिक्षणावच्छेदेनापि कार्य्याधिकरणे नियतसत्त्वं यत्कारणताघटकं तत्कारणताश्रयस्यैव कार्य्योत्पत्तिक्षणसत्त्वं कार्य्योत्पत्तिप्रयोजकं, यथा मण्यभावादेः सिद्धाभावस्य घ

कारणव्यापारत्वेनावश्यककारणभावस्य परामर्शस्य कारणतावच्छेदिका पक्षता न कारणमिति तु भ्रमः,

---

सामान्यकार्योत्पत्तावपि तादृशकार्यस्योक्तविशेषसामग्रीकार्यतावच्छेदकाक्रान्तत्वात्. तथाच विशेषसामग्रीं विना तदुत्पत्तौ तस्याव्यभिचारात् कारणमेव व्याहन्यत इति न तत्र तदुत्पत्त्यापत्तिरिति शङ्कते "इच्छेति"। कार्योन्मुखप्रयोजकसामग्रीसत्त्वे प्रयोजकघटितैर्नकार्योत्पत्तिं विरुणद्धि, तथाच प्रकृते सिषाधयिषाऽघटिताया: सामान्यकार्यप्रयोजकसामग्रया: सिद्धिकोलेऽपि सत्त्वे विशेषसामग्रीविरहेण तत्कार्यतावच्छेदकावच्छिन्नापत्त्यसम्भवेऽपि सामान्यधर्मावच्छिन्नापत्तिर्दुर्वारैवेत्यत आह"सा साऽनिष्टेति"। सा सिद्धसाधनानुमितिः। कार्योत्पादस्य, तद्धर्मावच्छिन्नोत्पादस्य। विना कारणविरहं, तद्धर्मावच्छिन्नोत्पादप्रयोजकसामग्रीविरहं विना। अनुमितिं प्रति पक्षतासहितपरामर्शत्वेनैव हेतुता, न तु पक्षतापरामर्शयोः पृथक्कारणताद्वयं, गौरवात्। न च विशेषणविशेष्यभावे विनिगमनाविरहः परामर्शस्याहेतुत्वे तस्य व्याप्तिज्ञानरूपकरणव्यापारत्वासम्भवात्, व्यापारतायाः फलजनकतागर्भत्वात्, इत्यस्यैव विनिगमकस्य सम्भवादिति कैपाक्षिप्तं दूषयति "करणेत्यादिना"।

परामर्शस्येति" षष्ठ्यर्थौ ह्यत्तिस्तस्याः कारणतायामन्वयः। निमित्तकारणस्य दण्डादेः। समवायिकारणस्येति। कार्यालादिनिष्ठघटत्वाद्यवच्छिन्नकारणतेत्यर्थः। समवाय नियमाय तत्कारणताया

प्रतिबन्धकान्तराभाववदन्वयव्यतिरेकशालित्वेन हेतुत्वात् । अन्यथा यथासम्भवं निमित्तकारणस्य समवायिकारणत्वाद्यवच्छेदकत्वप्रसङ्गात् ।

अथानुमितिसाधारणसिद्धेः प्रतिबन्धकत्वे तदभावस्य मण्याद्यभाववत् प्रतिबन्धकाभावत्वेन कार्य्यकालवृत्तिरेव हेतुत्वात् अनुमितिकाले च तदसम्भवात्

आवश्यकत्वादिति भावः । जन्यसत्त्वाद्यवच्छिन्ननिरूपितायाञ्च समवायिकारणतायां दण्डादेर्व्यभिचारेण प्रवेशासम्भवाद्यथासम्भवमित्युक्तम् । कारणता तदवच्छेदकत्वयोरुक्तविनिगमकत्वेन नियतत्वेऽपि सिद्धभावसाहित्यपरामर्शत्वयोरेकविशिष्टस्यैव एकविशेषतावच्छेदकतापन्नस्यैव वाऽपरस्यावच्छेदकत्वं वाच्यम्, तत्र विनिगमनाविरहो दुर्व्वार इति तु तत्त्वम् । ननु सिद्धभावस्यानुमितिहेतुत्वेऽनुमित्सां विना कदाप्यनुमितिर्नोपपद्येत मण्यसमवधानोत्पत्तिकाले दाहानुत्पत्त्या प्रतिबन्धकाभावस्य कार्य्यकालसत्तायाः फलोपधानप्रयोजकत्वात्, अनुमितिकाले च सिद्धभावासत्त्वादित्यगत्या तस्य कारणतावच्छेदकत्वमेव, न तु कारणत्वमिति शङ्कते "अथेति" ।

कार्य्योत्पत्तिक्षणावच्छेदेनापि कार्य्याधिकरणे नियतसत्त्वं यत्कारणताघटकं तत्कारणताश्रयस्यैव कार्य्योत्पत्तिक्षणसत्त्वं कार्य्योत्पत्तिप्रयोजकं, यथा मण्यभावादेः सिद्धभावस्य च

सा नोत्पद्येतेति चेत् ? न, यस्य मण्यादभावादेः कार्य्यसमकालतया अन्वयव्यतिरेकित्वं तस्यैव तथात्वेन हेतुत्वं न तु सर्व्वस्य, गौरवात्। अन्यथा समवायिकारणस्य कार्य्यसहभूतस्यैव हेतुत्वात् कारणतावादस्य तथात्वप्रसङ्गे प्राभाकरा एव विजयेरन्निति।

प्रतिबन्धकाभावकल्पेऽपि नियतप्राक्सत्त्वमेव कारणताघटकं नतूक्तमपीति तस्य स्वप्राक्सत्त्वमात्रं फलोत्पत्तौ तन्त्रमिति नानुपपत्तिरिति समाधत्ते "यस्येति"। "अन्येति"। सहकारदर्शनमात्रेणैव प्रतिबन्धकाभावे कार्य्यसहभावेन हेतुतासिद्धौ इत्यर्थः। "प्राभाकरा इति"। सहवर्त्तिन एव कारणतावादिन इत्यादिः। यत्तु, अनुमितौ प्रत्यक्षसामग्याः प्रतिबन्धकान्तरकल्पने गौरवात् तत्सामग्रीदशायाम् अनुमित्यापत्तिवारणायानुमित्यन्यसिद्धभावस्य कार्य्यकालवृत्तितया हेतुत्वमेव युक्तम् अनुमित्यभावस्य प्राक्क्षणत्वभावेन हेतुत्वान्तर कल्पनाम् इति, तदसत्, सिषाधयिषानन्तर-ज्ञानसिद्धिद्वितीय-क्षणेऽनुमित्युत्पादप्रसङ्गात्, कार्य्यकालेऽनुमितिज्ञानाभेन तदभावविशिष्टसिद्धिसम्भवात्। प्रत्यक्षादिसिद्धिसम्भवेऽपि तत्सामग्र्या यद्विज्ञानानन्तरं जायतामिति नियमात् अनुमित्युत्पत्त्या अनुमित्यन्यसिद्धौ तादृशेच्छाया उत्तेजकत्वात् तादृशेच्छाबलात् प्रत्यक्षसामग्र्यानन्तरं प्रत्यक्षोत्पादसमयेऽप्यनुमित्यापत्तेः, सिद्धसाधनाप्रयोजकत्वे प्रत्यक्षोत्पादसमयेऽनु-

प्राभाकरास्तु विनाप्यनुमित्सां क्वचित् परामर्शानुमितिप्रवाहस्याविरललग्नस्यानुभविकत्वात् कालभेदकल्पनायाश्च मानाभावात् मानाभावाच्च पक्षता मित्यापत्तेश्च इति। पक्षताया अनुमिति हेतुतामनङ्गीकुर्व्वतां गुरूणां मतमाह "प्राभाकरास्त्विति"।

अनुमित्सायोग्यताया उत्तेजकत्वे द्वित्वत्वादिप्रकारकेच्छाबलात् अनुमितिद्वितीयक्षणोत्पन्नपरामर्शात् तृतीयक्षणेऽनुमित्यन्तरोत्पादस्य पक्षताहेतुतामतेऽप्युपपत्तेर्विनानुमित्सामिति। क्वचित्, प्रतिबन्धकान्तरासत्त्वस्थले। परामर्शानुमितिप्रवाहस्य, क्रमोत्पन्नपरामर्शानुमिति समूहस्य। अपलापनिराकरणाय समूहपर्य्यन्तानुसरणम्। पूर्व्वपूर्व्वानुमिति नाशे द्वितीयादिपरामर्शादनुमित्यन्तरोत्पत्तौ बाधकाभावादाह "अविरललग्नस्येति"। ननु तन्नागत्या एकैकक्षणविलम्बेनैवानुमितिः स्वीकार्य्या इत्यत आह "कालभेदेति"। मानाभावात् पक्षताया हेतुत्वस्यासिद्धा गत्यन्तरविरहस्यैवासिद्धेः इति भावः। नन्वेवं सिद्धसाधनस्यादूषणतया परार्थस्थले तदुद्भावनानुपपत्तिरित्यत आह "परार्थेति"। "अर्थान्तरेति"। सिद्धेऽर्थे आकाङ्क्षाविरहादिति भावः। न च पक्षताया अनुमित्यहेतुत्वेऽनुमित्यनन्तरं जातव्यक्तिरिव कथं नोत्पद्यते? तद्वारणाय तत्तद्व्यक्तौ तत्तत्प्रागभावव्यक्तीनां विशिष्यानन्तहेतुताकल्पने गौरवमिति वाच्यं, तत्तदनुमिति व्यक्तेः पूर्व्वं तत्प्राग्भात् परतोवा, कदाचित् तत् समानविषयकानुमित्यन्तरोत्पादसमये तदव्यक्त्यापत्तिवारणाय

नानुमितिहेतुः । परार्थानुमाने तु सिद्धसाधनमर्थान्तर-
विधया दूषणमित्याहुः ।

इत्यनुमानचिन्तामणिदीधितौ पक्षता
निरूपणं समाप्तम् ।

सच परामर्शव्यक्तीना विशिष्यहेतुतायां आवश्यकत्वात्, ततएव तदव्यक्तीनां पुनरुत्पादवारणसम्भवात् । न च परामर्शाना तत्तद्-व्यक्तित्वेन तत्तदनुमितिव्यक्तिहेतुत्वेऽपि विनश्यदवस्थात्तदनुमिति-व्यवहितपूर्व्वोत्पन्नपरामर्शात् पुनस्तदनुमितिप्रसङ्ग इति वाच्यम्, एतन्मते कार्य्यावच्छेदकस्य फलाजनकत्वात् अनुमितित्वावच्छिन्ना-भावहेतुतयाऽपि तादृशापत्तिवारणसम्भवात् तदनुरोधेन गुरुणा प्रत्यक्षादिसाधारणनियमत्वेन प्रतिबन्धकत्वासिद्धेः । अत्र केचित्, पक्षताया अनुमित्यहेतुत्वमते विनापि वह्न्यादिलिङ्गकवह्न्याद्यनु-मित्सां तादृशानुमित्युत्पत्त्या तादृशानुमितौ तादृशानुमित्साविरह-विशिष्टप्रत्यक्षादिसामग्रीभावस्यकारणताधिक्यात् गौरवं, पक्षता-हेतुत्वमते तादृशानुमितिरिच्छानियततया तदिच्छाया लघीयस्या हेतुतयैवोपपत्तेः, पक्षतापि तदिच्छेवेत्याहुः ।

इत्यनुमानचिन्तामणिदीधितिगादाधर्य्यं पक्षता
निरूपणं समाप्तम् ।

परामर्शनिरूपणम् ।

अनुमानचिन्तामणिः ।

पक्षधर्मतया व्याप्तिविशिष्टज्ञानमनुमितिहेतुः । ननु व्याप्यतावच्छेदकप्रकारेण व्याप्तिस्मरणं ? पक्षधर्मताज्ञानं तथा, लाघवात् परामर्शहेुत्वेनावश्यकत्वाच्च ।

दीधितिः ।

लक्षणोपोद्घातेन विशिष्टज्ञानस्य कारणत्वं व्यवस्थापयति "पक्षेत्यादि" ।

व्याप्तिस्मरणमिति । स्मरणत्वमविवक्षितमव्यापकत्वात् । लाघवात्, प्रथमोपस्थितत्वलाघवात् ।

गादाधरी विवृतिः ।

पक्षतां निरूप्य विशिष्टपरामर्शत्वेनहेतुता'ज्ञानद्वयकारणतावादिमीमांसकविप्रतिपत्तिं निरस्य मणिकारेण व्यवस्थापिता' तत्र सङ्गतिं दर्शयति "लक्षणोपोद्घातेनेति" ।

(१) विशिष्टपरामर्शत्वावच्छिन्नकारणतावटितानुमितिलक्षणोपपादकतयेत्यर्थः । विशिष्टज्ञानस्य, विशिष्टपरामर्शत्वावच्छिन्नस्य । कारणत्वं व्यवस्थापयति, अनुमितिकारणत्वे युक्तिमभिधातुं प्रतिजानीते । तादृशयुक्तेरनुमितिलक्षणघटककारणतानिष्ठविशिष्टपरामर्शत्वावच्छिन्नत्वसाधकतया लक्षणोपपादकत्वं बोध्यम् । एवं-

---

(१) लक्षणोपोद्घातेनेत्यस्यार्थमाह विशिष्टेति ।

कल्पनालाघवमाह परामर्शेति। परामर्शहेतुत्ववादि-नाप्यनुमितेः पूर्वं तादृशज्ञानमवश्यं मन्तव्यम्। तथाचातिरिक्तधर्म्मिगम्यत्वानन्यथासिद्धत्वनियतपूर्व्ववर्त्तित्वयोः कल्पनामपेक्ष्य उभयवादिसिद्धनियतपूर्व्ववर्त्तित्वयोरनन्यथासिद्धत्वमाचकल्पना लघीयसीति भावः।

मीमपि विशिष्टपरामर्शत्वस्यानुमितिकारणतावच्छेदकत्वे मीमांसकविप्रतिपत्त्यवतारणेनाप्रामाणिकत्वशङ्कया (१) तदुपपादकप्रमाणाकाङ्क्षासम्भवेन तदुपपादकत्वस्य लक्षणनिरूपितसङ्गतित्वम् (२)। मूले "पक्षधर्मेति"।

(२) हेतुतावच्छेदकसम्बन्धेन पक्षविशेषणतापन्नस्येत्यर्थः।

व्याप्यविशेषकपरामर्शस्य समाख्यत्वे विशेषणतेत्यत्र विशेष्यतान्तर्भाव्या। व्याप्तिविशिष्टज्ञान व्याप्तिप्रकारकज्ञानम्। तथाच पक्षविशेषणतापन्नहेतुविषयकत्वावच्छेदेन व्याप्तिप्रकारकत्ववज्ज्ञानत्वस्य पक्षतावच्छेदकत्वलाभः, उद्देश्यतावच्छेदकविधेयभाव-

---

(१) "अप्रतारणेमाप्रामाणिकत्वशङ्कया" इतिपाठोऽप्यत्रास्ति।

(२) पक्षतानिरूपितसङ्गतित्वमित्यपि पाठः कचिद्दृश्यते। तत्रायमाशयः, तादृशयुक्तेर्ज्ञानोपपादकत्वमभिधानद्वारा। अभिधानञ्चाकाङ्क्षां विना न सम्भवति चाकाङ्क्षा च परामर्शत्वधर्म्मिकानुमितिजनकतावच्छेदकत्वयकृप्रामाण्यग्रहं विना न भवतीति तदनाक्रन्दितसिद्धेराकाङ्क्षाविरोधितया तदभावस्याकाङ्क्षाप्रयोजकत्वात् परम्परयापक्षतानिरूपितसङ्गतित्व तदुपपादकत्वस्येति। पक्षतालक्षणेऽपि निरूपितसङ्गतित्वमितिपाठे तु पक्षतालक्षणोभयनिरूपितसङ्गतित्वमित्यर्थो-बोध्यश्च।

(३) पक्षधर्म्मेत्यस्यार्थमाह हेतुतेति।

महिम्ना तादृशहेतुविषयकत्वव्याप्तिप्रकारकत्वयोरवच्छेदावच्छेद-
कभावलाभात् । पक्षतावच्छेदकतादृशज्ञानत्वाग्रे कारणत्वरूपसा-
ध्यस्य स्वरूपसम्बन्धरूपावच्छेदकतासिद्धिरप्युद्देश्या, अतो व्याप्य-
तावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वादिना विशिष्टपरामर्शस्या-
नुमितिहेतुताया मीमांसकसम्मतत्वेऽपि न सिद्धसाधनावकाशः ।
व्याप्तिस्मरणमित्यत्र स्मृतित्वस्य हेतुतावच्छेदकत्वाभिमान निरा-
करोति "स्मरणत्वमिति" । अविवक्षितमिति" । हेतुतावच्छेदकत्वे-
नेत्यादि. । अविवक्षाबीजमाहाव्यापकत्वादिति" हेतुत्वाव्यापकत्वा-
दित्यर्थ. । व्याप्यनुभवस्यापि हेतुत्वादिति भावः । अवच्छेदकलाघ-
वस्य नैयायिकमत एव सत्त्वात् कल्पनालाघवस्याग्रे वाच्यत्वाल्लाघ-
वादिति ग्रन्थस्य तत्परत्वायोगात्तमन्यथा व्याचष्टे "लाघवादिति" ।
"प्रथमोपस्थितत्वेति" । ज्ञानद्वयस्य विशिष्टपरामर्शापेक्षया प्रथममु-
त्पन्नतया स्वप्रकाशत्ववादिना गुरुणा ज्ञानद्वयस्यैव ज्ञानद्वयोपस्थिति-
रूपतया तस्य प्रथमोपस्थितत्वमिति भाव. । ननु परामर्शहेतु
तया ज्ञानद्वयस्यावश्यकत्वमनुमितिहेतुताकल्पनेऽनुपयुक्तमित्याशङ्का
निराचिकीर्षुराहकल्पनालाघवमिति" । परामर्शहेतुत्वेनावश्य-
कत्वाच्चेतिमूले परामर्शहेतुत्वेनेत्यनन्तर तवापीति पूरणीयमित्या-
शयेन तदर्थमाह "परामर्शहेतुत्वेति"। तादृशज्ञान, व्याप्यतावच्छे-
दकप्रकारकव्याप्यादिज्ञानम् । "मन्तव्यमिति" । अन्यथा कारण-
विरहेण परामर्शस्यैवानुदयापत्तेरिति शेषः । यद्यपि धूम-
वान् पर्व्वत इति ज्ञानं विनापि धूमो वह्निव्याप्य इति ज्ञानेन
पर्व्वतत्वरूपविशेषणज्ञानसहकृतेन वह्निव्याप्य धूमवान् पर्व्वत इति

विशिष्टवैशिष्ट्यबोधजननसम्भवात् परामर्शहेतुतया पक्षधर्मता-ज्ञानस्य नावश्यकता, तथापि, पर्व्वते धूमदर्शनात्मकोद्बोधकाद्धूमो वह्निव्याप्य इति स्मरण तत परामर्श इति क्रमस्यौत्सर्गिकतया इदानीं लाट्टगरीत्यैव परामर्शोत्पत्तिः सर्व्वत्रेत्यभिमानेन ज्ञानद्वयस्य परामर्शहेतुतायां आवश्यकत्व मूलकृताभिहितं, एतदभिमानेनैवा-नुमिति पूर्व्वं विशिष्टपरामर्शस्यासिद्धिः। परामर्शार्थं ज्ञानद्वयोप-गमे अनुमिति सामग्रीसत्त्वेन परामर्शोत्पत्त्यसम्भवादित्यभि-धायाग्रे परामर्शहेतुतायामवच्छेदकलाघवमप्रयोजकी करिष्यते। एतादृशाभिमानञ्च नैयायिकमतमालम्ब्य। अय वह्निव्याप्यो धूम इत्यादिना निराकृत्यानुमिति पूर्व्वं विशिष्टपरामर्शसिद्धि-रुपपादनीया, तावता च परामर्शहेतुतया ज्ञानद्वयस्यावश्यक-त्वनिराकरणेऽपि वह्निव्याप्य धूमवान् पर्व्वत इति परामर्शस्यैव व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानत्व-तत्प्रकारकपक्षधर्मताज्ञान-त्वाक्रान्ततया तत्तद्रूपावच्छिन्नस्य नियतपूर्व्ववर्त्तिताया उभय सिद्धत्वेन कल्पनालाघवमक्षुण्णमेव। अतएव तदुत्तर व्याप्यतावच्छे-दकानवगाहिशाब्दपरामर्शादनुमित्युत्पादाभिधानमेव दीधिति कृता एतादृशकल्पनालाघवनिराकरणपरतया व्याख्यायते। केचित्तु[1] परामर्शहेतुतयेति मूलस्य (१) परामर्शस्यानुमिति हेतुतयापि व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानत्वाद्यवच्छिन्नस्य न्यायमतसिद्धनियतपूर्व्ववर्त्तितावत्त्वादित्यर्थः (२)। परामर्शेन

---

(१) परामर्शहेतुत्वेनावश्यकत्वाद्येति मूलाभिप्रायेणेदम्।

(२) नियतपूर्व्वभावत्वादित्यपि पुस्तकान्तरीयपाठः।

स्वार्थं (१) व्याप्यतावच्छेदकप्रकारकव्याप्त्यादिविषयकज्ञानान्तर-मपेक्ष्यतां मा वा (२) परामर्श एव तादृशज्ञानात्मक इत्यतोपि परामर्शस्य नियतपूर्ववर्त्तितावादिनापि तत्तद्रूपावच्छिन्नस्य नियतपूर्ववर्त्तित्वमनुमतमेवेतिभाव इत्याहुः, तदसत्, यत्र धूमत्वसामानाधिकरण्येन वह्निव्याप्यवगाहिविशिष्टपरामर्शस्तत्र व्यभिचारेण मीमांसकमतसिद्धकारणतावच्छेदकद्वयस्य विशिष्ट-परामर्शत्वव्यापकत्वाभावात्, द्रव्यत्वादिसामानाधिकरण्यमात्रेण वह्न्यादिव्याप्तिज्ञानात्, द्रव्यत्वादिना च जलादिभेदवृत्तिताज्ञाना-दन्यथाख्यात्यापत्तिभयेन धूमत्वावच्छेदेन व्याप्तिप्रकारकज्ञानस्यैव तन्मते हेतुत्वादिति । न चैतत् समशीलदोषस्य व्याप्यतावच्छेदका-नवगाहिशाब्दपरामर्शस्थले मणिकृतैव दास्यमानत्वान्न दोष इति वाच्यम्, एवं सत्येतद्व्याख्यापक्षेऽपि मीमांसकमतसिद्धकारणतावच्छेदकद्वयस्य विशिष्टपरामर्शत्वव्यापकत्वमित्यभिमानस्यानुसरणीय-तया तादृशज्ञानद्वयस्य विशिष्टपरामर्शहेतुत्वमित्यभिमानमूलक-त्वमेव (३) सम्यक् (४) । केचित्तु" निश्चयत्वानिवेशप्रयुक्तलाघवानु-रोधेन वह्निव्याप्यधूमवत्पर्व्वतवानित्यादिविशिष्टवैशिष्ट्यावगाहि-ज्ञानमेव नैयायिकमतेऽनुमितिकारणं, तत्र च धूमवान् पर्व्वत

---

(१) स्वोत्पत्त्यर्थमित्यर्थः ।

(२) व्याप्तेक्ष्यतामिति शेषः ।

(३) परामर्शहेतुत्वेनावश्यकत्वादिति मूलस्थेति भावः ।

(४) स्यादिति शेषः । तथाच परामर्शहेतुत्वेनावश्यकत्वादित्यनेन कारणता-वच्छेदकद्वयस्य विशिष्टपरामर्शत्वव्यापकत्वमित्यभिमानस्य स्वार्थिकतया न सम्यक् स्यमित्याशयः ।

इति ज्ञानस्य विशेषणतावच्छेदकप्रकारकज्ञानविषया हेतुत्वम्। पक्षमुख्यविशेष्यकज्ञानस्यैव हेतुत्वे वह्निव्याप्यधूमवत् पर्व्वतोभिन्नः पर्व्वत इत्याकारकज्ञानस्यैव हेतुत्वमित्यभिप्रायकतया परामर्शं-हेतुत्वेनावश्यकत्वादिति मूलं वर्णयन्ति"। परं तु" मानसत्वव्याप्य-परामर्शत्वमते उपनीतभानात्मकपरामर्श एवानुमिति हेतुः, यो यत्र पूर्व्वमवगत इति नियमोप्यस्ति, ताट्शनियमबलात् वह्नि-व्याप्यधूमवान् पर्व्वत इति ज्ञाने धूमवान् पर्व्वत इति ज्ञानस्यापि हेतुत्वमित्यभिप्रायकतया परामर्शहेतुत्वेनेत्यादिकं वर्णयन्ति, तदसत्, ताट्शनियमवादिमते धूमवान् पर्व्वत इति ज्ञानस्य यदा कदाचिदपेक्षितत्वेऽप्यव्यवहितप्राक्कालीनापेक्षणात्। न च ताट्श-नियमनिर्व्वाहाय तत्प्रकारकतद्विशेष्यकज्ञानस्य संस्कारद्वारा हेतुत्वं ताट्शसंस्कारस्य वा हेतुत्वं कल्पनीयं, तत्प्रकारकोपनीतभाने तद्विषयकज्ञानस्य साक्षाद्धेतुत्वं कल्पनीयमिति गौरवं, तथाच लाघवात्तत्प्रकारकतद्विशेष्यकोपनीतभाने तत्प्रकारकज्ञानस्य साक्षा-देव हेतुत्व ताट्शनियमनिर्व्वाहाय कल्पयितुमुचितमिति वाच्यम्, ताट्शनियमवादिमते यदा कदाचित् तत्प्रकारकतद्विशेष्यक-ज्ञानमात्रस्यैव तत्प्रकारकतद्विशेष्यकोपनीतभाननिर्व्वाह इत्यनुभव-मपलप्य लाघवानुसरणे गतं ताट्शनियमेन, तत्प्रकारकोपनीतभाने तद्विषयकज्ञानत्वेनैव हेतुत्वस्यौचित्यात्, ताट्शनियमस्यापूर्व्वं धर्म्मिकसंगत्यान्यथानुपपत्त्या दोषनिष्कलङ्कदूषितत्वाच्चेति। कारण-तायाः स्वरूपसम्बन्धादिरूपत्वे कल्पनालाघवासम्भवादनन्यथासिद्ध-नियतपूर्व्ववर्त्तित्वं कारणत्वम् इत्यभिप्रायकतया कल्पनाला-

एवं धूमो वह्निव्याप्यो धूमवांश्चायमिति ज्ञान-
द्वयादेवानुमितिरस्तु ? न चानुमितिं प्रति व्याप्यत्व-

ननु धूमत्वावच्छेदेन व्याप्तेरालोकत्वेन च पक्ष-
धर्मतायाग्रहेऽप्यनुमितिः स्यादित्यत आह "एव-
मिति" । यद्धर्मावच्छेदेन व्याप्तिज्ञानं तेन रूपेण पक्ष-

धव मुपपादयितुं भावमाह "तथाचेति" (१) । अतिरिक्तधर्मिणः,
ज्ञानद्वयानन्तरमुभयवावसिद्धविशिष्टपरामर्शस्य कल्पनामित्य-
नेनान्वयः । तत्र, विशिष्टपरामर्शत्वावच्छिन्ने । व्याप्यतावच्छे-
दकप्रकारकज्ञानत्वेन सामान्यतो हेतुत्वे विभिन्नव्याप्यतावच्छे-
दकप्रकारकव्याप्तिपक्षधर्मताज्ञानाभ्यामनुमितिप्रसङ्ग इत्याशङ्कानु-
द्धारे मूलस्य न्यूनतेति तन्निराकरणपरतया एवमित्यादिमूलमुत्था-
पयति "नन्विति" ।

अनुमितिः स्यादिति" तत्रापि ज्ञानद्वयघटितसामग्रीसत्त्वा-
दिति भावः । एवञ्चैवमित्यादिमूलस्य धूमत्वाद्यवच्छेदेन व्याप्ति-
ज्ञानं तत्प्रकारकपक्षधर्मताज्ञानञ्च मिलितमनुमित्युत्पादप्रयोजक-
सामग्री, नतूक्तं ज्ञानद्वयं तथेत्यर्थः । सामान्यरूपेण हेतुत्वे
विशेषरूपेण सामग्रीप्रवेशो न सम्भवति कारणतावच्छेदकाव-
च्छिन्नस्तोमस्यैव सामग्रीत्वादित्याशङ्क्य विशेषरूपेण हेतुतामाह
"यद्धर्मावच्छेदेनेति" । व्याप्तिज्ञान यत्रानुमितौ हेतुस्तत्रेति,

---

(१) कल्पनाघवं विदुषोति "तथाचेति" इत्यपि क्वचित् क पाठ ।

ज्ञानमेव हेतुर्लाघवादावश्यकत्वाच्चेति वाच्यं, तस्या-
नुमितेः पूर्व्वमसिद्धौ युगपदुपस्थित्यभावात् ।

धर्म्मताज्ञानं हेतुरिति नातिप्रसङ्गः। "ज्ञानद्वयादिति"।
द्वित्वमविवक्षितम् । लाघवात्, अवच्छेदकलाघवात् ।
आवश्यकत्वात्, व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानस्य

वियत इति वा, पूरणीयम् । द्रव्यत्वादिसामानाधिकरण्येन वह्न्यादिव्याप्तिज्ञानात् द्रव्यत्वादिना च जलादेरुद्भेदादिहेतुता-ज्ञानादन्यथाख्यात्यात्मकानुमित्यापत्तेर्वारणाय यद्धर्म्मप्रकारेणे-त्युपेत्य यद्धर्म्मावच्छेदेनेत्यभिहितम् । अन्यथाख्यातिमनङ्गी-कुर्व्वतां द्रव्यत्वाद्यवच्छेदेन व्याप्तिज्ञानाप्रसिद्धा नोक्तापत्ति-सम्भवः । द्वित्वस्य फलोपधायकतावच्छेदकत्वे उभयविषय-कैकज्ञानादनुमित्यनिर्व्वाहः, सर्व्वत्र भेदाभेदसाधारणं कारणस्य मेलनमेव कार्य्योत्पत्तिप्रयोजकं न तु भेदनियतं तद्द्वित्वमपि क्वचि-त्तथेति, द्वित्वस्य तथात्वमसम्भवदुक्तिकञ्च, (१) इत्यभिसन्धाय ज्ञान-द्वयादित्यत्र हयपदं व्याप्तिपक्षधर्म्मताज्ञानयोरभेदानपेक्षतया सूचकतया व्याचष्टे "ज्ञानद्वयादितीति"। कल्पनालाघवस्यावश्यकत्वा-दित्यनेन वाच्यतया पौनरुक्त्यं निराचिकीर्षुर्व्याचष्टे "लाघवादिति"। "अवच्छेदकलाघवादिति" । व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञान-त्वापेक्षया व्याप्तिप्रकारकज्ञानत्वरूपावच्छेदकस्य लघुशरीरत्वादिति

---

(१) व्याप्यत्वादिधर्म्मस्य कारणतावच्छेदकत्वादिति भाः ।

हेतुत्वे व्याप्तिज्ञानहेतुताया आवश्यकत्वात् । क्वचिदुप-
जीव्यत्वादिति पाठः। उपजीव्यत्वञ्च व्याप्तिज्ञानं विना
यद्धर्मावच्छेदेन व्याप्तिज्ञानं तत्प्रकारकपक्षधर्मता-

भावः । व्याप्तिज्ञानस्येति धर्म्मपरम् । हेतुत्वे, कारणतावच्छेदकत्वे ।
व्याप्तिज्ञानहेतुतायाः, व्याप्तिज्ञानत्वस्य कारणतावच्छेदकतायाः ।
"आवश्यकत्वादिति" उभयसिद्धत्वादित्यर्थः । तस्य तदन्तर्गतत्वा-
दिति भावः । व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानादेर्व्याप्ति-
प्रकारकज्ञानानुपजीवकत्वात् क्वाचित्के उपजीव्यत्वादिति पाठे
असङ्गतिरिति उपजीव्यपदं विशिष्टसत्तानिर्व्वाहकपरमित्याशयेन
विशिष्टसत्तानिर्व्वाहकत्वमुपपादयति "उपजीव्यत्वञ्चेति" । असम-
वात्, सत्तानुपपत्तेः । विशिष्टसत्ताया विशेषणव्याप्तिज्ञानसत्त्व नियं-
तत्वादिति भावः । एतावतापि कल्पनालाघवमित्यवधेयम् ।
ननु व्याप्तिप्रकारकज्ञानत्वेन हेतुत्वे सिद्धेऽपि व्याप्तिप्रकारक-
पक्षधर्म्मताज्ञानत्वरूपपरामर्शत्वस्य हेतुतावच्छेदकत्वासिद्धा नैया-
यिकानां नाभिमतसिद्धिरित्यत आशयं पूरयति "एवञ्चेति" ।
व्याप्तिज्ञाने, व्याप्तिज्ञानत्वावच्छिन्ने । अतिप्रसङ्गभङ्गाय, पक्षधर्म्म-
ताधीशून्यकाले अनुमितिवारणाय । व्याप्तिज्ञानकारणतायामेव
पक्षधर्म्मताविषयकत्वमवच्छेदकं अन्यथानुपपत्त्या कल्प्यते । यद्यपि
व्याप्तिज्ञानत्वावच्छिन्नहेतुतायां पक्षधर्म्मताविषयकत्वस्यावच्छेद-
कत्वोपगमे प्रस्थितमवच्छेदकलाघवादिना, तथाप्यतिप्रसङ्गा-
नवतारदशायां व्याप्तिज्ञानत्वस्य लाघवात् प्रथमतोऽवच्छेद-

ज्ञानस्यासम्भवात्। एवञ्च सिद्धे व्याप्तिज्ञाने हेतावति-प्रसङ्गभङ्गाय पक्षधर्म्मतात्रविषयकत्वमवच्छेदकं कल्प्यते लाघवात् न तु कारणान्तरं गौरवादिति भावः। सिद्धस्य व्याप्तिज्ञानस्य न पक्षधर्म्मताविषयकत्वमित्याशयेनाह "तस्येति"।

यद्वा व्याप्यत्वज्ञानं व्याप्यत्वप्रकारकं पक्षधर्म्म-

कालसिद्धिरुत्तरकालमवच्छेदकाभिहद्धिय निष्प्रत्युहैवेति भावः। ननु पक्षधर्म्मताधीत्वेन कारणत्वान्तरकल्पनयाप्यतिप्रसङ्गभङ्गे-नान्यथानुपपत्त्या अवच्छेदकाभिहद्धिकल्पनं कथमित्यत आह "लाघवादिति"। कारणतान्तरकल्पनापेक्षया लाघवादित्यर्थः। अनतिप्रसङ्गोपपादकत्वाविशेषेऽपि गौरवादेव न कारणत्वान्तरसिद्धिरित्याह "नत्विति"। व्याप्तिज्ञानत्वावच्छिन्नमनुमितेः पूर्व्वमुभयवादिसिद्धमेवेति तत्त्वानुमितेः पूर्व्वमसिद्धावित्यग्रिम-मूलासङ्गतिरतस्तदाशयं व्याचष्टे "सिद्धस्येति"। न पक्ष-धर्म्मताविषयकत्वमिति"। तथा च कार्य्यहेतुतायां तदज्ञानेः पक्ष-धर्म्मताविषयकत्वस्यावच्छेदकत्वमपेऽपि कल्पयितुमशक्यमिति भावः। आशयमपूरयित्वापि व्याप्यत्वज्ञानमित्यादिमूलं व्या-करोति "यद्वेति"।

एतन्मतेऽपि लाघवादित्यस्यावच्छेदकलाघवादित्यर्थः। धूम-त्वादौ व्यक्तिरतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहिताया मीमा-सकैः कारणतावच्छेदके निर्दिग्गीयतया तन्मते अवच्छेद-

ताज्ञानमित्यर्थः । ननु विशिष्टज्ञानान्यथानुपपत्त्या ज्ञानद्वयस्यावश्यं वाच्यतया तस्यैव हेतुत्वं युक्तं तदिदमुक्तमावश्यकत्वादिति, अत आह "उपजीव्यत्वादिति । विशिष्टज्ञानस्यान्यथानुपपत्त्या तत्कल्पने विशिष्टज्ञानस्योपजीव्यत्वादित्यर्थः । स्वसम्वेदनसिद्धमेव ज्ञानद्वयम् आवश्यकत्वञ्च तस्योभयवादिसिद्धत्वमित्याशयेनाह "तस्येति" ।

कगौरवादिति भावः । अवच्छेदकगौरवेऽपि मीमांसकमते दर्शितकल्पनालाघवमक्षुण्णमितिशङ्कायामुपजीव्यत्वादितिमूलमवतारयति "नन्विति" । विशिष्टज्ञानान्यथानुपपत्त्येति" । तथाच ज्ञानद्वयकल्पकतया विशिष्टज्ञानमप्यनुमितेः पूर्वं मीमांसकमतसिद्धमिति न नैयायिकमते कल्पना गौरवमिति भावः । ननु मूलकृता अनुमिति पूर्वं विशिष्टज्ञानस्यासिद्धिमुद्भाव्य यदवच्छेदकलाघवमप्रयोजकीकृतं तन्न सङ्गच्छते विशिष्टपरामर्शसिद्धौ कल्पकविरहेण ज्ञानद्वयस्याप्यसिद्धिप्रसङ्गादतस्तदाशयं प्रकाशयति "स्वेति" । स्वात्मकं यत् सम्वेदनं प्रत्यक्षं (१) तत्सिद्धमित्यर्थं, तथाच न तत्कल्पकतया विशिष्टपरामर्शस्य तदभ्युपगतत्वमिति भावः । नन्वेवं तेषां ज्ञानद्वयस्यावश्यकत्वाभिधानविरोधः ? विशिष्टज्ञानान्यथानुपपत्त्या अवश्यकल्पनीयत्वस्यैवावश्यकत्वपदार्थत्वादित्यत

---

(१) मत्यक्षमिति पाठः क्वचिद्दृश्यते ।

अथ यथा तत्ताविशिष्टस्मरणे सतीन्द्रियसन्निकृष्टे स एवायमित्यभेदप्रत्ययो भवति तथेन्द्रियसन्निकृष्टे धूमे वह्निव्याप्यधूमस्मरणे धूमत्वसाधारणधर्म्मदर्शनात् व्याप्योऽयमित्यभेदप्रत्ययः स्यात् सामग्राद्दत्तत्वादिति स एवानुमितिहेतुरिति चेन्न, प्रत्यक्षसामग्रीतोऽनुमितिसामग्रीबलवत्त्वादनुमितिरेवोत्पद्यते न तु व्याप्याभेदप्रत्यक्षम्, (१) अन्यथा तवापि परामर्शानन्तरं तदनुव्यवसायो वा भवेन्नत्वनुमितिरेव ।

असिद्धिं परिजिहीर्षुराशङ्कते "अथेति"। अयं, पक्षदृत्तिः। हेतुरिति" लाघवादिति शेषः। "अनुमिति-

---

आहावश्यकत्वञ्चेति"। "उभयवादिसिद्धत्वमिति"। तथाच नोक्तरूपमावश्यकत्वमिति न तदभिधानविरोध इति भावः। अथ यथेत्यादिना मूलकृतो विशिष्टपरामर्शसामग्रीप्रदर्शनस्य प्रकृतोपयोगितां दर्शयति "असिद्धिमिति"।

मीमांसकोक्ताविति विशिष्टपरामर्शस्यासिद्धिमित्यर्थः। व्याप्योयमित्यभेदप्रत्ययस्य विशिष्टपरामर्शत्व स्फुटीचिकीर्षुरयमित्यस्यार्थं व्याचष्टेः पक्षवृत्तितायगाहितां स्पष्टयति "अयमिति"। स एवानुमितिहेतुरित्यत्र न्यूनताभङ्गाय हेतुं पूरयति "लाघवादितीति"। मत्कारसाधारणेन मविषयकत्वेनोपनायकतामते व्याप्युप-

---

(१) व्याप्याभेदप्रत्यय इति मथुरानाथ कृतपाठोऽप्यत्रास्ति।

अथ वह्निव्याप्यो धूम इति स्मरतः पर्व्वतीयधूमेन्द्रियसन्निकर्षेण प्रथमत एव व्याप्तिधूमलयोर्वैशिष्ट्यं

सामग्र्या इति"। स्मृतिहेतुतावादिनां नव्यानां नये दूषणमिदं, न तु संस्कारकारणतावादिनां प्राचामिति। "अथेत्यादि"।

अत्र यत्र प्रथमं पक्षाग्रहे गृहीतधूमे स्मृतव्याप्तिवैशिष्ट्यभानमनन्तरञ्च गृहीते पक्षे तादृशविशिष्ट-

---

नये तत्स्मरणपर्य्यन्तस्थानपेक्षितया न विशिष्टपरामर्शपूर्व्वमनुमितिसामग्रीनियत्वं संस्कारस्यानुमितावहेतुत्वादितिज्ञानवैनोपनायकत्ववादिनयेऽनुमितिसामग्रीनिबन्धनपरामर्शसम्भवरूपदूषणं सङ्गमयति "स्मृतीति"। स्मृतिहेतुतावादिनां, संस्कारस्यानुपनायकतया उपनयानुरोधेन स्मृतिं कल्पयताम् (१)।

यच्च पक्षीयधूमदर्शनात् प्रागेव उद्बोधकान्तराद्व्याप्तिस्मरणं तच्च तदुत्तरं पक्षधर्म्मताग्रहस्यैव विशिष्टपरामर्शरूपता मूलकृतोक्ता, तत्र न्यूनताभङ्गाय पक्षधर्म्मत्वाविषयकपक्षीयहेतुदर्शनोद्बोधितव्याप्तिस्मृतिस्थलेऽपि विशिष्टपरामर्शमुपपादयति "अत्रेति"।

तत्रेत्यपि द्रष्टव्यमित्यन्वयः। प्रथम पक्षग्रहे पक्षधर्म्मताग्रहोत्पत्त्या विशिष्टपरामर्शपूर्व्वमनुमितिसामग्री सम्भवतीति पक्षाग्रह इत्युक्तम्।

---

(१) तद्धेतुतया कल्पयतामित्यपि क्वचित् क. पाठ। उपनयहेतुतया कल्पयतामिति तदर्थः।

यत्र भासते विशेषणज्ञानस्य पूर्वं हेतुत्वात् तत्र यत्र वाग्वाक्याद्वह्निव्याप्यवानयमितिज्ञानं तत्रोभयत्वापि

धीस्तत्रेत्यपि द्रष्टव्यम्। प्रथमत इति विशिष्टज्ञानात् पूर्वमनुमितिसामग्रीविरहदशंनाय। एवञ्च सिद्धे पूर्ववर्त्तिनि विशिष्टज्ञाने तत्त्वेन हेतुत्वं गुरुधर्म्मद्वयावच्छेदेनानन्यथासिद्धत्वकल्पनामपेक्ष्य लघ्वेकरूपावच्छेदेन

सामान्य लक्षणानुपगमे व्याप्तिस्मरणस्य पक्षीयधूमादिविषयकतया विशिष्टविशेषणतावच्छेदकविशिष्टविशेषणज्ञानविरहेण विशेषणतावच्छेदकविशिष्टधूमवैशिष्ट्यज्ञानं पक्षे न सम्भवतीति अन्तराभूतव्याप्तेः पक्षीयधूमे विशिष्टज्ञानस्वीकारः। पक्षविशेष्यकोऽपि परामर्शः पक्षग्रहस्य पक्षतावच्छेदकरूपविशेषणविषयकतया, विशिष्टविशेष्यकज्ञाने विशेष्यतावच्छेदकप्रकारकधीहेतुत्वे लघ्वेन वा, उपयोगात् गृह्णातीपक्ष इत्युक्तम्। तादृग्विशिष्टधीरिति" तादृशस्य व्याप्तिविशिष्टस्य हेतोर्विशिष्टधीरित्यर्थः। मूले प्रथमत इत्यनन्तरं पक्षधर्म्मतया भासमान इति पूरणीयम्। ननु उक्तरीत्या जायमानस्य विशिष्टपरामर्शस्य व्याप्तिस्मरणपक्षधर्म्मताज्ञानापेक्षया प्राथम्याभावात् प्रथमत एवेत्युक्तमसङ्गतमत आह "प्रथमत इतीति"। विशिष्टज्ञानात् पूर्वमिति"। तथाच प्रथमत एवेत्यस्यानुमितिसामग्र्यासम्भवायामेवेत्यर्थ इति भावः। नन्वेवं क्वचिद्विशिष्टपरामर्शमिद्धावपि विशिष्टपरामर्शत्वरूपावच्छेदकस्य लघुत्वेऽपि च

लाघवात् पक्षधर्म्मव्याप्यत्वज्ञानस्य हेतुत्वकल्पना-
दन्यत्रापि तथेति चेन्न, इन्द्रियासन्निकृष्टेऽतीन्द्रिये च

नियमानन्यथासिद्धत्वकल्पनाया एव न्याय्यत्वात्,
गृह्यमाणव्याप्यवच्छेदकताक-धर्म्म-प्रकारकपक्षधर्म्मता-
ज्ञानत्वेन पक्षधर्म्मताग्रहप्रकारीभवद्धर्म्मावच्छिन्नव्याप्ति-

---

तेन रूपेण हेतुतामते तद्रूपावच्छिन्नस्य नियमकल्पनाया आधिक्येन गौरवं दुर्व्वारमेवेत्यत आह "एवञ्चेति"। "गृह्यधर्म्मद्वयावच्छेदेनेति"। यद्यपि व्याप्तिविशिष्टवैशिष्ट्यज्ञानत्वापेक्षया धूमत्वादंशे अवच्छेदकत्वावगाहिव्याप्तिनिश्चयत्वस्य गुरुत्वेऽपि धूमत्वादिप्रकारकपक्षधर्म्मताज्ञानत्वस्यातथात्वाद्धर्म्मद्वयस्य गौरवाभिधानमसङ्गतम्, तथापि गृह्यधर्म्मद्वयेत्यस्य गृह्यधर्म्मघटितद्वयेत्यर्थकत्वान्न दोषः।

"न्याय्यत्वादिति"। न्यायमते कल्पनीयस्य द्वित्वं परमते कल्पनाधर्म्मिणोद्वित्वमिति कल्पनासाम्येऽपि न्यायमते अवच्छेदकलाघवादिति भावः। परमते एकमेव ज्ञानं कारणमन्यदवच्छेदकमिति न धर्म्मद्वयावच्छेदेन कारणताकल्पनमिति शङ्कां निराकरोति "गृह्यमाणेति"। गृह्यमाणव्याप्यवच्छेदकताकत्वञ्च वर्त्तमानव्याप्यवच्छेदकत्वग्रहविषयत्वम्। पक्षधर्म्मताग्रहप्रकारीभवदितिविद्यमानपक्षधर्म्मताग्रहप्रकारार्थकम्। "अतिगौरवादिति"। तत्तत्कालविद्यमानत्वप्रवेशेन कालभेदेनानन्तकार्य्यकारणभावप्रसङ्गादिति भावः। ननु कारणतावच्छेदकविशिष्टकारणस्य प्राक्सत्तायाः प्रकृते फलोपधानप्रयोजकत्वोपगमे विद्यमानत्वनिवेशं विनाप्यतिप्रसङ्गः

लिङ्गे प्रत्यक्षविशिष्टज्ञानसामग्रीविरहात्, तेन विना अनुमित्यनुत्पादापत्तेः, अस्मदुक्तसामग्राश्च तत्रापि

ज्ञानत्वेन वा एककारणत्वे चातिगौरवात्, विनिगमकाभावाच्च। तत्रापि च नियतपूर्व्व-

---

शक्यवारणः। न चैवमपि समानप्रकारकपुरुषान्तरीयव्याप्तिज्ञानकालीनपक्षधर्म्मताज्ञानादितोऽनुमित्यापत्तिवारणाय तत्तत्पुरुषीयानुमितिजनकतायां तत्तत्पुरुषीयज्ञानमेवावच्छेदकं वाच्यमिति पुरुषभेदेन कारणताभेदो दुर्व्वार एवेति वाच्यम्, स्वसमानाधिकरण स्वविषयधर्म्मप्रकारकत्वोभयसम्बन्धेन व्याप्यवच्छेदकतायाः स्वविशिष्टपक्षधर्म्मताज्ञानत्वेन, स्वसामानाधिकरण्य स्वप्रकारधर्म्मविषयकत्वोभयसम्बन्धेन पक्षधर्म्मताग्रहविशिष्टव्याप्यवच्छेदकत्वग्रहत्वेन वा, हेतुत्वोपगमे व्यधिकरणज्ञानदशादनुमिति वारणस्य तत्तत्पुरुषीयत्वनिवेशमन्तरेणैव सम्भवादित्यत आह "विनिगमकाभावाच्चेति"। दर्शितरूपयोरेकतरस्य हेतुतावच्छेदकत्व इत्यादिः। तथाच विनिगमनाविरहाद्धर्म्मद्वयावच्छेदेनानन्यथासिद्धत्वकल्पनमावश्यकमेवेति भावः। वह्निव्याप्यवानयमितिशाब्दपरामर्शस्थले व्याप्यतावच्छेदकप्रकारकपक्षधर्म्मतादिग्रहविरहेण परमतेऽनुमित्यनुत्पादान्नानुमितिपूर्व्वं विशिष्टपरामर्शस्योभयवादिसिद्धत्वान्नमितिव्याप्यतावच्छेदकप्रकारकव्याप्तिपक्षधर्म्मताग्रहस्यानुमितिनियतपूर्व्ववर्त्तितायाः कथितोभयसिद्धत्वासम्भवप्रदर्शनपरतया यत्न वेत्यादिमूल सङ्गमयति "तत्रापि चेति"। तत्र, मीमांसकस्य। मूले तेन

सत्त्वात्। न चानुमानादिना तत्र परामर्शः, अनवस्थानात्।

वर्त्तित्वं कल्प्यमित्याह "यत्र वेति"। "तेन विनेति"। तथाच व्यभिचारात् कारणत्वं बाधितमिति भावः। स्वतो व्यभिचारं निरस्यति "अस्मादुक्तेति"। "अनवस्थानादिति"। न च धूमान्तरसन्निकर्षे तत्तद्व्यक्तिवृत्तिधूमत्वं वह्निव्याप्यमितिलिङ्गविशिष्यकपरा-

---

विनेति"। विशिष्टपरामर्शाभावेनेत्यर्थः। विशिष्टपरामर्शशून्यकालेऽनुमित्यनुत्पादापत्तिर्विशिष्टपरामर्शहेतुतायां किं विषया बाधिकेत्याकाङ्क्षायामाह दीधितौ "तथाचेति"। अनुमित्यनुत्पादापत्तौ चेत्यर्थः। "व्यभिचारादिति"। अनुमित्यनुत्पादापत्तिकथनादर्थतोऽनुमित्युत्पादलाभेन मूलग्रन्थाद्व्यतिरेकव्यभिचारलाभः। स्वमतसिद्धानुमिति सामग्रीसत्त्वकथनप्रयोजनं स्फुटयति "स्वत इति"। स्वतः, स्वमते। यदा चातीन्द्रियादिहेतुके शब्दादिजन्यज्ञानद्वयघटितसामग्रयपि नास्ति, तदानुमितिर्न केनाप्यनुमन्यते इति न मीमांसकमते व्यभिचारावकाश इत्यवधेयम्। मूले "अनवस्थानादिति"। अनुमित्यात्मकपरामर्शार्थमपि प्रत्यक्षसामग्रीविरहेणानुमानादेव परामर्शान्तरस्याभ्युपगन्तव्यत्वादिति भावः। पक्षतद्वृत्तिहेतोरसन्निकर्षेऽपि तद्वृत्तिधूमो वह्निव्याप्य इति व्याप्तिसाध्यकानुमित्यात्मकविशिष्टपरामर्शं प्रत्यक्षात्मकपरामर्शादुपपाद्य अनवस्था-

अथ यया स देवदत्तो गौरो न वा परमाणुर्गुरु-त्वाधिकरणं (१) न वेति संशयो बहिरिन्द्रियेणापि

मर्शाद्यानुमितिसम्भवः, धूमसामान्यासन्निकर्षेऽपि तत्र वह्न्यनुमानात् तदाक्षिप्तविशेषधूमत्वस्यैवाप्यग्राहक-विरहाच्च ।

परीहारमाह निरस्यति दीधितौ "न चेति"। विशेष्यसन्निकर्ष-विरहेण पक्षीयधूमरूपपक्षविशेष्यकव्याप्तिव्याप्यवत्तापरामर्शासम्भ-वादाह व्याप्यविशेष्यकपरामर्शेत्युपावनम्। "धूमसामान्यासन्निकर्षेऽपीति"। तथाच तदानीं धूमत्वासन्निकर्षेण तद्विशेष्यकोक्तपरामर्शस्याप्य-सम्भव इति भावः। विशेष्यसन्निकर्षबहिर्गोपणसन्निकर्षोऽपि विशि-ष्टप्रत्यक्षे हेतुरित्यागत्येन धूमान्तरसन्निकर्षस्थलेऽपि पर्व्वतीयधूम-रूपविशेषणसन्निकर्षविरहेण धूमत्वे तद्वृत्तित्वावगाहिदर्शनपरा-मर्शासम्भवमाह "तदाक्षीति"। यद्यपि विशेषणसन्निकर्षस्य प्रत्यक्ष-हेतुत्वेऽपि पक्षीयधूमादिसन्निकर्षस्थलेऽपि साध्यासन्निकर्षे ज्ञान-प्रत्यासत्तिं विना विशिष्टपरामर्शासम्भवादसन्निकृष्टहेतुकस्थला-नुभावनमफलं ज्ञानप्रत्यासत्तिसत्त्वे च तत्रापि विशिष्टपरामर्श-सम्भवस्तथापि चाक्षुषादिज्ञाने उपनीतस्य भानीपगमे मनो भिन्नप्रमाणसहकारित्वघटितापादकक्लप्तप्रमाणान्तरतापत्तिः प्रत्यक्षप्रमासामग्रीविरहकालीनप्रमोत्पादकत्वापादकक-प्रत्यक्षवि-

---

(१) परमाणुरूपाधिकरणमिति पाठोऽत्वार्कि।

मनसा . कोटिस्मरणविशेषादर्शनादिसहकारिवशाज्ज-
न्यते, यथावा निद्रासहकारेण वाह्यस्वप्नानुभवस्तथे-
हापि ज्ञानान्तरोपनीतविशेष्ये व्याप्तिस्मरणासहकृतेन
मनसा परामर्शो जन्यते, तदनन्तरमनुमितिदर्शना-
दिति चेन्न, व्याप्तिस्मरणादेः प्रमाणान्तरतापत्तेः ।

तदेव हि प्रमाणान्तरं यदसाधारणं सहकार्य्यासाद्य
मनो वहिर्गोचरप्रमां जनयति, यद्येन्द्रियादि (१) ।

---

* असाधारणमिति शरीरादिव्युदासाय । आलोका-
दिवारणाय प्रमाणान्तरासहकारीति वाच्यम् । तदपि

जातीयप्रमोपधायकतापत्तेस्थानवकाशात् यच्च मानसान्योपनीत-
भानासम्भवस्तादृशस्थलानुधावनमित्यवधेयम् ।

मूले "यदसाधारणमिति" । मनसा वहिर्गोचरप्रमाजनने
यदसाधारणं सहकारि भवतीत्यर्थः । तेन वहिर्गोचरप्रमाया
मसाधारणकारणत्वमापदकमिति फलितम् । सुखादिगोचरप्रमा-
जनके सुखादिनिष्ठमनःसन्निकर्षे व्यभिचारवारणाय "वहि-
र्गोचरेति" । वहिष्ठत्वलौकिकमानसाविषयत्वम् । स्मृतिजनक-

---

(१) तेजस्त्वादिना साङ्कर्यात् इन्द्रियत्वं न जातिः, अपि तु शब्देतरोद्भूत-
विशेषगुणाश्रयत्वेसति ज्ञानकारण मन संयोगाश्रयत्वमेवतदित्यवधेयम् ।

अथ यथा स देवदत्तो गौरो न वा परमाणुर्गुरु-त्वाधिकरणं (१) न वेति संशयो बहिरिन्द्रियाणामि

मर्थाद्ग्रामानुमितिसम्भवः, धूमसामान्यासन्निकर्षेऽपि तव वह्न्यनुमानात् तद्व्यक्तित्वधूमत्ववैशिष्ट्यग्राहक-विरहाच्च ।

परीहारग्रहा निरस्यति दीधितौ "न चेति"। विशेष्यसन्निकर्ष-विरहेण पक्षीयधूमरूपपक्षविशेष्यकव्याप्तिव्याप्यवत्तापरामर्शस्य-बाह्याप्यविशेष्यकपरामर्शानुधावनम्। "धूमसामान्यसन्निकर्षेऽपीति"। तथाच तदानीं धूमत्वासन्निकर्षेण तद्विशेष्यकोल्लपरामर्शस्याप्य-सम्भव इति भावः। विशेष्यसन्निकर्षवद्विशेषणसन्निकर्षोऽपि विशि-ष्टप्रत्यक्षे हेतुरित्याशयेन धूमान्तरसन्निकर्षस्थलेऽपि पर्व्वतीयधूम-रूपविशेषणसन्निकर्षविरहेण धूमत्वे तद्वृत्तित्वावगाहिदर्शनपरा-मर्शासम्भवमाह "तदानीति"। यद्यपि विशेषणसन्निकर्षस्य प्रत्यक्ष-हेतुत्वेऽपि पक्षीयधूमादिसन्निकर्षस्थलेऽपि साध्यासन्निकर्षे ज्ञान-प्रत्यासत्तिं विना विशिष्टपरामर्शासम्भवादसन्निकृष्टहेतुकस्थला-नुधावनमफलं ज्ञानप्रत्यासत्तिसत्त्वे च तत्रापि विशिष्टपरामर्श-सम्भवस्तथापि चाक्षुषादिज्ञाने वह्नीतस्य भानोपगमे मणि-मितप्रमाणासङ्कीर्णविघटितापादकक्लप्तप्रमाणान्तरतापत्ते-प्रत्यक्षप्रमासामग्रीविरहकालीनप्रमोत्पादकत्वापादकक प्रत्यक्षवि-

---

(१) परमाणुरूपगुरुत्वमिति पाठान्तरम्।

मनसा कोटिस्मरणविशेषादर्शनादिसहकारिवशाज्ज-
न्यते, यथावा निद्रासहकारेण बाह्यस्वप्नानुभवस्तथे-
हापि ज्ञानान्तरोपनीतविशेष्ये व्याप्तिस्मरणसहकृतेन
मनसा परामर्शो जन्यते, तदनन्तरमनुमितिदर्शना-
दिति चेन्न, व्याप्तिस्मरणादेः प्रमाणान्तरतापत्तेः ।

तदेव हि प्रमाणान्तरं यदसाधारणं सहकार्य्यासाद्य
मनो बहिर्गोचरप्रमां जनयति, यथेन्द्रियादि (१) ।

---

* असाधारणमिति शरीरादिव्युदासाय । आलोका-
दिवारणाय प्रमाणान्तरासहकारीति वाच्यम् । तदपि

जातीयप्रमोपधायकतापत्त्यानवकाशात् यत्र मानसान्योपनीत-
भानासम्भवस्तादृशस्थलानुधावनमित्यवधेयम् ।

मूले "यदसाधारणमिति" । मनसा बहिर्गोचरप्रमाजनने
यदसाधारणं सहकारि भवतीत्यर्थः । तेन बहिर्गोचरमसाया
मसाधारणकारणत्वमापदकमिति फलितम् । सुखादिगोचरप्रमा-
जनके सुखादिनिष्ठमन.सन्निकर्षे व्यभिचारवारणाय "बहि-
र्गोचरेति" । बहिष्ठत्वलौकिकमानसाविषयत्वम् । स्मृतिजनक-

---

(१) तेजस्त्वादिना साङ्कर्यात् इन्द्रियत्व न जाति , अपि तु शब्देतरोद्भूत-
विशेषगुणानाश्रयत्वेसति साक्षात्कारण मन संयोगाश्रयत्वमेवतदित्यवधेयम् ।

प्रमाणान्तरं भवत्येव प्रत्यक्षादिप्रमाकरणत्वेन विभागान्न तद्व्याघात ईत्यपि कश्चित्। यद्वा असाधारणम-

---

स्कारादौ व्यभिचारवारणायानुभवार्थकं प्रमापदम्। असाधारणपदप्रयोजनमाह "दीधितावसाधारणमितीति"। *

शरीरादीत्यादिपदात् आत्ममनोयोगादिपरिग्रहः। शरीरादेर्वह्निगोचरप्रमाजनकत्वेऽपि जन्यज्ञानसामान्यं प्रत्येव तेषां हेतुतया तादृशप्रमां प्रत्यसाधारणकारणत्वविरहादिति भावः। अत्र तादृशप्रमाऽसाधारणकारणत्वं यदि स्मरणाहत्तितादृशप्रमावृत्तिकार्यतानिरूपकत्वं तदा स्मृतिजनकसंस्कारादिवारकतमालनिवेशवैफल्यं, विशिष्टवैशिष्ट्यानुभवत्वावच्छिन्नहेतुभूतविशेषणतावच्छेदकप्रकारकज्ञानादौ व्यभिचारश्च। अतएव जन्यज्ञानत्वानवच्छिन्नतादृशप्रमावृत्तिकार्यतानिरूपकत्वं तदित्यपि निरस्तम्। यदिचानुभवत्वव्यापकजातिघटितधर्मावच्छिन्नकार्यत्वानिरूपकत्वे सति तादृशप्रमाजनकत्वं तत्, तदाऽनुभवत्वव्याप्यानुभवत्वव्यापकतया तदवच्छिन्नजनकविशेषणतावच्छेदकप्रकारकज्ञाने व्यभिचारवारणसम्भवेऽपि जन्यसत्त्वावच्छिन्न प्रति द्रव्यत्वेन हेतौ चक्षुरादावापादकासत्त्वेन इन्द्रियादिवदिति दृष्टान्तासङ्गतिः। रूपावृत्तित्वेन सत्त्वान्यत्वेन वा तादृशजाति विशिष्यैतद्धेतोरुद्धारेऽपि व्याप्तिविशिष्टवैशिष्ट्यानुभवत्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकज्ञानमुद्दया व्याप्तिस्मरणादेर्हेतुतायाः सर्वमतसिद्धतया तत्रापादकासिद्धेर्दुर्वारैवेति अनुभवत्वव्याप्यजातिघटितधर्मावच्छिन्ना या तादृशप्रमावृत्ति-

समवहितं, तथाच यज्जातीयप्रमाया मनोन्यकरणेना समवहितं सत् यद्वह्निविषयकप्रमोत्पादकं, यज्जा-

---

कार्यता तन्निरूपकत्वमेव तादृशप्रमाऽसाधारणकारणत्वं वाच्यम् । अनुभवत्वव्याप्यत्वञ्च अनुभववृत्तिभेदप्रतियोगितावच्छेदकत्वं, तच्च ज्ञानत्वादेरिवानुभवत्वादेरपि व्यवहारमतो न विशेषणतावच्छेदक-प्रकारकज्ञाने व्यभिचारः । एवं तादृशधर्मस्य स्मृतित्वेऽप्यक्षतत्या तदवच्छिन्नहेतुभूतसंस्कारादौ व्यभिचारवारणाय प्रमात्वनिवेशस्या-प्यावश्यकता । व्याप्तिस्मरणादेर्विशिष्टवैशिष्ट्यानुभवत्वावच्छिन्नज-नकत्वेऽपि नैयायिकैः सन्निकर्षविधया अलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति तस्य कारणतान्तरोपगमान्न तत्रापादकासिद्धिः, तन्निरूपि-ताया अलौकिकप्रत्यक्षत्वावच्छिन्नकार्यतायाः एवानुभवत्वव्याप्य-जातिघटितधर्मावच्छिन्नत्वात्तामादायैवापादकसत्तायास्तत्रोपपा-दनीयत्वात् । अलौकिकप्रत्यक्षत्वस्योपाधितया तदवच्छिन्नजन्य-ताया जात्यवच्छिन्नत्वविरहादापादकासिद्धिः स्यादतो जाति-घटितेत्युक्तम् । तादृशजाताववच्छेदकतापर्य्याप्तनिवेशस्तोरकमेवात्र घटितपदं न तु विवक्षितार्थकमित्यवधेयम् । आलोकादेरपि अनुभवत्व-व्याप्यचाक्षुषत्वादि-जातिघटित-धर्मावच्छिन्नजनकतया निर्व्वाच्यप्रमाणान्तरत्वरूपाव्यविरहेण च व्यभिचार इति तद्वार-णायापादककोटौ विशेषणान्तरं पूरयति "आलोकादीति" । आदिना सन्निकर्षादिपरिग्रहः । "प्रमाणान्तरासहकारित्व-मिति" । मनोभिन्नप्रमाणासहकारित्वमित्यर्थः । स्वभिन्नतज्जन्य-

तीयप्रमासामग्रीविरहे वा यत्वमौत्पादकं, तद्विजा-
तीयप्रमाहेतुरित्येव व्याप्तिस्तत: सिद्धायां विलक्षण-

जनकत्वमेव तत्सहकारिता पदार्थं इति चक्षुरादे: स्वात्मकप्रमाण-
जन्यजनकत्वसत्त्वेऽपि न दृष्टान्तासिद्धि:। न च चक्षुरादे: स्वभि-
न्नचक्षुरादिव्यक्त्यन्तरजन्यतावच्छेदकचाक्षुषत्वाद्यवच्छिन्न-जनकत्व-
सत्त्वात् स्वभिन्नत्वविशेषणदानेप्यनिस्तार इति वाच्यं, स्वभिन्न-
त्वरूपप्रमाणविशेषणं परित्यज्य प्रमाणजन्यतायां स्वानिरूपित-
त्वस्य विशेषणतयैव तद्दोषानवकाशात्। उपनायकज्ञानस्य मनो-
रूपप्रमाणसहकारितया आपादकासिद्धिरतो "मनोभिन्नेति"।
अय सहकारित्वमत्र न तज्जन्यजनकत्वं, तथासति चक्षुरादेरपि
स्वगादिजन्यचक्षुर्गाद्युभयवृत्तित्वादिजनकतया दृष्टान्तासिद्धे:,।
नापि तज्जन्यज्ञानजनकत्वं, चक्षरादेरपि इन्द्रियत्वेन त्वगादिजन्य
प्रत्यक्षादिस्वरूपयोग्यतया तद्दोषतादवस्थ्यात्। फलोपहितजनक-
त्वादीनां तद्धर्मनिवेशनेनैतद्दोषोद्धारेऽपि शरीरादेरपि निरूप्यप्रमा-
णान्तरसहकारित्वमत्त्वेन तदारकमूलोक्तासाधारणपदवैयर्थ्यंमत-
स्तज्जन्यतावच्छेदक-जातिघटितधर्म्मावच्छिन्नजन्यतानिरूपकत्वमेव
तत्सहकारित्वं वाच्यम्। तथाच मनोभिन्नत्वरूपप्रमाणविशेषणवैय-
र्थ्यम्, उपनायकज्ञानजन्यताया मनोजन्यतावच्छेदकमानसत्वघटि-
तधर्म्मानवच्छिन्नत्वात्,नैयायिकैर्बहिरिन्द्रियजन्योपनीतभानसाधा-
रणालौकिकप्रत्यक्षत्वावच्छिन्नं प्रत्येव उपनायकज्ञानहेतुत्वोपगमात्।
न च प्रत्यक्षत्वजातिरपि मनोजन्यतावच्छेदिका प्रत्यक्षत्वावच्छिन्नं

प्रमायां विलक्षणे च तत्करणे कल्पनीये आवश्यक-
त्वात् बाधकाभावाच्च तस्यैव तथात्वं पर्य्यवस्यतीति ।

प्रति इन्द्रियत्वेन सामान्यकारणतासत्त्वादिति वाच्यं, तादृशसामा-
न्यकार्य्यकारणभावस्य प्रामाणिकत्वे (१) मनोभिन्नत्वविशेषणो-
पादानेऽपि तथाविधचक्षुरादिप्रमाणजन्यतावच्छेदकप्रत्यक्षत्वमादा-
यैतद्दोषप्रसङ्ग इति निरुक्तसहकारिताघटकजातौ प्रत्यक्षनिष्ठ-
भेदप्रतियोगितावच्छेदकत्वनिवेशनस्यावश्यकतया मनोभिन्नत्वा-
निवेशेऽप्युक्तदोषाभावात् । नच न देयमेव मनोभिन्नत्वरूपं प्रमाण-
विशेषण दीधितिस्थान्तरपदस्य स्वभिन्नपरतयैव सार्थकत्वादिति
वाच्यं, मनोभिन्नत्वानुपादाने मनःसहकारिसुखादिमन.सन्निकर्षे
व्यभिचाराप्रसक्तेः मूलस्थबहिःपदवैयर्थ्यापत्तेरिति चेन्न, उपना-
यकज्ञानस्य जन्यतावच्छेदकं मानसत्वमेव बहिरिन्द्रियजन्यज्ञाने
उपनीतस्य विशेषणतया तत्र विशेषणज्ञानविधयैवोपनायक-
ज्ञानस्य हेतुत्वात्तत्साधारणधर्म्मस्य तज्जन्यतानवच्छेदकत्वेऽपि क्षति-
विरहात्, तथाच निरुक्तमनःसहकारित्वमुपनायकज्ञानस्याक्षतमे-
वेति मनोभिन्नत्वरूपप्रमाणविशेषणमावश्यकम्, अथवा मनोभिन्न-
त्वेन न प्रमाण विशेषणीयमपि तु इन्द्रियत्वावच्छिन्ननिरूपिततज्ज-
न्यतामादायोक्तदोषस्य वारणाय निरुक्तजातिविशेषणं परित्यज्य
प्रमाणजन्यतायां मनोऽनिरूपितत्वमेव निवेश्यं, तावतैव बहिः-

---

(१) प्रमापकत्वे इत्यपि क्वचित्क पाठ ।

पदमार्थ्यकादिति आलोकादिसहकारितया चक्षुरादावसिद्धिरतः "प्रमाणेति"। प्रमाणत्वञ्चानानुभवहेतुजातिपर्याप्यकार्य्यतावच्छेदकताकत्वम्। चक्षुरादेश्चक्षुष्टादिना शुक्लचाक्षुषत्वाद्यवच्छिन्नं प्रत्येव सामान्यतोदृष्टतासत्त्वात्तावदमहत्तमेवेति आलोकस्य च भास्वच्चाक्षुषत्वं द्रव्यचाक्षुषत्वादिकं वा अन्यतावच्छेदकं, चक्षुः संयोगादिरूपविषयेन्द्रियसन्निकर्षस्यापि द्रव्यचाक्षुषत्वादिकमेव तथा, न तु शुक्लचाक्षुषत्वादिकमिति न तत्सहकारितामादाय चक्षुरादावसिद्धिः। न चैवमपि चक्षुर्मनोयोगादिजन्यतावच्छेदककोटौ विषयादिनिवेशे प्रयोजनविरहेण शुक्लचाक्षुषत्वादिकमेव तज्जन्यतावच्छेदकमुपेयते एवञ्च तेषामपि निरूढप्रमाणत्वगालित्वेन तत्सहकारितामादाय इन्द्रियेष्वसिद्धिरिति वाच्यं, संयोगान्यत्वस्यापि प्रमाणत्वशरीरेऽन्तर्भावनीयत्वात्। न चोक्तप्रमाणान्तरासहकारित्वनिवेशेऽपि उद्भूतरूपे व्यभिचारस्तस्य मूर्त्तप्रत्यक्षत्वावच्छिन्नं प्रत्येव जनकतया चक्षुरादिजन्यतावच्छेदकावच्छिन्नजन्यताकत्वरूपतत्सहकारित्वाभावादिति वाच्यम, मीमांसकैर्वायोः प्रत्यक्षत्वाभ्युपगमेन मूर्त्तचाक्षुषत्वस्यैव तज्जन्यतावच्छेदकत्वोपगमे तस्य चक्षु सहकारिताया अप्रत्यक्षत्वात्। एवं महत्त्वस्यापि द्रव्यचाक्षुषत्वमेव जन्यतावच्छेदकं न तु द्रव्यप्रत्यक्षत्वमतो न व्यभिचारः। द्वयोरवयवयोरवयवित्वोपपत्तये द्रव्यारम्भं प्रति द्वित्वमहत्त्वव्याप्यजातिविजातीयमहत्त्वत्वेन हेतुत्वान्तरस्यावश्यकतया चाक्षुषत्वस्य महत्त्वजन्यतावच्छेदकत्वेऽपि न परमाणुद्व्यणुकयोरवयवयोरवयवित्वेनापत्तिः, विपक्षस्य च हेतुत्वमप्रामाणिकमेवेति न तत्रव्यभिचारः। अथ

व्याप्तिस्मरणस्यापि योग्यताज्ञानविधया शब्दप्रमाणसहकारितया तत्रापादकासिद्धिरिति चेन्न, सहकारिताशरीरे चरमजन्यतायाः फलोपधानरूपाया एव विवक्षणीयत्वात्, शाब्दफलानुपधायक-व्याप्तिज्ञानस्यैव पक्षत्वेन आपादकासिद्धानवकाशात् ।

इदन्त्ववधेयम् । प्रमाणान्तरासहकारित्वस्य निरुक्तस्य स्वातन्त्र्येणापादककोटौ न निवेशो गौरवात् अपित्वनुभवत्वव्याप्यजाति-घटितधर्म्मावच्छिन्नबहिर्गोचरप्रमानिष्ठकार्य्यतानिरूपकत्वात्मक(१) तादृशप्रमासाधारणकारणताघटकजातावेव प्रमाणान्तरजन्यतान-वच्छेदकत्व निवेशनीयं, तच्च स्वानिरूपिता मनोऽनिरूपिता च या जन्यता तदवच्छेदकतापर्य्याप्यनधिकरणत्वं । पर्य्याप्तिनिवेशात् चाक्षुषत्वादेरालोकादिजन्यतावच्छेदकघटकत्वेऽपि न दृष्टान्ता-सिद्धिः । मनोऽनिरूपितेत्यस्य मनस्त्वघटितधर्म्मावच्छिन्नानिरू-पिताथैंकतया मनस्त्वघटितचक्षुर्मनोयोगत्वाद्यवच्छिन्नजन्यतामादा-योक्तदोषस्यानवकाशः । एवञ्च स्वानिरूपिता मनस्त्वघटितधर्म्मा-वच्छिन्नानिरूपिता च या जन्यता तदवच्छेदकतापर्य्याप्यनधि-करणं या अनुभवनिष्ठभेदप्रतियोगितावच्छेदकजातिस्तद्घटित-धर्म्मावच्छिन्ना या बहिर्विषयकानुभवनिष्ठकार्य्यता तन्निरूपकत्व-मापादकदलसमुदायार्थः । आपाद्यं प्रमाणत्वं प्रमाया असाधा-रणकारणत्वम् । असाधारणकारणत्वञ्च व्यापारवदसाधारणफलोप-हितकारणत्वम् । व्यापारनिवेशात् प्रतीकान्तरवत्त्वमनायकज्ञाने आपाद्यविरहनिर्व्वाहः । असाधारणप्रवेशादापादके शरीरादि-

(१) निरूपकत्वात्मकत्वं कारणताविशेषणम् ।

यारकासाधारण्यविशेषणसार्थक्यम्। फलोपधाननिवेशाद्यागि-
ज्ञानस्यानुमित्यालकप्रमाव्यरूपयोग्यतामादाय नेष्टापत्तिः अनु-
मित्यनुपधायकस्य तस्य पक्षत्वात्। वस्तुतः प्रमाणव्यवहार-
विषयत्वमेवापादयं दीधितिक्षतोऽभिप्रेतम्, अन्यथा आलोकेऽप्यु-
पाद्यत्वेन 'आलोकादिवारणायेत्यादि' तद्ग्रन्थासङ्गतिः। प्रमाण-
व्यवहारविषयतावच्छेदकञ्च प्रमाणान्तरासङ्कारित्वगर्भम् आलो-
कादौ व्यापारवत्यपि प्रमाणव्यवहारविरहात्, अतो व्यवहारा-
पादनपक्षे आलोकस्य वारणीयत्वाभिधानसङ्गतिः। वह्निव्याप्य-
धूमवान् पर्वत इत्यादि विशिष्टपरामर्शात्मकपर्वतविषयकप्रमायां
व्याप्तिज्ञानस्य कारणत्वे तत्त्वमेव प्रमाण स्यात्, लाङ्गप्रमायां
साध्यत्वा ग्रहेण (१) तदसिद्धा तत्करणस्य प्रत्यक्षप्रमाणानन्तर्भा-
वात् अत इष्टापत्तिर्न सम्भवतीति सूचनाय अन्तरपदं न तु तदर्थ-
स्यापाद्यकोटिप्रवेशः। एतेन, प्रमाणान्तरत्वे यदि कृत्तप्रमाणभिन्न-
प्रमाणत्वं तदा मापाद्याप्रसिद्धिः, यदि प्रत्यक्षप्रमाणभिन्न-
प्रमाणत्वं तदापि चक्षुरादेर्दृष्टान्ततयोपन्यासविरोधः, यदि च
मानसान्यप्रमाकरणत्वं तदापि मानसान्यत्वस्य वैयर्थ्यम्, इति
परास्तं, प्रमाणव्यवहारविषयत्वस्यैवानिष्टतया तन्नाचापादनेनैवो-
द्धेयसिद्धेः। न च मानसजनके उपनायकज्ञाने मानसप्रमा-
करणत्वं तत्करणव्यवहारयेष्ट इति इष्टापत्तिवायकलया तस्यार्थक्यं,
करणत्वस्य व्यापारगर्भतया इष्टापत्तेरनवकाशात्। न चास्तु
करणत्वं व्यापारगर्भं तथापि प्रकृते तमनन्तर्भाव्य मानसान्यप्रमा-

(१) 'मानसकारणत्वस्यैवोक्तयं'। 'ऋषिसंधेकपाठ'।

ऽसाधारणफलोपहितकरणत्वस्यापादनसम्भवेन तदेव मूलाभिप्रेत-
मस्त्विति वाच्यं, तथा सति सिद्धान्तेव्यापाराभावेन प्रमाया करण-
त्वाभिधानस्य मूलक्षतोऽलग्नकतापत्तेः। आलोकादौ व्यवहारमभ्यु-
पगम्य प्रमाणान्तरासहकारित्वविशेषणमन्तरेणैव तत्र व्यभिचारं
वारयतः कस्यचिन्मतमाह "तदपीति"। ननु प्रमाणव्यवहार-
विषयस्यालोकादेः प्रत्यक्षानुमानेत्यादिसूत्रेऽपरिगणनात्तद्विरोध
इत्यत आह "प्रत्यक्षेति"। विभागात्, आलोकादीनामपि विभक्त-
त्वात्। तद्व्याघातः, विभाजकसूत्रविरोधः। अत्रेदमबोधि-
बीजम्, आलोकस्य सव्यापारस्य प्रमाकरणत्वोपगमसम्भवेऽपि
निर्व्यापारस्य तत्संयोगादेस्तदुपगमासम्भवेन उक्तविशेषणप्रक्षेप
आवश्यकः, अन्यथा शरीरादेरपि प्रमाणत्वोपगमसम्भवेनासाधा-
रणविशेषणस्यापि परित्यागापत्तेः। तान्त्रिकाणां प्रमाणव्यव-
हारस्य तुल्य एवेति प्रमाणान्तरासहकारित्वविशेषणपूरणं विनैव
निर्व्वाहाय प्रकारान्तरेण व्याप्तिं व्याचष्टे "यद्दित्यादि"। "यज्जा-
तीयेति" यज्जात्यवच्छिन्नेत्यर्थः। "तद्विजातीयेति" तज्जाति-
मद्वृत्तिजातिमदित्यर्थः। ईदृगव्याप्तिबलाच्चानुमित्याद्यनुपधा-
यकव्याप्तिज्ञानादौ प्रत्यक्षत्वविरुद्धजातिमत्प्रमाहेतुत्वमापादनी-
यम्। यत्प्रमाया मनोन्यकरणेनासमवहितं सत् यद्वृत्तिविषयप्रमो-
त्पादकं तत्तद्वृत्तिजातिमत्प्रमाहेतुरित्युक्तौ मानसप्रमाया मनोन्य-
करणाप्रसिद्धया यत्प्रदेन चाक्षुषादिप्रमाया एवोपादेयतया मान-
सप्रमाहेतावुपनये तद्वृत्तिजातिमद्धेतुत्वमेवापाद्यं, मानसप्रमायाः
तद्वृत्तिजातिमत्त्वात्तत्रेष्टापत्तिरिति यत्त्वतत्त्वेन जातेरुपादानं,

तथाच मणि यत्पदेन प्रत्यक्षत्वजातिमादाय तद्विरुद्धजातिमत्प्रमा-हेतुत्वापादनेन नेष्टापत्त्यसर.। प्रकृते प्रमानिष्ठजातिमादायेयापादनमित्येतत्सूचनाय "प्रमाया इति'। तज्जातीयप्रमाविजातीयप्रमाहेतुत्वमेवापाद्यं, एवञ्च यज्जातीयेत्यनेन स्मृतित्वादुपादाने तत्प्रमाया अभिन्ना सामान्यव्याप्तिभङ्ग इत्यतः "प्रमाया इति" इति केचित्। प्रत्यक्षकरणमन.सन्निकर्षादिरूपेन्द्रियोपनयस्य प्रमोत्पादकत्वोपगमादापादकासिद्धिवारणाय "मनोन्येति"। मनोभिन्नप्रत्यक्षकारणमनोयोगादिसमवधानस्यावश्यकत्वादसिद्धिरिति "करणेनेति"। तदसमवहितं सत्प्रमोत्पादकं, तदजन्यप्रमोत्पादकम्। यद्विषयकत्वविशेषणव्याप्तिः पूर्ववत्, मनोन्यकरणेनासमवहितस्याप्युपनयस्य मनःसन्निकर्षेण बाह्यविषयकप्रत्यक्षजनकत्वे बाधकाभावादप्रयोजकत्वशङ्का स्यादित्याशङ्क्याकस्मात्तरमाह "यज्जातीयेति"। तज्जातीयसामग्र्यविरहे तज्जातीयोत्पत्तेरप्रसक्त्या प्रमाया जन्यमानाया विजातीयैव सा जनयितुं शक्येति नात्राप्रयोजकत्वशङ्का। न च नैयायिकैरुपनीतभानस्थले उपनयघटितया प्रत्यक्षसामग्र्या उपगमादापादकासिद्धिरिति वाच्य, उपनीत विषयोपरागेण (१) साक्षात्त्वस्याग्रहात्तादृग्विषये द्रव्यादिप्रत्यक्षहेतूभूतेन्द्रियसंयोगादिविरहाच्चोपनयजन्यज्ञाने प्रत्यक्षत्वासम्भवेनापादकस्य प्रमाध्यत्वात्। अत्र च (२) बाह्याभ्यन्तरप्रत्यभिज्ञादौ (३) लौकिक-

---

(१) उपनीतविषयोपाभानेन इति पाठान्तरमप्यस्ति।

(२) अत्र चेत्यत्र "इत्यादयो नैयायिकविज्ञानप्रकारा" इत्यपेक्षान्वय।

(३) सोऽयं चैत्र इति बाह्यप्रत्यभिज्ञा, अभ्यन्तरप्रत्यभिज्ञातु सुखी सोऽहमधुना दुःखीत्याकारिका।

सन्निकर्षवद्विषयोपरागेण साक्षात्त्वस्य उपनीतविषयोपरागेण च तदभावस्य ग्रहात् साक्षात्त्व विषयताविशेष -एव नतु प्रत्यक्षत्व-जातिः, स एव लौकिकसन्निकर्षजन्यतावच्छेदक', एवञ्चोपनीत-भानस्य प्रत्यक्षत्वेन किञ्चिद्बाधकं बाधकविरहेऽपि साधकविरहान्न-सर्व्वांशेपनीतज्ञाने प्रत्यक्षत्वजातिरिति नाभ्युपगन्तव्यम्, लौकि-कान्यप्रत्यक्षत्वस्यैवोपनायकज्ञानजन्यतावच्छेदकतया तत्र तत्सिद्धेः, लौकिकान्यज्ञानत्वस्य तथात्वे अप्रसिद्धसाध्यकानुमितौ स्मृतौ च व्यभिचारप्रसङ्गात् । न च प्रत्यक्षत्वविरुद्धं जात्यन्तरमेव तथा-स्त्विति वाच्यं, आंशिकोपनीतभानासंग्रहात्, तत्र तादृश-जातिस्वीकारे तस्याःप्रत्यक्षत्वसामानाधिकरण्येन व्याप्यव्यापक-भावस्यावश्यकत्वात्, आंशिकोपनीतभाने च चाक्षुषत्वमानसत्वा-दीनां प्रत्यक्षत्वसाधकत्वात, इत्यादयोनैयायिकसिद्धान्तप्रकाराः अग्रे ग्रन्थकारेणैव स्फुटीकरणीयाः ।

नन्वायातूक्तव्याप्तिबलात् विजातीयप्रमा(१) तत्करणमन्यदेवास्तां कुतो व्याप्तिस्मरणादेः प्रमाणान्तरतेत्यत आह 'तत इति" । ततः, उक्तव्याप्त्यनुरोधतः । सिद्धायां, स्वीकृतायां । आवश्यकत्वात्, अवश्यो-पेयकारणताकत्वात् । बाधकाभावादित्यस्य करणत्व इत्यादिः । तस्यैव, व्याप्तिस्मरणादेरेव । तथात्वं, तादृशप्रमाकरणत्वम् । ननु संशयस्वप्नौ तु न प्रमे इति मूलमसङ्गतम् ? तयोरप्यबाधितविषये प्रमात्वात् । अथ सर्व्वांशे प्रमात्वमत्र विवक्षितं स्वप्नस्य किञ्चिदंशे भ्रमत्वं नियमतः स्वीक्रियत इति चेत् ? माभूत् सर्व्वांशे तयोः

(१) चस्य चायातीति प्रागुक्तक्रियापदेनान्वयः ।

संशयस्वप्नौ तु न प्रमे इति न निद्रादिः प्रमाणान्तरत्वम् ।

संशयस्वप्नौ च न विशिष्टानुभवरूपौ, येनोपनयादिवशादहिर्विषयानुभवजनने कृमशक्तिकेन मनसा दोषवशादप्रमेव तदभावादिवशात् प्रमापि जनयितव्येत्याशङ्क्यात, किन्तु धर्मिज्ञानकोटिस्मरणादिरूपौ,

---

प्रमार्त्वं, तथापि तत्र इन्द्रिय संयोगादिरूपप्रत्यासत्तिशून्यविषयभानार्थं ज्ञानस्य प्रत्यासत्तित्वमावश्यकमिति तस्य प्रमाणत्वं दुर्व्वारमेवेत्यतो मूलस्यागयं व्याचष्टे "संशयेति" ।

न विशिष्टानुभवरूपौ, न योग्यतासहितेन्द्रियसंयोगादिशून्यवस्तुसंसर्गविषयकप्रत्यक्षरूपौ । तयात्वे किमनिष्टमित्याकाङ्क्षायामाह "येनेति" । येन हेत्याशङ्क्येतेत्यन्वयः । तदभावादीत्यादिपदाद्विषयाबाधपरिग्रहः । "प्रमापि जनयितव्येति" । अप्रमाया अप्यबाधितविषये प्रमात्वस्यावर्जनीयत्वादिति शेषः । तथाच तस्य (१) प्रमाणत्वापत्तिदुर्व्वारेति भावः । "धर्मिज्ञानकोटिस्मरणादिरूपाविति" । धर्म्मिणि लौकिकसन्निकर्षादिसत्त्वेऽनुभवाभावेन अन्यदा च (२) स्मरणरूपेण तज्ज्ञानेन सहितं यत् तद्

---

(१) व्याप्तिस्मरणादेरित्यर्थः ।

(२) लौकिकसन्निकर्षोत्पत्तिकाले चेत्यर्थः ।

न च कथं तवापि स धूमो वह्निव्याप्य इति व्यवहारस्तदानीं तद्ग्राप्यत्वानुभावकाभावादिति वाच्यं,

---

धर्म्मिज्ञानं पुनरनुभवरूपं यथासम्भवमन्यादेः, स्मरणञ्च संस्कारादित्याशयेनाह "संशयेति"।

व्याप्यत्वानुमानादिति। धूमत्वादौ वह्निव्याप्ति-व्याप्यत्वं जानतो धूमत्वत्वादिना तद्वत्तानिश्चयदशायां,

---

गृहीतासंसर्गकधर्म्मस्य पूर्ब्ववत् (१) कदाचित् स्मरणरूपं कदाचि-ज्ज्ञानानुभवात्मकं ज्ञानं तद्रूपावित्यर्थः। धर्म्मिज्ञानमित्यत्र धर्म्मिपदं धर्म्मस्याप्युपलक्षणम् (२)। अन्यादेः, लौकिकप्रत्यासत्तिसहकृतेन्द्रियादेः। आदिना अनुमानादिपरिग्रहः। "संस्कारादिति"। अतो नीपनयोपयोग इति शेषः। असन्निकृष्टे धूमे धूमत्वेन हेतुना व्याप्यत्वानुमानं धूमत्वत्वेन व्याप्तिव्याप्यत्व-पक्षधर्म्मताज्ञानं विना न सम्भवतीति अनुमानात् विशिष्टव्यवहारोपपादनं मूलकृतस्तादृशज्ञानदशाभिप्रायकतयोपपादयन् न्यूनतामङ्गायान्यदाव्यवहारमन्यथोपपादयति "धूमत्वादावित्यादिना"।

यसंसर्गाग्रहादेवेत्येवकारेण विशिष्टज्ञानव्यवच्छेदः। यद्यपि तन्मते विशिष्टज्ञानस्यलेप्यसंसर्गाग्रह एव विशिष्टव्यवहारहेतुर्नतु विशिष्टज्ञानं, तथापि, विशिष्टज्ञानस्यापि विशिष्टविषयकत्वमपुर-

---

(१) सन्निकर्षसत्त्वे अनुभवात्मकम् अन्यदा च स्मरणात्मकमितिबोद्धव्यं।

(२) स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वमुपलक्षणत्वम्।

तव स्मृतधूमे धूमत्वेन वह्निव्याप्यत्वानुमानात्* । न च त्वन्मते धूमत्वेन व्याप्यत्वानुभवः सम्भवति ।

अन्यदालम्बसंसर्गाग्रहादेवेति अतीन्द्रियादौ लिङ्गे व्याप्यत्वप्रकारकज्ञानस्य सम्भवेऽप्यनुमितेः सर्व्वानुभवसिद्धतया तस्य कारणत्वे बाधिते परिशेषाद्गुरोरपि व्याप्यतावच्छेदकप्रकारकज्ञानस्य हेतुत्वे सिद्धे शाब्दव्याप्यवत्ताबोधस्थलेऽपि कल्प्यते, कारणं विना कार्य्योत्पत्तेर-

---

त्वात्य तत्तत्पदार्थविषयकत्वेनासंसर्गाग्रहनिष्ठकारणतायामवच्छेदकत्वादिनिष्टविषयकानुमानस्य व्यवहारप्रयोजकत्वोक्तेर्नासङ्गतिः । अतएवेत्यादिमूलेन व्याप्यतावच्छेदकधूमत्वादनवगाहिशाब्दादिपरामर्शस्थले तादृशपरामर्शप्रकारीभूतव्याप्यत्वावच्छेदेन व्याप्यग्रहदशायामनुमितिर्न भवतीत्यभिहितम् । तत्र च नैयायिकानामतीन्द्रियादिहेतुकस्थलेऽनुमितिर्न भवतीत्युक्तिसम्भवात् तुल्यलक्षणा परिशिष्टोर्थुरागयं व्याचष्टे "अतीन्द्रियेति" । व्याप्यत्वप्रकारकज्ञानस्य, व्याप्यत्वप्रकारकपक्षधर्म्मताज्ञानस्य । सर्व्वानुभवसिद्धतया इत्यनेन दुरपह्नवत्व दर्शितम् । बाधित इत्यस्य व्यभिचारनिश्चयेनेत्यादि' । व्याप्यतावच्छेदकप्रकारकज्ञानस्य, व्याप्यतावच्छेदकप्रकारकव्याप्तिपक्षधर्म्मताज्ञानत्वावच्छिन्नस्य । तद्व्यावच्छेदेन व्याप्तिप्रकारकज्ञान कल्पनीयं, कल्पनाबीजमाह 'कारण

अतएव यो वह्निव्याप्यवान् सोऽवश्यं वह्निमानिति व्याप्तिज्ञानवतोऽनुमितिर्नान्यथा ।

अथ पर्व्वतीयधूमे धूमत्वेन ज्ञाते वह्निव्याप्योऽयं नवेति संशयेप्यनुमितिः स्यादिति चेन्न, धूमो वह्नि-व्याप्य इति स्मरणे विद्यमाने धूमत्वज्ञानस्य विशेष-

---

सम्भवात् । तेन विना तच्चानुमितेरप्रसिद्धत्वात् न तस्यापि हेतुतावाधः । तवातीन्द्रियलिङ्गादौ सर्व्वा-नुभवसिद्धाया-अप्यनुमितेः सर्व्वथैवापलापः, मम तु क्वचित् कालविलम्बादिमात्रकल्पनमित्याशयेनाह "अतएवेति" ।

विनेति" । ननु तत्र तदभावेप्यनुमित्युत्पत्त्या तस्य हेतुतैव किं न बाध्यते इत्यत आह "तेन विनेति" । तत्र, शाब्दव्याप्यवत्ताज्ञान-स्थले । नन्वेवं फलापलापोऽविशिष्ट इत्यत आह "तवेति" । "सर्व्वथैवापलाप इति" । कालविलम्बेनापि विशिष्टपरामर्शसम्भवा-दिति भाव. । "कालविलम्बादीति" । व्याप्यवच्छेदेन व्याप्तिज्ञानोत्-पत्त्या कालविलम्बेनानुमितिसम्भवादितिभावः । उपनीतभानानङ्गी-कर्त्तृणा व्याप्यवच्छेदेन व्याप्तिज्ञानं तत्रानुमितिरूपं स्मृतिरूपं वेति हृदय ।

तुल्यमित्यनेन मूले पक्षधर्म्मे व्याप्तिसंशयस्य प्रतिबन्ध-

दर्शनत्वेन संशया भावात्। अन्यथा परामर्शोपि कुतो न स्यात् संशयेन प्रतिबन्धादिति चेत् तुल्यम्।

न च सामान्यनिश्चयस्य सामान्यसंशयनिवर्त्तकत्वात् धूमसामान्ये संशयो माभूत् विशेषसंशयस्तु विशेषनिश्चयनिवर्त्तनीय इति धूमविशेषे संशयनिरासार्थं पृथग्व्याप्तिनिश्चयो वाच्य इति वाच्यम्, यद हि यद्व्यावर्त्तकधर्म्मदर्शनं तद न तत्संशय तच्च सामान्ये विशेषेवेति। वस्तुतस्तु धूमत्वपुरस्कारेण व्याप्तिस्मरणे पक्षधर्म्मताज्ञानं चानुमितिर्भवत्येव।

तुल्यमित्यभ्युपगमवादः। यच्च, यदवच्छिन्ने। यथा हि तदभावेन तदभावव्याप्यतया ग्रहीतेन वा विशिष्टे न तत्संशयः, तथा, यदवच्छेदेन तद्व्यावर्त्तकधर्म्मदर्शनं तद्विशिष्टेऽपि अनुभवबलात्। व्यावर्त्तकश्च तदभावो

कत्वमुक्तं (१), तन्नयुक्त, विशेषदर्शनेन ज्ञानद्वयानन्तर संशयानुत्पादेन तत्प्रतिबन्धकतायां मानाभावादित्यत आह "तुल्यमितीति"।

अभ्युपगमवादः, ज्ञानद्वयानन्तरं संशयोत्पादाभ्युपगमेनोक्तिः। तथाच संशयस्यानुमिति प्रतिबन्धकताया न निर्भरः किन्तु विशेष-

---

(१) अनुमिति मतीत्यादि।

दवच्छेदेन वा तदभावोऽवगतः, यो वा तदभाव-
याप्यत्वेन गृहीतः । यथा स्थाणुत्वाभावस्य पुरुषत्वा-

धर्मनात् संशयानुत्पत्तावेव । अतएवाग्रे संशयोत्पत्त्या शङ्कापि
इच्छत इति भावः । मूले "सामान्यनिश्चयस्येति" ।

सामान्यधर्मपुरस्कारेण विरोधिनिश्चयस्येत्यर्थः । धूमसामान्ये
संशयः, शुद्धधूमत्वपुरस्कारेण व्याप्यत्वसंशयः । "माभूदिति" ।
तत्प्रकारेण व्याप्तिनिश्चयसत्त्वादिति भावः । विशेषसंशयः, विशेष-
धर्मावच्छेदेन तदभावसंशयः । विशेषनिश्चयनिवर्त्तनीयः, विशेष-
धर्मपुरस्कारेण विरोधिनिश्चयमात्रनिवर्त्तनीयः (१) । धूमविशेषे
संशयनिवारार्थं, पर्व्वतीयधूमत्वपुरस्कारेणाव्याप्यत्वसंशयस्यैऽनु-
मितिनिरासार्थम्(२) । पृथग्व्याप्तिनिश्चयः, पर्व्वतीयधूमत्वपुरस्कारेण
व्याप्तिनिश्चयः । वाच्यः, अनुमितिहेतुतया स्वीकार्य्यः । यद्यपि पूर्व्वं
धूमत्वदर्शनस्यैव व्यावर्त्तकधर्मदर्शनविधया संशयविरोधित्वमुक्तं न
तु व्याप्तिनिश्चयस्येतिधूमसामान्ये व्याप्तिनिश्चयात्तत्सामान्ये संश-
यानुत्पादोपगमेन विशेषसंशयोपपादनं न युज्यते, तथापि, पर्व्वत-
वृत्तित्वसामानाधिकरण्येन धूमत्वदर्शनात्तदवच्छेदेन व्याप्यभाव-
संशयनिवृत्तावपि पर्व्वतीयधूमत्वावच्छेदेन व्याप्यभावसंशयो दुर्व्वारः

---

(१) द्रव्यत्वादिसामानाधिकरण्येन गन्धादिनिश्चयेऽपि पृथिव्यन्यद्रव्यत्वादिना गन्धादिसंशयादितिभावः । इत्यधिक पाठोऽत्र कुत्रचित् पुस्तके दृश्यते ।

(२) पर्व्वतीयधूमत्वपुरस्कारेणाव्याप्यत्वसंशयनिरासार्थमित्यपि क्वचित् कः पाठः ।

वच्छेदेन ग्रहे, पुरुषत्वस्य न्यूनत्वाभावव्याप्यत्वेन गृहीत-

पर्व्वतीयत्वावच्छेदेन धूमत्वनियतग्रहसम्भवादिति—शङ्काया धूमत्वज्ञानस्य विशेषदर्शनत्वेनेत्यादिसिद्धान्तोपरि-सम्भवाद्धूमत्वपुरस्कारेण व्याप्तिनिश्चयस्य पर्व्वतीयधूमत्वावच्छेदेन तदभावसंशयनिवर्त्तकत्वमपि तादृशपर्व्वतीयत्वविषयकत्वेनैवेयं शङ्का। अथ पर्व्वतवृत्तित्वावच्छेदेन तत्सहितधूमत्वावच्छेदेन वा व्याप्तिविरहशङ्का नैयायिकसिद्धानुमितिहेतुताकस्य व्याप्तिविशिष्टे धूमे पक्षधर्म्मतावैशिष्ट्यावगाहिनिश्चयस्याप्यनिवर्त्या, असमानधर्म्मतावच्छेदकत्वात्पक्षधर्म्मताविशिष्टे व्याप्तिनिश्चयश्च तच्छङ्कानिवर्त्तकोपि नानुमिति हेतुः, व्याप्तिविशिष्टवैशिष्ट्यबोधस्यैवानुमितिहेतुतायां वक्ष्यमाणत्वात्। उभयविधपरामर्शस्य तथात्वेऽपि व्याप्तिविशिष्टवैशिष्ट्यबोधघटितानुमितिसामग्रीदशायां तादृशशङ्काया दुरुच्छेदतया तत्सत्त्वे नैयायिकैरनुमितिस्वीकारे मीमांसकानामपि ज्ञानद्वयसत्त्वे तत् शङ्कासत्त्वेऽप्यनुमितापत्तिसम्भवेन तादृशशङ्कोच्छेदोपायानुसरणप्रयासवैयर्थ्यात्।

यत्तु व्याप्तिविशिष्टधूमे पर्व्वतवृत्तित्वशङ्कादशायां मीमांसकमतेऽनुमित्यापत्तिपरतया मूलशङ्कावर्णने नोक्तापत्तिसमाधानं 'पृथग्व्याप्तिनिश्चयो वाच्य' इत्यस्यापि व्याप्तिविशिष्टधूमे पक्षधर्म्मतानिश्चयस्यानुमितिहेतुत्वस्वीकारपरतया वर्णनं, तदशुद्धं, मीमांसकमते धूमत्वावच्छेदेन पक्षधर्म्मत्वाज्ञत्वेनान्यथाख्यातिस्वीकारप्रसङ्गभयेन धूमत्वसामानाधिकरण्येनैव पक्षधर्म्मतानिश्चयहेतुताया

तस्य कारादेर्व्वा ह्रदन्त्वावच्छेदेन ग्रहे, पुरुषोऽयं स्थाणु-

---

वाच्यतया विशिष्टधूमत्वावच्छेदेन पक्षावृत्तित्वशङ्कायाः शुद्धधूमत्व-सामानाधिकरण्येन पक्षधर्म्मतानिश्चयाप्रतिबध्यतया मीमांसकाना-मनुमितिजनकपक्षधर्म्मतानिश्चयस्य तादृशशङ्कोच्छेदकत्वाभिधानेन समाधानासङ्गतिरिति चेन्न, पक्षवृत्तिधूमत्वविशिष्टे व्याप्तिज्ञान-मात्रस्यानुमितिहेतुत्वेऽपि नैयायिकानामुद्देश्यसिद्धेस्तदभ्युपगमे-नैव तादृशपरामर्शप्रतिबध्यायाः पक्षवृत्तित्वावच्छेदेनाव्याप्यत्व-शङ्काया ज्ञानद्वयसम्भवशङ्कनसङ्गतेः । वस्तुतः पक्षवृत्तिधूमत्वावच्छे-देन व्याप्तिविरहशङ्काया व्याप्तिविशिष्टेपक्षधर्म्मतानिश्चयो विरोधी, यज्ज्ञानं यदुभयधर्म्मसामानाधिकरण्यमवगाहते तस्य तदेक-तरावच्छेदेनापरधर्म्माभावशङ्कानिवर्त्तकताया अनुभवसिद्धत्वात्, पक्षवृत्तिधूमत्वस्य उक्तपरामर्शधर्म्मितानवच्छेदकत्वेऽपि तदवच्छे-देनाव्याप्यत्वशङ्काया: पक्षवृत्तिधूमत्वव्याप्यत्वसामानाधिकरण्याव-गाहिकथितपरामर्शसत्त्वे उत्पत्त्यसम्भवादित्यभिप्रायकतया यथा-श्रुतप्रकृतमूलमसङ्गतिः । सामान्यघटितविशेषधर्म्मपुरस्कारेण संशये सामान्यधर्म्मसामानाधिकरण्यमात्रावगाहिनिश्चयस्याविरोधित्वेऽपि सामान्यधर्म्मावच्छेदेन विरोधिनिश्चयस्य विरोधित्वमावश्यकमव-च्छेदकावच्छेदेन विपरीतज्ञानप्रतिबध्यतावच्छेदककोटौ तद्धर्म्मि-तावच्छेदकपर्य्याप्तधर्म्मितावच्छेदकत्वपर्य्यन्तानिवेशादित्यभिप्रायेण समाधत्ते "यत्र हीति" । व्यावर्त्तकधर्म्मदर्शनस्य धर्म्मितावच्छेदका-वच्छिन्नत्वावगाहितां स्फुटयितुं व्याचष्टे दीधितौ "यत्र, यदवच्छिन्ने

नेति न संशयः। तदभावादिति च तदन्योन्या-

दति"। यत्तु "धूमसामान्ये धूमो माभूदिति"। व्याप्यधर्म-धर्मत्वेन निश्चिते पर्व्वतीयत्वसामान्यधर्मविशिष्टे तदवच्छेदेना-व्याप्यत्वसंशयो माभूदित्ययं:। विशेषसंशयत्वित्वादेः पूर्व्वएवार्थः। समानविषयकत्वमेव विरोधितायां तन्त्रं न तु समानप्रकारकत्व-मपीत्याशयेन समाधत्ते "यत्र हीति"। यथाश्रुतार्थकमेवेति। तत्र, समानधर्मिकव्याप्यसंकल्पधर्मसंदेहश्च। सामान्ये, सामान्यधर्मविशिष्ट-विशेष्यकम्। विशेषे वा, विशेषधर्मविशिष्टविशेष्यकं वा। तत्राद्य पर्व्वतीयधूमे पर्व्वतीयत्वमात्रेण धूमत्वनिश्चयेऽपि पर्व्वतीयधूमत्व-पुरस्कारेण न संशयमभ्युपैति भावः। यद्यपि धूमत्वे व्याप्यवच्छेद-कत्वावगाहिनिश्चयस्य धूमत्वघटितधर्म्मावच्छिन्नविशेष्यताकसंशय-प्रतिबन्धकत्वात्तादृशनिश्चयादपि प्रकृते संशयनिवृत्तिः सम्भवति, तथापि, शुद्धपर्व्वतीयत्वाद्यवच्छेदेनाव्याप्यत्वग्रहानिरासार्थम् धूम-त्वनिश्चयस्यादरणीयतया तत-एव पर्व्वतीयधूमत्वावच्छिन्नविशे-ष्यकसंशयनिवृत्तिरुपपादिता, समानविषयकत्वेन विरोधितया वादिना धर्म्मितावच्छेदके अवच्छेदकत्वावगाहिनोऽपि विरो-धिज्ञानस्याविरोधित्वाभिप्रायेण वैतिक्वातन्त्रेण मूलं वर्ण-यन्ति। सामान्यधर्म्मावच्छिन्नं व्याप्तिनिश्चयस्य पर्व्व-तीयधूमाविषयकतया धूमत्वे व्याप्यवच्छेदकत्वावगाहित्वेऽपि धूम-त्वघटितधर्म्मावच्छिन्नपर्व्वतीयधूमधर्म्मिकसंशयविरोधित्वे विवादः सम्भवतीति दृष्टान्तेनानुभव दृढयन्तं निराकुरुते "यथा हीति"।

भावादिः, तादात्म्येन तत्संशये च तदन्योऽन्या-
भावादिरपि द्रष्टव्यः । एवं तङ्भ्रमोऽपि न, विशेषदर्श-

तदभावेन विशिष्टे न तत्संशय इति योजना । धर्मिविशेषणत्वञ्च तदभावादीनां धर्मितावच्छेदकतारूप विषयत्वम् । स्थाणुत्वाभाव-व्याप्यं—करादीतिस्वतन्त्रज्ञानदशायामपि शुङ्कत्वादवच्छिन्नं धर्मितावच्छेदकीभूत्य-स्थाणुत्वादि-संशयानुदयाद्व्याप्तिविशिष्टेने-त्युपेत्य 'व्याप्यतया गृहीतेन' इत्युक्तम् । तदव्यवहितप्राक्क्षणे तत्-क्षणे वा तस्य पुंसो व्याप्यतया निश्चयविषयेनेत्यर्थः । तदभावेन तद-भावव्याप्तिविशिष्टेन च विशिष्टे तद्धर्मज्ञानमाहार्य्यमेव प्रसिद्ध-मितितादृशज्ञाने इच्छाया एव हेतुत्वात्तदभावादेव नाहार्य्यताटृश-संशयप्रसङ्गः । करादिमान् स्थाणुर्नवेतिसंशयश्च करत्वादवच्छिन्ने स्थाणुत्वाद्यभावव्याप्तिनिश्चयशून्यकाले इच्छां विनापि प्रसिद्ध-इत्यनाहार्य्यताटृशज्ञाने तथाविधव्याप्तिनिश्चयत्वेन प्रतिबन्धकतां कल्पयित्वा ताटृशनिश्चयदशायामसौ निरसनीयः । "तथेत्यादि" । तद्विशिष्टेऽपि न तत्संशय इत्यनुषङ्गेणान्वयः । यद्वच्छेदेन तद-भावादिनिश्चयस्तस्यापि तदभावादितुल्यत्वादिति भावः । अनु-भवबलादित्यग्रिमहेत्वन्वयानुरोधेन 'इत्यविवाद' इति पूरणीयम् ।

ननु धूमत्वादवच्छेदेन व्याप्यभावव्यावर्त्तकधर्मः प्रकृते न गृहीतः अपि तु तदभावोव्याप्तिरेवेति व्यावर्त्तकपदस्य तद-भावावच्छेदकमात्रपरत्वाभिमानिनामाशङ्का निराकरोति "व्याव-र्त्तकेति" । स्थाणुत्वाभावव्याप्यः करः करवांश्चायमितिज्ञान-

नस्य विपरीतज्ञानमात्रविरोधित्वादित्यग्रे स्फुटीभविष्यति ।

द्वयव्याप्ति अयं स्थाणुर्नवेति संशयविरोधितया व्याप्तिविशिष्ट इत्युपेक्ष्य 'व्याप्यतया गृहीत' इत्युक्तम् ।

अथ यदवच्छेदेन तदभावोऽवगत इत्यस्य यत्तदभावाव च्छेदकत्वेनावगत इत्यर्थः अयच्छेदकत्वज्ञानतिरिक्तवृत्तित्वमेव न तु स्वरूपसम्बन्धविशेष, पुरुषत्वादौ स्थाणुत्वाभावादेस्तादृशावच्छेदकताया अप्रामाणिकत्वात् मीमांसकानामपि धूमत्वादौ व्याप्यतिरिक्तवृत्तित्वज्ञानमेवानुमितिहेतुत्वेनोपगतमित्यभिप्रायेण मूल सङ्गमनीयम्. एवञ्चानतिरिक्तवृत्तित्वस्य व्याप्तिरूपतया 'व्याप्यतया गृहीत' इत्यनेन पौनरुक्त्यम ? न च यदवच्छेदेनेत्यादे-र्यत्र यदभावस्य व्याप्तिः संसर्गतयावगतेतिव्याप्यतयेत्यस्य व्याप्ति प्रकारिणेत्यर्थ इति भेद. पुरुषो न स्थाणुरित्याकारके पुरुषत्वाव वच्छेदेन स्थाणुत्वाभावग्रहे च पुरुषत्वाभे व्याप्ति संसर्गतयैव भासते न तु प्रकारतया तद्विशिष्टवाचकपदानुल्लेखात् संसर्गतया प्रकारतया च भानस्य पृथक्कथन प्रतिबन्धकता या भेदसूचनाय तत्प्रकारकज्ञानस्य तदीयसंसर्गविशेषावगाहित्वेनैव प्रतिबन्धकताया अनतिप्रसङ्गाय कल्पनीयतया तत्संसर्गकज्ञानस्य च तदीयसंसर्गा-वगाहितया तेन रूपेणाग्रहादिति वाच्यम्, संसर्गता-संसर्गविशेषावच्छिन्नप्रकारतयोः संसर्गविशेषानवच्छिन्नप्रकारता-न्यविषयतात्वेनानुगमेनातिप्रसङ्गविरहादिति चेन्न, अवच्छेदकाव

च्छेदेन स्थाणुत्वाभावादिज्ञाने अवच्छेदकाग्रे व्याप्ति. संसर्गतयापि न भासते, पुरुषो न स्थाणुरित्यादिज्ञानस्य पुरुषत्वाद्यग्रे निष्प्रकारकतायाः अनुभवसिद्धत्वात्, किन्तु धर्म्मितावच्छेदकपुरुषत्वादि-व्यापकताविशिष्टविशेषणतैव स्थाणुत्वाभावादौ पुरुषादौ संसर्ग-तया भासते, एवञ्च यद्व्यापकताविशिष्टविशेषणतासंसर्गेण तदभावो धर्म्मिण्यवगत इत्येवं यदित्यादेरर्थ इति न पौनरुक्त्यम् । यदि च विशेषणतात्वादिना व्यापकतायाः संसर्गघटकत्वे प्रमेयत्वाद्यव-च्छेदेन स्थाणुत्वाभावादिज्ञानमपि प्रमा स्यादितिस्थाणुत्वाभावीय-विशेषणतात्वेन व्यापकत्वमेव तथा वाच्यम्, तथाच स्थाणुत्वाद्य-भावस्यापि संसर्गान्तर्भावे तदग्र एव व्यापकत्वभानमुचितं, तथा सति स्थाणुत्वाभावः पुरुषनिष्ठाभावाप्रतियोगी अयञ्च पुरुष इत्यादिज्ञानस्य स्थाणुत्वाभावादिधर्म्मिकपुरुषत्व व्यापकताग्रह-सहितपुरुषत्वादिप्रकारकनिश्चयत्वेन प्रतिबन्धकताया अयं स्थाणु-र्नवेतिसंशय प्रति कृत्वात् पुरुषो न स्थाणुरयञ्च पुरुष इत्यादि-ज्ञानस्य तद्रूपाक्रान्ततया न पृथक्प्रतिबन्धकत्व उक्तज्ञानप्रतिबन्धक-तायां व्यापकत्वीयसंसर्गविशेषावगाहित्वनिवेशेऽपि न क्षति, व्यापकताविशिष्टघटितसंसर्गकज्ञानेऽपि विशिष्टघटकस्य वैशिष्ट्य-स्यावश्य भानादिति मन्यते, तदा, यदित्यादेरपि यद्व्यापकतया तदभावोऽवगत इत्येवार्थ । न च व्याप्तिघटकसामानाधिकरण्याग्र-भानस्याप्रयोजकतया 'योवेत्यादेरपि' उक्त एवार्थ इति पौनरुक्त्यं दुर्व्वारमेवेति वाच्यम्, व्याप्तिपदेन तद्वदन्यावृत्तित्वस्यैवाभि-हितत्वात्, व्यापकसामानाधिकरण्यज्ञानस्य यदवच्छेदेनेत्याद्यन्त-

र्भावेऽपि क्षतिविरहात्। वस्तुतस्तु ग्राह्याभावांशे तद्धर्मव्यापकतायां समर्थघटकविशेषणविधयाभानमात्र न विरोधितायाः प्रयोजकं, तथासति यत्र पुरुषो न स्थाणुरित्यादिज्ञानं करादिव्यापकतासिश्रिष्टस्थाणुत्वाद्यभावीय विशेषणतादे समर्थतया भान, तादृशज्ञानसहितस्य करादिमानयमित्यादिज्ञानस्याप्यय स्थाणुनेत्यादिज्ञानविरोधितापत्तेः। असद्धर्मविशिष्टे ग्राह्याभावावगाहित्वसहितमेव तद्धर्मव्यापकतायास्तथाभाने विरोधितायाः प्रयोजकमित्युपेय,तथाच ग्राह्याभावांशे तद्धर्मव्यापकताप्रकारकस्य तद्धर्मविशिष्टे ग्राह्याभावाप्रकारकस्यापि ज्ञानस्य तद्धर्मसमानाधर्मितावच्छेदकविशिष्टविशेष्यकज्ञानविरोधितया न तदभाव व्याप्यतदभावावच्छेदकधर्मद्वयोरैक्यरूपेण प्रतिबन्धकतासम्भव। न च ग्राह्याभावांशे तद्धर्मव्यापकताप्रकारकस्येव समर्थघटकतया तद्विषयकस्यापि तद्धर्मविशिष्टे ग्राह्याभावानवगाहिनो विरोधित्वमिष्टमेव समर्थघटकविशेषणविषयतायां, प्रकारतातुल्यत्वादिति वाच्य, तथा सति पुरुषत्वाद्यवच्छेदेन स्थाणुत्वाद्यभावावगाहिन पुरुष स्थाणुर्नेत्यादिसंशयस्यापि स्थाणुत्वाद्यभावांशे पुरुषत्वादिव्यापकत्वविषयकतया तत्सहितपुरुषत्वादिप्रकारकज्ञानस्य स्वसमानधर्मितावच्छेदकस्थाणुत्वादिविशिष्टज्ञानाविरोधितायां निर्बीजतापातात्। नहि लक्षते तादृशसंशयस्य संशयत्वमेवाविरोधितावीजमिति सम्भवति, पुरुषत्वादिविशिष्ट स्थाणुत्वाभावावगाहितायां विरोधितायामप्रयोजकत्वेन स्थाणुत्वाभावांशे संशयत्वस्य घटादिरूपौदासीनविषयांशे संशयत्वतुल्य

त्वात् । एतेन पुरुषत्वादिसामानाधिकरण्येन स्थाणुत्वादिवि शिष्टबुद्धौ पुरुषत्वाद्यवच्छेदेन तद्विपरीतनिश्चयस्य विरोधितायामभावांशे पुरुषत्वादिव्यापकतावगाहित्वमेव बीजं न तु पुरुषत्वादिविशिष्टे अभावावगाहित्वमपि, तच्च तदनवगाहिनोपि स्थाणुत्वाभावस्याप्य पुरुषत्व, पुरुषत्वव्यापक' स्थाणुत्वाभाव, इत्यादिव्यापकताप्रकारकज्ञानस्य पुरुष स्थाणुरित्यादिधीविरोधित्वात् । तथाच तादृशव्यापकताप्रकारकज्ञानस्य तादृशव्यापकता विषयकत्वेनैव प्रतिबन्धकतासम्भवादवच्छेदकावच्छेदेन बाधबुद्धे' पृथक्प्रतिबन्धकताया मानाभाव, तस्या अपि उक्तरूपाक्रान्तत्वात् । एवं धर्मितावच्छेदकसमानाधिकरण्येन अभावविशिष्टबुद्धेर्धर्मितावच्छेदके प्रतियोगिव्यभिचारधीरूपतया अवच्छेदकावच्छेदेन प्रतियोगिविशिष्टज्ञानस्य तत्प्रतिबध्यत्वे प्रतियोगिन्यवच्छेदक-व्यापकतावगाहित्वमेव बीज, तथाच व्यापकताप्रकारक तत्ससर्गक-ज्ञानसाधारणानुगतरूपेणैव तत्प्रतिबध्यताकल्पनसम्भवादवच्छेदका-वच्छेदेन विशिष्टबुद्धाववच्छेदकसामानाधिकरण्यावगाहिबाधबुद्धे-रपि पृथक्प्रतिबन्धकत्वे मानाभाव , न च तादृशव्यभिचारज्ञानस्य व्यापकताज्ञानविरोधित्वमेव नास्तीति वाच्यम लाघवेनैव तद्वि रोधितास्वीकारौचित्यात् प्राचीनसिद्धान्तसिद्धत्वाच्च, इति परा स्तम्, ससर्गतया व्यापकतामात्रावगाहित्वस्य विरोधितावीजत्वे-ऽवच्छेदकावच्छेदेनाभावावगाहिन, पुरुष. स्थाणुर्नवेत्यादिसश यस्य पुरुष.स्थाणुर्नवेतिज्ञानाविरोधितया निर्बीजत्वापातात् । तादृशव्यापकतावगाहित्वस्य व्यापकतानिरूपकधर्मविशिष्टे बाध्या-

भावावगाहित्वस्यैव विरोधिभावोजनया करादिव्यापकता विशिष्टस्थाणुत्वाद्यभाव समर्थघटकतयाऽवगाह्यमानस्य पुरुषो न स्थाणुरित्यादिज्ञानस्य करादिमान् स्थाणुरित्यादिज्ञानाप्रतिबन्ध कत्वनिर्व्वाहाय तद्धर्म्मावच्छिन्नविशेष्यकग्राह्याभावावगाहित्वेन बाधबुद्धेर्ग्राह्याभावांशे व्यापकताप्रकारकबुद्धेश्च व्याप्यधर्म्म धर्म्मितावच्छेदकबुद्धौ तादृग्व्यापकताप्रकारकत्वेन पृथक्प्रति बन्धकताया आवश्यकत्वात्, व्यभिचारधिया व्यापकताग्रहविरो धित्ववादिना प्राचा तत्सत्वेऽपि तद्विरोधितायां अनुभव तया संसर्गविधया व्यापकतावगाहित्वस्य तत्प्रतिबध्यतावीजत्वे पुरुष स्थाणुर्नवेत्यादिसंशयेऽवच्छेदकावच्छेदेन स्थाणुत्वाद्यभाव गाहितायां एवानुपपत्तेश्चेति। यद्विशेषावच्छेदकसामानाधिकरण्य मात्रेण तदवच्छेदेन विशेषणमवगाहमानयो र्बुद्धयोर्व्वैलक्षण्य निर्व्वाहायावच्छेदकावच्छेदेन बुद्धौ व्यापकतायां संसर्गघटकतया भानमुपेयते पुरुषत्वादिधर्म्मितावच्छेदकबुद्धौ च करादिव्यापक तायां संसर्गघटकतया भानमप्रामाणिक, तदा, पुरुषो न स्थाणु रित्यादिधीसहितस्य करादिमत्ताज्ञानस्य स्थाणुत्वादिविशिष्टधी विरोधित्वाप्रसक्तेरनुगतरूपेणैव ग्राह्याभावांशे तद्धर्म्मव्यापकता प्रकारकज्ञानस्य तद्धर्म्मावच्छेदेन ग्राह्याभावज्ञानस्य च तद्धर्म्म दर्शनप्रतिबन्धकतया निवेश्य पुरुष स्थाणुर्नवेत्यादिसंशय कालीनपुरुषत्वादिधर्म्मस्य चाविरोधितोपपत्तये व्यापकताज्ञानं पुरुषत्वाद्यवच्छिन्नविशेष्यकस्थाणुत्वादिसंशयभेदो निवेश्यः। स्थाणुत्वाद्यभावांशे व्यापकताप्रकारकनिश्चयस्य तादृग्स्थाणुत्वा

दिसंशयरूपो नास्त्येव तादृशनिश्चयस्य स्वकालेऽपि तादृशसंशय-विरोधित्वात् । अतो न तादृशसंशयरूपव्यापकताप्रकारकनिश्चया-संग्रहभयेन तादृशसंशयभेदस्य प्रतिबन्धकत्वावच्छेदकत्वासम्भवस्या-वकाशः । एवं तादृशसंशयभेदं निवेश्य पुरुषत्वाद्यवच्छेदेन स्थाणु-त्वाद्यभावनिश्चयसाधारणेन रूपेण स्थाणुत्वाद्यभावः पुरुषत्वादि-व्यापक इतिबुद्धेः पुरुषः स्थाणुरित्यादिधीप्रतिबन्धकतासम्भव इति ध्येयम् ।

अत्रापि ज्ञानजन्यमुपेत्य अवगतो गृहीत इति क्तान्त-प्रयोगौ 'यदा संशयानुत्पादो निर्व्याह्यः तदव्यवहितप्राक्क्षणे तज्ज्ञानसत्त्वमपेक्षितं न तु तदैव' इति लाभाय । एतेन चिरवि-नष्टज्ञानजोद्बुद्धसंस्कारसत्त्वेऽपि संशयानुत्पादलाभाय तथाभि-धानमिति ह्रेयम् । उद्बुद्धसंस्कारज्ञानयोरनुगमासम्भवेन पृथक् पृथक् प्रतिबन्धकताया वाच्यतया गौरवात्, उद्बुद्धसंस्कारात् स्मरणस्यावश्यकतया तेनैव कार्य्यकालवर्त्तिना संशयप्रतिबन्ध-सम्भवाच्च । यदवच्छेदेन व्यावर्त्तकधर्मदर्शनं तद्धर्मविशिष्टे न संशय-इत्युक्तमेव विशेष्य दर्शयति "यद्येति" । स्थाणुत्वाभावस्य पुरुषत्वाव-च्छेदेन ग्रहे पुरुषोऽयं स्थाणुर्न वेति न संशय इत्येकोऽन्वय' । एवं स्थाणुत्वाभावस्य पुरुषत्वावच्छेदेन पुरुषत्वस्य चेदन्त्वावच्छेदेन ग्रहे अयं स्थाणुर्नवेति न संशय इत्यपरः । चरमःस्फुट एव । तद्वदन्योन्या-भावादित्यस्य 'व्यावर्त्तकतया बोध्यस्य-इत्यर्थकेनादिशब्देन 'द्रष्टत्व' इत्यनेन, सम्बन्धः । सर्वत्रादिना तदवच्छेदकतद्व्यावर्त्तकयोः परिग्रहः । तत्त्वदं सर्वत्र ग्राह्यपरम् । संशयत्वस्य व्यावर्त्तकदर्शन-

ननु भावोऽभावो वा उभयथापि प्रमेयम् इत्यत्र भावत्वाभावत्वयोर्व्याप्यतावच्छेदकयोरग्रहादनुमान न स्यात् तदन्यान्यत्वरूपसान्यतरत्वस्य लिङ्ग-

---

"नन्वित्यादि।" इद नीलत्वेन प्रतीयमान भावोऽभावो वा। भावत्वाभावत्वयोः, तत्त्वयोरित्यर्थः। लिङ्गत्वाभावादप्रसिद्धत्वेन तत्त्वासम्भवात्। भावत्वाभावत्वे-

---

प्रतिबध्यतावच्छेदकत्वभ्रम निराकरोति "एवमिति"। तद्भ्रमोपोत्थाय व्यावर्त्तकधर्म्मदर्शनदशायामित्यादि। तथाच सशय-निश्चयसाधारणज्ञानत्वमेव सप्रतिबध्यतावच्छेदकमिति भाव। विशेषदर्शनस्य, तद्व्यावर्त्तकदर्शनस्य। विपरीतज्ञानमात्रेति। तज्ज्ञानसामान्येत्यर्थ। अग्रे, धूमत्वपुरस्कारेणेत्यादौ। प्रमेयमित्यस्य समानलिङ्ग पक्षरूपविशेष्यवाचकपद पूरयति "इदमिति"।

इदन्त्वस्य तेजोऽभावत्वाल्लक्ष्ये तदवच्छिन्न भावत्वमशयायोगात्तद्विशिनष्टीति 'नीलत्वेनेति'। मूलेऽनुमानम् अनुमितिमिति। उभयथापीत्यनेनेद प्रमेयमितिज्ञानस्यावधारणत्वलाभात्ताहग्ज्ञानस्यानुमितिहेतुत्वाघटकत्व लभ्यते, तथाच इद भावोऽभावो वेतिसशयस्थले जायमानमिदमुभयथापि प्रमेयमित्यनुमितिस्तवनेन स्यादित्यर्थ। अनुमित्यनुपपत्तौ हेतुरग्रहादित्यत्तम्। अग्रहादित्यस्य पक्षधर्म्मतानिश्चयप्रकारतयेत्यादि। अग्रे तादात्म्यसम्बन्धेनान्यतरवतो लिङ्गत्वमुपेत्याभ्यतरस्य 'धर्म्मस्य लिङ्गताया निराक्रियमाणतया अत्रापि

त्वाभावादिति-चेन्न, भावत्वाभावत्वान्यान्यधर्म्मवत्त्वस्य लिङ्गत्वात् । एवं धूमालोकान्यतरत्वमपि लिङ्गम् ।

त्यादिकं केवलान्वय्यनुमानमतिरिक्तञ्चाभावमभ्युपेत्य । केवलान्वयिनः साध्यस्य धर्म्ममात्रमेव व्याप्यमिति तु मन्तव्यम् । "एवमिति" । लिङ्गं व्याप्यत्वे, लिङ्गतावच्छेदकं वा वह्नौ ।

भावत्वादिधर्म्मवत्तयैव लिङ्गतावच्छेदकस्याग्रहे मूलतात्पर्य्यमवगम्यते इत्यभिसन्धाय भावत्वादिपदं भावत्वत्वादिपरतया व्याचष्टे दीधितौ "भावत्वेति" । अप्रसिद्धानुयोगिकाभावस्य दुर्निरूपतया लिङ्गत्वाभावादित्यसम्भवपरतया हेतुं पूरयन् व्याचष्टे "अप्रसिद्धत्वेनेति" । भावभेदवैशिष्ट्यस्याभावभेदाहृत्तितया तद्विशेषणतया लिङ्गतावच्छेदकघटकत्वासम्भवादिति पर्य्यवसितोऽर्थः ।

ननु मीमांसकैः केवलान्वयनुमानानङ्गीकाराद्भावभिन्नपदार्थानङ्गीकाराच्च भावभिन्नत्वरूपाभावत्वघटितान्यतरत्वावच्छिन्नलिङ्गकप्रमेयत्वानुमानोपपादनं विरुद्धमित्यत आह "भावत्वाभावत्वेत्यादिकमिति" । "अतिरिक्तञ्चेति" । यद्यप्यभावस्याधिकरणरूपत्वेऽपि स्वरूपसम्बन्धादिरूपाभावत्वघटितान्यतरस्य हेतुत्वसम्भवस्थापि दर्शितसाध्ये भावभेदस्य कोटितया तदघटितान्यतरस्य हेतुत्वं मूलाभिप्रेतमित्याशयेनेदम् । साध्यस्य केवलान्वयित्वज्ञानकाले यत्किञ्चिद्रूपावच्छिन्नस्यैव वृत्तिमतो लिङ्गता सम्भव-

अथ यद्व्यतिरेकज्ञानं यदुत्पत्तिप्रतिबन्ध्यकं तत् तन्निश्चयसाध्यं, तथाच पक्षधर्मस्य व्याप्यभेदज्ञानमनुमितिप्रतिबन्ध्यकम्, अतो व्याप्याभेदज्ञानं तद्धेतुः सिध्य-

---

"यद्व्यतिरेकेति"।

यत्संशयव्यतिरेकनिश्चयावित्यत्र व्याख्याततत्त्वमेतत्। यद्वा यद्व्यतिरेकनिश्चये कार्य्यानुत्पत्तौ तद्व्यति-

---

रीति मूले तदकथनात् न्यूनताभङ्गायाह "केवलान्वयिन इति"। अयमालोको धूमो वेति-सन्देहे धूमालोकान्यतरत्वस्यानुमापकत्वरूपं लिङ्गत्वमुक्तं वह्नौ साध्ये व्यधिकरणतया न सम्भवतीति साध्यं पूरयति "व्याप्यत्व इति"। वह्नजादिव्याप्यत्वे साध्य इत्यर्थः। लिङ्गपदस्यातैव लिङ्गतावच्छेदकपरत्वे वह्नजादिसाध्यपरतया मूलसङ्गतिरित्याह "लिङ्गतावच्छेदकत्वेति"। ननु यद्धर्मिकव्यतिरेकज्ञानप्रतिबध्यं तद्धर्मिकतद्विषयत्वावच्छिन्नजन्यमित्येतादृशां पक्षीयधूमधर्मिकसाध्यव्याप्तिनिश्चयत्वेनानुमितिहेतुत्वसाधिकायां मूलोक्तव्याप्तौ ग्राह्यव्यतिरेकनिश्चयप्रतिबध्ये घटज्ञानादौ व्यभिचारज्ञानसामान्यप्रतिबध्ये अव्यभिचारज्ञाने च व्यभिचार इत्याशङ्क्याह "यत्संशयेति"।

"व्याख्याततत्त्वमिति। तच्च तत्त्वं संशयसाधारणव्यतिरेकज्ञानत्वेन प्रतिबन्धकत्वं व्याप्तिघटकम्, ग्राह्यसंशयस्य सर्व्वत्रैवाप्रतिबन्धकत्वोपगमात् अव्यभिचारग्रहेऽपि व्यभिचारनिश्चयत्वेनैव प्रतिबन्धकत्वमिति। अथेत्यादिशङ्काया व्याप्तिपरत्वे स्वयमनुपपत्तेर्व्वैय्य-

तीति-चेन्न, धूमत्वपुरस्कारेण व्याप्तिस्मरणपक्षधर्म्मता-ज्ञानं सति विशेषदर्शनान्न-धूमे व्याप्यभेदज्ञानं, किन्त्व-नुमितिरेव तत्रोत्पत्तिः, तत्सामग्रीसत्त्वात्। अतो न व्याप्यभेदज्ञानम् अनुमितिप्रतिबन्धकं येन व्याप्याभेद-ज्ञानं तद्धेतुः स्यात्।

रेकनिश्चयाभावस्य कारणतामपेक्ष्य तन्निश्चयस्यैव कार-णत्वं युक्तं लाघवादित्यभिप्रायिकमिदम्। अतएव क्लृप्तनियतपूर्व्वभावतया भेदग्रहाभावएवानुमितिहेतु-रित्यभिप्रेत्य "अस्तु वेत्यादि" वक्ष्यति।

माणतया फलानुत्पत्तिनियतत्वरूपप्रतिबन्धकत्वनिवेशनेन मूले वक्ष्यमाणस्वरूपासिद्धेः परीहारसम्भवेन समाधानासङ्गतेः लाघवेन विशिष्टपरामर्शकारणताव्यवस्थापनपरतया ता व्याचष्टे "यद्वेति"। व्यतिरेकसंशये कार्य्यानुत्पत्त्यनुरोधेन नियतत्वेन हेतुतायाः पूर्व्वमाशङ्कितत्वात् पौनरुक्त्याशङ्काया. परीहाराय मूलस्थव्याप्यभेद-ज्ञानपदस्य नियतपरता स्फुटयितु व्यतिरेकज्ञानसामान्यमुपेक्ष्य तन्नियतकथनम्। कार्य्यानुत्पत्तौ, कार्य्यानुत्पत्तिनियमे। इत्यत्र मूले 'यदुत्पत्तिप्रतिबन्धकम्' इत्यत्र प्रतिबन्धकत्व गुरुधर्म्मावच्छिन्नभेदाग्रहकारणताप्रसञ्जकं कार्य्यानुत्पत्तिनियतत्वरूपमेवेति-बोध्यम्। लाघवात्, अवच्छेदक लाघवात्। संशयसाधारणज्ञानत्वा-वच्छिन्नाभावहेतुत्वेऽप्यप्रामाण्यनिश्चयत्वावच्छिन्नाभावस्य विशेषण-

न च धूमत्वपुरस्कारेण व्याप्तिग्रहोपपद्यमानता ज्ञानं हृयं धूमव्यक्तिर्वह्निव्याप्या-नतिभास्यतोऽनुमित्यापत्तिरतो विशिष्टज्ञानं तद्धेतुरिति-वाच्यं, धूमत्वस्य विशेषस्य दर्शनेन तादृशभ्रमानुत्पत्तेः, तदानुमिति-सद्भावादेव। अन्यथा निश्चयसामग्र्यां सत्यां भ्रमानन्तरं परामर्श एव कुतो न भवति।

सामान्यतो विशेषदर्शनात् सामान्यतो भ्रमो न स्यात् विशेषतस्तु-स्यादेवेत्यभिप्रायिकीमाशङ्कां निरस्यति "न चेति"।

लाघवं बोध्यम्, अतएव, उक्तग्रन्थस्य ल . : . . : " ,
मितिहेतुः, कल्पनालाघवादिति शेषः। ' ' '' . . :
व्याप्तिपरत्वे भेदग्रहाभावस्य हेतुत्वेऽपि .' ' . ' . . .
कारणतासिद्धेरावश्यकत्वात् तामनिराकृत्य भेदाग्रहकारणत्वोपगमस्यामङ्गत्यापत्तेरिति भावः। एवञ्च समाधानै 'अनुमितिप्रतिबन्धकस्येत्यस्य, मयोच्यत इति शेषः। येन, यदपेक्षया लाघवेनेत्यर्थः। विशेषदर्शनाद्भ्रमोत्पत्त्यभावस्य प्रागुक्तत्वान्नचेत्याद्यागङ्कानुत्थितेस्तदागयं प्रकाशयति "सामान्यत इति"।

धूमत्वस्य विशेषस्य दर्शनेनेतिमूलस्य 'उक्तभ्रमे ग्राह्याभावावच्छेदकतया भातस्य धूमत्वस्य धर्म्मितावच्छेदकतया स्फुरणनेत्यर्थो, दीधित्यनुसारेण बोध्यः। विशेषदर्शने संशयस्यैव भ्रमस्यापि

BIBLIOTHECA INDICA:

A

A Collection Of Oriental Works

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1372

तत्त्वचिन्तामणि-दीधिति-विवृतिः



TATTVACINTĀMANI DIDHITI-VIVRITI

OR

A Sub-commentary on Tattvacintamani

BY

GADADHARA BHATTACHARYYA

WITH TATTVACINTAMANI AND DIDHITI

EDITED BY

MAHĀMAHOPĀDHYĀYA KAMAKHYANATHA TARKAVAGISA

Late Professor, Sanskrit College.

Volume II Fascicle III.

Calcutta,

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS,
No. 5, Nandakumar Chawdhury's 2nd Lane

AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.

1913.

तत्त्वचिन्तामणिः ।

अस्तु वा व्याप्यतया पक्षधर्म्मतया चावगतस्य भेदाग्रहएवानुमितिहेतुः परामर्शहेतुतया तस्यावश्यक-त्वात् । अतएवासन्निकृष्टधूमज्ञानादप्यनुमितिः । नचैवं गौरवं, तदा विशिष्टज्ञानानुपस्थितेः । न च जनक-ज्ञानाविरोधिनोज्ञानस्याप्रतिबन्धकत्वात् भेदग्रहो न प्रतिबन्धक इति वाच्यम् । अभेदज्ञानस्याजनकत्वात् त्वयापि लिङ्गपरामर्शे तादृशस्य प्रतिबन्धकत्वस्वीका-राच्च । अथ गोत्वं मधुरत्वावान्तरजातिर्वा लिङ्गं न स्यात् तद्गतधर्म्मान्तरस्याभावात्, अतएव तस्य विल-क्षणत्वात् इति चेन्न, व्यक्तेरेव तत्र प्रकारत्वात्, न हि गौर्गौत्वमिति ज्ञानयोरविशेषः, अन्यथा गोत्वमिति ज्ञानस्य निर्विकल्पकत्वापत्त्या व्याप्यत्वग्रहे परामर्शे चानुपयोगात् गवेतरावृत्तित्वे सति सकलगोवृत्तित्वं गोत्वमित्यनुभवाच्च । न चैवमनवस्था, तदितरावृ-त्तित्वे सति तदृत्तित्वस्यानुभवेनापलापासम्भवात् ।

इति परामर्शपूर्व्वपक्षचिन्तामणिः ।

दीधितिः ।

'अस्तु वेत्यभ्युपगमवादः। 'न चेत्यादि अभेदज्ञानस्याहेतुत्वे भेदग्रहो न प्रतिबन्धकोभवितुमर्हतीत्यर्थः। 'अभेदेति, तथाचातथाभूतस्यापि प्रतिबन्धकत्वमनायत्या वक्तव्यमिति भावः। अतथाभूतत्वस्य सन्दिग्धत्वे व्यभिचारमाह, 'त्वयापीति, विशेषणान्तरदाने चाप्रयोजकत्वमिति भावः। गोत्वे गोपदशक्यतावच्छेदकत्वमविशेषितं विशेषितं वा तदर्थीत्यतः 'मधुरत्वेति, मधुरत्वव्याप्यो धर्म्मो जातिरखण्डोपाधिर्वेति फलतो न विशेषः। गौरिलिङ्गाने गोत्वप्रकारकत्वं विशेषमाशङ्क्याह, 'अन्यथेति। व्यक्तेः प्रकारत्वेऽपि लिङ्गतावच्छेदकत्वासम्भवादाह, 'गवेतरेति, गोत्वत्वस्यात्राप्रवेशान्नात्माश्रयः, अत्र च यथा साध्यं गवेतरासमवेतत्वादिकमेवोपादेयं कालादौ व्यभिचारधारणाय समवायेन सम्बन्धेन हेतुत्वस्यावश्यवाच्यत्वेनाभावादिसाधारणेऽप्यदोषात्, व्यतिरेकेऽपि रूपान्तरेण सम्बन्धान्तरेण च गोत्वाभावस्यापि व्यभिचारितया गवेतरासमवेतस्य तत्त्वेन समवायसम्बन्धेनाभावस्यैव गमकत्वात्।

इति परामर्शपूर्व्वपक्षदीधितिः।

न सम्भव इति भेदाग्रहहेतुत्वाभिधानासङ्गतिरत आह, 'अस्तु-
वेति । ननु व्याप्य-पक्षधर्मतयोर्भेदाग्रहस्यानुमितिहेतुत्वे तेषां
कारणबाधेनानुमित्यात्मकान्यथाख्यातिनिराकरणं विरुध्यते ह्रद-
हस्तिवाय्वादौ वह्निव्याप्यधूमादेर्भेदाग्रहेण ह्रदादौ वह्न्याद्यनुमि-
तेर्दुर्वारत्वात् । न च फलासिद्धा ह्रदादिपक्षं वह्न्यादिरूप-
साध्यश्चान्तर्भाव्य कारणत्वाकल्पनान्नापत्तिरिति वाच्यम् । पक्षमन-
न्तर्भाव्य पक्षनिष्ठप्रत्यासत्त्या कारणत्वकल्पनेनापत्तिसम्भवादिति
चेन्न, एतन्मतानिर्भरेणैतद्दोषस्याकिञ्चित्करत्वात् व्याप्यतावच्छेदक-
प्रकारकस्यैव पक्षधर्मताज्ञानस्य भेदाग्रहहेतुतावच्छेदकत्वोपगमे-
नान्यथाख्यातिवारणसम्भवाच्च (१) इतरसकलकारणसत्त्वे यत्सत्त्वे
कार्यानुत्पादस्तस्यैव प्रतिबन्धकताया आवश्यकत्वादिति भावः ।
'न च जनकज्ञानेत्यादिमूलशङ्काया भेदग्रहे नैयायिकानामनुमित्य-
प्रतिबन्धकत्वसाधनपरत्वेऽसङ्गतिः जनकज्ञानाप्रतिबन्धकस्यैव हेतु
ताया: स्वीकरणीयत्वात् तस्य च स्वमतेऽसिद्धत्वात् इत्यतस्तस्या-
आपत्तिपरत्वं स्फुटीकरोति, 'अभेदज्ञानस्येति, मूले 'अभेदज्ञानस्या-
जनकत्वात्' अतीन्द्रियहेतुकानुमितावुक्तक्रमेण व्यभिचारेण जनक
त्वासम्भवात्, तथाच विपर्ययानुमाने बाध इति भावः । नन्वेवम-
प्युक्तव्याप्तिविरोधाद्भेदग्रहस्य प्रतिबन्धकत्वानुपपत्तिर्दुर्वारैवेत्यत-
आह, दीधितौ 'तयाचेति, 'अतथाभूतस्यापि' जनकज्ञानाविरोधि-

---

(१) पक्षमनन्तर्भाव्य पक्षनिष्ठप्रत्यासत्त्या कारणत्वकल्पनेनापत्तिसम्भवादि-
त्यभिसन्धायास्तु वेत्यादिकल्पे व्यभिचारमाह, 'वस्तुवेत्यादि, इति पा० ।

दीधितिः ।

'अस्तु वेत्यभ्युपगमवादः । 'न चेत्यादि अभेदज्ञानस्याहेतुत्वे भेदग्रहो न प्रतिबन्धकोभवितुमर्हतीत्यर्थः । 'अभेदेति, तथाचातथाभूतस्यापि प्रतिबन्धकत्वमनायत्या वक्तव्यमिति भावः । अतथाभूतत्वस्य सन्दिग्धत्वे व्यभिचारमाह, 'त्वयापीति, विशेषणान्तरदाने चाप्रयोजकत्वमिति भावः । गोत्वे गोपदशक्यतावच्छेदकत्वमविशेषितं विशेषितं वा तदभीत्यतः 'मधुरत्वेति, मधुरत्वव्याप्यो धर्मो जातिरवयवोपाधिर्वेति फलतो न विशेषः । गौरितिज्ञाने गोत्वप्रकारकत्वं विशेषमाशङ्क्याह, 'अन्यथेति । व्यक्तेः प्रकारत्वेऽपि लिङ्गतावच्छेदकत्वासम्भवादाह, 'गवेतरेति, गोत्वत्वस्यावाप्रवेशान्नात्माश्रयः, अत्र च यथा साध्यं गवेतरासमवेतत्वादिकमेवोपादेयं कालादौ व्यभिचारवारणाय समवायेन सम्बन्धेन हेतुत्वस्यावश्यवाच्यत्वेनाभावादिसाधारणेऽप्यदोषात्, व्यतिरेकेऽपि रूपान्तरेण सम्बन्धान्तरेण च गोत्वाभावस्यापि व्यभिचारितया गवेतरासमवेतस्य तत्त्वेन समवायसम्बन्धेनाभावस्यैव गमकत्वात् ।

इति परामर्शपूर्वकपक्षदीधितिः ।

गादाधरी विवृतिः ।

न सम्भव इति भेदाग्रहहेतुत्वाभिधानासङ्गतिरत आह, 'अस्तु-वेति। ननु व्याप्य-पक्षधर्मतयोर्भेदाग्रहस्यानुमितिहेतुत्वे तयां कारणबाधेनानुमित्यात्मकान्यथाख्यातिनिरासकरणं विरुध्यते ह्रदो-हत्तिमाम्प्रादौ वह्निव्याप्यधूमादेर्भेदाग्रहेण ह्रदादौ वह्न्यादयनुमि-तेर्दुर्वारत्वात्। न च फलासिद्धा ह्रदादिपक्षं वह्न्यादिरूप-साध्यस्यान्तर्भाव्य कारणत्वाकल्पनाद्वापत्तिरिति वाच्यम्। पक्षमन-न्तर्भाव्य पक्षनिष्ठप्रत्यासत्त्या कारणत्वकल्पनेनापत्तिसम्भवादिति चेन्न, एतन्मतानिर्भरेणैतद्दोषस्याकिञ्चित्करत्वात् व्याप्यतावच्छेदक-प्रकारकस्येव पक्षधर्मताज्ञानस्य भेदाग्रहहेतुतावच्छेदकत्वोपगमे-नान्यथाख्यातिवारणसम्भवाच्च (१) इतरसकलकारणसत्त्वे यत्सत्त्वे कार्य्यानुत्पादस्तस्यैव प्रतिबन्धकताया आवश्यकत्वादिति भावः। 'न च जनकज्ञानेत्यादिमूलग्रन्थस्य भेदग्रहे नैयायिकानामनुमिति-प्रतिबन्धकत्वसाधनपरत्वेऽसङ्गतिः जनकज्ञानाप्रतिबन्धकस्यैव हेतु-ताया: स्वीकरणीयत्वात् तस्य च स्वमतेऽसिद्धत्वात् इत्यतस्तस्या-आपत्तिपरत्वं स्वीकरोति, 'अभेदज्ञानस्येति, मूले 'अभेदज्ञानस्या-जनकत्वात्' अतीन्द्रियहेतुकानुमितावुक्तक्रमेण व्यभिचारेण जनक-त्वासम्भवात्, तथाच विपर्य्ययानुमानं बाध इति भावः। नन्वव-म्प्युक्तव्याप्तिविरोधाद्भेदग्रहस्य प्रतिबन्धकत्वानुपपत्तिर्दुर्वारेवेत्यत-आह, दीधितौ 'तथाचेति, 'अतथाभूतस्यापि' जनकज्ञानाविरोधि-

---

(१) पक्षधर्मतान्तर्भाव्य पक्षनिष्ठप्रत्यासत्त्या कारणत्वकल्पनेनापत्तिसम्भवादि-त्यभिधानायास्तु वेत्यादिकल्पे अनिर्भरमाह, 'अस्तु वेत्यादि, इति पा०।

नोऽपि, भेदग्रहस्येति शेष', 'अनायत्ता वक्तव्यमिति, अन्यथा भेद ग्रहदशाया अनुमित्यापत्तेरिति शेष'। तथाच तादृशव्याप्तिरेव बाधितेति भाव:। 'सन्दिग्धत्व इति, नैयायिकैरतीन्द्रियादिहेतुक स्थले मानसविशिष्टज्ञानोपगमेन व्यभिचारानिर्णयादिति भाव:। ननु लिङ्गपरामर्शं भेदग्रहस्य जनकज्ञानाविरोधिन' प्रतिबन्धकत्वेऽपि न व्यभिचार' ग्राह्याभावानवगाहित्वविशिष्टस्य जनकज्ञानाविरोधित्वस्याप्रतिबन्धकत्वव्याप्यत्वापगमात् इत्यत आह, 'विशेषणान्तरदानं चेति। ननु गोपदवाच्यत्वे साध्ये गोपदशक्यतावच्छेदकत्वस्य लिङ्गतावच्छेदकत्वमम्भवेऽपि साक्षादिसाध्यकस्थले न तथात्वसम्भव गोपदस्य नानार्थतया अन्यत्रापि तत्शक्यतावच्छेदकसत्त्वात् इत्यत आह,'विशेषितं वेति साक्षादिसहत्तित्वादि विशेषितं वेत्यर्थं, वाकारो व्यवस्थितविकल्पे। ननु गुणगतजाति मनङ्गीकुर्व्वता मधुरत्वव्याप्यरसगतजातेरभावात्तल्लिङ्गतानुपपत्ते इत्यत आह, 'मधुरत्वेति, 'फलत इति, तादृशधर्म्मस्य चीरत्वाद्यनुमापकताया सर्व्वसम्मतत्वादिति भाव। 'गोत्वप्रकारकत्व विशेषमिति, गोत्वमिति ज्ञाने तदभावादिति भाव। मूले 'अन्यथेति गोत्वमिति ज्ञाने व्यक्तेरप्रकारत्वे, 'अनुपयोगात्' उपयोगानुपपत्ते, अवच्छेदकप्रकारकज्ञानविधयैव तस्यावच्छेद्यव्याप्तिपक्षे सम्बन्धितावच्छेदकप्रकारकज्ञानविधया व्याप्तिस्मारकत्वेनैव च तस्य परामर्शे उपयोगादिति भाव। दीधितौ 'लिङ्गतावच्छेदकत्वासम्भवादित्यस्य गोपदप्रवृत्तिनिमित्तत्वादिसाध्यके तादात्म्येन गोत्वादिहे तावित्यादि आधेयतया गोविशिष्टस्य गवाधेयत्वविशिष्टस्य च

व्यत्वादेरपि गोमात्रवृत्तितया सास्नादिसाध्यकस्थले व्यतिरिङ्ग-
ावच्छेदकत्वं सम्भवत्येव इत्यवगन्तव्यम्। ननु उक्तगोत्वशरीरेऽपि
देप्रतियोगितावच्छेदकमुद्रया गोत्वस्यातिप्रसक्तगोत्वेनैव निवे-
यनीयतया आत्माश्रयः इत्यत आह, 'गोत्वत्वेति, 'अप्रवेशादिति
स्वरूपत एव तत्प्रवेशसम्भवादिति भावः। मूले 'न चैवमिति खतो-
व्यावर्त्तते गोत्वादावपि धर्म्मान्तरस्वीकारे, 'अनवस्था' अविश्रान्त-
धर्म्मधाराप्रसङ्गः। प्रामाणिकत्वादनवस्था न दोषायेति समाधत्ते,
'तदितरेति। सास्नादौ साध्ये गोत्वघटकसकलगोसमवेतत्वांशस्य
वैयर्थ्यात् तत्र तं परित्यजति दीधितौ 'अभावेति, 'अत्र' एतद्घटकं,
'यद्यसाध्यमिति सास्नादौ साध्ये गवेतरासमवेतत्वं विशेषणीभूतं
गोसमवेतत्वञ्च (१), सास्नाव्यापकजातित्वादौ साध्ये तादात्म्येन
हेतुतायां सकलगोसमवेतत्वं केवलं व्याप्यतावच्छेदकं वाच्यं
न तु विशिष्टं, विशिष्टन्तु (२) गोपदप्रवृत्तिनिमित्तत्वादिसाध्यके
तादात्म्येन गोत्वे हेतावित्यर्थः। ननु गवेतरासमवेतत्वस्या-
भाव-मेयत्वादापि सत्त्वात् सास्नादिव्यभिचारितया सास्नादि-
साध्यकएव कथं तद्व्याप्यतावच्छेदकं इत्यत आह, 'कालादाविति
सम्बन्धसामान्येन हेतुत्वे सकलगोसमवेतत्वांशनिवेशेऽपि गोत्ववति
सास्नादिशून्ये कालादौ व्यभिचारस्यावश्यकतया समवायेन हेतु-
त्वस्यायश्यं स्वीकरणीयत्वात् गवेतरासमवेतत्वस्याभावादिसाधा-

---

(१) गोसमवेतत्वस्य सास्नाव्याप्यत्वादिति भावः।

(२) गवेतरावृत्तित्वे सति सकलगोवृत्तित्वरूपमित्यर्थः।

रणस्यापि समवायेन व्यभिचरितायामनवच्छेदकत्वादित्यर्थः (१)। एतच्च साध्याभाववदवृत्तित्वमेव व्याप्तिरित्यभिप्रायेण। यदि च हेतुतावच्छेदकसम्बन्धेनावृत्तित्वाद्वृत्ति तेन सम्बन्धेन वृत्तिमत्त्वमपि तत्र निवेश्यते तदा अवच्छेदकस्यानतिप्रसक्तत्वनियमेन गवेतरासमवेतत्वमाचस्य समवायसम्बन्धेन वृत्तिमत्त्वमात्रघटितव्याप्तेरतिप्रसक्तयानवच्छेदकत्वात् समवेतत्वांशोऽपि तद्विशेष्यविधया हेतुतावच्छेदककोटौ निवेश्य इति ध्येयम्। साक्षाभावसाध्यक-गोत्वाभावादिहेतुकस्थलेऽपि समवायसम्बन्धावच्छिन्नगवेतरासमवेतत्वावच्छिन्नप्रतियोगिताकाभावत्वमेव व्याप्यतावच्छेदकं न तु सकलगोसमवेतत्वमपि हेतुमूलाभावप्रतियोगितावच्छेदके निवेश्यं वैयर्थ्यात् (२)। न च गवेतरासमवेतत्वस्य प्रतियोगितावच्छेदकतया निवेशे तद्वैयर्थ्येऽपि प्रतियोगित्वसमानाधिकरणतया निवेशे न तथात्वं गवेतरासमवेततद्भूपाथभावस्य गोसाधारण्येन व्यभिचारित्वादिति शङ्क्यं, सकलगोसमवेतगोत्वस्यापि द्वित्वादिनाभावस्य गोसाधारण्यात् सकलगोसमवेतत्वनिवेशेऽपि साक्षद्रूपावच्छिन्नाभावस्यैव हेतुतया वाच्यतया तदंशवैयर्थ्यस्य दुर्व्वारत्वात् विशिष्टस्य गौरवेणाभावप्रतियोगितायामप्यनवच्छेदकतया तदवच्छिन्नाभावाप्रसिद्धेत्यतआह, 'अतिरिक्तोपीति, सम्ब-

(१) समवायेनाव्यभिचारितायामवच्छेदकत्वादित्यर्थं इति पा०।

(२) तदा अवच्छेदकस्यानतिप्रसक्तत्वनियमेन गवेतरासमवेतत्वे इति समवेतत्वमेव साक्षादिव्याप्यतावच्छेदकं वाच्यं गोसाभाव साक्षाभावादिसाध्यकेऽपि प्रतियोगिविशेषणतया गवेतरासमवेतत्वस्यैव निवेशो न तु सकलगोसमवेतत्वस्यापि वैयर्थ्यात् इति पा०।

व्योन्तरेण गोत्वाभावस्य व्यभिचारितया 'समवायेति दृष्टान्त-विधयोक्तम् ।

यत्तु गवेतरासमवेतस्य मेयत्वादेः केवलान्वयितया सम्बन्ध-सामान्येन तत्त्वावच्छिन्नाभावाप्रसिद्धितः समवेतत्वं निवेश्यमेवे-त्याग्रहानिराकरणाय 'तदिति, तत्तुच्छं, समन्धसामान्येन गवेतरा-समवेतसमवेताभावस्याव्यभिचारितयोक्तग्रन्थस्य यत्किञ्चित्सम्बन्धा-वच्छिन्नाभावहेतुतायामेव व्यभिचारप्रदर्शनपरतया तद्धेतुतायाश्चा-प्रसिद्धिविरहेण तामादाय समवेतत्वांशसार्थक्यग्रहानवतारेण तत्र व्यभिचारप्रदर्शनस्यानौचित्येनासङ्गतेः, 'सम्बन्धान्तरेण' सम्बन्ध-सामान्येन, 'गोत्वाभावस्यापि व्यभिचारितया' कालादेः पक्षत्वे स्वरूपासिद्धतयेति व्याख्यायामुदञ्चरत्वात् ।

इति परामर्शपूर्वपक्षविवृतिः समाप्ता ।

अथ परामर्शसिद्धान्तः ।

तत्त्वचिन्तामणिः ।

अत्रोच्यते, अयमालोको धूमोवा उभयथापि वह्नि-व्याप्य इति ज्ञानं ततोऽनुमितिः । न च धूमत्वेना-लोकत्वेन वा तत्र निश्चयः । अथ तदन्यान्यत्वमेव तत्र लिङ्गम् । न च तदज्ञानदशायामनुमितिदर्शनात् न तथेति वाच्यम् । धूमालोकान्यान्यत्वज्ञानं विना तवापि

तत्र व्याप्यत्वनिश्चयेन तदर्थं तद्धीधावश्यकत्वादिति चेन्न, न हि धूमालोकान्यान्यत्वं धूमान्यान्यत्वं वा व्याप्यतावच्छेदकं गौरवात् व्यभिचारावारकविशेषण-वत्त्वाच्च किन्तु धूमत्वादिकं तच्च तत्र सन्दिग्धमेव। ननु तदन्यान्यद्वह्निव्याप्यमेव व्यभिचाराभावेन व्याप्ति-विरहसाधनस्य बाधितत्वात् पुरुषस्तु तत्र नीलधूम-वत्त्वादित्यतैवाधिकेन निगृह्यते न तु व्याप्यत्वासिद्धेरिति चेन्न, तदन्यान्यद्धूमालोकस्वरूपमेव तच्च व्याप्यमिति सत्यं, न च वस्तुगत्या व्याप्यज्ञानादनुमितिः, अति-प्रसङ्गात् किन्तु व्याप्यतावच्छेदकप्रकारकज्ञानात्। न च तदन्यान्यत्वं वह्निव्याप्यतावच्छेदकमित्युक्तम्।

परामर्शसिद्धान्तदीधितिः।

'लिङ्गं' लिङ्गतावच्छेदकं, तथाच न व्यभिचारः,'न तथा' न तेन व्यभिचारवारणम्। 'न हीति, 'धूमान्या-न्यत्वमिति दृष्टान्तार्थम्। न चैकधर्म्मस्यावच्छेदकत्वा-पेक्षया धर्म्मद्वयस्य तत्त्व एव गौरवमिति वाच्यम्। तादृशैकधर्म्मघटकानेकभेदादिघटकतया धर्म्मद्वयस्यैव प्रथमोपस्थितत्वेन चावच्छेदकत्वौचित्यात्। अन्यथा

वह्न्यादीनामपि व्याप्यतया तावदन्यतमत्वस्यैवावच्छेदकत्वं स्यात् ।

अथ परामर्शसिद्धान्तविवृतिः ।

मूले 'अयमिति पर्व्वतवृत्तिरित्यर्थः, 'आलोको धूमो वेति, स्वरूपतो धूमत्वालोकत्वयोरत्र कोटिता न तु धूमत्वत्वालोकत्वावच्छिन्नयोः, तथा सत्युक्तसंशयस्य स्वरूपतो धूमत्वादिप्रकारेण पक्षधर्म्मतानिश्चयाविरोधितया असङ्गतेः । न च संशयस्य भावद्वयमात्रकोटिकस्यानभ्युपगमे धूमत्वाभावालोकत्वाभावयोरत्र कोटितायाः स्वीकरणीयत्वात् तत्प्रतियोगितावच्छेदकधूमत्वत्वादेरपि भानमावश्यकं इति वाच्यम् । धूमत्वाद्यभावस्यैव धूमादिभेदस्यापि कोटितया धूमत्वादिसंशयनिर्व्वाहात् धूमादिभेदज्ञाने च धूमत्वत्वादिभानानावश्यकत्वात् । न च धूमत्वादौ धूमादिभेदविरोधभाने तदर्म्मितावच्छेदकतया धूमत्वत्वादिभानमावश्यकमिति धूमत्व-धूमादिभेदकोटिकसंशयेऽपि धूमत्वत्वादिनैव धूमत्वादेः कोटित्वमावश्यकं संशये कोटिविषयताया विरोधग्रहप्रकारावच्छिन्नत्वनियमादिति वाच्यम् । संशयस्थले कोट्योः परस्परविरोधभाननियमात् धर्मभेदादौ धूमाद्यवृत्तित्वरूपधूमत्वादिविरोधभानेन स्वरूपतो धूमत्वादिकोटिकसंशयनिर्व्वाहात्, स्वरूपतो भासमानधूमत्वाद्यवच्छेदेन धूमादिभेदाभावज्ञानस्यापि धूमत्वादौ धूमादिभेदविरोधज्ञानतया तादृशविरोधज्ञानेऽपि धूमत्वत्वादिभाननियमाच्च । अथैवमपि पर्व्वतवृत्तित्वविशिष्टे

धूमत्वादिसन्देहः पर्व्वतवृत्तित्वविशिष्टे धूमत्वादिनिश्चयस्यैव विरोधी न त्वनुमितिजनकतया अभिमतस्य धूमत्वादिविशिष्टे पर्व्वतवृत्तित्वनिश्चयस्यासमानधर्म्मितावच्छेदकत्वात् बाधाभावानवगाहित्वाच्चेति न तादृशसंशयदशायामनुमित्यनुपपत्तिः, एवं व्याप्यमनसिद्धपरामर्शनिर्व्वाहाय 'उभयथापि वह्निव्याप्य इति इदमर्थे व्याप्तिनिश्चयाभिधानमप्यङ्गतं पक्षवृत्तित्वविशिष्टे व्याप्तिनिश्चयस्यानुमितिहेतुत्वे व्याप्तिविशिष्टवैशिष्ट्यज्ञानस्य व्याप्तिप्रकारकज्ञानरूपकरणव्यापारस्य उपसंहारभेदेऽनुमितिहेतुत्वाभिधानविरोधादिति चेन्न, पक्षवृत्तित्वावच्छिन्ने धूमत्वादिरूपविशेषणसन्देहे पक्षे धूमत्वादिविशिष्टकोटिकसंशयस्यौचित्यावर्जिततया पक्षविशेष्यकव्याप्तिविशिष्टप्रकारकानुमितिहेतुनिश्चयासम्भवेन तादृशविशेषणसंशयविरोधिपक्षवृत्तित्वविशिष्टविशेष्यकव्याप्तिनिश्चयाभिधानस्य च सङ्गतेः। वस्तुतः पक्षवृत्तिर्धूमो न वेति संशयस्य पक्षवृत्तिर्धूम इति निश्चय एव धूमत्वविशिष्टधर्म्मिकपक्षवृत्तितानिश्चयेऽपि विरोधित्वं दुरपह्नवं धूमत्वावच्छेदेन पक्षावृत्तित्वस्य पक्षवृत्तित्वावच्छेदेन धूमभेदनिर्व्वाह्यतया तदवच्छेदेन धूमभेदसंशयाद्धूमत्वावच्छेदेन पक्षावृत्तित्वसंशयस्यौचित्यावर्जितत्वात्। एवं पक्षवृत्तित्वविशिष्टे व्याप्यत्वनिश्चयो

व्याप्तिविशिष्टे पक्षवृत्तित्वनिश्चये व्याप्तिविशिष्टे पक्षवृत्तित्वसंशा-यकपक्षवृत्तित्वावच्छिन्नधर्मिकव्याप्यभावसंशयविरोधितयोपयुज्यते इति पक्षवृत्तिधर्मिकधूमत्वादिसंशय व्याप्तिनिश्चयाभिधानसङ्गतिः।

केचित्तु व्याप्तिसम्बन्धेन वह्निसाध्यकपुरोवर्तिधूमादिपक्षक-स्थले तादात्म्यसम्बन्धेन धूमादेर्हेतुत्वे तादात्म्यसम्बन्धेन धूमत्वा-दिरूपव्याप्यतावच्छेदकावच्छिन्नस्य यत्र पक्षे संशयस्तत्र व्याप्यत्वेन धूमादेः पक्षे तादात्म्यसम्बन्धेन निश्चयादनुमित्युत्पत्त्या व्याप्यताव-च्छेदकप्रकारकपक्षधर्मतानिश्चयस्य व्यभिचारप्रदर्शनपरतया एत-न्मूलं उक्तानुपपत्तिशङ्काव्याकुलचेतसो वर्णयन्ति ते पुनः प्रसिद्धस्थले पर्व्वते धूमत्वाद्यवच्छिन्नवत्तासंशयस्थलीयव्याप्तिविशिष्टवत्तानिश्चय-जन्यानुमितौ व्याप्यतावच्छेदकप्रकारकपक्षधर्मतानिश्चयव्यभिचा-रोपेक्षाबीजं सम्यगपश्यन्तः कथं निर्वृतिभाजो भवन्तीति चिन्त्यम्।

मूले 'उभयथापि वह्निव्याप्य इति निश्चयकथनं स्वमते हेतु-रक्षणाय, अत्र वह्नेः साध्यस्योपादानाद्धूमालोकान्यतरत्वं लिङ्ग-मित्यत्र लिङ्गपदस्य यथाश्रुतार्थकत्वानुपपत्तेस्तदाचष्टे, 'लिङ्ग-मिति, व्यभिचारवारणस्याप्रक्रान्तत्वे 'न तथेत्यत्र 'तथापदस्य वक्ष्य-माणतदर्थकत्वानुपपत्तेः पूरयति, 'तथाच न व्यभिचार इति, 'न तथेत्यस्य न लिङ्गतावच्छेदकमिति नार्थो युज्यते धूमत्वा-देरज्ञाने आलोकत्वाद्यवच्छेदेनानुमितावपि तस्य लिङ्गतावच्छेद-कताया इव तदन्यान्यत्वस्य लिङ्गतावच्छेदकत्वसम्भवेन हेत्वसङ्गतेः अतो व्याचष्टे, 'न तेनेति, 'तेन' तस्य लिङ्गतावच्छेदकत्वेन, प्रकृते धूमत्वस्येव धूमान्यान्यत्वस्यापि सन्दिग्धतया तस्य व्याप्यतावच्छे-

दकत्वखण्डनमनुपयुक्तमित्यत आह, 'धूमान्यान्यत्वमितीति, 'एक-धर्म्मस्य' अन्यतरत्वरूपस्य, 'धर्म्मद्वयस्य' धूमत्वालोकत्वरूपस्य, 'तत्त्वे' व्याप्यतावच्छेदकत्वे, तथाच गौरवस्य व्याप्यतावच्छेदकताबाधकत्वे वैपरीत्यमेव स्यादिति भावः। एकस्यातिगुरुशरीरत्वेन लघुशरीरावच्छेदकयोर्द्वित्वमबाधकमित्याशयेनाह, 'तादृगैकेति, 'धर्म्मद्वयस्यैवावच्छेदकतौचित्यादित्यन्वयः। शरीरलाघवमुक्ता उपस्थिति-लाघवमप्याह, 'प्रथमोपस्थितत्वेन चेति, 'तावदन्यतमत्वस्य' वह्नि-धूमालोकान्यतमस्य, 'अवच्छेदकत्वं स्यात्' न तु धूमालोकान्य-तरत्वस्य, तथाच कुतो वैपरीत्यापादनमिति भावः। अन्यतर-त्वाश्रये व्याप्तिरेव नास्ति अतएव तेन रूपेण हेतुप्रयोगे व्याप्यसि-द्ध्यादिना वादिनो निग्रह इत्येवान्यतरत्वस्य व्याप्यतानवच्छेदकत्वे बीजं तदाश्रयस्य व्याप्यत्वे तस्यावच्छेदकताया आवश्यकत्वादित्य-भिप्रायोऽन्यतरत्वस्य व्याप्यतावच्छेदकतानिराकर्त्तुरिति भ्रमेण शङ्कते, मूले 'न चेति, भ्रमं निराकरोति, 'तदन्यान्यदिति। न च तदन्यान्यत्वं वह्निव्याप्यतावच्छेदकं इत्युक्तमिति, अन्यतरनिष्ठ-योर्विभिन्नाश्रयोर्धूमत्वालोकत्वाभ्यामेवावच्छेदात् प्रत्येकानवच्छे-द्यान्यतरत्वावच्छेद्यतया साधारणातिरिक्तव्याप्तेरज्ञानभ्युपगमात् इति भावः।

तत्त्वचिन्तामणिः।

न चैवं तदन्यान्यत्वाद्वह्निव्याप्यत्वमपि तव नानु-मेयं व्यर्थविशेषणत्वादिति वाच्यम्। एवत्वं हि तद-

न्यान्यत्वविशेषदर्शनाद्व्याप्यत्वज्ञानं जनयति, विशेषण-ज्ञान-विशेषण--विशेष्यसम्बन्ध-विशेषण--विशेष्येन्द्रियसन्निकर्ष-तदसंसर्गाग्रहविशेषदर्शनानां सत्त्वेन वह्निव्याप्यत्वप्रत्यक्षसत्त्वात् । नचैवं न प्रत्यक्षेऽपि तदन्यान्यत्व-ज्ञानं सहकारीति वाच्यम् । अन्वय-व्यतिरेकाभ्यां गुरोरपि तस्य विशेषदर्शनत्वेन प्रत्यक्षसहकारित्वात् तस्मात्तदन्यान्यत्वज्ञानं तत्र व्याप्यताज्ञानोपयोगि न तु साक्षादनुमितिहेतुरिति ।

दीधितिः ।

'अन्वयेति, विशेषदर्शनं हि विपरीतज्ञानविरोधितया प्रत्यक्ष उपयुज्यते तत्त्वज्ञान्यतरत्वदर्शनस्यापि व्यावर्तकधर्मदर्शनत्वेनाक्षतम्, अत्र च तदन्यान्यत्वस्यातिरिक्तत्वे धूमत्वत्वादेस्तदवृत्तित्वात् धूमत्वादिरूपत्वेऽपि च धूमत्वत्वादेरप्रवेशान्निष्प्रत्यूहत्वेऽपि न वैयर्थ्यमित्यपि द्रष्टव्यम् । एवञ्चान्यतरत्वस्य व्याप्यानवच्छेदकत्वे स्थिते तदवच्छेदेन तद्ग्रहोपगमे तवाप्यन्यथाख्याति-स्वीकारप्रसङ्गः ।

गादाधरी विवृतिः ।

व्यर्थविशेषणघटितधर्मस्य व्याप्यतानवच्छेदकत्वे धूमालोक-

भिन्नभेदवत् नत्वमपि न व्याप्यतावच्छेदकं तथाच व्यासेरव-च्छिन्नत्वनियमात् ताहगभेदे षष्ठिव्याप्तिनिरूपिता व्याप्तिरेव न सम्भवतीति तेन षष्ठिव्याप्यत्वमपि नानुमातुं शक्यते षष्ठिव्याप्ति-व्याप्यत्वेन पक्षधर्म्मतानिश्चयस्याप्ययोगात् इति भवन्मते षष्ठि-व्याप्तिप्रकारकपक्षधर्म्मतानिश्चयोऽपि तत्र दुर्घट इत्याशङ्कते, 'न चैवमिति।

ननु विशेषदर्शनसहकृतं प्रत्यक्षं तत्र व्याप्तिनिश्चायकं इत्य-युक्तं तदन्यान्यत्वस्याप्यव्याप्यतया तज्ज्ञानस्य विशेषदर्शनत्वा-सम्भवादिति पुनः शङ्कते, 'न चैवमिति, 'विशेषदर्शनत्वेन प्रत्यक्षमहकारित्वादिति समाधौ 'विशेषदर्शनत्वेनेत्यस्य व्याप्य-दर्शनत्वेनित्यर्थकतोक्तक्रमेण न सम्भवतीति व्याप्यदर्शनसाधारण-विपरीतज्ञानविरोधित्वेनित्यर्थकतां तस्याह, दीधितौ 'विशेष-दर्शनमिति, 'व्यावर्त्तकधर्म्मदर्शनत्वेनेति ग्राह्यविरोधिधर्म्मदर्शनत्वे-नेत्यर्थः। समानाधिकरणव्याप्यतावच्छेदकान्तरघटितमेव न व्याप्यतावच्छेदकमित्याशयेनान्यतरत्वस्य व्याप्तिव्याप्यतावच्छेद-कत्वं स्वयं व्यवस्थापयति, 'अत्र चेति, अन्यतरत्वस्य धूमत्वादिरूपत्वे तत्त्वस्यानवच्छेदकत्वेऽपि धूमत्वादिना व्याप्यतया व्याप्तिप्रका-रकपक्षधर्म्मताधीहेतुतावादिनां व्याप्यनुमानं निराबाधमित्यपि बोध्यम्। अन्यतरत्वस्य व्याप्यनवच्छेदकत्वेऽपि तदवच्छेदेन तद्-ग्रहादनुमितिर्भविष्यतीति शङ्का निराकुरुते, 'एवञ्चेति। ननु गौरवमात्रं न व्याप्यवच्छेदकत्वे बाधकं तथा सति मात्रादिना गवादेर्हेतुतानिर्वाहप्रसङ्गः किन्तु व्यर्थविशेषणघटितत्वमेव धूम-

त्वादेश प्रत्येकमुभयासंग्राहकत्वात् उभयसंग्रहप्रयोजकस्य धर्मस्य न वैयर्थ्यम् । वस्तुतस्तु अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वावगाहि-ज्ञानमेव कारणं अतएवानुमितिजनकतया तन्मतसिद्धज्ञानद्वय-काले धूमत्वदर्शनस्यावच्छेदकदर्शनतया अयं धूमो वह्निव्या-प्योन वेति शङ्काविरोधित्वमप्युपपद्यते गुरोरपि च तादृशावच्छे-दकत्वमप्यतमवेति ।

तत्त्वचिन्तामणिः ।

किञ्च वह्निव्याप्यवानयमिति शाब्दज्ञाने व्याप्यत्व-ज्ञानं कारणमित्यन्यत्रापि तथा । अथ वह्निव्याप्य-त्वमपि वह्निव्याप्यतावच्छेदकं तथाहि वह्निनिरूपिता धूमादिप्रत्येकवृत्तिरेव व्याप्तिर्व्याप्तित्वेन सकलधूमादि-वृत्तिव्याप्त्यवच्छेदिका आश्रयभेदेनावच्छेदकभेदेन च व्याप्तिभेदादिति चेन्न, सकलधूमादिवृत्तिव्याप्तौ माना-भावात् यच्च वह्निव्याप्यस्तत्र वह्निरिति व्याप्तिबुद्धौ शाब्दव्याप्यत्वबुद्धौ च प्रत्येकवृत्तिव्याप्त्याश्रयत्वस्यैव-विषयत्वात् प्रत्येकवृत्तिव्याप्तिज्ञानं विना तद्बोधा-भावात् ।

दीधितिः ।

अस्तु वा गुरुरपि धर्मोऽवच्छेदकस्तथापि शुद्धव्या-

मिप्रकारकज्ञानस्थले व्यभिचारान्न तस्य हेतुत्वमित्याह, 'किञ्चेति, 'वह्नीत्यादि, व्याप्तेर्व्याप्यनवच्छेदकत्वादिति भावः। 'मानाभावादिति, वस्तुतो विशेषव्याप्यावच्छिन्ना महाव्याप्तिरतिरिच्यतां किं तेन, न हि वस्तुतो व्याप्यावच्छेदकप्रकारकं पक्षधर्मताज्ञानं हेतुरतिप्रसङ्गात् परन्तु यदवच्छेदेन व्याप्तिर्गृह्यते तत्प्रकारकम्।* न च तदानीं व्याप्यावच्छेदेन व्याप्तिर्गृह्यते, न च तद्ग्रहेऽनुमितिरपलपनीया, मानाभावात् कल्पत्वाविशेषे लघुरूपावच्छिन्नस्यैव नियतपूर्ववर्त्तितायाः कल्पयितुं युक्तत्वात्।

गादाधरी विवृतिः।

अयमालोको धूमो वेत्यादिसन्देहदशायां नानुमित्यनुपपत्तिरित्याशङ्कायाः प्रथमकल्पे सत्त्वात् तदेव 'किञ्चेत्यादिदूषणान्तरानुसरणे बीजमिति सूचयितुं प्रथमदोषाभावाभ्युपगमं प्रकाशयन् 'किञ्चेत्यादेर्व्याप्यतावच्छेदकप्रकारकज्ञानहेतुत्वासम्भवपरतां स्फुटयति, 'यस्तु वेत्यादिना, एवञ्च मूले 'व्याप्यत्वज्ञानमित्यस्यावधारणपरतया व्याप्तिप्रकारकपक्षधर्मताज्ञानमेवेत्यर्थः, 'कारणं' फलोपधायकं, तथाच व्याप्यतावच्छेदकप्रकारकज्ञानव्यवच्छेदात् तद्धेतुतायां व्यभिचार इत्यर्थो लभ्यते व्याप्तिर्व्याप्यवच्छेदकत्वोपगमेनैतद्दोषस्य प्राक् समाहितत्वात् तस्यास्तथात्वि-

मनिराकृत्य प्रथमत एव तद्दोषदानमयुक्तं इत्यत आशयं पूरयति, 'व्याप्तेरिति, आत्माश्रयेणेत्यादिः, एतच्च स्वरूपसम्बन्धरूपावच्छेदत्वाभिप्रायेण, तदभिप्रायेणैव सामान्य विशेषव्याप्योर्भेदं व्यवस्थाप्य 'अग्नेत्यादिमूले तयोरवच्छेद्यावच्छेदकभावशङ्का, मूले 'सकलधूमादिवृत्तिव्याप्तौ मानाभावादिति, विशेषव्याप्तीना धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्वादीनां अनुगमकस्य व्याप्तित्वस्य दुर्निर्वचतया तासां व्याप्यन्तरावच्छेदकत्वासम्भवादिति भाव.। ननु व्यभिचारधीविरोधित्वमेव सकलविशेषव्याप्तीनामनुगमकं व्याप्तित्वं वह्निव्याप्यवानयमित्यादिशब्देनापि तादृशव्याप्तित्वेन व्याप्तय: पक्षधर्मांशे प्रकारतया प्रत्याय्यन्ते, एवं साध्याभाववदवृत्तित्वमपि स्वविशिष्टव्यापकताघटितव्याप्तेरवच्छेदकमिति तेन रूपेण यत्र शब्दाद्व्याप्यवगतिस्तत्राप्यनुमितिरुपपद्यत एव, एवं अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य स्वसाधारणतया तदनुसरणे न काचिदप्यनुपपत्तिरित्याशङ्क्य व्याप्तेर्व्याप्यतावच्छेदकत्वमभ्युपेत्यापि शाब्दपरामर्शजानुमितौ व्यभिचारमुपपादयति, 'वस्तुतः इति,'अतिरिक्तेतामित्यस्य स्वसाधारणमनतिरिक्तवृत्तित्वरूपमवच्छेदकत्व मांशीयतामिति शेष.(१)। 'अतिप्रसङ्गात्' धूमत्वावच्छेदेन व्याप्तिज्ञानरहितस्यापि धूमवानयमिति ज्ञानादनुमितिप्रसङ्गात्। 'गृह्यते' तत्कालीनग्रहविषय:, 'न च तदानीमिति यदा वह्निव्याप्यवानयमिति शब्द: श्रुयते इत्यर्थ., 'गृह्यत इत्यस्य पक्षधर्मता-

---

(१) अनुव्याप्तेयतामिति शेष इति पा०।

ग्रहकाले व्याप्तौ व्याप्यतावच्छेदकत्वग्राहकशब्दाभावादिति शेषः। 'अनुमितिरपलप्यतेति अनुमित्यभावः कल्पनीय इत्यर्थः, 'मानाभावात्' तत्कल्पकाभावात्, चक्षुरूपेण कारणतायां अप्रसिद्धा कारणाभावाभिधेति भावः। ननु तत्रापि स्मरणादिरूपतादृशव्याप्तिज्ञानसम्भवात् न व्यभिचारनिश्चय इत्यत आह, 'कल्पयेति, 'लघुरूपं' व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वं, अयञ्च 'अपि चेत्यादिमूलस्यैवार्थः, इति तत्कल्प एव निर्भरो दर्शितः।

दीधितिः।

एतेन व्याप्तिग्रहविषयधर्म्मिसमवृत्तिधर्म्मप्रकारकं पक्षधर्म्मताज्ञानं हेतुरित्यपास्तम्। सामान्यलक्षणानङ्गीकारे धूमत्वादेरपि तथात्वायोगात् वह्निव्याप्यं सर्वं प्रमेयं धूमवान् पर्व्वत इति ज्ञानादप्यनुमितिप्रसङ्गाच्च। व्याप्तिसमानाधिकरणत्वेन तादृशधर्म्मभानोक्तौ च सा धूमव्यक्तिर्वह्निव्याप्येति ज्ञानसहिताद्दृक्षज्ञानात्तत्प्रसङ्गो वह्निव्याप्यवानिति शाब्दज्ञानासंग्रहः।

गादाधरी विवृतिः।

'एतेन' कारणीभूतसकलपक्षधर्म्मताज्ञानासंग्राहकत्वेनातिप्रसक्तत्वेन च, 'व्याप्तिग्रहेति, एतादृशस्य धर्म्मी व्याप्यतावच्छेदकधूमत्वादिरिव व्याप्तिरपीति न शाब्दपरामर्शासंग्रह इति भावः। धूमोवह्निव्याप्य इति निश्चयसहिताद् द्रव्यमानितिज्ञानादनुमिति-

वारणाय 'मात्रेति। प्रमेयसामान्यहेतुकवाच्यत्वाद्यनुमितिस्वीकारे स्वव्यापकतद्वृत्तिविषयताकत्वमेव तद्विषयमात्रवृत्तित्वं, केवलान्वय्यनुमानानभ्युपगमे तु तद्विषयान्याद्यवृत्तित्वमेव, यादृशरूपेण व्याप्तिग्रहविषयतानियतत्व तादृशनिष्ठावच्छेदकत्वान्यावच्छेदकत्वानिरूपकत्वं प्रकारतायां निवेश्यं अतो न धूमो वह्निव्याप्य इति ज्ञानदशायां जातित्वादिना धूमत्वादिप्रकारकज्ञानात्प्रतिप्रसङ्गः। स्वरूपतोधूमत्वादिप्रकारकज्ञानसंग्रहाय तादृशरूपावच्छिन्नत्वमुपेक्षितं, 'तथात्वायोगात्' वह्न्यादिव्याप्तिग्रहविषयमात्रवृत्तित्वासम्भवात्, सामान्यप्रत्यासत्तिं विना सकलधूमादीनां व्याप्तिग्रहे भानासम्भवादिति भावः। 'आदिपदेन सकलधूमादिवृत्तिव्याप्तेरपि परिग्रहः, एतावता धूमत्वादिप्रकारकस्य व्याप्तिप्रकारकस्य च पक्षधर्मतागृहस्यासंग्रहो दर्शितः। अतिप्रसङ्गं दर्शयति, 'वह्निव्याप्यमिति, धूमत्वे व्याप्तिग्रहविषयतानियतत्वनिर्व्यूढकस्य व्याप्तिग्रहे सकलवह्निव्याप्यविषयकत्वस्य लाभाय 'सर्वमिति, एतच्च ज्ञानं अनुमित्यादिरूपं, सामान्यप्रत्यासत्तिमनङ्गीकुर्वतां तेषां प्रत्यक्षे सकलवह्निव्याप्यभानासम्भवात्। सामान्यप्रत्यासत्त्यभ्युपगमपक्षे वा दूषणमिदं, अन्यथाख्यातिमनङ्गीकुर्वतां सर्वस्मिन् वह्निव्याप्तिविषयकज्ञानासम्भवात्। अन्यथाख्यातिस्वीकारे च तादृशान्यथाख्यातिकाले धूमवान् पर्वत इत्यादिज्ञानादनुमितेरिष्टत्वात्। वह्निव्याप्यत्वस्य स्वसमनियतसर्वैक्यधर्मितावच्छेदकतापन्नस्य उद्देश्यतावच्छेदकत्वं सूचयितुं 'प्रमेयमिति विधेयवाचकपदान्तरनिर्देशः, धूमत्वावच्छेदेन व्याप्तिज्ञानद-

पक्षधर्मे व्याप्तौ व्याप्यतावच्छेदकत्वघटकज्ञानाभावादिति शिवः। 'धूमत्वादिरयमर्थो' धूमत्वादेरयमर्थः, 'ज्ञानाभावात्' तत्तत्त्वज्ञानाभावात्, तद्धर्मिक व्याप्यतायां धूमनिष्ठा कारणताभावादिति भावः। ननु तत्तदि तत्तदवच्छेदकवत्ताज्ञानं व्याप्तिग्रहणसम्भवात् न व्याप्तिधारणिरयत्र कारणं वाच्यं, 'ज्ञानत्वेति, 'तत्तदर्थं' व्याप्तिप्रकारकपक्षधर्मतायाज्ञानत्वं, अयञ्च 'यदि वह्न्यादि-मूलश्चैवार्थः, इति तत्त्व एव निर्णयो दर्शितः।

दीधितिः।

एतेन व्याप्यवदवृत्तिधर्मावच्छिन्नधर्मप्रकारकं पक्षधर्मताज्ञानं हेतुरित्यपास्तम्। सामान्यलक्षणाङ्गीकारे धूमत्वादेरपि तथात्वायोगात् वह्निव्याप्यं सर्वं प्रमेयं धूमवान् पर्वत इति ज्ञानादप्यनुमितिप्रसङ्गाच्च। व्याप्तिसमानाधिकरणत्वेन तादृशधर्मभानोक्तौ च सा धूमव्यक्तिर्वह्निव्याप्येति ज्ञानसहितादुक्तज्ञानात्तत्प्रसङ्गो वह्निव्याप्यवानिति शाब्दज्ञानासंग्रहः।

गादाधरी विवृतिः।

'एतेन' कारणीभूतसकलपक्षधर्मताज्ञानासंग्राहकत्वेनातिप्रसक्तत्वेन च, 'व्याप्यवदिति, एतादृशय धर्मो व्याप्यतावच्छेदक-धूमत्वादिरिव व्याप्तिरपीति न शाब्दपरामर्शांशसंग्रह इति भावः। धूमोवह्निव्याप्य इति नियतसहितात् द्रव्यवानितिज्ञानादनुमिति-

वारणाय 'मात्रेति। प्रमेयसामान्यहेतुकवाच्यत्वाद्यनुमितिस्वीकारे स्वव्यापकतद्वृत्तिविषयतात्वमेव तद्विषयमात्रवृत्तित्वं, केवलान्वय्यनुमानानभ्युपगमे तु तद्विषयान्याहृत्तित्वमेव, तादृशरूपेण व्याप्तिग्रहविषयतानियतत्व तादृशनिष्ठावच्छेदकत्वान्यावच्छेदकत्वानिरूपकत्वं प्रकारतायां निवेश्यं अतो न धूमो वह्निव्याप्य इति ज्ञानदशायां जातित्वादिना धूमत्वादिप्रकारकज्ञानादतिप्रसङ्गः। स्वरूपतोधूमत्वादिप्रकारकज्ञानसंग्रहाय तादृशरूपावच्छिन्नत्वमुपेक्षितं, 'तथात्वायोगात्' वह्न्यादिव्याप्तिग्रहविषयमात्रवृत्तित्वासम्भवात्, सामान्यप्रत्यासत्तिं विना सकलधूमादीनां व्याप्तिग्रहे भानासम्भवादिति भावः। 'आदिपदेन सकलधूमादिवृत्तिव्याप्तेरपि परिग्रहः, एतावता धूमत्वादिप्रकारकस्य व्याप्तिप्रकारकस्य च पक्षधर्मताग्रहस्यासंग्रहो दर्शितः। अतिप्रसङ्गं दर्शयति, 'वह्निव्याप्यमिति, धूमत्वे व्याप्तिग्रहविषयतानियतत्वनिर्व्वाहकस्य व्याप्तिग्रहे सकलवह्निव्याप्यविषयकत्वस्य लाभाय 'सर्व्वमिति, एतच्च ज्ञानं अनुमित्यादिरूपं, सामान्यप्रत्यासत्तिमनङ्गीकुर्व्वतां तेषां प्रत्यक्षे सकलवह्निव्याप्यभानासम्भवात्। सामान्यप्रत्यासत्त्यभ्युपगमपक्षे वा दूषणमिदं, अन्यथाख्यातिमनङ्गीकुर्व्वतां सर्व्वस्मिन् वह्निव्याप्तिविषयकज्ञानासम्भवात्। अन्यथाख्यातिस्वीकारे च तादृशान्यथाख्यातिकाले धूमवान् पर्व्वत इत्यादिज्ञानादनुमितेरिष्टत्वात्। वह्निव्याप्यत्वस्य स्वसमनियतसर्व्वत्वधर्म्मितावच्छेदकतापन्नस्य उद्देश्यतावच्छेदकत्वं सूचयितुं 'प्रमेयमिति विधेयवाचकपदान्तरनिर्देशः, धूमत्वावच्छेदेन व्याप्तिज्ञानद-

गायां तज्ज्ञानादनुमितेरिष्टत्वात् धूमलांशे व्याप्तेः सामानाधिकरण्यमात्रावगाहितां सूचयितुं धूम इत्यनभिधाय 'सा धूमव्यक्तिरिति, 'शाब्दज्ञानासंग्रह इति वह्निव्याप्यवानित्यादिशब्दस्य व्याप्तेरवच्छेदकताया इव सामानाधिकरण्यस्याप्यबोधकत्वादिति भावः ।

दीधितिः ।

अतएव व्याप्तिभानांशे प्रकारतया यल्लाङ्गो-धर्म्मीभासते तत्प्रकारकं पक्षधर्म्मताज्ञानं हेतुः वह्नि-व्याप्यवानित्यत्र च वह्निव्याप्यत्वमेव तथा, धूमवानित्यादौ च धूमत्वादिकं धूमसमानाधिकरणेत्यादिव्याप्तिज्ञाने तस्यापि प्रकारत्वादिति परास्तम् । धूमसमानाधिकरणवह्निव्याप्यं सर्व्वं प्रमेयं धूमवानयं प्रमेयत्वव्याप्यं सर्व्वमभिधेयं समानाधिकरणवांश्चायमित्यादिज्ञानादप्यनुमित्यापत्तिः । न च धूमत्वादेरतिरिक्तावृत्तित्वग्रहे स एव प्रतिबन्धकस्तद्ग्रहे त्वनुमितापत्तिरिति वाच्यम् । एवम्विधेष्टापत्त्यैव सर्व्वत्र प्रतीकारे विशेषणानुसरणवैयर्थ्यात् व्यभिचाराग्रह-पक्षधर्म्मताज्ञानयोरेव हेतुत्वस्य सुवचत्वात् ।

गादाधरी विवृतिः ।

'अतएव' अतिप्रसङ्गस्य दुर्वारत्वादेव, 'व्याप्तिभानांशे इत्या-देर्व्याप्तिप्रकारतान्तर्गतप्रकारतार्थयो यो व्याप्तिग्रहविषयतानियतो धर्म इत्यर्थः, वह्निव्याप्यं सर्वं प्रमेयं धूमवान् पर्वत इत्युत्तरज्ञान-वारणाय निरुक्तप्रकारतार्थयत्वं धर्मविशेषणं, धूमो वह्निव्याप्यः अभाववानयमित्यादिज्ञानवारणाय च व्याप्तिग्रहविषयतानियतत्वं उपात्तं, 'तया' तादृशोधर्मः, व्याप्तिप्रकारतान्तर्गतत्वस्य भेदाभे-दसाधारणत्वात् इति भावः। 'धूमत्वादिकं' 'तथेत्यनुषङ्गेणा-न्वयः। 'धूमसमानाधिकरणेत्यादीति साध्याभाववदवृत्तित्वरूप-व्याप्तिग्रहस्थले च ज्ञानद्वयादनुमितिर्मयापि न स्वीक्रियते इति भावः। 'वह्निव्याप्यं सर्वमित्यत्र तदभाववद्वृत्तित्वरूपव्याप्ति-ज्ञानमेव विवक्षितं धूमव्यापकवह्निसमानाधिकरणवृत्तिधूम-त्वादिरूपव्याप्तिभाने धूमत्वादिप्रकारकपक्षधर्मताज्ञानादनुमिते-रिष्टत्वात्, तथाच वह्नित्वमावस्य साध्यतावच्छेदकत्वे धूमत्वादेर्न व्याप्तिप्रकारतान्तःपातिप्रकारतार्थयत्वं अतो धूमसमानाधिकर-णवह्नित्वावच्छिन्नस्य साध्यत्वानुधावनं, साध्यतावच्छेदकप्रकारता-नन्तःपातित्वेन व्याप्तिप्रकारताविशेषणे उक्तस्थले दोषाभावा-दाह, 'प्रमेयत्वव्याप्यमिति, अत्र चाभिधेयत्वावच्छिन्नव्यापक-प्रमेयत्वसमानाधिकरणाभिधेयत्वरूपव्याप्तिरभिप्रेता न तु साध्या-भाववदवृत्तित्वविशिष्टसाध्यसामानाधिकरण्यरूपा साध्याभावव्या-प्तिर्नैयायिकैरन्यथाख्यात्यनभ्युपगमात् भ्रमात्मकतादृशव्याप्ति-ज्ञानमादाय तन्मते ऽतिप्रसङ्गाभावात् न वा समानाधिकरणत्वाव-

च्छिन्नव्यापकसाध्यसामानाधिकरण्यरूपा तादृग्व्यापकतायच्छेदकतायां(१) समानाधिकरणत्वप्रकारकज्ञानादनुमितिस्तेषामिष्टत्वात्। 'अतिरिक्तवृत्तित्वग्रहे' व्याप्तिशून्यवृत्तित्वग्रहे, 'अनुमितावि'ति, वह्नि-व्याप्यं सर्वं प्रमेयं धूमवान् पर्वत इत्यादिज्ञानादित्यादिः, 'एवम्बि-धेष्टापत्त्यैवे'ति व्याप्तिग्रहविषयधर्म्मिवृत्तिधर्म्मप्रकारकपक्षधर्म्मताज्ञा-नत्वेनैवानुमितिहेतुता वह्निव्याप्यो धूमो द्रव्यवान् पर्वत इत्यादौ द्रव्यत्वादावतिरिक्तवृत्तित्वग्रहे स एव प्रतिबन्धकः तदग्रहेऽनुमिता-विष्टापत्तिरित्यपि वक्तुं शक्यतया व्याप्तिग्रहविषयधर्म्मिमात्रवृत्ति-धर्म्मप्रकारकत्वादिविशेषणवैयर्थ्यापातादित्यर्थः, अनेष्टापत्तौ प्रति-बन्धकान्तरमाह, 'व्यभिचारादि'ति, 'एवकारेण व्याप्तिज्ञानहेतुता-व्यवच्छेदः व्याप्तिज्ञानशून्यतादशायां व्यभिचारग्रहे तद्दशानुमिता-विष्टापत्तिसम्भवात्, यदि च व्यभिचाराव्यभिचारयोर्द्वयोरेव यत्ता-ग्रहस्तत्रानुमितेरनुभवविरुद्धत्वान्न चेष्टापत्तिः सम्भवतीत्युच्यते तदा प्रमेयत्वव्याप्यं सर्वमित्यादिज्ञानादप्यनुमितिरनुभवविरुद्धत्वात् प्रकृतेऽपीष्टापत्तिर्न सम्भवतीति भावः।

दीधितिः।

किञ्च पुरुषान्तरस्य तस्यैव वा कालान्तरे वर्त्त-मानं व्याप्तिग्रहमादायातिप्रसङ्गस्य भङ्गाय स्वसमान-कालीनस्वसमानाधिकरणव्याप्तिग्रहविषयधर्म्मिमात्रवृत्ति-धर्म्मप्रकारकं पक्षधर्म्मताज्ञानं वाच्यं तथा च स्वत्व-

---

(१) तादृग्व्याप्तिग्रहतायामिति पा०।

स्याननुगतत्वात्कारणतावच्छेदकस्य तत्तद्व्यक्तिमात्रपर्य्य-
वसायित्वे मिथोव्यभिचारः तत्तत्पक्षधर्म्मताज्ञानत्वेनैव
हेतुत्वसम्भवेऽधिकवैयर्थ्यञ्च ।

गादाधरी विवृतिः ।

ननु व्याप्तिप्रकारतानिरूपिता या संसर्गता तन्निरूपिता या विशेष्यवृत्तिविषयता तन्निरूपिता या विषयता तन्निरूपकीभूतो यो व्याप्तिग्रहविषयभावृत्तिधर्म्मस्तत्प्रकारकपक्षधर्म्मताज्ञानत्वेन हेतुता वाच्या तादृशधर्म्मौ व्याप्तिः धूमव्यापकवह्निसमानाधि-करणधूमत्वादिरूपव्याप्तौ हेतुतावच्छेदकीभूतधूमत्वादिर्न तु तद्घटकसामानाधिकरण्यादिकं,साध्याभाववदवृत्तित्वादिरूपव्याप्ति-घटकाभावमादायातिप्रसङ्गभङ्गाय व्याप्तिग्रहविषयभावृत्तित्वोपा-दानं वृत्ति नोक्तापत्तीनामवकाशः वृत्यतो दूषणान्तरमाह,'किञ्चेति, 'कालान्तर वृति, कारणतावच्छेदककोटिप्रविष्टलिङ्गादीनां अती-तत्वदशायामपि अनुमितेरुत्पत्त्या प्रसक्ते कारणतावच्छेदकविशिष्ट-प्राक्सत्तायाः कार्य्यजनने नियामकत्वासम्भवादतिप्रसङ्गो बोध्यः । 'स्वसमानकालीनेति स्वघटवृत्तीत्यर्थः, स्वपदं फलोपधायकत्वेना-भिमततत्तत्पक्षधर्म्मताज्ञानव्यक्तिपरं, 'वाच्यमिति हेतुतया स्वीका-र्य्यमित्यर्थः, तादृशपक्षधर्म्मताज्ञानत्वेनेत्यादिः, व्याप्तिज्ञानोत्पत्ति-द्वितीयक्षणोत्पन्नपक्षधर्म्मताज्ञानात् व्याप्तिज्ञाननाशेऽपि अनुमिति-रित्यत्र स्वीक्रियते वृति बोध्यम् । तत्तत्पक्षधर्म्मताज्ञानत्वेन हेतुत्वसम्भव वृति फलोपधायकीभूतपक्षधर्म्मताज्ञाननिष्ठानां तत्त-

च्छिन्नव्यापकसाध्यसामानाधिकरण्यरूपा नाद्यव्यापकसाध्यघटद-
शायां(१) समानाधिकरणत्वप्रकारकज्ञानादनुमितिहेतोपामिष्टत्वात्।
'अनिरुक्तप्रवृत्तित्वग्रहे' व्याप्यगृह्यप्रवृत्तित्वग्रहे, 'अनुमितावपि, वह्नि-
व्याप्यं सर्वं प्रमेयं धूमवान् पर्व्वत इत्यादिज्ञानादित्यादिः, 'एतस्मि-
न्नेवेष्टापत्त्यैवेति व्याप्तिग्रहविषयधर्म्मिनिरूपितधर्म्मप्रकारकपक्षधर्म्मताज्ञा-
नत्वेनैवानुमितिहेतुता वह्नियाप्यो धूमो द्रव्यवान् पर्व्वत इत्यादौ
द्रव्यत्वादावतिरिक्तप्रवृत्तित्वग्रहे स एव प्रतिबन्धकः तदग्रहेऽनुमिता-
विष्टापत्तिरित्यपि वक्तुं शक्यतया व्याप्तिग्रहविषयधर्म्मिमात्रवृत्ति-
धर्म्मप्रकारकत्वादिविशेषणवैयर्थ्यापातादित्यर्थः, अत्रेष्टापत्तौ प्रति-
बन्धान्तरमाह, 'व्यभिचाराग्रहेति, 'एवकारेण व्याप्तिज्ञानहेतुता-
व्यवच्छेदः व्याप्तिज्ञानगुण्यतादशायां व्यभिचाराग्रहे तद्ग्रानुमिता-
विष्टापत्तिसम्भवात्, यदि च व्यभिचाराव्यभिचारयोर्द्वयोरेव यत्रा-
ग्रहस्तत्रानुमितेरनुभवविरुद्धत्वात्र तत्रेष्टापत्तिः सम्भवतीत्युच्यते तदा
प्रमेयत्वव्याप्यं सर्व्वमित्यादिज्ञानादप्यनुमितेरनुभवविरुद्धत्वात् प्रकृते
ऽपीष्टापत्तिर्न सम्भवतीति भावः ।

दीधितिः ।

किञ्च पुरुषान्तरस्य तस्यैव वा कालान्तरे वर्त्त-
मानं व्याप्तिग्रहमादायातिप्रसङ्गस्य भङ्गाय स्वसमान-
कालीनस्वसमानाधिकरणव्याप्तिग्रहविषयधर्म्मिमात्रवृ-
त्तिधर्म्मप्रकारकं पक्षधर्म्मताज्ञानं वाच्यं तथा च स्वत्व-

---

(१) साध्यव्याप्तिपक्षतावच्छिन्नेति पा० ।

स्यानुगतत्वात्कारणतावच्छेदकस्य तत्तद्व्यक्तिमात्रपर्य्यवसायित्वे मिथोव्यभिचारः तत्तत्यक्षधर्म्मताज्ञानत्वेनैव हेतुत्वसम्भवेऽधिकवैयर्थ्यञ्च ।

गादाधरी विवृतिः ।

ननु व्याप्तिग्रहप्रकारतानिरूपिता या संसर्गता तन्निरूपिता या विशेष्यवृत्तिविषयता तन्निरूपिता या विषयता तन्निरूपकीभूतो यो व्याप्तिग्रहविषयमात्रवृत्तिधर्म्मस्तत्प्रकारकपक्षधर्म्मताज्ञानत्वेन हेतुता वाच्या तादृशधर्म्मौ व्याप्तिः धूमव्यापकवह्निसमानाधिकरणधूमत्वादिरूपव्याप्तौ हेतुतावच्छेदकीभूतधूमत्वादिस्य न तु तद्घटकसामानाधिकरण्यादिकं,साध्याभाववदवृत्तित्वादिरूपव्याप्तिघटकाभावमादायातिप्रसङ्गभङ्गाय व्याप्तिग्रहविषयमात्रवृत्तित्वोपादानं इति नोक्तापत्तीनामवकाशः इत्यतो दूषणान्तरमाह,'किञ्चेति, 'कालान्तर इति, कारणतावच्छेदककोटिप्रविष्टलिङ्गादीनां अतीतत्वदशायामपि अनुमितेरुत्पत्त्या प्रकृते कारणतावच्छेदकविशिष्टप्राक्सत्तायाः कार्य्यजनने नियामकत्वासम्भवादतिप्रसङ्गो बोध्यः । 'स्वसमानकालीनेति स्वत्वपक्षधर्म्मतेत्यर्थः, स्वपदं फलोपधायकत्वेनाभिमततत्तत्पक्षधर्म्मताज्ञानव्यक्तिपरं, 'वाच्यमिति हेतुतया स्वीकार्य्यमित्यर्थः, तादृशपक्षधर्म्मताज्ञानत्वेनेत्यादिः, व्याप्तिज्ञानोत्पत्तिद्वितीयक्षणोत्पन्नपक्षधर्म्मताज्ञानात् व्याप्तिज्ञाननाशेऽपि अनुमितिरेतन्मते स्वीक्रियते इति बोध्यम् । तत्तत्पक्षधर्म्मताज्ञानत्वेन हेतुत्वसम्भव इति फलोपधायकीभूतपक्षधर्म्मताज्ञाननिष्ठानां तत्त-

द्यतित्वानां किञ्चिदविशेषितानामेव हेतुतावच्छेदकत्वसम्भव-
इत्यर्थः। यथाश्रुते तत्तद्व्यक्तित्वनिवेशस्यावश्यकत्वे पक्षधर्मता-
ज्ञानत्वनिवेशे प्रयोजनविरहादसङ्गतेः। 'अधिकवैयर्थ्यञ्चेति
तादृशधर्मप्रकारकत्वादिविशेषणवैयर्थ्यञ्चेत्यर्थः। इदमुपलक्षणं
तादृशरूपेण हेतुत्वेऽनन्तकार्यकारणभावप्रसङ्गेन महागौरवमपि
बोध्यम्। -

दीधितिः।

एतेन गृह्यमाणव्याप्यावच्छेदकतादौत्यादुपदर्शित-
प्रकारद्वयमपि प्रत्युक्तं वेदितव्यं एवं यद्धर्मावच्छेदेन
व्याप्तिज्ञानं तद्धर्मप्रकारकं पक्षधर्मताज्ञानं हेतुरि-
त्यपि परास्तम्। तत्तद्धर्मविश्रान्तमूर्त्तिकत्वेनाप्य-
ननुगतत्वाच्च।

गादाधरी विवृतिः।

'एतेन' उक्तरीत्या कारणतावच्छेदकस्य तत्तद्व्यक्तिमात्रपर्य्य
वसायितापातेन, 'एवमिति स्वसमानकालीनत्व-स्वसमानाधि-
करणत्वयोरन्यतरप्रवेशस्यावश्यकतया अननुगमेनेत्यर्थः, 'यद्धर्मा-
वच्छेदेनेति तद्धर्मावच्छिन्नव्याप्तिज्ञानसहिततद्धर्मप्रकारकपक्षधर्म-
ताज्ञानत्वावच्छिन्नमित्यर्थः, 'परास्तमिति, साहित्यस्य समान-
कालीनत्वात्मकत्वे स्वसमानाधिकरणत्वस्य सामानाधिकरण्यरूपत्वे
स्वसमानकालीनत्वस्य व्याप्तिज्ञानेऽवश्यं निवेशनीयत्वात् इति

भावः । एकक्षणावच्छिन्नैकाश्रयवृत्तित्वसम्बन्धेन तद्वत्त्वं यदि तत्साहित्यं तदा नैतादृशानुगम इत्यतः प्रकारान्तरेणानुगममाह, 'तत्तद्धर्मेति विशिष्य तत्तद्धर्मघटितत्वेनेत्यर्थः, 'अननुगतत्वादिति, तथाच धूमत्वादिप्रकारकपक्षधर्मताज्ञानस्यालोकत्वाद्यवच्छिन्नलिङ्गकानुमितौ व्यभिचारः तत्तद्धर्मावच्छिन्नलिङ्गकानुमितित्वस्य कार्यतावच्छेदकत्वोपगमेऽपि हेतुतावच्छेदकभेदेन कारणताबाहुल्यमिति भावः । यद्यपि हेतुतावच्छेदकघटितव्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानस्यैव हेतुतायाः केवलान्वयिसाधारणानुरोधेन वक्तव्यतया तस्य च हेतुतावच्छेदकमनन्तर्भाव्य कारणतायां दुष्कल्पतया नैयायिकमतेऽपि हेतुतावच्छेदकभेदेन परामर्शकारणताभेद आवश्यकः व्याप्यतावच्छेदकानवगाहिशाब्दपरामर्शादनुमित्यनुत्पादश्च समानः, तथापि निरुक्तधर्मापेक्षया व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वस्य लघुतया तेन रूपेण कारणताकल्पनमेवोचितमित्यत्र तात्पर्यम् ।

तत्त्वचिन्तामणिः ।

अपि च यत्र धूमत्व-व्याप्यत्वावैशिष्ट्यं प्रथमनेव प्रत्यक्षेन युगपत्पक्षधर्मे भासते तत्र लाघवात् व्याप्यत्वज्ञानत्वमेव कारणतावच्छेदकम् । न चैवमतिरिक्तविशिष्टज्ञानकारणत्वे गौरवं दोषाय, सप्रमाणकत्वात् कारणताग्रहदशायां फलमुखगौरवस्य सिद्धसिद्धिभ्यामदोषत्वात् ।

दीधितिः ।

यत्रेच्छा तत्साधनताज्ञानस्येच्छाहेतुत्वेऽपि समानमिति चेत् सत्यं, प्रतिबध्यते हि तत्र लघु-गुरु-रूपाभ्यां युगपदुपस्थितौ लघुरूपावच्छेदेनैव कारणत्वं कल्प्यते लाघवात् नियमादेरेकतररूपावच्छेदेनाप्यकृप्तत्वात् इत्याशयवानाह, 'अपि चेति। ननु स्वसमानाधिकरणाभावेत्यादिव्याप्तौ स्वपदार्थस्यैकस्याभावेन धूमादिकमेव विशिष्य उपादेयं तव च धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नवह्निसमानाधिकरणेत्यनवानयमिति ज्ञानाद्प्यनुमितिप्रसङ्गेन तादृशवह्निसमानाधिकरणधूमत्वं व्याप्तिस्वप्रकारकमेव च पक्षधर्मताज्ञानमननुगतमपि हेतुरिति वक्तव्यं तथा च यद्धर्मविशिष्टसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके गृह्यते तत्प्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वम्, अयं वह्निव्याप्यवान् धूमो वह्निव्याप्योऽयं धूमवान् वह्निर्धूमव्यापकोऽयं धूमवानित्यादिसकलविधिव्याप्यकत्वात् न तूपदर्शितव्याप्तिप्रकारकज्ञानत्वेनाव्याप्यकत्वात्।

गादाधरी विवृतिः ।

ननु यत्त्व-तत्त्वानुगमस्य दोषत्वे इष्टत्वेन फलसाधनताज्ञानस्य उपायेच्छाद्यहेतुत्वेन यत्नेच्छा तत्साधनताज्ञानं हेतुरितीष्टसाधनताज्ञानहेतुतापरिष्कारो मणिकृतां 'विरुद्धेयत इत्याशङ्कते, 'यत्नेच्छेति,'प्रतिबध्यत इति, तत्र गत्यन्तरविरहेण सुख-दुःखाभावत्वादिप्रकारकफलगोचरेच्छायास्तदवच्छिन्नसाधनताज्ञानस्य चानुगतेनापि तादृशेच्छात्वेन तादृशज्ञानत्वेन च हेतुता स्वीक्रियते कार्यतावच्छेदककोटौ चाव्यवहितोत्तरत्वसम्बन्धेन तत्तत्कारणतावच्छेदकावच्छिन्नवैशिष्ट्यं निवेश्य व्यभिचारो वारणीयः इच्छागता जातिविशेषा एव वा तत्तत्फलेच्छाजन्यतावच्छेदकतया स्वीक्रियन्ते नानाफलगोचरेच्छास्थले च नानेच्छाव्यक्तयः स्वीक्रियन्ते प्रयत्नवदिच्छायौगपद्यस्वीकारेऽपि क्षतिविरहात् इति भावः । ननु पर्वतवृत्तिधूमत्व-वह्निव्याप्योर्व्यैधिक्यं यत्र युगपदेव पक्षधर्मे भासते तत्र विशिष्टपरामर्शत्वावच्छिन्नस्यैव व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वावच्छिन्नस्याप्युपस्थितिरस्ति तथाच तेन रूपेणैव किञ्च हेतुत्वमुपेयते, एतन्मतेऽवच्छेदकलाघवबलात् तन्मतेऽपि नियमांशाकल्पनेन लाघवसत्त्वात् इत्याशङ्कां परिजिहीर्षुः 'अपिचेत्यादिमूलाशयमाह ; 'लघ्विति । 'नियमादेरिति आदिना अनन्यथासिद्धत्वपरिग्रहः, 'एकतररूपेति, उक्तग्राह्यपरामर्शस्थले यद्धर्मावच्छेदेन व्याप्तिज्ञानं तद्धर्मप्रकारकपक्षधर्मताज्ञानस्य नैयायिकमतासिद्धत्वादिति भावः । हेतुतावच्छेदकभेदेन कारणताभेदं नैयायिकमतेऽप्याशङ्क्य मीमांसकमते लाघ-

धमाग्रहे, 'नञ्चित्यादिना, 'विशिष्य' धूमत्वादिना। ननु धूमत्वादीनां विशिष्य व्याप्तिघटकत्वेऽपि किञ्चिद्ग्राहकज्ञानविषयतावच्छेदकत्वेनैव सामान्यतस्तद्विषयता कारणतावच्छेदककोटौ निवेशनीयेति न कारणतावच्छेदकानुगम इत्यत आह, 'तत्र चेति, धूमादिविषयतानां विशिष्य कारणतावच्छेदकेऽनिवेशे चेति शेषः, धूमादिविषयतानां विशिष्य निवेशेऽपि व्याप्तिशरीरे सामानाधिकरण्यानुयोगितावच्छेदकतया धूमत्वादीनां अनिवेशे उक्तज्ञानादनुमितिप्रसङ्गो दुर्वार एवेति तत्र धूमत्वादिकं तथा निवेश्य विशिष्य तत्प्रकारकत्वेन हेतुतां दर्शयति, 'ताहशेति, 'यद्धर्मविशिष्टेत्यादि तद्धर्मावच्छिन्नलिङ्गकानुमितौ तद्धर्मविशिष्टव्यापकतावच्छेदकतानिरूपितविशिष्टसाध्यतावच्छेदकविषयतायाग्निग्रहविशिष्टतद्धर्मप्रकारकपक्षधर्मतायत्नेनत्वेनैवेत्यर्थः। 'सकलवित्तिव्यापकत्वादिति, तथाच तद्धर्मावच्छिन्नस्य नियतपूर्ववर्त्तित्वमुभयमतसिद्धमेवेति एतन्मते कल्पनालाघवमनुसमेव, व्याप्यतावच्छेदकानवगाहिशाब्दज्ञानादनुमितिश्च नैयायिकानामप्यसिद्धैवानुमितिप्रयाजिकाया उक्तव्याप्तेर्व्याप्यतावच्छेदकघटितत्वात् इत्यभिप्रायः।

दीधितिः।

किञ्चान्यथाख्यातिवादिभिर्धूमादिसमानाधिकरणात्यन्ताभावाप्रतियोगिगगनसमानाधिकरणधूमादिमानयमिति ज्ञानादनुमित्यङ्गीकाराद्खण्डव्याप्तिग्राप्रसि-

इतया प्रकारत्वासम्भवात् साध्ये साधनव्यापकत्वग्राह-
कमधिकरणादौ च साध्यीयत्वाद्यवगाहि पक्षे च
तादृशसाधनवत्त्वावगाहि यज्ज्ञानं तत्त्वेन कारणत्वं
वाच्यं तथाच लाघवात्तादृशव्यापकत्व-पक्षधर्म्मत्वाव-
गाहितयोरेव कारणतावच्छेदकत्वमवृत्तित्वेऽनुरोधेन
व्यापकत्वस्यापि खण्डशो निरुक्तिस्तेषां परमतिरिच्यते,
यथा च सामानाधिकरण्यज्ञानस्य हेतुत्वेऽपि न क्षति-
स्तथा वक्ष्यते इति चेन्न, 'गृह्यमाणव्याप्यतावच्छेद-
कताकेत्यादिप्रकारद्वयोक्तदूषणग्रस्तत्वात् वह्न्यत्यन्ता-
भाववद्वृत्तिधर्म्मवानयमित्यादिज्ञानादप्यनुमित्युदयाच्च
व्यभिचारज्ञानविरोधिज्ञानविषयत्वेनैव व्याप्तीनामनु-
गमात् ।

गदाधरी विवृतिः ।

अत्र च कारणतावच्छेदकावच्छिन्नाव्यवहितोत्तरत्वघटितधर्म्म-
त्वेव जन्यतावच्छेदकत्वोपगमात्, तदवच्छिन्नियतपूर्ववर्त्तिता
विशिष्टपरामर्शत्वावच्छेदेनाप्युभयथादिसिद्धैव ज्ञानद्वयस्थलेऽतिरिक्त-
विशिष्टपरामर्शकत्वनागौरवस्य फलमुखत्वेनादौपत्वं मूलकृतैव वाच्य-
मित्याशङ्क्य मीमांसकमते कारणतावच्छेदकलाघवप्रणालीमाह,
'किञ्चेति । 'अखण्डव्याप्तेरिति उक्तविशिष्टपदार्थरूपाया व्याप्ते-

रित्यर्थः, 'प्रकारत्वासम्भवादिति, तथाच विशिष्टव्याप्तिप्रकारकत्वेन कारणतापि न सम्भवतीति भावः। 'साध्ये' साध्यतावच्छेदके, 'व्यापकत्वग्राहक' व्यापकतावच्छेदकत्वावगाहि, 'तादृगव्यापकत्व-पक्षधर्मत्वावगाहिस्तयोरेवेति हेतुसमानाधिकरणाभावप्रतियोगि-तानवच्छेदकत्वविशिष्टसाध्यतावच्छेदकरूपव्यापकत्वावगाहित्व हे-तुतावच्छेदकावच्छिन्नहेतुविशिष्टपक्षावगाहित्वयोरेवेत्यर्थः, 'एवका-रेणाधिकरणाद्यंशे साध्यावगाहित्वव्यवच्छेदः, कारणतावच्छेद-कत्वमुचितमिति शेषः। यद्यपि वह्न्यादिसाध्यकधूमादिहेतुकस्थले-ऽखण्डव्याप्तेः प्रसिद्धा व्याप्तिविशिष्टहेतुमत्ताज्ञानत्वेन कारणत्वं सुवचमेव साध्य-साधनभेदेन कारणभेदस्यावश्यकत्वात्। न चैव-मपि साध्यसामानाधिकरण्याग्रस्य व्याप्तिघटकतया कारणतावच्छेदककोटौ निवेशाधिक्येन गौरवं दुष्परिहरमेवेति वाच्यम्। भवन्मतेऽपि एकत्वावच्छिन्नसामानाधिकरण्यसम्बन्धेन एकज्ञान-वैशिष्ट्यस्यापरज्ञानांशे निवेशाधिक्यात् अन्यथा अखण्डव्याप्ति-प्रकारकत्वेन हेतुत्वेऽपि गौरवात् तन्निक्षेपस्य (१) अनुचितत्वात्। तथापि अन्यथाख्यातिवादिनां वह्न्याद्यधिकरणत्वादिना तदनधि-करणादिमात्रविषयकज्ञानादप्यनुमित्युत्पत्त्या अखण्डव्याप्तिविषय-कत्वेन वह्न्यादिसाध्यकानुमितावपि न हेतुता सम्भवतीत्यभिप्रायः। 'व्यापकत्वस्यापीति व्यापकतावच्छेदकत्वावगाहित्वस्यापीत्यर्थः, 'खण्डशोनिरुक्तिरिति अधिकरणांशे साधनावगाहि आधेयत्वांशे

---

(१) अखण्डत्वप्रतिक्षेपस्येत्यर्थः।

अधिकरणीयत्वावगाहीत्यादिक्रमेण कारणतावच्छेदकगर्भं निवेशनमित्यर्थः, अखण्डव्यापकत्वाप्रसिद्धा तदवगाहित्वस्य यथाश्रुतस्य निवेशासम्भवादिति भावः। 'तेषाम्' अन्यथाख्यातिवादिनां नैयायिकानामित्यर्थः, मीमांसकानां तत्र व्यापकताज्ञानासम्भवेनानुमितेरसिद्धेरिति भावः। न च केवलाभावत्वादिना साधनसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वादिज्ञानादनुमितिवारणायाधिकरणांशे धूमादिप्रकारकं आधेयत्वांशेऽधिकरणप्रकारकं इत्यादिक्रमेण व्यापकताज्ञाननिवेशनं मीमांसकानामप्यावश्यकमिति वाच्यम्। हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकविशिष्टपदार्थस्य विषयतासम्बन्धेन कारणतावच्छेदकत्वोपगमात् विशेष्य-विशेषणभावापन्नतावत्पदार्थानवगाहिज्ञाने विशिष्टनिरूपितविषयताविरहेण विषयतासम्बन्धेन तादृशविशिष्टवत्त्वाभावादुक्तातिप्रसङ्गासङ्गतेः, यादृशविशिष्टपदार्थस्य कारणतावच्छेदकत्वं तादृशविशिष्टाधिकरणस्यैव कार्योत्पादकत्वात्। नन्वत्र तन्मते साध्यसामानाधिकरण्यज्ञानस्यानुमित्यहेतुतया विरोधस्य हेत्वाभासतानुपपत्तिः अनुमितिजनकज्ञानाविरोधित्वादित्यत आह, 'यथा चेति, 'वक्ष्यत इति, व्यापकतापरामर्शविचार इति शेषः। 'तादृशमपीति व्यापकताज्ञानविशिष्टपक्षधर्मताज्ञानत्वेन पक्षधर्मताज्ञानविशिष्टव्यापकताज्ञानत्वेन वा हेतुत्वम् इत्यत्र विनिगमनाविरहरूपदूषणग्रस्तत्वादित्यर्थः। नन्वनुमितिं प्रति तद्धर्मावच्छिन्ननिरूपितव्यापकताज्ञानत्वेन तद्धर्मावच्छिन्नहेतुमत्पक्षज्ञानत्वेन च कारणता स्वीकि-

यते दण्ड चक्रादिवत् परस्परसङ्कारेण फलजननाद्यतिप्रसङ्गः। न च विशिष्टपरामर्शत्वेनैककारणत्वकल्पनापेक्षया कारणत्वद्वय-कल्पने गौरवमिति वाच्यम्। विशिष्टपरामर्शत्वेन हेतुतासति कारण-तावच्छेदककोटिप्रविष्टस्याधिकरणाद्यंशे साध्याव्यवगाहित्व-तदं-शीयाप्रामाण्यज्ञानविशेषानास्कन्दितत्वरूपाधिकविशेषणस्य तथा विधविशेषणान्तरैः सम मिथो विशेष्य-विशेषणभावे विनिगमना-विरहेण कारणताबाहुल्यस्य दुर्वारत्वादित्यतो दूषणान्तरमाह, 'वह्नित्वज्ञाभाववदहृत्तीति, 'अनुमित्युदयादिति, तथाच तटसंघाट्ट कतया नोक्तरूपेण हेतुतासम्भव इति भाव। ननु तादृशज्ञानान्न जायत एवानुमितिर्नैयायिकमतेऽपि केवलान्वयिसाधारण्यानुरो धेन व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानस्यैव हेतुतायां वक्तव्य त्वात् तत्रानुमित्यनुत्पादस्य तुल्यत्वादित्याशङ्क्य परिहरति, 'व्यभि चारेति, अन्वयव्यभिचारज्ञानप्रतिबन्धकतावच्छेदकत्वेन नाना विधव्याप्तिप्रकारता अनुगमय्य कारणतावच्छेदकगर्भं प्रवेश-नीया इत्यर्थः, तथाचाक्षाक तत्वानुमितिर्भवत्येव इति भाव। इदन्त्वापातत, तन्मतेऽपि तद्धर्मावच्छिन्नविशेष्यकव्यभिचारज्ञान प्रतिबन्धकत्वेन व्यापकताज्ञानस्य हेतुतायां वक्तव्यतया साध्या-भाववदवृत्तित्वरूपव्याप्तिज्ञानस्य सत्प्रतिपक्षसम्भवात् तादृशव्याप्तौ निर्धर्मितावच्छेदकज्ञानन्तु नैयायिकानामपि दुःसम्पाद्यं तादृश-ज्ञानीयव्याप्तिप्रकारतायां व्यभिचारज्ञानप्रतिबन्धकावच्छेदकता विरहात् तादृशप्रतिबन्धतावच्छेदकप्रकारितानिरूपकधर्मप्रकार-तात्वेन व्याप्तिप्रकारितायाः कारणतावच्छेदकत्वे प्रमेयत्वादिना

व्याप्तिप्रकारताकज्ञानादप्यनुमितिप्रसङ्गः, एवं व्यापकताज्ञानस्य साध्याभाववद्वृत्तित्वरूपव्यभिचारज्ञानं प्रति साध्याभाववद्वृत्तित्वज्ञानस्य साधनव्यापकताज्ञानं प्रति विरोधित्वे मानाभावादनुगम एवासम्भवः । साध्यसामानाधिकरण्यविषयतायां व्यापकतायच्छनिष्ठप्रतिबन्धकतावच्छेदककोटावनिवेशेन व्यापकसामानाधिकरण्यरूपव्याप्तिप्रकारितायां व्यभिचारज्ञानप्रतिबन्धकतावच्छेदकत्वञ्च दुर्घटम् अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशेऽपि च धूमव्यापकवह्निसमानाधिकरणेन्धनकालीनधूमवान् पर्व्वतइत्यादिज्ञानादनुमित्यापत्तेः ।

यत्तु व्यापकत्वज्ञान व्यापकत्वनिरूपकतावच्छेदकधर्म्मावच्छिन्नविशेष्यकव्यभिचारज्ञानं प्रत्येव प्रतिबन्धकं तत्प्रतिबन्धकतया च धूमादिव्यापकसाध्यसमानाधिकरणवृत्तिधूमत्वादिरूपव्याप्तिज्ञानधर्म्मितावच्छेदकधर्म्मान्तरावच्छिन्नविशेष्यताकव्यभिचारज्ञानस्य तादृशव्याप्तिज्ञानदशायां दुर्व्वारतया समानधर्म्मितावच्छेदकत्वप्रत्यासत्त्या व्यभिचारधियं प्रति तादृशव्याप्तिप्रकारकज्ञानत्वेन पृथक् प्रतिबन्धकत्वं कल्प्यते इति तादृशव्याप्तिप्रकारतायाः साध्याभाववदवृत्तित्वरूपव्याप्तिप्रकारतायाश्च व्यभिचारधीप्रतिबन्धकतावच्छेदकप्रकारतात्वेनानुगम्यानुमितिकारणतावच्छेदकत्वं सम्भवति एवञ्च व्याप्यंशे निर्धर्म्मितावच्छेदकताकज्ञानीयप्रकारतायाः अपि तादृशरूपेण संग्रहः सम्भवति, धर्म्मितावच्छेदकतायाः प्रत्यासत्तित्वे धर्म्मितावच्छेदकतानिरूपकत्वस्य व्याप्तिप्रकारतायामनिवेशादिति, तदपि न सम्यक्, धूमादि-

व्यापकसाध्यसमानाधिकरणहेत्विधर्म्मत्वादिज्ञानदशायां तद्विशेष्यतावच्छेदकावच्छिन्ने साध्याभाववद्वृत्तित्वज्ञानोपगमे चातिविरुद्धादिति।

वस्तुतस्तु यदि ज्ञानद्वयहेतुतावादिना व्यापकताधीर्हेतुरुपेयते तदा व्यापकत्वमपेक्ष्यापि लघुशरीरा साध्याभाववदवृत्तित्वरूपा व्याप्तिरेवानुमितिप्रयोजिका न्यायमते स्वीकार्या तत्प्रकारकपक्षधर्मताज्ञानत्वेन हेतुतावच्छेदकधर्म्मानिवेशेनैव हेतुतोपगन्तव्या तथाच हेतुतावच्छेदकभेदेन तेषां न कारणताभेदः, ज्ञानद्वयहेतुतावादिना तादृशव्याप्तेरनुमितिप्रयोजकत्वोपगमेऽपि साध्यव्याप्यो धूमः आलोकवान् पर्व्वत इत्यादिज्ञानद्वयादनुमितिप्रसङ्गवारणाय हेतुतावच्छेदकानां विशिष्य निवेशनीयतया तेषां लङ्घनेन कारणताङ्गीकृतिति विशिष्टपरामर्शत्वेन हेतुत्वमेव सम्यक्। यदि च केवलान्वय्यनुमानं नैयायिकानामनुपेक्षणीयमिति व्यापकसामानाधिकरण्यज्ञानमप्यनुमितिकारणं वाच्यमित्युच्यते तदा केवलान्वय्यनुमानपदार्थशोकभिर्म्मीमांसकैः कथं तादृशव्याप्तिमुपेक्ष्य व्यापकताया लाघवेन तज्ज्ञानपक्षधर्म्मताज्ञानयोः पृथक्कारणत्वं व्यवस्थाप्यायिष्यते इत्यादिरीत्या परमतं निराकार्य्यमधिकमन्यत्रानुसन्धेयम्।

दीधितिः।

नन्वत्र कारणे कार्य्यमेव प्रमाणं तच्च कार्य्य-कारणभावग्रहे सति स्यात् स एव तु न सम्भवति गौरव-

ज्ञानेन प्रतिबन्धादित्यत आह, 'कारणताग्रहेति कारणतानिर्णयं विना तत्फलस्य धर्म्मान्तरनिर्णयस्याभावेन तद्घटितगौरवस्यानिर्णयादित्यर्थः, सम्भाव्यते तावदिदं धर्म्मान्तरकल्पनं विना कारणत्वस्यैवाशक्यनिर्व्वाहत्वादिति चेत्, सम्भाव्यतां न तु तत् प्रतिबन्धकं, सामान्यतः कार्य्य-कारणभावग्रहस्य प्रायशो विलयप्रसङ्गात्। तत्र तत्र क्लृप्तनियतपूर्व्ववर्त्तितावच्छेदकरूपान्तरविरहिणागत्या गौरवमप्यास्थीयते इति चेदिहापि तद्विरहस्यासकृदावेदितत्वादिति कृतं पल्लवितेनेति।

गादाधरी विवृतिः।

विशिष्टपरामर्शरूपधर्म्मिणः सप्रमाणकत्वात् न तत्कल्पनं गौरवायेति यदुक्तं 'सप्रमाणकत्वादिति, मूले तत्राग्रहाद् युक्त्यन्तरमवतारयति, 'नन्विति, 'तच्च' कार्य्यस्य प्रमाणत्वञ्च, 'कार्य्यकारणभावग्रहे सतीति, अन्वयानुकूलतर्कानवतारेण व्यभिचारशङ्कया स क्वणोविशिष्टपरामर्शवान् अव्यवहितपूर्व्वत्वसम्बन्धेनानुमितिमत्त्वादिति रीत्या अनुमित्या ज्ञानद्वयस्थले विशिष्टपरामर्शानुमानासम्भवादिति भावः। 'तत्फलस्य' कारणतानिर्णयाधीनस्य, 'तद्घटितेति धर्म्मान्तरघटितित्यर्थः, विशिष्टपरामर्शत्वावच्छेदेन कारणताग्रहे विशिष्टपरामर्शत्वधर्म्मिकगौरवज्ञानं विरोधि तच्च गौरवं प्रमाणान्तरप्रसिद्धतत्तदनु-

मित्यव्यवहितपूर्वकालीनत्वाव्ययत्वादव्ययम् दुर्ज्ञेयमेवेति गौरवस्य तादृशधर्मिघटितत्वमित्यभिप्रायः (१)। गौरवनिर्णयासम्भवेऽपि गौरवसन्देहेन प्रतिबन्धात् न कारणतायहः सम्भवतीति आगङ्कते, 'सम्भाव्यत इति सन्दिह्यत इत्यर्थः। 'इदं' गौरवं, संशयप्रयोजकमाह, 'धर्म्यन्तरेति, 'अगत्यनिर्व्वाहत्वादिति, तथाच कारणतासंशयाच्चदुपपादकधर्म्मिणोऽपि संशयो भविष्यति, तत्संशयाहितगौरवसंशयेन प्रतिबन्धाच्च न कारणतानिर्णयः सम्भवतीति भावः। 'तत्' सम्भावनं, 'सामान्यतः' घटत्व-दण्डत्वादिसामान्यरूपेण, 'कार्य्य-कारणभावग्रहस्येति तन्निर्णयस्येत्यर्थः, 'प्रायशो विलयप्रसङ्गादिति। यत्र दण्डादिरूपकारणं कार्य्यानेयं तत्स्थलीयधर्म्मिघटितगौरवसंशयेन प्रतिबन्धसम्भवादिति भावः। यत्र च कार्य्याव्यवहितपूर्वक्षणे कारणतावच्छेदकावच्छिन्नसत्त्वं प्रमाणान्तरसिद्धं तत्र तादृशगौरवाभावात् 'प्रायश इत्युक्तं, 'तत्र तन्नेति घटत्वदण्डत्वादिना कार्य्य-कारणभावस्थल इत्यर्थः, 'गौरवमप्याधीयते' गौरवसन्देहोऽविरोधितया स्वीक्रियते।

तत्त्वचिन्तामणिः।

न चासन्निकृष्टे धूमे तदभावः, भवन्मतानुमिति-हेतुव्याप्तिस्मरण-धूमत्वज्ञानसहितेन मनसा तदुत्पादात्, यथा परमाणुर्निरवयवद्रव्यं नित्यपरिमाणवत्त्वात्

---

(१) तादृशधर्म्मान्तरघटितत्वमित्यभिप्राय इति पा०।

आकाशवदित्यादौ प्रत्येकानुमानोपनीतातीन्द्रियसाध्य-साधनयोराकाशवृत्तितया स्मरणे व्यभिचाराज्ञाने मनसा व्याप्त्यनुभवः, अनुमानयोः प्रत्येकतदुभयसह-चाराविषयत्वेन व्याप्तिग्राहकत्वात् । न चातीन्द्रिय-व्याप्यत्वमतीन्द्रियेऽनुमेयं, तत्रापि व्याप्तिग्राहकाभा-वात्। न च तदुपनयसहितस्य मनसोबहिरर्थप्रमाहेतुत्वे उपनयस्य प्रमाणान्तरत्वम्, इन्द्रियादेः सन्निकर्षवदुप-नयस्य नियतव्यापाराभावेन प्रमायामकरणत्वात् सह-कारिता च तदभावेऽपि भवति वहिरिन्द्रिय-लिङ्ग-सादृश्यादिव्यापारं विनापि चिन्तोपनीतपदार्थानां बाधकानवतारे मनसा संसर्गानुभवस्य सकलजन-सिद्धत्वात् कथमन्यथा कविकाव्यादिकमिति ।

दीधितिः ।

व्यभिचारनिर्णयेन कारणत्वग्रहासम्भवं निरस्यति, 'न चेति । 'अनुमानयोरिति, अनुमितैकसाध्यविशिष्टे साध्यान्तरानुमित्या सहचारग्रहोगपमेऽपि नियमांश-ग्रहासम्भवादिति भावः । 'नियतव्यापारेति एक-सम्बन्धिज्ञानाधीनसम्बन्ध्यन्तरस्मरणादितः क्वचिद्विशि-ष्टज्ञानोत्पत्तावपि नियतत्वेन न तस्य व्यापारत्वं, यं

वनयित्वैव यस्य यज्ञानकर्त्वं तस्यैव तत्र तज्ज्ञापयत्वा-
दित्यर्थः । वस्तुतस्तु तदुपनयव्यक्त्यादिस्तत्समाव्याप्तिं
प्रति कारणत्वेऽपि न घटितः प्रमा वैजात्यस्यैवात्र प्रमा-
णान्तरनिमित्तत्वात् ।

गादाधरी विवृतिः ।

विशिष्टपरामर्शत्वेन हेतुत्वमिष्टे 'न चेत्यादिना अवच्छिन्न-
धूमादौ विशिष्टपरामर्शांशभ्रमत्वग्रहनिराकरणस्य (१) तत्सिद्धरूप-
योगितामाविष्करोति, (२) 'व्यभिचारनिर्णयेनेति, सति लाघवे
व्यभिचारसंशयस्याकिञ्चित्करत्वान्निर्णयोपादानम् । ननु निरवय-
द्रव्यत्व नित्यपरिमाणयोरेकतरं हट्टात्ते प्रसाध्य तद्विशिष्टेऽपरानु-
मित्या तदुभयमानाधिकरण्यावगाहिन सुघटमेव अनुमिते
पक्षतावच्छेदक साध्यमानाधिकरण्यावगाहित्वस्य नियमात् इत्य-
नुमानणीत्यादिमूलानुसङ्गतिं इत्यत आह 'अनुमितेरेकेति,
'उपगमेऽपीत्यनेन व्याप्तिप्रकारकधियोऽनुमितिहेतुतया संसर्ग-
मर्यादया लक्ष्यमानाधिकरण्यावगाहित्वस्यानुमित्यनुपयो-
गित्व सूचितम् । एतेन पक्षतावच्छेदक साध्यतावच्छेदाव-
च्छेदकभावस्यानुमितौ संसर्गतया भानोपगमेऽपि न विरोधः,

---

(१) विशिष्टपरामर्शांशभ्रमत्वग्रहा निराकरणस्येति पा० ।

(२) विशिष्टपरामर्शत्वेन हेतुतामते लाघवेन व्याप्त्याधिताया मूलोपदर्शितायां अवच्छिन्नधूमादौ विशिष्टपरामर्शांशभ्रमत्वग्रहा अकिञ्चित्करत्व परिष्कारेति पा० ।

व्यापाराभावेन उपनायकज्ञाने प्रमाणत्व-तद्व्यवहारयोर्विरहेऽपि उक्तापादकसत्त्वाद्यविरोधाद्व्यभिचारेण व्याप्यसिद्धिरित्याशयेन पूर्वग्रन्थोपदर्शितापत्तिमुद्धरति, मूले 'नचैवमित्यादिना, 'नियत-व्यापाराभावेनेति मूलमसङ्गतं नियतव्यापारत्वपर्यन्तस्य करण-लक्षणेऽप्रवेशादतो व्यापाराभाव एवात्र विवक्षितः। व्यापारत्वन्तु नियतत्वनिर्व्वाह्यमित्यान्तरालिकस्य क्वचित्सम्भवेऽपि न तस्योप-नीतप्रमात्वावच्छिन्ने उपनयेन जननीये व्यापारतेत्येतत्सूचनाय मूले 'नियतपदमिति सूचयितुं व्याचष्टे, 'एकसम्बन्धीति हस्त्यादि-ज्ञान-तज्जन्यहस्तिपकस्मरणाभ्यां हस्तिपकादिविशिष्टहस्त्यादि-विषयकोपनीतज्ञानजननेपीत्यर्थः, तस्य मध्यवर्त्तिनः स्मरणस्य अनियतत्वेऽपि कथं न व्यापारतेत्यत आह, 'यमिति,'यं' यद्रूपाव-च्छिन्नं, 'यस्य' यद्रूपावच्छिन्नस्य, 'यज्जनकत्वं' यद्रूपावच्छिन्नजन-कत्वं' 'तस्यैव' तद्रूपावच्छिन्नस्यैव, 'तद्व्यापारत्वात्' तद्रूपावच्छिन्न-जनने तद्रूपावच्छिन्नव्यापारत्वात्। एतावतापि तत्तदुपनयव्यक्ते-स्तत्तदुपनीतभानव्यक्तित्वावच्छिन्नजनने तन्नियतत्तत्स्मरणादि-व्यक्तिव्यापारकत्वं दुर्व्वारमेवेत्यालोच्योपनयस्य प्रमाकरणत्वमभ्यु-पेत्य प्रमाणान्तरत्वं निराकरोति, 'वस्तुतस्त्विति, 'न चतिरिति, प्रत्यक्षप्रमाण एव तदन्तर्भावेन प्रमाणचातुर्व्विध्याव्याघातात् इति भावः। नन्विन्द्रियात्मकप्रत्यक्षप्रमाणे तदनन्तर्भावात् प्रमा-णान्तरत्वं तस्य दुर्व्वारमेवेत्यत आह, 'प्रमावैजात्येनैवेति, 'एव-कारेण प्रमाकरणतावच्छेदकभेदव्यवच्छेदः, 'प्रमाणान्तरत्वनिमि-त्तत्वात्' विभिन्नप्रमाणव्यवहारप्रयोजकत्वात्।

दीधितिः ।

न चाव (१) प्रमावैजात्यं अनुपलम्भवाधितत्वात् मानाभावाच्च, उपनयस्य च विशिष्टज्ञाने विशेषणज्ञानजन्यत्वेन प्रत्यक्षे च सन्निकर्षविधयोपयोगितया जात्यव्यवस्थापकत्वात् । अतएव वाह्याभ्यन्तरप्रत्यभिज्ञा-सादृश्याभावादिप्रत्यक्षाणां तत्ताप्रतियोग्यादिविषयत्वमन्यथा जातिसङ्करप्रसङ्गात्, ज्ञानद्वयकल्पने च स्थैर्यमात्मुच्छिद्येत, व्यवस्थापितश्च विशिष्टज्ञानस्य व्यवहारहेतुत्वम् । न च प्रमाणान्तरासहकृतोपनयजन्यतावच्छेदकतया वैजात्यसिद्धिः, इतरासहकृतत्वेनाजनकत्वात् असिद्धेश्च, उपनयात्मकसन्निकर्षवशेन मनसा प्रत्यक्षजननस्यैवोपगमात् ।

गादाधरी विवृतिः ।

ननु उपनयहेतुतावादिनां तज्जन्यज्ञाने तज्जन्यतावच्छेदकधर्मस्वीकारे आवश्यके स च लाघवाज्जातिविशेषरूप एवेति प्रमावैजात्यं दुर्व्वारमित्यत आह, 'न चेति, 'अत्र प्रमावैजात्यमिति उपनीतज्ञाने प्रत्यक्षव्याहृत्या जातिरित्यर्थः, सम्भवतीति शेषः । युक्तिमत्त्वे योग्यायामपि व्यक्तौ व्यञ्जकविरहेण उपपद्यमानो जात्य-

---

(१). क. चाक्षुषेति पाठान्तरं च. क. भूयोऽवयवसम्भवेति 'अत्र प्रमावैजात्यमितीति पाठधारणे भावुकितम् ।

नुपलम्भो न जातिबाधकः, अन्यथा संयोगादौ क्रियादिजन्यता-
वच्छेदकजातेरपि विनयप्रसङ्गादित्याशङ्क्य उपनयस्य जात्यन्तरा-
व्यवस्थापकत्वं व्यवस्थापयन् युक्त्यभावमेव बाधकं दर्शयति, 'माना-
भावादित्यादिना, 'विशेषणज्ञानत्वेनेति 'उपयोगितयेत्यन्वितेना-
न्वयः, तथाच विशिष्टज्ञानत्वं तज्जन्यतावच्छेदकं न तु जात्यन्तर-
मिति भावः। उपनेयविशेष्यकमानसानुरोधेन कल्पकारण-
त्वान्तरनिरूपितकार्यतावच्छेदकतया जात्यन्तरसिद्धेरावश्यकते-
त्याशङ्क्याह, 'सन्निकर्षविधयेति, तथाच प्रत्यक्षत्वमेतज्जन्यतावच्छे-
दकमिति भावः। ननु संयोगज्ञानादिसाधारणं सन्निकर्ष-
त्वमनुगतानतिप्रसक्तं दुर्वचमिति विशिष्यैव हेतुता वाच्या
तथाच ज्ञानजन्यतावच्छेदकं यदि प्रत्यक्षत्वमात्रमुच्यते तदा
लौकिकप्रत्यक्षे व्यभिचार इति संयोगाद्यजन्यप्रत्यक्षत्वमेव तथा
वाच्यम् एवञ्च संयोगाद्यजन्यत्वानिवेशप्रयुक्तलाघवेन वैजात्य-
सिद्धिर्दुर्वारेत्यत आह, 'अत एवेति उपनयस्य जातिविशेषाव-
च्छिन्नजनकत्वादेवेत्यर्थः, 'बाह्यप्रत्यभिज्ञा' स एवायं चैत्र इत्या-
दिका, 'अभ्यन्तरप्रत्यभिज्ञा' स एवाहमित्यादिरूपा, 'आदिपदाभ्यां
ज्ञानादि विषयादिपरिग्रहः, यथायोगमन्वयः, 'अन्यथा' उपनयस्य
जातिविशेषावच्छिन्नजनकत्वे, 'जातिसङ्करेति, किञ्चिद्विषये चक्षुः-
संयोगादिजन्यतया तत्र चाक्षुषत्वादेरेवावश्यकत्वात्तेन च समं
उपनयजन्यतावच्छेदकजातेर्व्याप्य-व्यापकभावासम्भवादिति भावः।
जातेरनाश्रिकतया विशेष्यीभूततत्तद्विषयकज्ञानस्य प्रत्यभिज्ञादौ
व्यभिचारप्रसङ्गाच्चेत्यपि बोध्यम्। तत्तेदन्त्वादिविशिष्टविषयकं तत्र

ज्ञानद्वयमेव भेदाग्रहमङ्गीकृतं विशिष्टव्यवहारादिनिमित्तं न लोकं ज्ञानं प्रती न जातिसङ्करादिप्रसङ्ग इत्यत आह, 'ज्ञानद्वयेति,'स्थैर्य-मात्रमिति, तस्य (१) पूर्वंगृहीतानुभूयमानयोरभेदप्रत्यभिज्ञैकप्र-माणकत्वादिति भावः। अनुमानादपि कुतश्चित् स्थैर्यसिद्धिसम्भवा-दाह,'व्यवस्थापितश्चेति, अन्यथाख्यातावितिशेषः। प्रत्यक्षमात्रप्र-समवहितज्ञानजन्यतावच्छेदकं वैजात्यन्तु न प्रत्यभिज्ञानादाविति न,सङ्कर इत्याशङ्क्ते,'न चेति,'अजनकत्वादिति, प्रत्यभिज्ञादौ तत्ता-दिभानार्थं चक्षुःसंयोगादिजन्यप्रत्यक्षे ज्ञानस्य स्वतन्त्रहेतुतायाः आवश्यकत्वात् तत एव सर्वांशोपनीतभानस्योपपत्तेरुक्तरूपेण हेतुत्वे मानाभावादिति भावः। ननु तदानीमिन्द्रियसंयोगादिघटितप्रत्य-क्षसामग्र्या अभावात् सर्वांशोपनीतभाने प्रत्यक्षत्वं न सम्भवतीति 'यज्जातीयप्रमासामग्रीविरहे' इत्यादिव्याप्तिबलात् प्रमावैजात्या-पत्तिर्दुर्वारेव। न च तादृशव्याप्तौ मानाभावः, तादृशोपनीतभाने प्रत्यक्षत्वासम्भवात्तत्रोपनायकज्ञानस्य स्वतन्त्रहेतुतायाः आवश्यक-त्वाज्जन्यतावच्छेदकधर्मं विना तदनुपपत्तेरेव मानत्वात् ज्ञानस्य जनकतायामेव प्रत्यक्षादिसामग्रीसमवहितत्वमवच्छेदकं भवतु तत्-सङ्कारि वैलक्षण्यदेतदित्यत आह, 'असिद्धेश्चेति, उपनीतभानस्थले प्रत्यक्षादिसामग्र्यभावस्यैवेत्यादिः, असिद्धिमेव विवृणोति, 'उप-नयेति, लौकिकसन्निकर्षस्य विषयिताविशेषावच्छिन्नं प्रत्येव जनकतया उपनीतभाने तादृशविषयिताविशेषानभ्युपगमेन न

---

(१) स्थैर्यमेवार्थः।

व्यभिचार इति भावः । न चांशिकोपनीतभाने उपनीतस्य प्रकार-तयैव भानोपगमाद्विशेषणज्ञानविधयैव तदुपनयज्ञानस्य हेतु-त्वात् सर्वांशोपनीतभाने जातिविशेषस्यैव तज्जन्यतावच्छेदकतया कल्पनमुचितम् अलौकिकप्रत्यक्षत्वस्य गुरुत्वात् तथाच प्रत्यक्षत्वं तत्र निर्युक्तिकमिति वाच्यम् । सुरभि चन्दनमित्यादौ मानससर्व्वां-शोपनीतभाने विशेष्यचन्दनादेस्तादात्मसम्बन्धेन स्वांशे प्रकारताया-अभ्युपगमेन विशिष्टबुद्धौ विशेषणज्ञानहेतुतयैव निर्व्वाहादुपनीत-भाने उपनायकज्ञानस्य स्वातन्त्र्येण हेतुताया अकल्पनात् सिध्यतु वा सर्व्वांशोपनीतभाने जातिविशेषः सोऽपि प्रत्यक्षत्वव्याप्य एव न तु तद्विरुद्ध इति नोपनयस्य प्रमाणान्तरता । न च तादृश-ज्ञाने प्रत्यक्षत्वमप्रामाणिकं, प्रत्यक्षत्वादन्यस्या अनुभवत्वजातेर-प्रामाणिकतया तत्प्रकारकज्ञानत्वस्य स्मृतिसाधारण्येन व्यभि-चारात् प्रत्यक्षत्वस्यैव विशेषणज्ञानजन्यतावच्छेदकतया तच्च प्रत्यक्षत्वानुपगमे तस्य विशेषणज्ञानजन्यत्वानुपपत्तेः । न चोपनय-विधयैव तत्र विशेषणज्ञानस्यापेक्षणीयतया विशिष्टप्रत्यक्षत्वाव-च्छिन्नाया विशेषणधीजन्यतायास्तत्त्वासत्त्वेऽपि न क्षतिरिति वाच्यम् । स्वरूपतो घटत्वादिप्रकारकोपनीतभाने घटत्वादिविषय-कज्ञानस्य उपनायकविधयापेक्षायामपि स्वरूपतस्तत्प्रकारकज्ञान-पर्य्यन्तानपेक्षायां जातित्वादिना घटत्वादिज्ञानात् घट इत्येता-दृशोपनीतभानापत्तेः (१) स्वरूपतस्तद्विषयकज्ञानजन्यतावच्छेदक-

---

(१) स्वरूपतो घटत्वादिप्रकारक-घट-इत्येतादृशोपनीतभानापत्तेरिति पा० ।

कस्य स्वरूपतस्तत्प्रकारकप्रत्यक्षत्वस्य स्वरूपतस्तत्प्रकारकोपनीत-भानसाधारणताया आवश्यकत्वात्। अथ स्वरूपतोघटत्वादिविषयक यत्र निर्विकल्पक जातित्वादिना घटत्वज्ञानन्तत्र तत्र स्वरूपतोघटत्वादिप्रकारकोपनीतभानवारणाय ताट्शोपनीतभानं स्वरूपतस्तत्प्रकारकज्ञानहेतुत्वमावश्यकं तथाच तस्य (१) प्रत्यक्षसाधारणविशेषणज्ञानजन्यतावच्छेदकानाक्रान्तत्वेऽपि न क्षतिः। न च ताट्शस्थले तथाविधोपनीतभानमिष्टमेवेति वाच्यम्। येन रूपेण यस्य ज्ञान तेन रूपेणैव तस्योपनयः न तु तदविशेषितत्वेति नियमादिति चेत्तर्हि, स्वरूपतस्तत्प्रकारकोपनयस्यापि स्वरूपतस्तत्प्रकारकालौकिकप्रत्यक्षत्वमेव जन्यतावच्छेदकं वाच्यं न तु सर्व्वांशोपनीतभानहेतुत्वं तथात्वे घटः इत्याद्याकारकचाक्षुषाद्युपनीतभानापत्तेः तथाच सर्व्वांशोपनीतभानस्यापि ताट्शोपनयजन्यतावच्छेदकाक्रान्तत्वनिर्व्वाहायैव तत्र प्रत्यक्षत्वस्वीकार आवश्यक.। वस्तुतो येन रूपेणेत्यादिनियमो निर्विकल्पकस्य अनुपनायकतामते, निर्विकल्पकस्य उपनायकतामङ्गीकुर्व्वतान्तु न ताट्शनियम इत्यूह्यस्थले दर्शितोपनीतभानमिष्टमेवेति क्षत पक्षवितेन।

तत्त्वचिन्तामणि.।

स्यादेतत् पक्षधर्म्मस्य व्याप्यताज्ञानं नेन्द्रियेण वह्नेरसन्निकर्षे तन्नियतसामानाधिकरण्यस्य व्याप्यत्व-

---

(१) सर्व्वांशोपनीतभानहेत्वर्थं।

स्यायोग्यत्वात् । न च धूमत्वेन सकलधूमव्याप्यताव-
गमात् धूमविशेषे संस्कारात् स्मरणाद्वोपनीतव्याप्या-
भेदग्रहः प्रत्यभिज्ञाने तत्ताविशिष्टस्येवेति वाच्यम् ।
एवं हि धूमवत्त्वेन वह्निमत्त्वज्ञानात् धूमवद्विशेषे
पर्वते संस्कारवशात् प्रत्यक्षेण व्याप्तिज्ञानापेक्षेण वह्नि-
मद्भेदग्रहो वह्निमत्त्वसंसर्गग्रहो वाऽस्तु किमनुमानेन ।
पृथक् वह्निमत्त्वस्मरणं तव नास्ति किन्तु व्याप्य-
वच्छेदकतयेति चेन्न, वह्निमान्नवेति संशयानुरोधेन
स्वतन्त्रवह्निमत्त्वस्मरणात् । न च विशिष्टज्ञाने स्वतन्त्र-
विशेषणज्ञानत्वेन हेतुत्वं, गौरवात् ।

दीधिति. ।

'पृथगिति, न चैवं धारावाहिकोच्छेदः, इतरमा-
त्राविशेषणत्वेनोपस्थितेरेव तन्त्रत्वात्, कोटिस्मरणस्य
संशयेन तस्य च व्याप्तिस्मरणादिना नाशात् विशेष-
दर्शनकाले च संशयायोगादाह, 'न चेति । 'गौरवा-
दिति, न चैवमभावविशेषणत्वेनोपस्थितस्यापि भावस्य
ग्रहापत्तिः, अभावग्राहकसामग्री बलवत्या प्रतिबन्धात्,
अभावाविशेषणत्वेनोपस्थितिस्तन्त्रमित्यपि कश्चित् ।
वस्तुतस्तु स्वतन्त्रविशेषणज्ञानस्य विशिष्टधीहेतुत्वेऽनु-

मित्यर्थमेव त्वयापि तत्स्वीकरणीयं, न हि विशिष्ट-
प्रत्यक्षं प्रत्येव तथात्वं, मानाभावात् ।

गादाधरी विवृतिः ।

किञ्चिदंशे तदप्रकारकं विशेषणज्ञानमेव पृथग्विशेषणज्ञान मित्यागमेन ग्रहते, 'न चैवमिति, 'धारावाहिकोच्छेद इति विशिष्टबुद्धिधारान्त पातिद्वितीयादिविशिष्टबुद्धानुपपत्तिरित्यर्थं । तत्पूर्वं निर्विकल्पकात्मकस्य विशेषणज्ञानस्य विनायादिविशिष्टबु द्धिरूपस्य तस्य विशेषणप्रकारकतया स्वातन्त्र्यविरहादिति भाव । समाधत्ते 'इतरमात्रेति, तत्तदितरोभयांशे तत्प्रकारकज्ञानात्तदंशे तद्विशिष्टज्ञानोपपत्तये 'मात्रपद, तेन यद्विशिष्टज्ञान फल तद्धर्म्मांशे तदप्रकारक यत् तत्प्रकारकं तदन्यतद्विषयकोप स्थितेरित्यर्थं ।

यत्तु तदितरविशेष्यतानिरूपिततत्प्रकारतान्यतद्विषयतोपस्थितेरित्येवार्थं, विशेष्यताभेदेन प्रकारताभेदादुभयविशेष्यकविशिष्ट बुद्धिसंग्रहात् । तत्र घटौ पटावित्यादिसमूहालम्बनविलक्षणे घट पटौ द्वावित्यादिज्ञानेऽभयांशे एकत्वेव द्वित्वादिविशेषण मवगाहमाने विशेष्यभेदेऽपि द्वित्वादिप्रकारतायां अभिन्नतया घटादीतरपटादिविशेष्यतानिरूपितत्वसत्त्वेन तज्ज्ञानस्य घट पटौ द्वावित्यादिज्ञानान्तराजनकत्वप्रसङ्गात् (१) ।

---

(१) तदन्यतद्विषयकोपस्थितेरित्यर्थं' इति पाठान्तरे तदितरविशेष्यता निरूपितप्रकारतान्यतद्विषयतोपस्थितेरिति वा विशेष्यताभेदेन प्रकारताभेदा

स्वतन्त्रविशेषणज्ञानस्य विशिष्टधीहेतुत्वमभ्युपेत्य संशयार्थं स्वीकार्य्येण स्वतन्त्रवह्निस्मरणेन परामर्शोत्तरं पक्षे तदुत्तनीत-भाननिर्व्वाहे अपरितोषबीजं दर्शयन् विशेषणज्ञानहेतुतायां स्वातन्त्र्यप्रवेशे युक्तिविरहप्रदर्शकं 'न चेत्यादिमूलमवतारयति, 'कोटीति, 'संशयेन' 'नाशादित्यग्रिमेणान्वयः, स्मरणनाश्येऽपि संशयात्मकताट्यविशेषणज्ञानादेव निश्चयो भविष्यतीत्याशङ्क्याह, 'तस्य चेति, 'व्याप्तिस्मरणादिना' इत्यस्य परामर्शार्थमुपगन्तव्येनेत्यादिः, व्याप्तिस्मरणानन्तरं पक्षधर्मताज्ञानकाले विशिष्टज्ञानकाले वा पुनः संशयो भविष्यति ततो निश्चय इत्याशङ्क्याह, 'विशेषदर्शनेति, 'विशेषदर्शनं' व्याप्यतया गृहीतस्य पक्षे निश्चयः, 'संशयायोगादिति, तदभावस्य कार्य्यसहभावेन हेतुत्वादिति भावः। यद्यपि परामर्शानन्तर वह्निरित्याकारकस्मरणं कल्पयित्वा पक्षे उपनीतवह्निनिश्चयः शक्योपपादनस्तथापि ताट्यकारणतायाः प्रामाणिकत्व एव तत्तत्कल्पनमुचितं तदेव नेति वस्तुगतिमनुरुध्य ताट्यकारणत्वं मूलकृता निराकृतमिति भावः। मूले 'न चेति न चेत्यर्थः, युक्तिसत्त्वे उक्तकारणतायाः स्वातन्त्र्यस्याधिक्यावच्छेदकत्वं गौरवेण दुरपवादमिति युक्तिं दीधितौ गृह्णते, 'न चैवमिति, 'एवं' विशेषणज्ञानहेतुतावच्छेदकतायां स्वातन्त्र्यानिवेशे, 'भावस्य' घटादेः, 'ग्रहापत्तिः' भूतलं घटाभाववदित्यादिनिश्चयकाले भूतलादौ ग्रहापत्तिः, ताट्यापत्तिं परि-

---

उभयविशेष्यकविशिष्टबुद्धिसंग्रहात्' इति पाठः कस्मिंश्चिदादर्शपुस्तके दृश्यते इति।

हरति, 'अभावग्राहकेति, 'बलवत्येति' तुल्यबलसामग्रीदशायां संशयोत्पत्त्या इष्टापत्तिरेवेति भावः। न च तादृग्सामग्रीः प्रतिबन्धकत्वसमानाधिकमिति शङ्क्यं, स्वतन्त्रविशेषणज्ञानसत्त्वे कदाचित् (१) तथाविधनिश्चयकाले घटादिभङ्गापत्तेः। कस्यचित् समाधानमुपन्यस्यति, 'अभावेति, उक्तक्रमेणैव (२) उपपत्तावभावविशेषणत्वप्रवेशे गौरवमन्याय्य तथा सति (३) वह्न्यभाववदवृत्तित्वरूपव्याप्तिघटकतया वह्निविषयकज्ञानाङ्गत्वापनीतभानानिर्व्याहत्याचास्वरसबीजम्। विशिष्टबुद्धिसामान्यहेतुतायां स्वातन्त्र्यनिवेशनं स्वतन्त्रविशेषणज्ञानं विनानुमितिमङ्गीकुर्व्वाणस्य षड्डास्यदमपि नेति प्रत्यक्षे तन्निवेशेन कारणत्वान्तरस्वातिनिर्युक्तिकमित्याह, 'वस्तुतस्त्विति, 'मानाभावादिति। अथ ज्ञानत्वस्य स्मरणेश्वरज्ञानवृत्तितया अनुभवत्वस्य चेश्वरज्ञानवृत्तितया जन्यतावच्छेदकत्वासम्भवात् तद्व्यावृत्तं विशिष्टविषयकविजातीयप्रत्यक्षत्वमेव विशेषणज्ञानजन्यतावच्छेदकं वाच्यमिति कथं मानाभाव इति चेत्, अनुभवत्वजातिरीश्वरज्ञानवृत्तित्वे मानाभावादनुमितिसाधारणविशिष्टानुभवत्वेनैव विशेषणधीजन्यत्वोपगमात् अन्यथा अनुमितौ कारणत्वान्तरकल्पनापत्तेः प्रत्यक्षत्वेऽपि ईश्वरज्ञानवृत्तित्वे मानाभावाच्च न षड्डरप्रसङ्गः। न चेश्वरज्ञाने प्रत्यक्षत्वानङ्गीकारे तस्य जन्यमात्रं प्रति उपादानगोचरलौकिकप्रत्यक्षत्वेन हेतुत्वानुप-

---

(१) विशेषादर्शनकाल इत्यर्थः।

(२) सामग्रीयतिरिक्तप्रतिबन्धकत्वमेवेत्यर्थः।

(३) गौरवस्य न्याय्यत्वे।

पत्तिरिति वाच्यम् । उपादानप्रत्यक्षहेतुतायां लौकिकविषयतायाः प्रत्यासत्तित्वावश्यकत्वेन ज्ञानत्वस्यावच्छेदकत्वसम्भवात् भगवज्ज्ञाने प्रत्यक्षत्वानङ्गीकारेऽपि क्षतिविरहात् लौकिकविषयतायाः प्रत्यक्षत्ववन्मात्रनिरूपितत्वे मानाभावादीश्वरज्ञाने प्रत्यक्षत्वव्यवहारस्य लौकिकविषयतावत्त्वनिबन्धनत्वेनौपचारिकत्वादिति ।

तत्त्वचिन्तामणिः ।

अथ यो यत्र विशिष्य पूर्व्वमवगतः स तत्र संस्कारवशाद्यथार्थप्रत्यक्षे भासते यथा तत्ताप्रत्यभिज्ञाने । न च पर्व्वते विशिष्य पुरा वह्निरवगतः । यत्र चन्दने सौरभमुपलब्धं तत्र संस्कारवशाच्चक्षुषा सुरभि चन्दनमिति ज्ञानमन्यथानुमितिरिति चेत्तर्हि, पक्षधर्म्मधूमेऽपि न पुरा विशिष्य व्याप्तिरवगतेति कथं संस्कारवशात्तद्गतव्याप्तिबोधः प्रत्यक्षेण ।

दीधितिः ।

'तर्हीत्यादि, वस्तुतो यत्र क्वचिदपि गृहीतस्य धर्म्मिणि साधारणधर्म्मदर्शनात् स्मृतस्य संशयादिसाधारणी विशिष्टधीरियांस्तु विशेषो यत्कोटिद्वयसहचरितधर्म्मदर्शनात् कोटिद्वयस्मरणे संशयोऽन्यथा त्वेककोटिनिश्चय इति । एतेन धूमत्वादिना पक्षधर्म्मे

व्याप्तिमनुमाय वह्न्याद्यनुमितिरिति परास्तम्। धूमत्व-
व्याद्यनुपस्थित्या धूमत्वादेर्वह्निव्याप्यत्वाग्रहे वह्न्य-
नुमितिप्रसङ्गाच्च। एतेन यद्धर्मावच्छेदेन यद्वत्त्वं
गृहीतमुपनयवशात् तद्धर्मविशिष्ट एव तद्भासते
धूमवत्त्वावच्छेदेन च वह्निमत्त्वग्रहाद्धूमवानेव वह्नि-
मानिति बुद्धिः स्यात् न तु पर्व्वतो वह्निमानित्यपि
परास्तम्। मानाभावात् चन्दनत्वाद्यवच्छेदेन गृहीतस्य
सौरभादेः पुरोवर्त्तिनि चन्दनत्वादिदर्शनादिदं सुरभि
इत्यादिवुद्धौ व्यभिचाराच्च। यदि चावच्छेदकधर्म्मवैशि-
ष्ट्यमपि तत्र भासत इति नियमोऽपि तत्र प्रामा-
णिकस्तदा धूमवानयं पर्व्वतो वह्निमानित्येव धीरस्तु, न
हि लिङ्गोपधानभाने वाधकमन्यत्, साधकविरहात्।

गादाधरी विवृतिः।

ननु 'तर्हीत्यादिमूलमयुक्तं तथाहि यो यत्र विशिष्येत्यादि-
नियमे विशिष्येत्यस्य तन्निरूपितवृत्तिं(१) धर्म्मप्रकारेणेति नार्थः, परन्तु
फलीभूतमहधर्मितावच्छेदकप्रकारेणेत्येव, एवञ्च पर्व्वतीयधूमत्वा-
दिना व्याप्यग्रहेऽपि धूमत्वेन पर्व्वतीयधूमे सामान्यलक्षणया
व्याप्तिग्रहात् वह्निव्याप्यधूमवान् पर्व्वत इति परामर्शो नानुपपन्न-
इत्याशङ्क्य उक्तनियमे बाधकान्तरमाह, 'वस्तुत इति, 'यत्र क्वचिद-

---

(१) फलीभूतमहविशेष्यमात्रवृत्तीत्यर्थः।

पीति फलीभूतज्ञानाविषये धर्म्मिमात्र इत्यर्थः, 'धर्म्मिणि' फलीभूतग्रहविशयधर्म्मिणीत्यर्थः, 'संशयादीत्यादिना निश्चयग्रहः। नन्वपूर्व्वे धर्म्मिणि संशय एव स्वीक्रियते न तूपनीतधर्म्मनिश्चयः, यश्च संशय इव तत्रैव सति व्याप्यदर्शने निश्चयोऽनुभूयते स तु आनुमाणिकएव व्याप्यदर्शनस्याकाकमनुमितिहेतुत्वादिति निश्चयात्मकोपनीतभाने कथितनियमो निराबाध एवेति कदाचित् ब्रूयादिति शङ्कया यादृशसामग्रया कोव्यन्तरभासकसामग्रीकाले संशयात्मकतत्कोटिविशिष्टधीर्जन्यते तादृशसामग्रीतः असत्यां विपरीतकोटिभानसामग्र्यां तत्कोटिनिश्चयोऽनुभवसिद्धतया दुरपह्नवः विपरीतकोटिभानसामग्रीविगमस्य विशेषदर्शनादिव तत्कोव्यस्मरणादपीति एककोटिमात्रस्मरणे व्याप्यदर्शनं विनाप्येककोटिनिश्चयोत्पत्त्या लोकनियमो निश्चयदशायां (१) सम्भवतीत्याह, 'इयांस्त्विति, 'तुः' अवधारणे, तथाचैतावानेव संशयनिश्चययोरुत्पत्तौ विशेष इत्यर्थः। 'एतेन' अपूर्व्वधर्म्मिविषयकसंशयादौ व्यभिचारस्य दुर्व्वारत्वेन, 'व्याप्तिमनुमायेति, तथाच पर्व्वतीयधूमे विशिष्य प्रागगृहीताया व्याप्तेस्तत्रोपनीतभानाभ्युपगमादुक्तनियमो दुर्व्वार एवेति भावः। 'सर्व्वत्र व्याप्त्यनुमितिरपि न सम्भवतीति मूलोक्तदूषणं दर्शितरीत्या दुरुद्धरमित्याह, 'धूमत्वेति, 'व्याप्तिव्याप्यत्वाग्रह इति व्याप्तिव्याप्यत्वेनानिश्चयस्थले इत्यर्थः, व्याप्यतावच्छेदकनिर्णयं विना व्याप्तेर्दुर्निश्चयत्वादिति

---

(१) निश्चयमात्रायापीति पा०।

भावः। 'यद्भानमनुमितौति, व्याप्यनुमानासम्भवादिति भावः। 'एतेन' दर्शितसंशयानुपपत्त्योक्तनियमस्यैव (१) तत्समशीलस्य नियमान्तर-स्याप्यनभ्युपगमेन, 'यद्धर्मावच्छेदेनेति, पर्व्वतीयधूमे विशिष्य व्याप्यग्रहेऽपि धूमत्वावच्छेदेन व्याप्तेर्ग्रहान्न विशिष्टपरामर्शानुप-पत्तिरिति भावः। अवच्छेदकधर्म्मदर्शनाधीनोपनीतभानमादाय नियमोपगमाद्दर्शितसंशयादावपि व्यभिचारोऽपि शक्यते वार-यितुमित्याशङ्क्य अप्रयोजकतामप्याह, 'मानाभावादिति, अव-च्छेदकधर्म्मदर्शनाधीने अपूर्व्वधर्म्मितावच्छेदकविशिष्टविषयकनि-श्चये व्यभिचाररूपं बाधकमप्याह, 'चन्दनत्वेति, 'सौरभादेः' 'बुद्धावित्यधिमेणान्वयः, व्याप्तिप्रकारेण चन्दनत्वादेरग्रहाच्च तत्र सौरभानुमितिसम्भव इति भावः। ननु तद्धर्म्मविशिष्ट-एव तद्भासते इत्यस्य तदन्यधर्म्मविशिष्टे न भासते इति नार्थः, किन्तु तद्धर्म्माविशिष्टे न भासते इत्येवार्थः, एवञ्चोक्तस्थले इदं चन्दनं सुरभीत्येवोपनीतभानमुपेयते इत्यतो न व्यभिचार-इत्यत आह, 'यदि चेति, 'इत्येव धीरस्तिति उपनीतप्रत्यक्ष-रूपा एतादृशी धीरेवानुमितिकार्य्यकारिणी भवत्वित्यर्थः। ननु लिङ्गोपधानमतस्य बाधकत्वात्र तादृशोपनीतभानस्वीकार-सम्भव इत्यत-आह, 'न हीति, 'साधकविरहादिति, उप-नीतभानोपगन्तृणां दर्शितनियम एव लिङ्गोपधानि साधक' इति भावः।

---

(१) दर्शितस्य यथाश्रुतरीत्या उक्तनियमस्येति।

तत्त्वचिन्तामणिः ।

न च सहचारदर्शनजन्यसंस्कारसहितेनेन्द्रियेण व्यभिचारज्ञानाभावे सति महानसीयधूमवत् पर्व्वतीयधूमे व्याप्तग्रहो वह्निषु न प्रत्यक्षसामग्री सन्निकर्षाभावादिति वाच्यम्। हेतु-साध्यसाक्षात्कारं विना प्रत्यक्षेण व्याप्तिग्रहात्। न च पर्व्वते वह्निसाक्षात्कारः। न च पक्षधर्म्मस्य साध्यसामानाधिकरण्यविशेषो-व्याप्तिः, पक्षे साध्यग्रहं विनेत्युक्तम्।

उच्यते विशेषणज्ञानं तस्य विशेष्ये सम्बन्धस्तयो-रसंसर्गाग्रहो विशेषदर्शनं विशेषण-विशेष्येन्द्रिय-सन्निकर्षो गौरयमित्यादियथार्थविशिष्टप्रत्यक्षकारणम्, अस्ति चाचापि व्याप्तिस्मरणं स्मृतव्याप्तेः पक्षवृत्तिधूमे सत्त्वम्।

दीधितिः ।

'हेतु-साध्येति, सम्बन्धिद्वयनिरूप्यपदार्थप्रत्यक्षं प्रति सम्बन्धिद्वयप्रत्यक्षस्य हेतुतायाः संयोगादिस्थले त्वयैव क्लृप्तत्वात् तदनादरेऽपि साध्यघटितमूर्त्तिकव्याप्तिप्रत्यक्षस्य साध्यप्रत्यक्षसामग्रीं विना असम्भवादिति भावः।

'विशेषणेत्यादि, विशेषण-विशेष्यसम्बन्धस्तदंशे प्रमात्वे लौकिकत्वे वा विशेषदर्शनञ्च विपरीतज्ञानप्रतिबन्धकतया क्वचित् क्वचित्सहचरितधर्म्मदर्शनत्वेन विशेषणस्मारकतया विशेषणस्य च ज्ञानसत्त्वेऽप्यतिरिक्तसन्निकर्षस्तदंशे लौकिकतायामुपयुज्यते ।

गादाधरी विवृतिः ।

व्यभिचारादर्शनसहकृतसहचारदर्शनरूपव्याप्तिपाटवकसद्भावान्महानसीयधूम एव पक्षीयधूमेऽपि सन्निकृष्टे व्याप्तेर्लौकिकप्रत्यक्षमेव स्वीक्रियते न तूपनीतभानमिति कथं यो यत्रेत्यादिनियमे सत्येव विशिष्टपरामर्शोपपत्तिरित्याशङ्का निरस्यति, मूले 'न चेत्यादिना, हेतु साध्योभयसाक्षात्कारस्य व्याप्तिप्रत्यक्षापेक्षणीयतां मूलोक्तामुपपादयति, दीधितौ 'सम्बन्धीति, मीमांसकमते समम्बन्धिकक्षसुव्यवहार एव सम्बन्धिप्रत्यक्षस्य हेतुता न तु तत्प्रत्यक्षेत्यः 'त्वयैवेति नैयायिकेनैवेत्यर्थः', 'कृत्वादित्यस्य यत्किञ्चिदेकसम्बन्धिग्रहविरोधीन्द्रियासन्निकर्षदोषसमवधानादिदशायां प्रत्यक्षवारणायेत्यादिः । ननु सम्बन्धिद्वयप्रत्यक्षस्य हेतुत्वेऽपि यत्र सम्बन्धिप्रत्यक्षोत्पत्तिक्षणे तत्सामग्रीविरहस्तत्र तद्द्वितीयक्षणद्वितीयक्षणयोः संयोगादिप्रत्यक्षापत्तिः सम्बन्ध्यंशे लौकिकप्रत्यक्षात्मकस्य संयोगादिलौकिकप्रत्यक्षस्यानुभवविरुद्धतया दृष्टापत्तेरयोगादिति सम्बन्धिग्राहकसामग्रीया हेतुताया आवश्यकत्वे सम्बन्धिसाक्षात्कारहेतुतायां मानाभाव इत्यपरितोषात्सम्बन्धि-

प्रत्यक्षसामग्राभावस्यैव प्रकृते व्याप्तिप्रत्यक्षविरोधितामाह, 'तद-नादरेऽपीति, 'साध्यघटितमूर्त्तिकेत्यनेन व्याप्तिप्रत्यक्षे साध्यमानानुरोधेनापि साध्यसन्निकर्षोदयपेक्षेति सूचितम्। भ्रमात्मकविशिष्ट-ज्ञाने विशेष्ये विशेषणसम्बन्धस्यानपेक्षणात् प्रमात्वोपयोगि-तया तत्परिगणनं सङ्गमयति, 'विशेषणेति, 'तदंशे' विशेषण-विशेष्यसम्बन्धांशे, न तु विशेषणांशे, संयोगेन द्रव्यविशे-षणकस्थले विशेष्ये विशेषणसंयोगस्य संयोगसम्बन्धेन विशेषण-प्रमात्वनिर्व्याहकत्वेऽपि इन्द्रियासयुक्तविशेषणसंयोगस्य लौकिक-सन्निकर्षात्मकतया विशेषणांशे लौकिकत्वानुपयोगित्वेन 'लौकि-कत्वे वा' इत्यत्रैतदन्वयानुपपत्तेः, सम्बन्धांशे प्रमात्वस्य सम्बन्ध-घटितं प्रमात्वं, अत्र च विशेष्य-विशेषणसम्बन्धस्य तदानीमवि-द्यमानत्वेऽपि दण्डायमानौदित्यादिप्रमोत्पत्तेः प्रमात्वे यदा कदा-चित् सम्बन्धस्य उपयोगितापरमिदं, विद्यमानसम्बन्धस्य उप-योगितापरत्वाभिप्रायेण कल्पान्तरमाह (१) 'लौकिकत्वे वेति 'उपयुज्यते' इत्यग्रिमेणान्वयः, लौकिकत्वमपि सम्बन्धांशे बोध्यम्। विशेष्ये विशेषणसम्बन्धस्य सम्बन्धे विशेष्यघटितलौकिकसन्निकर्ष-सम्पादकतया लौकिकत्वोपयोगिता, अथवा तदंश इत्यस्य विशे-षणांश इत्येवार्थः, विशेष्ये विशेषणसम्बन्धस्य विशेषणांशे लौकि-कत्वोपयोगिता तु समवायेन गुणादिविशिष्टबुद्ध्यभिप्रायेण, द्वितीयकल्पे विशेष्यपदञ्च सन्निकृष्टधर्म्मिमात्रपरं, अतो अनुभूय-

---

(१) दण्डायमानौदित्यादिप्रमोत्पत्तिरित्यपरितोषात् कल्पान्तरमाहेति पा०।

मानारोपे विशेष्य-विशेषणसम्बन्धामत्वेऽपि विशेषणांशे लौकिकत्वादसङ्गतिर्नाधकाशः । लौकिकपदस्य प्रमात्वघटकलौकिकविषयतापरतया यथाश्रुतमेव वा समर्थनीयम् । विशेषदर्शनस्य स्वमते नियतविशेषस्याहेतुतया उपयोगितामकारमाह, 'विशेषदर्शनञ्चेति, 'क्वचिदिति विपरीतकोटिभासकतदुपस्थित्यादिकालीननियत इत्यर्थः, अत्राप्युपयुज्यत इति सम्बध्यते, 'क्वचिदिति प्रकारान्तरेण यत्र न विशेषणज्ञानं तत्रत्यविशिष्टज्ञाने इत्यर्थः । 'दर्शनत्वेनेत्युक्तं ज्ञापकतायां हेतुः, 'ज्ञापकतया उपयुज्यते इति सम्बन्धः, एवञ्च विशिष्टप्रत्यक्षनिर्व्याढकाणामेव कीर्त्तनमिदं न तु तत्कारणमात्रस्यैवेति भावः । विशेषणज्ञानस्यैव विशेषणभासकसन्निकर्षत्वात् सन्निकर्षान्तरकथनं किमर्थमित्यत आह, 'विशेषणस्य चेति, 'तदंशे' विशेषणांशे, 'लौकिकतायामिति, इत्यत्र मूले सन्निकर्षपद लौकिकसन्निकर्षपरमित्यपि बोध्यम् । व्याप्तिप्रविष्टचरमांशस्य व्याप्यैकमते धूमत्वरूपस्य सन्निकर्षादेव भानात्पक्षते व्याप्तिविशिष्टप्रत्यक्षसामग्रीघटकत्वमपि विशेषणलौकिकसन्निकर्षस्यैत्यविरोधः ।

तत्त्वचिन्तामणिः ।

एकैव हि सा व्याप्तिः तयोरसंसर्गाग्रहो धूमत्वविशेषदर्शनं व्याप्तिविशिष्टधूमेन्द्रियसन्निकर्षश्च व्याप्तिविशिष्टज्ञानकारणं । न च वह्निविशिष्टज्ञानसामग्री, वह्नेरसन्निकर्षात् । कश्चित्तु धूमत्वे परम्परासम्बन्धेन

वह्निव्याप्यत्वं पूर्वं गृहीतं तथाच संस्कारोपनीतं वह्निव्याप्यत्वं परम्परासम्बन्धेन पक्षवृत्तिधूमत्वे प्रत्यभिज्ञायते तद्वृत्तित्वेन पूर्वमनुभवात्, एवञ्च धूमत्वव्याप्यपरामर्शादेवानुमितिरिति प्राह ।

दीधितिः ।

'एकैव हीति, वस्तुतो व्याप्तिभेदेऽपि न क्षतिः सामान्यतो व्याप्तित्वेन गृहीतानां सकलव्याप्तीनां तथैव स्मरणसम्भवात् वह्निरसन्निकर्षादिति । ननूपनयात्मकसन्निकर्षेणैव नयनेन निरूप्यतां हुताशनः, न हि बहिरिन्द्रियेण द्रव्यस्याधेयतया तद्वत्त्वस्य वा ग्रहे तत्संयोगो हेतुः दण्डी पुरुषो नास्तीत्यादौ व्यभिचारात् कथमन्यथा पक्षधर्मे वह्निमत्त्वगर्भिता व्याप्तिरेव गृह्यते । न चाधेयतया मुख्यविशेष्ये साक्षात् द्रव्यग्रहे तत्संयोगो हेतुः अभेदारोपे च नाधेयतया रजतादिकं प्रकारो दण्डाद्यात्मकतत्तावगाहिप्रत्यभिज्ञायाश्च तत्तावदभेदो भासत इति दण्डादेः साक्षात्प्रकारतेति वाच्यम् । मानाभावात् धूमवान् वह्निमानिति सामान्यलक्षणया ग्रहे व्यभिचारात् तत्तासंसर्गस्यापि प्रत्यभि-

ज्ञायां भानसम्भवात् प्रकृतेऽपि वह्निमद्भेदग्रहेणैव कृतार्थत्वाच्च । एतेन तत्ताकारानुपनीतताद्दगद्रव्यग्रहे स हेतुरिति निरस्तम् । चैत्रपदवाच्योऽयमित्यादिवत् दण्डायमासीदय दण्डीत्यादिग्रहस्यानुभविकत्वात् तत्तावस्यातिरिक्तस्याभावात् तच्छब्दप्रयोगजनकाभावस्य च निमित्तान्तरविरहप्रयुक्तस्य जन्यतानवच्छेदकत्वात् तज्जननयोग्यताया प्रकृतेऽपीष्टत्वात् । अतएव तदिन्द्रियग्राह्यविद्यमानद्रव्यस्य तेन ग्रहे तत्सयोगो हेतुरिति परास्तम् । नयनादिना रजतादेरभावग्रहाभेदारोपादौ व्यभिचाराच्च ।

गादाधरी विवृति ।

'एकैव हीत्यादिमूल परमतसिद्धसामान्यप्रत्यासत्त्यभावमभ्युपेत्य सामान्यलक्षणासत्त्वे व्याप्यैक्यस्यानुपयोगिता दीधितिकृदाह, 'वस्तुत इति परमार्थतइत्यर्थ । एतेन यदि सामान्यप्रत्यासत्त्य भावोऽभ्युपगम्यते तदा क्षतिरेवेति सूचितम् । न च यो यत्रेत्यादि नियमोपगमेनैव पर्व्वतीयधूमे वह्निव्याप्तिविशिष्टप्रत्यक्षसामग्री सम्भवति न तु पर्व्वते वह्निविशिष्टप्रत्यक्षसामग्रीति विशेष व्युत्पादन मूलकृत उपपद्यते नियमानभ्युपगमे ज्ञानसन्निकर्ष घटितसामग्रा उभयत्राविशेषेण विशेषोत्तेरत्यन्तासम्भवात् तथाच व्याप्यधूमत्वादिरूपत्व एव पर्व्वतीयधूमे तदयस्य लौकिकसन्निकर्षा

देव भानात् धूमत्वांशे वह्निसमानाधिकरणधूमवृत्तित्वस्यैव ज्ञान-सन्निकर्षग्राह्यतया तत्र च तथाविधमहानसीयधूमवृत्तित्वप्र तन्निरूपितवृत्तिधूमत्वप्रकारेण पूर्वं गृहीतत्वादुक्तनियमो निर्वहति, न तु व्याप्तेः सामानाधिकरण्यरूपत्वे, तथाच व्याप्तेरैक्यं मूल-क्षतो निर्भर एवेति दीधितिकृता व्याप्तिभेदपक्षे चत्यभावाभि-धानविरोध इति वाच्यम्। मूलकृता स्मृतव्याप्तेः पक्षधर्मधूम-सत्त्वहेतुतया व्याप्तेरैक्याभिधानात् 'न चतिरिति ग्रन्थे चतिपदस्य पक्षीयधूमे स्मृतव्याप्यसत्त्वरूपचतिपरतया व्याप्तेर्नानात्वे उक्त-नियमभङ्गरूपचतिसत्त्वेऽपि तद्ग्रन्थाविरोधात्।

केचित्तु ननु व्याप्तिभेदेऽपि सामान्यप्रत्यासत्त्या सकलव्याप्य-नुभवात् स्मृतव्याप्तेः पक्षवृत्तिधूमे सत्त्वमुपपद्यत इति किमर्थम् 'एकैव हीत्युक्तमित्यनुगमस्य स्वयमेव वक्ष्यमाणत्वादाह, 'वस्तुत इति वस्तुगत्येर्थः, 'भेदेऽपीत्यनेनान्वयः, 'सामान्यतः' सामान्यप्रत्या-सत्तिबलात्, 'तथैव' व्याप्तित्वेनैव, तथाच धूमनिष्ठस्वव्याप-कवह्निसामानाधिकरण्यरूपैव व्याप्तिरिहाभिप्रेता, प्रतियोगिता-वच्छेदकादीनामैक्याच्च उपचारादेकपदप्रयोग इति व्याप्ति-वादोक्तमेवानुसरणीयम्। न च प्रतियोगितावच्छेदकानामैक्य-स्याकिञ्चित्करतया तत्प्रतिपादनमात्रफलस्योपचारस्य वैयर्थ्यमिति वाच्यम्। सखण्डे परम्परासम्बन्धेन अखण्डस्यैव प्रत्यासत्तितया तादृशवह्निलादिरूपसामान्यप्रत्यासत्त्या निखिलवह्निमदादिभानेन व्याप्तित्वेन व्याप्तिप्रत्यक्षस्य सकलव्याप्तिविषयकत्वलाभार्थं उप-चारानुसरणात् अन्यथा जातिलिङ्गतावादिमतोक्तसामान्यलक्षणा-

नुपयोगरूपदोषस्य स्वमतेऽपि सत्त्वादसङ्गत्यापत्तेः। एवञ्च सिद्धान्तलक्षणे एतन्मूलग्रन्थसङ्गतार्थतया 'वस्तुत' इत्यादिफक्किकावर्णनं भ्रमविजृम्भितमेवेत्याहुः (१)।

उक्तनियमसत्त्वे पक्षतत्तिधूमसविकर्षदशायां धूमत्वरूपव्याप्तेरपि तत्तोपनयेनैव ग्रहस्य स्वीकरणीयतया तत्क्षणीयमानसविशिष्टपरामर्शानुरोधेन उक्तनियमोऽनुमानप्रामाण्यवादिनापि न स्वीकरणीय एवेत्याशयेन सामान्यप्रत्यासत्तिपक्षमालम्ब्य पूर्व्वपक्षयति, 'नन्विति,'निरूप्यता' निर्णीयतां, मिश्रमतं निराकरोति,'न हीति, 'बहिरिन्द्रियेण द्रव्यस्याधेयतया ग्रहे' आधेयत्वविषयितावच्छिन्नद्रव्यविषयितायाःलिबहिरिन्द्रियजन्यज्ञानसामान्ये, प्रतियोगितया उपनीतघटादिविषयके घटनास्तीति चाक्षुषादौ व्यभिचारवारणाय 'आधेयतयेति, मानसे बाह्यद्रव्यत्वादिविषयकस्वप्रज्ञाने व्यभिचारवारणाय 'बहिरिन्द्रियेणेति, गुणादिगोचरचाक्षुषादौ तद्वारणाय 'द्रव्यस्येति, आधारत्वाधेयत्वयोस्तुल्यवित्तिवेद्यत्वाभावे पर्व्वतो वह्निमानित्यादिज्ञानसंग्रहाय 'तद्वत्त्वस्य वेति द्रव्याधारत्वस्येत्यर्थः, अत्रापि 'बहिरिन्द्रियेण' इत्यनुषज्यते, तथाचैतन्मते आधारत्वविषयितानिरूपितद्रव्यविषयितायाःलिबहिरिन्द्रियजन्यज्ञानत्वं कार्य्यतावच्छेदकं, वस्तुतस्तु त्वगिन्द्रियादिसंयोगाद्याक्षुषानुव्यवस्या चक्षुःसंयोगत्वादिनैव हेतुता वाच्या, तथाच चाक्षुषत्वादिकमेव कार्य्यतावच्छेदके निवेशनीय न तु बहिरिन्द्रियजन्य-

---

(१) केषिदित्यादिद्वाङ्मित्यन्त पाठः केषुचिदादर्शपुस्तकेषु नास्ति।

ज्ञानत्वम् । 'इत्यादाविति' इत्याद्युपनीतदण्डादिमत्त्वावगाहिनि तद्विशिष्टविशेषणकाभावचात्तुपादावित्यर्थः । फलापलापमाशङ्क्य निराकरोति, 'कथमिति, 'अन्यथा' असन्निकृष्टद्रव्यवत्त्वस्य विशेषणांशेऽप्यभाने, मुख्यविशेष्ये वृत्तिनियामकसम्बन्धेन साक्षात् द्रव्यप्रकारकत्वं कार्यतावच्छेदकं वक्तव्यमतो विशेषणांशे द्रव्यवत्त्वावगाहिन्युक्तस्थले न व्यभिचार इत्याशङ्क्य निराकरोति, 'न चेति, पक्षधर्मे व्याप्तेः प्रकारत्वे परम्परया व्याप्तिघटकत्वक्षतेरपि प्रकारत्वात् तत्र व्यभिचारवारणाय 'साक्षादिति, 'आधेयतयेत्यस्य व्याकृतिमाह, 'अभेदारोप इति सर्वभानसाधारणेतरस्याभेदेनारोपेत्यर्थः, 'आधेयतया' वृत्तिनियामकसम्बन्धेन, भूतले घटाभावत्वाद्यभावचात्तुपेऽपि व्याहृत्तिर्दुर्वारा । नन्वेवमपि इदन्त्वविशिष्टमुख्यविशेष्यकदण्डाद्यात्मकतत्तात्प्रकारकप्रत्यभिज्ञाने व्यभिचारइत्यत-आह, 'दण्डेति, तत्तावदभेदो भासते न तु तत्तादिसंसर्गइति शेषः । तावतापि सोऽयमित्याकारकतानिर्व्वाहादिति भावः । 'मानाभावादिति, तादृशकारणतायामित्यादिः, सामान्यप्रत्यासत्त्यजन्यत्वस्य कार्यतावच्छेदके निवेशेन सामान्यजन्यप्रत्यक्षे न व्यभिचार इत्यत आह, 'तत्तेति, 'भानसम्भवात्' भाने युक्तिसम्भवात्, तदनुपगमे तत्तासंसर्गाभावसंशयनिवृत्त्यनुपपत्तेरिति भावः । यदि तत्तावदभेदग्रहोऽपि तादृशसंशयादिविरोध्युपेयते, तदाह, 'प्रकृते पीति अनुमितिस्थलेऽपीत्यर्थः, 'अभेदग्रहेण' अभेदोपनीतभानेन, 'कृतार्थत्वात्' वह्नयभावसंशयनिवृत्त्याद्युपपत्तेः । प्रकारान्तरेण प्रत्यभिज्ञायां व्यभिचारोद्धारं निरस्यति,

'एतेनेति व्यभिचारस्य दुर्व्वारत्वेन, 'तत्ताकारानुपनीतत्वं तत्तावै-
नाभासमानत्वं, तच्छब्देनाप्यवच्छिद्यमानत्व वा, आद्ये तत्तात्वाव-
च्छिन्नवृत्तिनियामकसम्बन्धावच्छिन्नद्रव्यविषयिताविशिष्टं चाक्षुष-
त्वादिकं कार्य्यतावच्छेदकं द्वितीये तच्छब्दप्रयोगाजनकत्वसहित(१)
तादृशसंसर्गावच्छिन्नद्रव्यविषयिताविशिष्टमिति बोध्यम्। अयोग्यस्ये-
वासन्निकृष्टस्याप्युपनीतस्य चाक्षुषादौ भानमविशेषेण दुरपह्नव-
मिति सूचयितुं 'चैत्रपदेत्यादिदृष्टान्ताभिधानं, दण्डायमानोदिति
ज्ञाने व्यभिचारस्यातीतत्वानवगाहित्वविशेषणेन शक्यवारणतया
तदनवगाहिनि वस्तुतोऽतीतदण्डादिज्ञाने व्यभिचारमाह, 'अयं
दण्डीति, निरुक्तकार्य्यतावच्छेदकयोरार्द्यं दूषयति, 'तत्तात्वस्येति,
'अतिरिक्तस्येति दण्डत्व-वह्नित्वाद्यतिरिक्तस्येत्यर्थः, तथाच तद-
नवच्छिन्नद्रव्यप्रकारतैवासिद्धेति भावः। न च तत्पदप्रतिपाद्य-
तावच्छेदकत्वमन्यद्वा किञ्चिदीदृशं वह्न्यादिनिष्ठतत्तात्वं न तु
वह्नित्वादिकमिति वाच्यम्। तदग्रहेऽपि वह्नित्वादिना वह्न्यादि-
मत्त्वग्रहे सोऽयमिति व्यवहारात्। द्वितीयपक्षे अजनकत्वं फलानुप-
धायकत्वं स्वरूपायोग्यत्वं वा, नवाद्यं दूषयति, 'तच्छब्देति, 'निमि-
त्तान्तरविरहेति प्रयोगेच्छाविरहेत्यर्थः, तथाच तादृशधर्म्मस्य कार्य्य-
तावच्छेदकत्वे यत्र ज्ञानेऽपि प्रत्यभिज्ञाने निमित्तान्तरविरहाय
तच्छब्दप्रयोगः नत्र व्यभिचार इति भावः। द्वितीयं दूषयति,
'तज्ज्ञानेति, 'प्रकृतेऽपि' वह्निमानित्यादिज्ञानेऽपि, 'इदत्वादिति,

---

(१) अत्र साक्षिण्यं मानाभावाधिकरणरूपम्।

तच्छब्दस्य वह्निलाद्यवच्छिन्नवदर्थैकतया व्यवहर्त्तव्यज्ञानविषया तत्प्रयोगे वह्निलादिप्रकारकज्ञानमात्रस्यैव स्वरूपयोग्यत्वादिति भावः । तथाच तदयोग्यप्रकारकज्ञानमेवाप्रसिद्धमिति भावः । 'अतएव' विद्यमानदण्डाद्यात्मकतत्तावगाहिप्रत्यभिज्ञायां व्यभिचारादेव, चाक्षुषाद्युपनीतप्रभादिगोचरादिसार्श्यनादौ मानसे वाह्यविषयकस्वप्नाद्यनुभवे च व्यभिचारवारणाय 'तदिन्द्रियग्राह्येति तदिन्द्रियासाधारणकारणकलौकिकप्रत्यक्षयोग्यार्थैकं, घटसार्श्यनादौ चक्षुरादिसंयोगस्य व्यभिचारवारणाय 'तेनेति, त्वगादिसंयोगाद्घटादेश्चाक्षुषादेर्व्वारणाय 'तत्संयोग इति, एतन्मते आधेयतयेति कार्य्यदिग्निवेशादन्यत्रापि व्यभिचारं दर्शयति, 'नयनादिनेति ।

दीधितिः ।

अथैवम् व्यवहितदण्डे पुंसि न कथं नायनो दण्डीति निश्चय इति चेत्, क्वचित्तत्सहचरितधर्म्मादर्शनात् तदस्मरणात् क्वचिच्च साधारणधर्म्मदर्शनादिना संशयस्यैव जननात् सति च विशेषदर्शनादाविष्टत्वात् । युक्तश्चैतत् कथमन्यथा दण्डी न वेत्यादिकः संशयः । न हि नासौ तादृशिष्टबुद्धिः, न तन्निश्चय इति चेत्, किं तेन, उक्तं हि संशयत्वं निश्चयत्वञ्च न जन्यतावच्छेदकमिति । अस्तु वा तथा, तथापि विशेषस्यादर्शनात्

संशयस्यैव दर्शनात् (१) निश्चयस्यापि सम्भवात्। मा भूद् घायनादिरयं घुतागनादिनिर्णयो मानसस्तु स्यात् तत्र तादृगनियमस्यात्यन्तं बाधितत्वादिति।

गादाधरी विवृतिः।

उक्तकार्य्य-कारणभावानभ्युपगमेऽनिष्टमापद्यते, 'अथेति, मानसनिश्चयस्य दृष्टत्वात् अन्यथा उक्तकार्य्यकारणभावेनापि तदकारणासम्भवात् 'मायन इति। संशयस्यानुभवसिद्धतया 'निश्चय-इति, निश्चयानुत्पत्तिप्रयोजकाभिधानेनोद्धारयति, 'क्वचिदि-त्यादि, 'तत्सहचरितेति दण्डसहचरितेत्यर्थः, 'अदर्शनादित्यस्य तदकरणे हेतुः, 'तदकरणादिति, तथाच विशेषज्ञानाभावादेव तत्प्रकारकनिश्चयाभाव इत्यर्थः, 'साधारणधर्म्मदर्शनादिना' कोटि-द्वयसहचरितधर्म्मदर्शनादिना, कोटिद्वयस्मरण इति शेषः, 'संशय-स्यैव जननादिति, तथाच निश्चयत्वप्रयोजकविपरीतकोटिभान-सामग्रीविरहस्यासत्त्वाच निश्चयापत्तिरिति भावः। ननु कोटि-द्वयोपस्थितावपि यत्र विशेषदर्शनबलात् विपरीतकोटिभान-सामग्रीविरहः, यत्र च तत्कोटिमात्रसहचरितधर्म्मदर्शनात् तत्कोटि-रेवोपस्थितिः तत्र तद्विषयो दुर्व्वार इत्यत आह, 'सति च विशेष-दर्शनादाविति, आदिना कोव्यन्तरोपस्थित्यभावस्य विकल्पेन परिग्रहः, संशय-निश्चयसाधारणद्रव्यविशिष्टबुद्धिविशेषे इन्द्रिय-

---

(१) तदकरणादिति कस्यचित् पुस्तकस्य पाठः, इदंपाठे पूर्व्वोक्तविशेषस्य नानुषङ्गः, अपि तु तत्सदृशस्य तस्य परामर्शः।

संयोगहेतुतायाः संशयानुपपत्त्या उक्तिसम्भवोपि नेत्याह, 'युक्तश्चै-तदिति, 'एतत्' व्यवहितस्यापि दण्डादेः सति विशेषदर्शनादावुप-नयात् निश्चयजननं, 'कथमन्यथेत्यनन्तरं विशेषादर्शन इति पूरणीयम्, 'असौ' संशयः, 'तद्विशिष्टबुद्धिः' वहिरिन्द्रियजन्य-द्रव्यविशिष्टबुद्धिः, निश्चयत्वं जन्यतावच्छेदके निवेश्यमित्याशयेन शङ्कते, 'न तर्हि यय इति, निश्चयत्वस्यार्थसमाजग्रासेन जन्यताव-च्छेदके प्रवेशासम्भव इति कथयिष्यन् निश्चयत्वाभावस्य व्यभिचारा-भावेऽकिञ्चित्करतामाह, 'किन्तेनेति, ननु व्यभिचारवारणान्यथानु-पपत्त्या अर्थसमाजग्रस्तस्यापि कार्यतावच्छेदकत्वमुपेतव्यमित्यत-आह, 'अस्तु वेति, तथाच निश्चयत्वस्यापि जन्यतावच्छेदकत्व-स्वीकारः, 'दर्शनादित्यत्रासमस्ततया 'विशेषस्येत्यनुषज्यते, 'सम्भ-वात्' उत्पत्तेः, उक्तकार्य्य-कारणभावस्य निर्युक्तिकत्वादिति भावः। यद्यपि प्रागेव निश्चयत्वस्येष्टत्वमुक्तं तथापि तदा युक्त्य-नभिधानादनुभवकलहानिहत्तेरिदानीं यादृशसामग्रीतो विशेषा-दर्शनदशायां संशयः ततएव विशेषदर्शनकाले निश्चय इत्यनु-भवसिद्धं नियममवलम्ब्य निश्चयोत्पत्तिर्दूषीकृता। अभ्युपेत्याह, 'मा भूदिति, 'तत्र' मानसे, 'तादृशनियमस्य' वह्न्यादीन्द्रियसंयोगा-पेक्षानियमस्य ।

दीधितिः ।

उच्यते । अस्ति तावदनुमितीमीत्यनुव्यवसाय-साक्षिको ज्ञानविशेषो यत्र कारणमन्वय-व्यतिरेकाभ्यां

व्याप्यपरामर्शः, मानसप्रत्यक्षविशेषोऽसाविति चेत्, कुतोऽस्य प्रत्यक्षत्वं अनुभवत्वादिति चेत्, किमेवमनुभवत्वमन्यत् प्रत्यक्षत्वात्, स्मृत्यन्यज्ञानत्वमिति चेन्न, अप्रयोजकत्वात् अनुमितौ साक्षात्कारित्वग्रहप्रसङ्गाच्च। तद्ग्राह्यलौकिकसन्निकर्षादिजन्यत्वविरहान्न तथेति चेत्, आत्मानुमितौ तस्यापि सम्भवात् वह्निमनुमिनोमि न तु साक्षात्करोमीत्यबाधितसाक्षात्कारत्वाभावग्रहाच्च, अगत्या तु सौरभं न पश्यामीत्यादावन्यथात्वकल्पनं, सामान्यलक्षणानङ्गीकर्तृनये चाप्रसिद्धवह्न्यादिव्यक्तिकानुमितौ न प्रत्यक्षत्वसम्भावनापि सन्निकर्षासम्भवात्। एतेन शाब्दादिकं व्याख्यातं, व्यवस्थापयिष्यते तावदप्रसिद्धाभावसाध्यकानुमितिः। न च साक्षात्कारिणी, तत्रोपनयस्यासम्भवात्। एवञ्च प्रसिद्धसाध्यकानुमितेरपि न साक्षात्त्वं जातिसङ्करप्रसङ्गादित्यपि केचित्। तच्च भेदत्वादिनोपस्थिते जलादिप्रतियोगिकत्वग्रह इत्यपरे। 'मानाभावादिति, तन्निष्ठावच्छेदकान्तरग्रहमन्तरेणासम्भवाच्चेत्यपि द्रष्टव्यम्।

गादाधरी विहति.।

'ज्ञानविशेषः' प्रत्यक्षविजातीयं ज्ञानं, तथाच तत्कारण-

तया चानुमानस्य प्रमाणतेति भावः । न च व्याप्यदर्शनानन्तर-जातालौकिकप्रत्यक्षत्वं तादृशानुव्यवसायविषय इति वाच्यम् । साध्यनिश्चयाद्युत्तरकालतादृशानुव्यवसायानुदयात् । न च साध्य-निश्चयाद्यनुत्तरत्वमपि निवेशनीयमिति वाच्यम् । तदनुपस्थितावपि तथाविधानुव्यवसायोदयात् । अस्त्वनुव्यवसायबलादनुमितित्वं जातिः सा प्रत्यक्षत्वव्याप्यैवेति न तत्करणस्य प्रामाणान्तरतेति शङ्कते, 'मानसेति, अनुमितौ प्रत्यक्षत्वस्याप्रामाणिकतया अनुमितिः प्रत्यक्षविजातीयैवेति तत्करणं मानान्तरमिति समाधित्सुः प्रत्य-क्षत्वे मानं पृच्छति, 'कुत इति, पूर्वपक्षी शाब्दोपमित्योरपि प्रत्यक्षत्वमङ्गीकुर्वाणो अनुभवत्वमेव प्रत्यक्षत्वे साधकं दूषयति, 'अनुभवत्वादिति, अनुभवत्व-प्रत्यक्षत्वयोः समनियतत्वे समनियत-जातिद्वयानङ्गीकारेण अनुभवत्व यदि जातिस्तदा प्रत्यक्षत्वमेव तदिति साध्यविशेष इति दूषयति, 'किमेवमिति । स्मृत्यन्यज्ञान-स्वरूपोपाधिरेवानुभवत्वं प्रत्यक्षत्वसाधकमतो न साध्यविशेषः इत्याशङ्कते, 'स्मृत्येति । ननु विशेषणज्ञानजन्यतावच्छेदिका अनु-भवचतुष्टयसाधारणी जातिरेव साक्षात्कारीमीत्यनुव्यवसायसाक्षिकं प्रत्यक्षत्वं, न त्वनुमित्यादित्वयुक्ता अन्यापि जातिरत्र प्रामाणिकी तया च प्रत्यक्षानुमानयोर्न पृथक्प्रमाणता । न च विशेषणज्ञान-जन्यतावच्छेदकजातिरनुमित्यादिसाधारणे मानाभावः विशेषण-ज्ञानासत्त्वे परामर्शादिविरहेणैवानुमित्याद्यापत्त्ययोगादिति वाच्यं । पृथिव्यामितरभेद इत्याकारकाप्रसिद्धसाध्यकानुमित्युत्पादकाले साध्यविशेषणकानुमितिवारणाय विशेषणधीजन्यतावच्छेदकस्य

तत्साधारणतायां आवश्यकत्वात्। यदि च पृथिवीतरभिन्नेत्यनुमितिः विशिष्टे वैशिष्ट्यविषयिनीति विशेषणतावच्छेदकप्रकारकधीविरहात्र तथाः साध्यविशेष्यकानुमित्युत्पत्तिदशायामापत्तिरित्युच्यते तदापि अनुमितिर्विशेषणतावच्छेदकप्रकारकधीजन्यतावच्छेदकाक्रान्ततयैव प्रत्यक्षानुमित्योः स्मृतित्वाद्यत्तैकजातीयत्वमावश्यकं स्मृतित्वाद्यत्तजातिरेव तज्जन्यतायामप्यवच्छेदकत्वात्। यदि चानुमितिपरामर्शरूपकारणविरहादेव नाप्रसिद्धसाध्यकस्थले साध्यतावच्छेदकविशिष्टवैशिष्ट्यविषयकानुमितिः स्वतन्त्रसाध्यतावच्छेदकप्रकारकज्ञानदशायामप्यप्रसिद्धसाध्यकव्यतिरेकिपरामर्शात् साध्यविशेष्यिकैवानुमितिरुपेयते साध्यप्रसिद्धेस्तत्र प्रतिबन्धकत्वानुपगमात्। यदि वा अप्रसिद्धसाध्यकस्थलेऽपि साध्यविशेष्यकानुमित्यनुपगमे चतिविरहात् तादृशव्यतिरेकिपरामर्शात् सर्व्वत्र विशेष्ये विशेषणमित्यादिरीत्या साध्यविशेषणिकैवानुमितिरुपेयते इत्युच्यते, तदापि समानविषयकशाब्दबोध-चाक्षुषादिसामग्रीकाले अनुमितिवारणायानुमितित्वावच्छिन्नं प्रति तादृशसामग्र्याः पृथक् प्रतिबन्धकत्वं सिद्धान्तिना वाच्यम् अनुमितौ प्रत्यक्षविशेषत्वमते (१) मानसत्वावच्छिन्नं प्रति तादृशसामग्र्याः कृतप्रतिबन्धकत्वयैवोपपत्तौ न तत्कल्पनमिति लाघवादनुमितौ प्रत्यक्षत्वसिद्धिर्निष्प्रत्यूहैव। न च कथितशाब्दादिसामग्रीकाले (२) भित्त्वविषयकानुमित्युत्पत्त्या अनुमितेर्मानसत्वनये समानविषयकमानसत्वमेव तादृशसामग्रीप्रतिबध्य-

---

(१) पृथक्प्रतिबन्धकत्वकल्पने गौरवमनुमितौ मानसत्वस्वीकार इति पा०।

(२) तत्र शाब्दादिसामग्रीकाल इति पा०।

तावच्छेदकं वाच्यं तथाच भिन्नविषयकानुमित्यन्यमानसासंग्रह-
इति वाच्यम्। भिन्नविषयकमानसेच्छामुत्तेजकीकृत्य भिन्नविषयक-
मानसस्थले पृथक् प्रतिबन्धकतायां भवतोप्यावश्यकतया समान-
विषयकमानससाधारणप्रतिबध्यतया तदसंग्रहे चतिविरहात्। न
चानुमित्यन्यमानसस्थलीयप्रतिबन्धकतायामनुमितित्वप्रकारकेच्छा-
या अतिप्रसङ्गभयेनानुत्तेजकतया अनुमितित्वप्रकारकेच्छामुत्ते-
जकीकृत्यानुमितिस्थले पृथक् प्रतिबन्धकत्वमुभयोरावश्यकमिति
नोक्तलाघवावकाश इति वाच्यम्। यद्विषयकशाब्दादिसामग्रीकाले
अनुमितित्वप्रकारेच्छया न कदाप्यनुमितिर्जाता तत्रैव दर्शित-
लाघवसम्भवात्। न च तत्र लाघवेऽपि यत्रानुमितित्वप्रकारकेच्छा-
बलादनुमितिर्जाता तत्स्थलीयानुमित्यन्यमानसनिष्ठप्रतिबध्यता-
यामनुमित्यन्यमानसत्वमेवावच्छेदकं वाच्यम् अन्यथा असत्यां मान-
सत्वप्रकारकेच्छायां सत्यां च कथितशाब्दादिसामग्र्यां अनुमिति-
त्वप्रकारकेच्छासत्त्वेऽप्यनुमित्यनुपपत्तिरिति गौरवमिति वाच्यम्।
अनुमित्यन्यमानसे सर्व्वत्र लौकिकसन्निकर्षबलादात्मत्वभानोप-
गमेन लौकिकविषयितासम्बन्धेनात्मत्वस्यैवानुमित्यन्यमानसस्थली-
यस्य (१) तादृशप्रतिबध्यतावच्छेदकत्वोपगमेनानुमितिरुपपादना-
दिति नोक्तप्रयोजकत्वशङ्केत्यतोऽनुमितौ प्रत्यक्षत्वस्य बाधकमाह,
'अनुमितावि'ति, साक्षात्कारित्वप्रसङ्गवारणप्रकारमाशङ्कते,'तद्वाक्ष-
केति सुरभि चन्दनमित्यादिचाक्षुषादेः सौरभादिसाक्षात्कारित्वेनानु-

---

(१) अनुमित्यन्यमानसत्वप्रकारकेच्छास्थलीयस्येति पा०।

त्साधारण्याया आवश्यकत्वात्। यदि च पृथिवीतरभिन्नेत्वनुमितिः विशिष्टे वैशिष्ट्यविषयिनीति विशेषणतावच्छेदकप्रकारकधीविरहात्र तथाः साध्यविशेष्यकानुमित्युत्पत्तिदशायामापत्तिरित्युच्यते तदापि अनुमितेर्विशेषणतावच्छेदकप्रकारकधीजन्यतावच्छेदकाक्रान्ततयैव प्रत्यक्षानुमित्योः स्मृतित्वाद्यत्तैकजातीयत्वमावश्यकं स्मृतित्वावच्छिन्नजातेरेव तज्जन्यतायामप्यवच्छेदकत्वात्। यदि चानुमितिपरामर्शैकप्रकारणविरहादेव नाप्रसिद्धसाध्यकस्थले साध्यतावच्छेदकविशिष्टवैशिष्ट्यविषयकानुमितिः स्वतन्त्रसाध्यतावच्छेदकप्रकारकज्ञानदशायामप्यप्रसिद्धसाध्यकव्यतिरेकिपरामर्शात् साध्यविशेष्यिकैवानुमितिरुपेयते साध्यप्रमितेस्तत्र प्रतिबन्धकत्वानुपगमात्। यदि वा अप्रसिद्धसाध्यकस्थलेऽपि साध्यविशेष्यकानुमित्यनुपगमे चतिरिक्तात् तादृशव्यतिरेकिपरामर्शात् सत्त्वेन विशेषे विशेषणमित्यादिरीत्या साध्यविशेषणिकैवानुमितिरुपेयते इत्युच्यते, तदापि समानविषयकशाब्दबोध-चाक्षुषादिसामग्रीकाले (२) अनुमितिवारणायानुमितित्वावच्छिन्नं प्रति तादृशसामग्र्याः पृथक् प्रतिबन्धकत्वं सिद्धान्तिना वाच्यम् अनुमितौ प्रत्यक्षविशेषत्वमते (१) मानसत्वावच्छिन्नं प्रति तादृशसामग्र्याः क्लृप्तप्रतिबन्धकत्वेनैवोपपत्तौ न तत्कल्पनमिति लाघवादनुमितौ प्रत्यक्षत्वसिद्धिर्निष्प्रत्यूहैव। न च कथितशाब्दादिसामग्रीकाले (२) मिश्रविषयकानुमित्युत्पत्त्या अनुमितेर्मानसत्वनये समानविषयकमानसत्वमेव तादृशसामग्र्याप्रतिबध्य-

(१) पृथक्प्रतिबन्धकत्वकल्पने गौरवमनुमितौ मानसत्वस्वीकार इति पा०।

(२) तत्र शाब्दादिसामग्रीकाल इति पा०।

तावच्छेदकं वाच्यं तथाच भिन्नविषयकानुमित्यन्यमानसासंग्रह-
इति वाच्यम्। भिन्नविषयकमानसेच्छासुत्तेजकीकृत्य भिन्नविषयक-
मानसस्थले पृथक् प्रतिबन्धकतायां भवतोप्यावश्यकतया समान-
विषयकमानससाधारणप्रतिबध्यतया तदसंग्रहे क्षतिविरहात्। न
चानुमित्यन्यमानसस्थलीयप्रतिबन्धकतायामनुमितित्वप्रकारकेच्छा-
या अतिप्रसङ्गभयेनानुत्तेजकतया अनुमितित्वप्रकारकेच्छासुत्ते-
जकीकृत्यानुमितिस्थले पृथक् प्रतिबन्धकत्वमुभयोरावश्यकमिति
नोक्तलाघवावकाश इति वाच्यम्। यद्विषयकशाब्दादिसामग्रीकाले
अनुमितित्वप्रकारेच्छया न कदाप्यनुमितिर्जाता तत्रैव दर्शित-
लाघवसम्भवात्। न च तत्र लाघवेऽपि यत्रानुमितित्वप्रकारकेच्छा-
बलादनुमितिर्जाता तत्स्थलीयानुमित्यन्यमानसनिष्ठप्रतिबध्यता-
यामनुमित्यन्यमानसत्वमेवावच्छेदकं वाच्यम् अन्यथा असत्यां मान-
सत्वप्रकारकेच्छायां सत्यां च कथितशाब्दादिसामग्र्यां अनुमिति-
त्वप्रकारकेच्छासत्त्वेऽप्यनुमित्यनुपपत्तेरिति गौरवमिति वाच्यम्।
अनुमित्यन्यमानत्वे सर्व्वत्र लौकिकसन्निकर्षबलादात्मत्वभानोप-
गमेन लौकिकविषयितासम्बन्धेनात्मत्वस्यैवानुमित्यन्यमानसस्थली-
यस्य (१) तादृशप्रतिबध्यतावच्छेदकत्वोपगमेनानुमितेरुपपादना-
दिति नोक्तप्रयोजकत्वग्रहेत्यतोऽनुमितौ प्रत्यक्षत्वस्य बाधकमाह,
'अनुमितावि'ति, साक्षात्कारित्वप्रसङ्गवारणप्रकारमाशङ्कते,'तद्ग्रन्थ-
केति सुरभि चन्दनमित्यादिशब्दादेः सौरभादिसाक्षात्कारित्वेनानु-

---

(१) अनुमित्यन्यमानसत्वप्रकारकेच्छाश्रयीयस्येति प०।

व्यवसायवारणाय विशेषणतासम्बन्धेन तत्तद्विषयधर्मितावच्छेदकता
प्रकारसाक्षात्कारित्वप्रकारकप्रत्यक्ष प्रति स्वरूपसम्बन्धेन तत्तद्विषय
निष्ठलौकिकसन्निकर्षादिजन्यत्वस्य हेतुत्वात्तद्विरहादनुमित्यनन्तर
न वह्नि साक्षात्करोमीत्यनुव्यवसायापत्तिरित्यर्थ । लौकिक
सन्निकर्षादीत्यादिना दोषविशेषपरिग्रह , 'आत्मानुमितावपि,
'तस्य' आत्मनिष्ठमन सयोगरूपलौकिकसन्निकर्षजन्यत्वस्य । न
चैवमात्मोपनीतभाने भवतामपि न कथ साक्षात्कारित्वग्रह'
अनुमितेरिव तस्यापि आत्ममनोयोगासमवायिकारणकत्वादिति
वाच्यम् । मानसत्वावच्छिन्नाया एव मनोयोगजन्यतायास्तद्ग्राह्यक
त्वोपगमात् मानसज्ञाने आत्मनो लौकिकसन्निकर्षादेव भानात्
चाक्षुषादाविव तयोपनीतस्य भानात् तत्र च मानसत्वावच्छिन्न
जन्यताया अभावात् अनुमितौ मानसत्ववादिनाञ्च आत्मानुमिती
तादृश्या अपि जन्यताया अलपायादिति भाव । ननूक्तलाघवेना-
नुमितेर्मानसत्वमिदौ चक्षुरादिप्रसङ्गवारणाय साक्षात्कारित्वग्रह
प्रत्यनुमितिभेदस्य कारणत्वमेव कल्पनीयमित्यत प्रत्यक्षप्रमाणेना
नुमितौ प्रत्यक्षत्वाभाव व्यवस्थापयति, 'वह्निमिति, यद्यपि
वह्नि न साक्षात्करोमीति प्रतीतिरात्मनिष्ठो वर्त्तमानकाला
वच्छिन्नो वह्निसाक्षात्काराभाव एव विषय न त्वात्मनिष्ठ
वर्त्तमानवह्निज्ञाने साक्षात्कारत्वाभाव स्वरूपतो भासमान
साक्षात्त्वजाते पदार्थतावच्छेदिकाया अभावस्य तादृशशब्देना
प्रत्यायनात्, तथाप्येकविशेषणविशिष्टाधिकरणे विशेषणद्वयविशि
ष्टाभावप्रतीतौ तद्विशेषणवति विशेषणान्तराभावपर्य्यवसन्नत्वमिति

वह्निविषयकत्ववति ज्ञाने साक्षात्कारित्वरूपविशेषणाभावः प्रकृते पर्य्यवस्यतीत्याशयेनोक्तं 'साक्षात्कारित्वाभावेति। ननु सुरभि चन्दनमित्यादिचाक्षुषप्रतीतौ जातस्य सौरभं न पश्यामीति प्रत्ययस्येवोक्त-प्रत्ययस्यापि भ्रमत्वमस्त्वित्यत आह, 'अगत्येति, चन्दनं पश्यामीत्यादिप्रतीत्या सुरभि चन्दनमित्यादिज्ञाने चाक्षुषत्वादेरावश्यकतया तत्र गत्यन्तरविरहेणैव सौरभं न पश्यामीत्यादौ चाक्षुषत्वाद्यभावांशे भ्रमत्वकल्पनमित्यर्थः। अनुमितौ च साक्षात्त्वानभ्युपगेन न साक्षात्करोमीति प्रतीतेः प्रमात्वसम्भवात्, न तन्निरित्यागः धियां प्रमात्वस्यौत्सर्गिकत्वादिति भावः। अत्र नव्याः सौरभं न पश्यामि न साक्षात् करोमीत्यादिप्रतीतेः प्रमात्वानुरोधेन लौकिकत्वाख्योविषयताविशेषः कल्प्यते, तद्विशिष्टचाक्षुषत्वाद्यभावो न पश्यामीत्यस्य, तदभाव एव न साक्षात्करोमीत्यस्य विषयः। न च तथापि सौरभनिरूपितताद्दश्य-विषयितावैशिष्ट्यचाक्षुषाप्रसिद्धा सौरभं न पश्यामीत्यत्रागतिरेवेति वाच्यम्। चाक्षुषनिष्ठविषयितायां सौरभनिरूपितत्वाभावस्यैव ताद्दशप्रत्ययविषयत्वोपगमात्, अन्ध आकाशं न पश्यतीत्यादावपि कथञ्चित्प्रमात्वमुपपादनीयम्। न चातिरिक्तविषयितापसिद्धान्ततया न स्वीकरणीयेति वाच्यम्। प्रतीत्यनुरोधेन तत्कल्पनेऽपसिद्धान्तभयस्याविरोधित्वात्। अतएवाभावत्व-प्रतियोगित्वादीनामतिरिक्तपदार्थत्वं ग्रन्थकृतामनुमतम्। न चैवं प्रत्यक्षत्वजातिरेव प्रामाणिकी स्यात् तत्कार्य्यस्य लौकिकत्वेनैवोपपादनसम्भवादिति वाच्यम्। विशेषणज्ञानादिजन्यतावच्छेदकतयैव तत्सिद्धेः,

विषयितानिरूपितया जातेस्तस्तथात्वे लाघवात् सर्व्वांशेपनीतेभानस्य प्रामाणिकत्वे तदंशग्राहकतयापि लौकिकत्वस्य विशेषणतावच्छेदकप्रकारकज्ञानादिजन्यतावच्छेदकत्वासम्भवाच्च। एवञ्चानुमितेः प्रत्यक्षतामतेऽपि न तत्र साध्याभावग्रहानुपपत्तिरिति तस्याः प्रत्यक्षत्वाभावे युक्त्यन्तरमेवानुसन्धेयम्। 'सन्निकर्षविरहादित्यनुमानप्रामाण्यव्यवस्थापिकां मूलयुक्तिं सामान्यलक्षणानभ्युपगमपक्षे सङ्गमयति, 'सामान्येति, 'अप्रसिद्धवह्न्यादीति पूर्व्वाभ्यातपर्व्वतीयवह्न्यादीत्यर्थः, 'व्याख्यातं' प्रत्यक्षविजातीयतया व्यवस्थापितम्, अन्येषां युक्तिमुपन्यस्यति, 'व्यवस्थापयिष्यत इति। 'केचिदित्यखण्डोद्भावनं तद्बीजन्तु असन्निकृष्टस्याभावस्य साध्यतया अनुमितौ भानेऽपि तस्याः प्रत्यक्षत्वं निराबाधमेव यत्किञ्चिद्विषयसन्निकर्षजन्यतयैव प्रत्यक्षत्वनिर्व्वाहात्, साध्यांशे प्रकारतया भासमानस्याभावत्वादेः सामान्यस्यापि सन्निकर्षतया अज्ञातत्वमात्रेणाप्यसन्निकृष्टत्वानिर्व्वाहाच्च। न चाज्ञातस्य साध्यस्यानुमितौ ज्ञाने तादृशाभावविषयकोपनायकस्य तत्र व्यभिचारप्रसक्तिरेव तस्याः प्रत्यक्षत्वबाधिकेति वाच्यम्। प्रकारतायाः एव उपनायकज्ञानजन्यतावच्छेदकत्वोपगमेन व्यभिचारानवकाशात्। तन्मुख्यविशेष्यकमानोपनीतभानेऽपि तस्य स्वांशे अभेदसम्बन्धेन प्रकारतोपगमेन तत्संग्रहात्। अन्यथा सामान्यप्रत्यासत्तिजन्याज्ञातविशेष्यकबोधे व्यभिचारस्य दुर्व्वारत्वात्। वस्तुतः साध्यतावच्छेदकप्रकारेणाज्ञानेऽपि अभावत्वादिना साध्यस्य सामान्यप्रत्यासत्त्यैव ज्ञानं प्राक्सम्भवतीति नोपनयस्य व्यभिचार-

इत्यनुसरणीयं(१) अप्रसिद्धसाध्यकानुमितिमनभ्युपगम्य तादृग्युक्तिं दूषयतां परेषां मतमाह, 'तत्रेति, 'भेदत्वादिना' पृथिवीनिष्ठभेदत्वादिना,'आदिना क्वचिद् धूमात्यन्ताभाव इत्याद्यनुमितिप्रकारस्यात्यन्ताभावत्वस्य परिग्रहः, 'जलादिप्रतियोगिकत्वग्रहः' जलादिप्रतियोगिकत्वानुमितिः, जलादिप्रतियोगिकत्वं साध्यतया अनुमितेर्विषय इति यावत्, इत्यनियामकसंसर्गस्य व्यापकताघटकत्वे तु जलादिरूपसाध्यस्य संसर्गतयापि तत्प्रतियोगिकत्वं विषयः सम्भवतीति द्रष्टव्यम्। एतावतैव जलादिभेदस्य तादृप्येणाज्ञानदशायां पृथिव्यादिनिष्ठजलादिभेदसिद्धया ह्यतमप्रसिद्धसाध्यकानुमितिस्वीकारेण इति भावः। जलादिप्रतियोगिकत्वानुमापकान्वयिनोऽनुपस्थितिदशायामपि व्यतिरेकिणा तद्वत्त्वादिनापि तदनुमानसम्भवोबोध्यः। अत्राप्यपरद्वयस्वरससूचनाय, तन्नीलन्तु पृथिवीनिष्ठभेदत्वादिना भेदसाक्षात्वानुपस्थितावपि जलादिव्यापकाभावप्रतियोगित्वादिना भावेन पृथिव्यादौ जलादिभेदसिद्धेरप्रसिद्धसाध्यकानुमितिमनभ्युगम्य दुरुपपादता, तदपलापे पक्षैकदेशे जलादिभेदस्य प्रसिद्धैव कदाचित् तत्तत्साध्यकानुमितेरप्युपपादनसम्भवात् तादृशानुमित्यैवाप्रसिद्धसाध्यकानुमानखण्डनौचित्यादिति।

अनुमितिकारणविशिष्टपरामर्शानुपपत्तिरूपपूर्वपक्षमधक्षयितबाधकमुद्धृत्य 'यो यत्र विशिष्य पूर्वमित्यादिनियमं स्थापयित्वा अनुमितिस्थले पक्षे साध्योपनीतज्ञानं सामान्यप्रत्यासत्ति-

---

(१) क्वचिदनुसन्धेयमिति पा०।

मतेऽपि निराकुर्व्वाणस्य कस्यचिन्मतं निरसितुमुपन्यस्यति, मूले 'कश्चिदिति, 'परम्परासम्बन्धेन व्याप्यत्वं' परम्परासम्बन्धघटित-व्याप्यत्वम् ।

तत्त्वचिन्तामणिः ।

भवतु तावदेवं तथापि जातिरेव लिङ्गं स्यात् न तु व्यक्तिः तथाच सर्व्वोपसंहारेण व्यक्तौ व्याप्तिग्रहार्थं सामान्यलक्षणप्रत्यासत्तिव्युत्पादनमफलम् (१) स्यात् दृश्यते च परम्परासम्बन्धज्ञानं विना जातिव्याप्तिमविदुषोऽपि धूमादग्न्यनुमानम् । न हि व्याप्यतावच्छेदकतया भासमानस्यावश्यं व्याप्यतायहः, मानाभावात्, तस्मात् पक्षधर्म्मे व्याप्तिविशिष्टज्ञानं तदनन्तरं विशिष्टवैशिष्ट्यज्ञानं पक्षे वा तृतीयलिङ्गपरामर्शः । अन्ये तु स्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं व्यापकत्वं तत्समानाधिकरणत्वञ्च व्याप्यत्वं तथाच लाघवात् व्यापकताज्ञानमनुमितिहेतुः साध्यस्य पक्षधर्म्मव्यापकताज्ञानञ्च परामर्शः, न तु साध्यव्याप्यस्य पक्षधर्म्मताज्ञानं साध्यव्याप्यवत्पक्षधर्म्मताज्ञानं वा गौरवात् ।

---

(१) सामान्यलक्षणप्रत्यासत्त्युपादानमफलमिति पा० ।

दीधितिः ।

उपसंहरति, 'तस्मादिति, वाशब्दोऽनास्थायाम् उभयथापि प्रक्लृप्ताच्चतेः । वस्तुतो व्याप्य-पक्षयोर्वैशिष्ट्या-वगाहिज्ञानत्वेन हेतुत्वं विनिगमनाविरहेणान्यतर-विशेषण-विशेष्यभावस्यातन्त्रत्वात् । 'लाघवादिति, अथाव्याप्यवृत्तेर्व्यापकत्वसम्पत्तयेऽभावस्य प्रतियोग्य-सामानाधिकरण्यं वाच्यं तच्च स्वप्रतियोग्यनधिकरण-वृत्तित्वम् एवञ्चावृत्तिगगनादेर्धर्म्ममाचक्ष्यापकत्वं स्यात् तादृशघटत्वाद्यभावाप्रतियोगित्वात् तदधिकरणा-प्रसिद्धा च तद्भावस्य स्वप्रतियोग्यनधिकरणवृत्तित्वा-सम्भवात् तथा च तद्व्यावृत्तये व्यापके हेतुसामाना-धिकरण्यं वाच्यम् । न चैवं, हेतोर्व्याप्यसामाना-धिकरण्यापेक्षया लाघवमिति चेदस्तु तावदेवमापातत-स्तथापि वृत्तिमत्त्वमानमुपादेयम् । न चैवं हेतोः साध्यसामानाधिकरण्यस्य संशये व्यतिरेकनिश्चये वा अनुमित्यापत्तिरिति वाच्यम् । संशये दृष्टत्वात् व्यति-रेकनिश्चये च पक्षधर्म्मत्वाग्रहे परामर्शविरहात् तद्ग्रहे च साध्यासमानाधिकरणधर्म्मान्तरग्रहस्यैव तस्यापि विरोधित्वात् अन्यथा त्विष्टत्वात् पर्व्वतो वह्निव्याप्य-

धूमवान् पाषाणमयः पाषाणमयावृत्तिश्च वह्निरिति ज्ञानेन च तुल्ययोगक्षेमं पर्वतवृत्तिधूमव्यापको वह्निधूमवद्वृत्तिश्चेति ज्ञानम्। न च साध्याप्रतियोगिकस्वसमानाधिकरणयावदत्यन्ताभावकत्वं साध्याप्रतियोगिकत्वावच्छेदकस्वसमानाधिकरणात्यन्ताभावत्वकत्वं वा व्याप्तिः साध्यप्रतियोगित्वञ्च केवलान्वयिनि साध्यस्यान्योन्याभावे सम्बन्धविशेषावच्छिन्नात्यन्ताभावे वा प्रसिद्धमिति वाच्यम्। गौरवात् व्यापकत्वादानन्त्यभावेन यावत्त्वस्य दुर्वचत्वात् प्रमाणाभावेन स्वरूपसम्बन्धविशेषरूपत्वासम्भवेनावच्छेदकत्वस्यानतिरिक्तवृत्तित्वपर्य्यवसायित्वाच्च, व्यापकतायाश्च प्रतियोगित्वादेः सामान्याभावस्योक्तत्वात् सम्बन्धादिनिष्ठसाध्यप्रतियोगित्वव्यक्तिरभावस्य व्यभिचारिसाधनसमानाधिकरणयावदत्यन्ताभाववृत्तितया त्वयापि तस्यावश्यं वाच्यत्वात् साधनसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्म्मवत्त्वरूपव्यापकत्वज्ञानमपेक्ष्य साध्यवदन्यावृत्तित्वज्ञानस्य लघुत्वात्।

गादाधरी विवृतिः।

'सामान्यप्रत्यासत्तिव्युत्पादनं' सामान्यप्रत्यासत्तिस्वीकारः,

जातिमात्रस्य लिङ्गत्वोपगमेऽनुभवविरोधमप्याह, 'दृश्यते चेति । ननु धूमत्वेन धूमे व्याप्तिग्रहदशायां धूमत्वोपस्थितेराश्रयक-तया तत्रापि परम्परासम्बन्धघटिता व्याप्तिः शक्यग्रहा, अधि-करणे धूमत्वावच्छिन्नवत्त्वघटितधूमव्यापकताग्रहे धूमघटित-सम्बन्धेन धूमत्वस्याप्यधिकरणत्वांशे भानसम्भवेन धूमत्वव्यापक-ताया अपि वह्नौ भानसम्भवात् । धूमत्ववति संयोगेन वह्नि-महत्तित्वे भासमाने धूमत्वेऽपि वह्निमतः स्वसंयोगिसमवायरूप-परम्परासम्बन्धभानसम्भवाच्चेति व्यक्तिव्याप्तिज्ञानदशायां जाति-व्याप्यग्रह एवाप्रसिद्ध इत्यत आह, 'न हीति, 'भानाभावादिति, धर्मिणः साक्षात्सम्बन्धभाने धर्मस्य परम्परासम्बन्धभाननियमा-सिद्धिरिति भावः । अनुमित्यन्यथानुपपत्तेर्मानत्वसम्भवेनात्रापरि-तोषात् तात्पर्यनियमे बाधकं पुरयति, दीधितौ 'तन्निष्ठेति, अव-च्छेदकधूमत्वादिनिष्ठं अवच्छेदकान्तरं धूमत्वत्वादि, 'असम्भवात्' अवच्छेदकधूमत्वादौ अनुमित्यौपयिकव्याप्तिग्रहासम्भवात्, अभावे हेतुतावच्छेदकविशिष्टहेतुसामानाधिकरण्यस्य व्यापकताघटक-तया हेतुतावच्छेदकस्यापि तथात्वात् मकते अविशेषितधूमत्वा-दिविशेषिताधिकरणस्य व्यापकताघटकत्वोपगमेऽपि धूमत्व-त्वादिप्रकारेण व्यापकसामानाधिकरण्यप्रकारकज्ञानमेवानुमिति-हेतुर्वाच्यः, सामानाधिकरण्यांशे निर्धर्मितावच्छेदकप्रकज्ञान-स्यानुमित्यहेतुत्वात् तथा सति परम्परासम्बन्धेन धूमत्वादि-शून्यतया निर्णीयमाने ह्रदादावपि वह्न्यायनुमानापत्तेः, वह्नि-सामानाधिकरण्यसामान्याभावस्य तत्रापि केवलेन वह्निसमाना-

धिकरणत्वेन धूमत्वादेस्तदा तव ग्रहसम्भवात् धूमत्वत्वाद्यवच्छिन्ने सामानाधिकरण्यग्रहः कथं धूमत्वत्वाद्युपस्थितिं विना सम्भवति, साध्याभाववदवृत्तित्वरूपा व्याप्तिरपि पक्षवृत्तौ व्याप्यतावच्छेदक-निश्चयं विना प्रायशो दुर्निश्चयतया उपनीतविपरीतकोटेरपि मान-सम्भवेन संशयसम्भवात्, निर्ऋमितावच्छेदकसंशयासम्भवेन (१) साध्याभाववदवृत्तिमानिति निश्चयसम्भवेऽपि पक्षवृत्तित्वावच्छेदेन व्यभिचारसंशये च पक्षः साध्याभाववदवृत्तिमानिति निश्चयोऽपि दुर्घट इति भावः। 'मानाभावादित्यस्य मानत्वावच्छेदके व्याप्ति-प्रमितिजनकस्य तन्निष्ठावच्छेदकान्तरग्रहस्याभावात् नियमेना-सत्त्वादित्यर्थसम्भवेन पूर्णं विनापि निर्व्राह इति द्रष्टव्यम्। 'तस्मादित्यादेरव्यवधानव्यवस्थापितानुमानप्रामाण्योपनय-प्रत्यास-त्तित्वयोरुपसंहारत्वासम्भवात् प्रागव्यवस्थापितविशिष्टपरामर्शहेतु-त्वोपसंहारत्वमाविष्कर्तुमाह, 'उपसंहरतीति, मूले 'पक्षधर्मे व्याप्तिविशिष्टज्ञानमिति, विशेष्यतायां विशेषणतायां वा अवच्छे-दिकया व्याप्या प्रकारेण विशेष्यस्य विशेषणस्य वा पक्षीयहेतो-र्ज्ञानं प्रथमस्य इत्यर्थः, एतज्ज्ञानं सामान्यलक्षणाप्रत्यासत्तित्वमते स्मरणमेव अन्यथा तु महानसीयधूमादिविशेष्यकव्याप्तिस्मरणाधीनं प्रत्यक्षं तत्र च व्याप्ति पक्षधर्मतयोरेकत्र इयमित्यादिरीत्या भानेऽपि न तस्य व्याप्तिविशिष्टधूमे पक्षधर्मतायाः पक्षे वा तादृशधूमस्य विशिष्टावगाहिता सम्भवति तादृशबुद्धौ व्याप्तिविशिष्टधूमज्ञानस्य

---

(१) सशयानुपपत्तेरिति पा०।

विशेषतावच्छेदकविशिष्टविशेष्यादिज्ञानविधया हेतुत्वात् । अतएव न तस्यानुमितिहेतुतापि, तत्साधारणेन एकत्र व्याप्ति-पक्षधर्मतो-भयावगाहिज्ञानत्वेनानुमितिहेतुव्याप्यंशे संशयादनुमितिवारणाय तदन्यत्वस्याधिकस्यानुमितिजनकतावच्छेदके निवेशापातात् विशि-ष्टवैशिष्ट्यावगाहित्वेनैवानुमितिजनकत्वोपगमादिति । 'तदनन्तर-मिति तदनन्तरजातमित्यर्थः, 'विशिष्टवैशिष्ट्यज्ञानं' व्याप्ति-विशिष्टे पक्षवैशिष्ट्यावगाहिज्ञानत्वावच्छिन्नं, 'पक्षे वा तृतीयलिङ्ग-परामर्शः' पक्षे व्याप्तिविशिष्टप्रतियोगिकवैशिष्ट्यज्ञानत्वावच्छिन्नं वा, अनुमितिहेतुरिति शेषः । उभयोः पक्षयोस्तुल्यतया पूर्ववत्यपरि-तोषाभावाद्वाकारः एकत्रानिर्भरसूचकतया व्याचष्टे, दीधितौ 'वेति । ननु पूर्वमेकविधस्यैव परामर्शस्यानुमितिहेतुतायाः प्रति-पन्नत्वादत्र विकल्पेनोभयविधस्य तद्धेतुत्वोपसंहारविरोध इत्यत-आह, 'उभयथेति, 'प्रकृताद्यतेरिति अनुमितिलक्षणनिर्व्वाहादि-त्यर्थः, यादृशस्य हेतुता तादृशपरामर्शजन्यतायाः एवानुमितिलक्षणे निवेशत्वादिति भावः । एवञ्च पक्षधर्मस्य व्याप्तिविशिष्टज्ञानम् अनुमितिहेतुरित्यस्यापि पक्षतावच्छेदकावच्छिन्नविशेष्यकं व्याप्य-प्रकारकं व्याप्यवच्छिन्नविशेष्यकं पक्षप्रकारकं वा ज्ञानमनुमिति-हेतुरित्येवार्थ इति नोपक्रमविरोध इत्याशयः । उक्तपरामर्शयोरेक-तादेवानुमितिर्नान्यतादित्यत्र युक्तिविरहेण प्रत्येकरूपावच्छि-न्नस्य न जनकत्वम् उभयासंपाद्यकत्वादिति मूलोपन्यासस्तर्मं प्रका-शयन् उभयानुगमकं कारणतावच्छेदकमाह, 'यत्तु इति । अथवा मूलस्यवाकारः समुच्चये, तथाच प्रत्येकरूपेण हेतुत्वं न

विवक्षितम् अपि तूभयोरनुगतरूपेणैवेत्याह, 'वस्तुत इति। 'विनि-
गमनाविरहेण' विनिगमनाभावात्, हेतुभूतयोरुभयोरसंग्राहक-
त्वेन 'अतन्त्रत्वात्' विशिष्य जनकतानवच्छेदकत्वात्। इदमत्र बोध्यं,
व्याप्य-पक्षयोर्वैशिष्ट्यावगाहित्वं न वास्तवं पक्षानुयोगिकं व्याप्य-
प्रतियोगिकं यद्वैशिष्ट्यं हेतुतावच्छेदकसम्बन्धः तदवगाहित्वं भ्रम-
स्थलासंग्रहात् व्याप्यानवगाहिज्ञानसाधारण्याच्च। नापि व्याप्य-
प्रतियोगिकत्व-पक्षानुयोगिकत्वोभयोपरागेण तादृशसंसर्गावगाहित्वं
सम्बन्धसंसर्गकज्ञानासंग्रहात् संसर्गानुयोगित्व-प्रतियोगित्वयोर्विशि-
ष्टबुद्धिविषयत्वात्, समूहालम्बनवैलक्षण्यस्य विषयतावैलक्षण्ये-
नैवोपपत्तेः। नापि व्याप्य-पक्षोभयोपरागेण तादृशसंसर्गावगाहित्वं
तत्, तच्च तदुभयनिरूपितहेतुतावच्छेदकसम्बन्धीयसंसर्गतात्वं,
भ्रमस्थले उभयांशे संसर्गाप्रसिद्धावपि संसर्गतायां विशेष्य-विशेषणो-
भयनिरूपितत्वानुपपत्तिरिति, एवं सति पर्वतवान् व्याप्य-
त्वादिज्ञानादव्यनुमित्यापत्तेः। न च तत्र संयोगरूपहेतुतावच्छे-
दकसम्बन्धावच्छिन्नाधारत्वं सम्बन्धः न तु संयोगस्तस्य उभय-
निष्ठत्वात् तादृशबुद्धिरपि भ्रमात्वप्रसङ्गात्, यत्र संयोगो व्याप्यता-
वटकसम्बन्धस्तत्र पक्षे संयोगावच्छिन्नाधारतया व्याप्यप्रकारका-
द्याप्ये च संयोगावच्छिन्नाधेयतया पक्षप्रकारकाज्ज्ञानान्नेयत एवा-
नुमितिरपि तु संयोगमात्रेण तदेकतरांशेऽपरप्रकारकज्ञानादेवेति
वाच्यम्। एवमपि यत्राधारत्वादिरेव व्याप्यतावटकसम्बन्धस्तत्रो-
क्तज्ञानादनुमित्यापत्तेर्दुर्व्वारत्वात्। अथ संयोगो यत्र हेतुता-
वच्छेदकसम्बन्धस्तत्रैव व्याप्य-पक्षोभयवैशिष्ट्यावगाहित्वेन हेतुता

स्वीक्रियते न तु संयोगावच्छिन्नाधारतादियंत्र हेतुतावच्छेदकसम्ब-
न्धस्तत्रापि, तत्र (१) तेन सम्बन्धेन हेतुप्रकारक पक्षविशेष्यकपरा-
मर्शस्यैवानुमितिहेतुतया तादृशपरामर्शत्वस्यैव जनकतावच्छेदक-
त्वोपगमात् । न हि तत्र संयोगावच्छिन्नाधेयतासम्बन्धेन व्याप्यांशे
पक्षप्रकारकभानमपि हेतु', तस्य हेतुतावच्छेदकसम्बन्धानवगाहि-
त्वात् तद्धेतुत्वे उक्तरूपेण तत्संग्रहासम्भवाच्च इति चेत्तर्हि संयोगो-
यत्र हेतुतावच्छेदकसम्बन्धस्तत्रापि तेन सम्बन्धेन हेतुप्रकारक-
एव परामर्शो हेतुर्न तु तेन सम्बन्धेन पक्षप्रकारकोऽपि, तथा सति
हेतुनिष्ठे साध्यशून्येऽपि द्रव्ये हेतुविशेष्यक तद्द्रव्यप्रकारकयथार्थ-
परामर्शादनुमित्यापत्तेः सन्निकर्षपरामर्शादबाधितार्थविषयक
लाघवज्ञानादिरूपदोषासमवहितात् भ्रमानुमित्युत्पत्तेः सर्वानु-
भवविरुद्धतया इष्टापत्त्ययोगात्, तथाच तत्रापि (२) उक्तानुगत-
रूपेण हेतुता न युज्यत इति क्व तथा हेतुत्वम् । न चसाध्यशून्ये
हेतुसंयोगसत्त्वे तेन सम्बन्धेन व्याप्तिरेव बाधितेति कथमुक्तस्थले
प्रसञ्जितभ्रमानुमितिजनकस्य परामर्शस्य यथार्थता इति वाच्यम् ।
हेतुसंयोगिन्यपि हेतुवृत्तिद्रव्ये हेतुसंयोगानुयोगित्वविरहेण तत्र
साध्याभावस्य व्याप्यविघटकत्वात् अन्यथा संयोगेन तद्घटादेस्तद्-
घटान्यत्वाद्व्याप्यताप्रसङ्गात् साध्याभाववति तद्घटादौ तद्-
घटादिसंयोगसत्त्वात् । अत्र वदन्ति धूमवान् पर्वतः धूमः पर्वते
इत्युभयत्रैव संयोगः सम्बन्धतया भासते न तु संयोगावच्छिन्ना-

---

(१) 'तत्र' आधारतादिसम्बन्धेन हेतुतास्थल इत्यर्थः ।

(२) संयोगमात्रेण हेतुतास्थलेऽपीत्यर्थः ।

धारत्वाधेयत्वे, तथा सति संयोगस्य सम्बन्धताविलोपप्रसङ्गात्। एवञ्च तादृशज्ञानयोर्विषयतावैलक्षण्येन मिथो वैलक्षण्येऽपि धूमवान् पर्व्वतः धूमे पर्व्वत इत्यनयोः पर्व्वतवान् धूमः पर्व्वते धूम इत्यनयोर्विशेषप्रसङ्गात् तस्माद्धूमवान् पर्व्वत इत्यत्र धूमः पर्व्वते इत्यत्र च सम्बन्धस्य सम्बन्धविषया धूमे प्रतियोगित्वं पर्व्वते चानुयोगित्वं भासत इत्युपेयं, धूमे पर्व्वतः पर्व्वतवान् धूमः इत्यनयोश्च धूमेऽनुयोगित्वं पर्व्वते प्रतियोगित्वं भासत इति ताभ्यां विशेषः। न च विशेषणस्यानुयोगित्वभाने विशेष्यस्य च प्रतियोगित्वभाने विशेषण-विशेष्यभावविपरीत्यप्रसङ्ग इति वाच्यम्। यतो विशेषणत्व-विशेष्यत्वे न भासमानवैशिष्ट्यप्रतियोगित्वानुयोगित्वे, अपि तु विषयताविशेषावेव इत्याशयेन ग्रन्थकृता उक्तानुगमकरूपस्य कारणतावच्छेदकत्वमङ्गीकृतं, तथाच व्याप्यांशे सम्बन्धस्य प्रतियोगित्वं पक्षे चानुयोगित्वमवगाहमानमेव व्याप्य पक्षोभयवैशिष्ट्यावगाहितेति। वस्तुतः सम्बन्धानुयोगिनि सम्बन्धप्रतियोगिनस्तेन सम्बन्धेन विशिष्टबुद्धिः प्रमा धूम-पर्व्वतसंयोगस्य धूम-पर्व्वतयोः प्रतियोग्यनुयोगिभावो न विपरीतयोरिति पर्व्वतवान् धूम इति ज्ञानस्याधारतानवगाहित्वेऽपि न प्रमात्वप्रसङ्ग इति संयोगमात्रस्यैव सम्बन्धत्वं न त्वाधारत्वस्याधिक्यस्य, तस्यापि सम्बन्धत्वानुपपत्त्या हिष्ठतायाः स्वीकरणीयतया विशेषण-विशेष्ययोः तदीयप्रतियोगित्वानुयोगित्वयोः प्रमात्वनियामकतां विना भवतोऽप्यतिप्रसङ्गस्य दुर्व्वारत्वात्। सम्बन्धविशेषानुयोगित्वमेवाधारत्वमिति चेन्नवतु तथापि स्वरूपतस्त एव तस्य प्रमात्वनियामकतया न

तस्य सम्बन्धिसम्बन्धतेति । अत्र वदन्ति संयोगमात्रस्य सम्बन्धत्वे पर्व्वतवान् धूमः पर्व्वते धूम इत्यनयोः को विशेषः, आद्ये धूमांशे पक्षस्य संयोगः सम्बन्धः परत्र च पक्षसंयोगस्य प्रतियोगित्वं तयेति चेत्, आद्ये संयोगानुयोगित्वं सम्बन्धः परत्र च संयोग एव पक्षस्य तयेत्येव किं न स्यात्, अनुयोगित्वान्यसम्बन्धस्थले विशेष्ये प्रतियोगित्वस्यापि प्रमात्वनियामकतायां वक्तुं शक्यत्वात् शब्दानुगमस्यानपेक्षणीयत्वात् तस्माद्यत्र संयोग एव सम्बन्धस्तत्र प्रतियोग्यनुयोगिभावो धर्म्म-धर्म्मिणोस्तत्सम्बन्धतया भासत इत्युपगम्यैव उक्तप्रत्ययद्वयोर्वैलक्षण्यमपेयम् आधाराधेयभावस्य तुल्यविशिष्टवैद्यताप्रवादोऽप्येवं सङ्गच्छते (१)। तथाच व्याप्यांशे सम्बन्धस्य प्रतियोगित्वं पक्षांशे चानुयोगित्वमवगाह्यमानमेव व्याप्य पक्षवैशिष्ट्यावगाहितेति न कश्चिदतिप्रसङ्गः । इदन्तु तत्त्वं, तद्ज्ञानयमित्यत्र विशेष्ये विशेषणस्य संयोग एव सम्बन्धः, तत्रेदम् इत्यत्र च संयोगावच्छिन्नाधेयत्वमित्येव विशेषः, प्रथमे संयोगावच्छिन्नाधारत्वं परत्र च संयोगमात्रं सम्बन्ध इति वैपरीत्यस्य न प्रसक्तिः । विशेष्ये सम्बन्धानुयोगितायाः प्रमात्वनियामकतया धूमे पर्व्वत इत्यादिबुद्धेः प्रमात्वापातात्, एवञ्च सम्बन्धविधया भासमानसंयोगादेः प्रतियोगित्वानुयोगित्वभानमप्रामाणिकम् । एवञ्च पक्षविशेष्यकपरामर्श एवानुमितिहेतुर्न पर इत्यस्य विनिगमकमपि सुलभं व्याप्यविशेष्यकपरामर्शस्य संयोगावच्छिन्नाधेयतासंसर्गकत्वेनैव हेतुतायां वाच्यतया तदपेक्षया पक्षविशेष्यक-

(१) अयेत्यादिः सङ्गच्छते इत्यन्त पाठ केषुचिदादर्शपुस्तकेषु नास्ति ।

धिय: संयोगसंसर्गकत्वेन (१) हेतुत्वे लाघवादिति। हेतु-साध्य-सामानाधिकरण्याघटितत्वेन मूलोक्तव्याप्त्यपेक्षया व्यापकत्वंच लाघवं निराकर्तुं व्यापकत्वे तन्निवेशयितुमाशङ्कते, 'अथेति, 'तच स्वप्रतियोग्यनधिकरणवृत्तित्वमिति, स्व वृत्तित्वान्तविशेष्यतया विशिष्टोऽभाव:, स्वप्रतियोग्यधिकरणवृत्तिर्यो यन्मदन्यत्वनिवेशे संयोगि सत्त्वादित्यदावतिव्याप्तिरिति भाव:। धर्म्ममात्रस्य व्यापकत्वं येन येन सम्बन्धेन यदुयत् क्वचिदपि सम्बद्धं तेन तेन सम्बन्धेन तत्तत् प्रति येन येन सम्बन्धेन स्वमवृत्ति तेन तेन सम्बन्धेन व्यापकत्वं, 'तादृशेति प्रतियोग्यनधिकरणवृत्तीत्यर्थ:, गगनादेर्हेतु-सन्निष्ठस्वाभावप्रतियोगित्वमकिञ्चित्करमित्याह, 'तदधिकरणेति, 'तदधिकरणं' गगनाद्यधिकरणं, 'तदभावस्य' गगनाभावस्य, 'तद्-व्याहत्तये' उक्तापत्तिवारणाय, हेतुसामानाधिकरण्यं व्यापकताघटकं वाच्यम्। 'न चैवम्' एवञ्च न, समाधत्ते, 'अस्तु तावदिति, 'एवं' गगनाद्यभावस्य प्रतियोग्यसामानाधिकरण्यविशेषेण व्याहत्ति:, वस्तुगत्या उभयाभावघटितस्य प्रतियोग्यसामानाधिकरण्यस्य गग-नाद्यभावसाधारणतया व्याप्तिवादे दूषितत्वान्न तद्ग्राहत्तिरित्यभि-प्रेत्य उक्तम् 'आपातत इति, 'वृत्तिमत्त्व' व्यापकताघटकसम्बन्धेन सम्बन्धित्वं, न तु तेन सम्बन्धेन हेतुसामानाधिकरण्यपर्य्यन्तमिति शेष:। हेतु साध्ययोरसामानाधिकरण्यज्ञानं जनकज्ञानविषटकत्वे-नैवानुमितिविरोधि तच्च तदैवोपपद्यते यदि तयो: सामानाधि-करण्यज्ञानम् अनुमितिजनकं भवतीति आहते, 'न चैवमिति, 'एवं'

(१) संयोगविषयकत्वेनेवेति पा०।

हेतु साध्यसामानाधिकरण्यज्ञानस्याहेतुत्वे । 'पक्षधर्मतायहे' तद्-ग्रहदशायां, 'परामर्शविरहात्', पक्षधर्मतया हेत्ववगाहि-तदाप-कताज्ञानरूपानुमितिकारणविरहेण तदापत्त्ययोगात्, 'तद्ग्रहे' तद्ग्रहदशायां, 'साध्यसमानाधिकरणधर्मान्तरग्रहस्येवेति साध्या-समानाधिकरण्यतया निश्चितजलत्वादौ पक्षधर्मतायहस्येवेत्यर्थः, 'तस्यापि' प्रकृतहेतौ पक्षधर्मतायहस्यापि, 'विरोधित्वात्' तद्व-द्वृत्तित्वस्य तदभावव्याप्तिपर्य्यवसिततया साक्षादेवानुमितिविरोधि-त्वात्, साध्यवदवृत्तितया धर्मान्तरस्य ग्रहो न साध्याभावव्याप्तित्वेन तद्व्याप्तिविषयक इति तद्विषयधर्मान्तरस्य पक्षे ग्रहेऽप्यनुमिति-रिष्यत एवेति यदि तदा प्रकृतेऽपि तुल्यमित्याह, 'अन्ययेति, एतन्मते च विरोधः साध्याभावव्याप्यत्वं, असाधारण्यञ्चावृत्तित्वं, गगनादेरेव अनुकूलतर्कविरहेणासाधारण्यसन्देहादेव शब्दत्वादिकं शब्दादौ नित्यत्वाद्यसाधकमित्यवधेयम् । अस्तु हेतौ साध्य-वदवृत्तित्वयहसहितः पक्षधर्मतायहो विरोधिधर्मवत्ताज्ञान-विधया साक्षादनुमितिविरोधी तथापि साध्ये हेत्वसामानाधि-करण्यग्रहकाले अनुमित्यापत्तेर्दुर्वारतया साध्ये हेतुसामाना-धिकरण्यधीरनुमितिहेतुरवश्यमेष वाच्येत्यत आह, 'पर्व्वत इति, 'इति ज्ञानेन तुल्ययोगक्षेममिति, 'ज्ञानमिति, प्रथमज्ञान-काले (१) अनुमित्यनुत्पादे साध्यविरोधितया गृह्यमानधर्म-यहस्येव साध्यं यद्विरोधितया गृहीतं तद्धर्मयहस्याप्यनुमितौ

---

(१) पर्व्वतो वह्निव्याप्यधूमवान् धारावमयः धारावमयत्वात्तिव यद्वित्तिति ज्ञानकाले इत्यर्थः ।

साचाद्विरोधितया द्वयोरेव तथात्वं, तदा अनुमित्युपगमे च प्रकृतेऽप्यनुमितिरियत एवेत्यर्थः, साध्य हेत्वोरसामानाधिकरण्यग्रहात् कदाचिदनुमित्यनुत्पादानुभवसासामानाधिकरण्यस्याव्यापकत्वव्याप्यतया तद्ग्रहदशायामसामानाधिकरण्यग्रहस्य व्यापकताधीविरोधित्वादिति भावः। व्याप्ति-व्यापकतयोः साम्याय व्याप्तावपि न साध्य-हेत्वोः सामानाधिकरण्यान्तर्भाव इति शङ्कते, 'न चेत्यादिना, 'साध्येति साध्यतावच्छेदकावच्छिन्नाप्रतियोगिक-स्वावच्छिन्नसमानाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकयावद्-भावकधर्म्मवत्त्वमित्यर्थः, साध्यतावच्छेदकानवच्छिन्नस्वावच्छिन्न-समानाधिकरणाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितायावत्प्रतियोगितावकधर्म्मवत्त्वमिति तु परमार्थः (१) अतो वह्निमान् धूमादित्यादौ हेतुमद्विशेष्य संयोगेन गुणाद्यभावस्य स्वरूपसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नाभावसमनियतत्वया तदभावाभिन्नत्वेऽपि न क्षतिः, अभावैक्येऽपि प्रतियोगिताभेदात्। यावदर्थस्य लघोर्दुर्ब्बलमाशङ्क्याह, 'साध्याप्रतियोगिकत्वेति अत्रापि साध्यतावच्छेदकानवच्छिन्नत्वावच्छेदकत्वविशिष्टसमानाधिकरणाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितात्वक-त्वमिति पर्य्यवसितोऽर्थः (२), अवच्छेदकत्वञ्चेदं स्वरूपसम्बन्धात्मकमनतिप्रसक्तत्वनियतं इत्यभिमानः। बहुव्रीह्यर्थः सम्बन्धः समयचैव यः कश्चन सम्बन्धत्वेन सम्बन्धविधया प्रविष्टः, प्रमेय-

(१) इति तु फलितार्थं इति पा०।

(२) इति फलितार्थं इति पा०।

सामान्यसाध्यकस्थले अन्योन्याभावेऽपि न साध्यतावच्छेदकावच्छि-
न्नप्रतियोगिताकत्वप्रसिद्धिरतः 'सम्बन्धविशेषावच्छिन्नात्यन्ताभावे
वेति संयोगादिसम्बन्धावच्छिन्नाभावे वेत्यर्थः । प्रथमे गौरवं प्रका-
शयति, 'व्यापकत्वाद्यनन्तर्भावेनेति, तथाच तदन्तर्भाव आवश्यक-
इति भावः । द्वितीये गौरवं प्रकाशयति, 'प्रमाणाभावेनेति, प्रति-
योगित्वादिभिरेव समं अनतिप्रसक्तधर्मस्य स्वरूपसम्बन्धात्मकाव-
च्छेद्यावच्छेदकभावस्यानुभविकत्वादिति भावः । 'अनतिरिक्तवृत्ति-
त्वपर्य्यवसायित्वात्' अनतिरिक्तवृत्तित्वरूपत्वात् । ननु व्यापक-
तायामपि स्वसमानाधिकरणाभावीययत्किञ्चित्प्रतियोगिकत्वाव-
भावमादाय अतिप्रसङ्गवारणाय यावत्तदभावकूटो निवेश्य-
इति यावत्त्वनिवेशस्तुल्य इत्यत आह,'व्यापकतायाञ्चेति,'प्रतियोगि-
त्वादेरित्यादिना निष्कृष्टलक्षण(१)घटकतदवच्छेदकत्वपरिग्रहः,
'सामान्याभावस्य' तादृशप्रतियोगितावद्यावच्छिन्नाभावस्य, तदव्या-
वच्छिन्नत्वं प्रतियोगित्वे सर्व्वमत एव स्वरूपसम्बन्धः न तु व्याप-
कत्वं, अन्यथा (२) दर्शितव्याप्तिलक्षणप्रविष्टसाध्यप्रतियोगिकत्वसा-
मान्याभावस्यापि व्यापकतान्तरघटिततया महागौरवापत्तेरित्याह,
'सम्बन्धादिनिष्ठेति, 'आदिपदं सम्बन्धान्तरावच्छिन्नाभावपरि-
ग्राहकं सम्बन्धप्रतियोगित्वाभावप्रतियोगित्वयोर्वैलक्षण्येऽप्यतिप्रस-
ङ्गस्य दुर्व्वारताव्यञ्जकं, 'तस्य' सामान्याभावस्य, स्वसमानाधि-
करणाभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकत्वाभिधानेऽपि

---

(१) स्वसमानाधिकरणघटितलक्षणेत्यर्थः ।

(२) यावच्छब्दस्य व्यापकत्वरूपत्व इत्यर्थः ।

साद्दगसाध्यतावच्छेदकीयसम्बन्धस्याधिकस्य हेतोर्द्विधा विषयतायाश्च कारणतावच्छेदके निवेशनीयतया व्याप्यवत्तापरामर्शहेतुतागौरवं दुष्परिहरमेवेति भावः। व्यापकसामानाधिकरण्यरूपव्याप्तिधीहेतुतामतेऽपि व्यापकतामदर्शकोदाहरणप्रयोगसङ्गतिरत एवेत्याद्युपष्टम्भासङ्गतिरत आह, 'साधनेति।

तत्त्वचिन्तामणिः।

अतएव यो यो धूमवान् सोऽग्निमानित्युदाहरणवाक्ये साध्ययोगव्यवच्छेदेन धूमव्यापकता वह्निरूपदर्श्यते अन्यथा वह्निमानेव धूमवानित्यन्ययोगव्यवच्छेदेनोदाहरणशरीरं स्यात् दोषोऽपि व्यभिचारादिर्न पक्षधर्मव्यापकं साध्यमित्येवोद्भावयः।

दीधितिः।

तद्धेतुतावादिनं निरस्यति, 'अतएवेत्यादिना। दीपासमभिव्याहारादिवगदुद्देश्यधर्मावच्छेदेनात्यन्ताभावस्यान्योन्याभावस्य वा प्रतियोगित्वाभावो विधेयधर्मे तद्वति वा भासते, न तु विधेयधर्म्म-तद्वतोरत्यन्तान्योन्याभावानधिकरणत्वमुद्देश्यधर्म्मवति, यद्यदभिधेयं तत्तमेयमित्याद्दावसम्भवादिति भावः। 'साध्येति, 'अयोगः' अभावप्रतियोगित्वं, तथाच साध्ये साधनवन्निष्ठाभाव-

प्रतियोगित्वव्यवच्छेदेनेत्यर्थः । 'स्यादिति, न स्याच्च केवलान्वय्यनुमानमित्यपि द्रष्टव्यम् । 'न पक्षेति, एतच्च विरोधस्यातिस्फुटत्वमभिसन्धाय, साध्याभाववद्वृत्ति-त्वबुद्धेरपि व्यापकताधीविरोधित्वादिति वदन्ति ।

गादाधरी विवृति ।

ननु वीप्सावशात् उद्देश्यधर्मधूमादौ विधेयवह्निमदन्या-वृत्तित्वमेव प्रतीयते, न तु विधेयधर्मे उद्देश्यगतधर्मव्यापकत्व इत्युपेयमतो न साध्यवदन्यावृत्तित्वज्ञानहेतुतामतेऽप्युक्तोदाहरणा सङ्गतिरित्यत आह, 'वीप्सेति, 'वीप्सासमभिव्याहार' वीप्सितपद समभिव्याहार, 'उद्देश्यधर्म' उद्देश्यगतधर्म, स च वीप्सितयत्पदेत-रोद्देश्यवाचकपदघटितवाक्ये ग्रामो ग्रामो रमणीय इत्यादौ तत्प दोपस्थाप्यो ग्रामत्वादिरूपोद्देश्यतावच्छेदकधर्म, एव यत्पदवीप्सा स्थले यो यो धूमवानित्यादौ तु यत्पदार्थविधेयतया विवक्षितो-धूमादि तस्यापि यत्तद्घटितवाक्यद्वयोद्देश्यधर्मिसम्बन्धतया विव-क्षितत्वात् । अन्योन्याभावघटितव्यापकतया लघुत्वादन्योन्या भावस्य चरममुपादान, 'प्रतियोगित्वाभाव.' प्रतियोगितानवच्छे दकावच्छिन्नत्व, 'विधेयधर्मे' विधेयकोटिनिविष्टधर्मे, स च धर्मो ग्रामो ग्रामो रमणीय इत्यादौ यथायोग द्विरुक्तोद्देश्यवाचकपद-समभिव्याहृतपदोपस्थाप्यो विधेयतावच्छेदकरमणीयत्वादि विधेयो-रमणीयाभेदादिय, यो यो धूमवान् स वह्निमान् स न ह्रद इत्यादौ च वीप्सितपदघटितवाक्यान्तरस्थपदोपस्थाप्यो वह्न्यादि

रूपविधेयतावच्छेदको ह्रदभेदादिरूपो विधेयश्च विधेयधर्म्म तद्वतो रत्यन्तान्योन्याभावमतियोगित्वाभ्या यथासख्यमन्वय । उद्देश्य विधेयधर्म्मो वोक्षितपदघटितवाक्योपस्थाप्योद्देश्यतावच्छेदक विधेया वित्यपव्याख्यान, यो यो धूमवान् स वह्निमानित्यादौ धूम वह्नया दोर्विभिन्नवाक्योपस्थाप्ययोर्यत्तत्पदार्थांशे विधेयत्वात्, धूमादेर्वह्न्या युद्देश्यतावच्छेदकत्वविरहात् ।

यत्तु यत्तत्पदयोस्तात्पर्य्यग्राहकत्वमेव, धूमवान् वह्निमानित्य-मयोरेवोद्देश्य विधेयभावेनान्वय इति, तदशुद्ध, यो य इच्छति स जानाति इत्यादावाख्यातार्थस्य व्युत्पत्तिविरोधेन धर्म्मानुपस्थित्या च उद्देश्यतावच्छेदकत्वासम्भवात् । यत्पदाभ्या विरूपेणोपस्थितयो-रपि तत्पदेन परामर्शादिति मणिकारलिखनविरोधाच्च । एतेन पूर्व्ववाक्यमेव निरर्थक उत्तरवाक्यस्थतत्पद धूमादावच्छि न्नपरमित्यपि निरस्तम् । अप्रक्रान्तस्य तत्पदेन परामर्शायो-गाच्च । 'विधेयधर्म्म तद्वतोरत्यन्तान्योन्याभावाभ्या यथासख्यमन्वय । 'उद्देश्यधर्म्मवतीति 'न तु भासते' इत्यनेनान्वय । धूमवति वह्नि तद्वतोरत्यन्तान्योन्याभावानधिकरणत्वभाने अर्थाद्धूमे वह्निमदन्या धिकरणकत्वाभावरूपव्याप्तिलाभ सम्भवतीति न परानभिमत प्रतिक्षेपशङ्का । अतएव 'वह्निमानेव धूमवानित्यादिमूलस्यापि सङ्गति, वह्निमदन्यतादात्म्यव्यवच्छेदवत्त्वेन धूमवत एव तादृग वाक्यात् प्रतीते । 'असम्भवादिति विधेयधर्म्माद्यभावाप्रसिद्धेरित्यर्थ । इदमलावधेयम्, श्यामो श्यामो रमणीय इत्यादौ श्यामत्वव्यापकत्व विशिष्टाभेदादेरुद्देश्ये रमणीयादिसम्बन्धत्वोपगमाद्रागपक्षतावीज

निर्व्वाहः, व्यापकत्वस्यापदार्थत्वेन प्रकारत्वायोगात् । न च द्वितीय-ग्रामपदं ग्रामत्वव्यापकतावि शिष्टार्थकं तस्य चाभेदसम्बन्धेन विधेयान्वयः शक्तिग्राहकन्तु द्वितीयानुशासनमेवेति वाच्यम् । तथा सति उद्देश्यतया ग्रामादीनामन्वयानुपपत्तेः स्वातन्त्र्येणा-नुपस्थितत्वात् । न चैकग्रामपदं उद्देश्यवाचकमपरञ्चोक्तार्थक-मिति वाच्यम् । एकपदस्थले उभयात्मकपदद्वयादेशात् (१) पद-द्वयस्यैवाभावात्, द्वितीयादयर्थकर्म्मत्वादौ प्रकृत्यर्थस्याधेयतयैव अन्वयस्य व्युत्पन्नतया ग्रामं ग्राम ददातीत्यादौ वीप्सितपदस्य व्यापकतार्थकत्वे व्यापकादिकर्म्मकदानादेः प्रत्ययापत्तेश्च । न चोद्देश्य विधेयभावस्थले वीप्सा विनापि उद्देश्यतावच्छेदका-वच्छेदेन विधेयभानाद्व्यापकताबोधार्थं द्वितीयप्रयोगो व्यर्थं एव यदि व्यापकताया न प्रकारतेति वाच्यम् । उद्देश्यतावच्छेदकसामा-नाधिकरण्यमात्रेणापि क्वचिद्विधेयबोधाद्व्यापकतापरत्वस्फुटीकर-णाय द्वितीयादरात् । अस्तु वा रमनीयादिपदस्यैव ग्रामत्वव्यापक-रमणीयत्वादिना निरूढ़लक्षणा निरूढ़लक्षणाया द्वितीयोद्देश्य-वाचकपदसमभिव्याहारनियतत्वाच्च तद्विवचनवैयर्थ्यं, ग्रामं ग्रामं ददातीत्यादौ कर्म्मत्वादिरूपविधेयवाचकविभक्तेस्तु न लक्षणा सम्भवति सुब्विभक्तित्वादतस्तत्र व्यापकत्व सम्बन्ध एव, दान कर्म्मतात्वादिना कर्म्मत्वादेरनुपस्थितावपि तदूपावच्छिन्नव्यापकत्वं कर्म्मत्वादौ ग्रामादे. सम्बन्धः न तु शुद्धकर्म्मतात्वावच्छिन्नं प्रति-प्रसङ्गात् । यो यो धूमवान् स वह्निमान् इत्यादौ तु द्वितीय-

(१) गवादावेवादिति पा० ।

यत्पदस्य व्यापकत्वमर्थः, तत्र प्रतियोगित्वेन धूमस्यानुयोगित्वेन वह्निरन्वय इति प्रलपितमपि तुच्छं, नामार्थयोर्भेदान्वयायोगात् यत्पदस्य धूमवत्पदसामानाधिकरण्याभावेन सामान्यतया न पुंसकतापत्तेः, यत्र यत्र धूम इत्यादौ आधारत्वरूपार्थान्वयेन मत्वर्थानुपपत्तेश्च। यो यो धूमवानित्यादौ तु वह्न्यादिपदस्य धूमव्यापकवह्नित्वादिना निरूढलक्षणैव उद्देश्यतावच्छेदकस्य व्यापकतायाः एव विधेयसंसर्गघटकतया भानस्य प्रामाणिकतया पूर्व्वोक्तयुक्त्या च तत्र धूमादेरुद्देश्यतावच्छेदकताविरहेण तद्व्यापकतायाः संसर्गघटकत्वासम्भवात्।

प्राचस्तु वीप्साध्वनौ व्यापकताया न शाब्दधीः किन्तु विवक्षितग्रामादिपदादुग्रामत्वादिना उपस्थितेषु सकलग्रामादिषु, विवक्षितयत्पदाच्च महानसत्व महानसान्यत्वादिना उपस्थितेषु, तत्पदेन च तेन तेन रूपेण परामृष्टेषु सकलधूमादिमत्सु विधेयसम्बन्धः शब्दात् प्रतीयते, तावता क्वचिदपि व्याप्याधिकरणे व्यापकाभावग्रहाया अभावात् (१) व्यभिचारज्ञानाभावसहकृतसहचारदर्शनत्वात्, तदुत्तरकाल मानस एव व्यापकताबोधः 'सकृदुच्चरितेत्यादिनियमभ्यप्रामाणिकत्वेऽगत्या तस्य सङ्कोचः। अथ सार्वत्रिकनियमाभ्युपगमे द्विरुक्तवैयर्थ्यमिति चेन्न, सकलव्यक्तिपरत्वेयाङ्कतया तदुपयोगात् यो य इत्यस्य पदद्वयभ्रमेण महानस-चत्वरादिरूपधर्म्मिद्वयमात्रपरत्वभ्रमसम्भवादतिस्फुटत्वाय न्यूनातिरिक्तस्थले

---

(१) व्यभिचारज्ञानाभाव इति पा०।

तत्पदेऽपि वीप्सा दृश्यते एकतत्पदेनापि धर्मिद्वयपरामर्शसम्भवात्तन्मात्रपरत्वे तत्पदान्तरवैयर्थ्यमिति प्रतिसन्धानेन ताट्टग्भ्रमनिवृत्तिसम्भवात्, एकदा यावद्व्यक्तिप्रत्यायनेच्छैव वीप्सापदार्थः, युगपद्व्यासुमिच्छा वीप्सा इत्यभियुक्तैर्वारणात्, न तु व्यापकत्वप्रत्यायनेच्छा युगपदित्यस्य वैयर्थ्यापत्तेः । यो यो धूमवानित्यादौ यत्पदार्थव्यापकत्वाबोधात् यत्पदे द्विर्वचनानुपपत्तेयेत्याहुः । अत्र व्यापकतायाः शाब्दबोधानुपगमे यत्पदेन महानसत्वादिना सकलव्यक्तिषु वह्न्यादिमत्ताबोधेऽपि धूमादिमत्त्वेन तेष्वेव वह्न्याद्यभावसत्त्वशङ्कासम्भवात्र मनसा व्यापकतानिश्चयः सम्भवतीत्यनुपपत्तिः समानविषयकत्वमात्रेण विरोधितात्र्यवस्थापनमात्रेण दुर्वारेवेति चिन्त्यम् ।

साध्याभावव्यवच्छेदपदेन व्यापकतालाभार्थं व्याचष्टे, 'अयोगइति, 'अभावप्रतियोगित्व' हेतुमन्निष्ठाभावप्रतियोगित्वं, विरोध्यर्थकनञा तदधिकरणयोगविरोधिनोऽयोगपदार्थत्वं बोधयत इत्यभिप्रायः । साध्यस्याभावान्वये तन्निष्ठव्यापकत्वालाभाद्व्यवच्छेदान्वयितया व्याचष्टे, 'तथा चेति, 'व्यवच्छेदेनेति व्यापकताव्यधिकरणभेदस्तृतीयार्थः, न्यूनताभङ्गाय साध्यवदन्याद्यवृत्तित्वधीहेतुतायां (१) केवलान्वय्यनुमानानुपपत्तिदोषमपि दर्शयति, 'न स्याच्चेति । हेतौ साध्यप्रतियोगिकाभावसामानाधिकरण्यरूपव्यभिचारधियः साध्ये हेतुमन्निष्ठाभावप्रतियोगित्वविषयकतया समानविषयकत्वेन विरोधितामते व्यापकताधीविरोधित्वमावश्यकमिति हेतुः

(१) साध्यवदन्याद्यवृत्तित्वधीहेतुतामत इति पा० ।

साध्यव्यभिचारीत्युद्भावनस्यापि युक्तत्वादीषोऽपीत्यादिमूलासङ्गति
रत आह, 'एतच्चेति, 'विरोधस्य' व्यापकताधीप्रतिबन्धक
त्वस्य (१) 'अतिस्फुटत्व' सर्व्ववादिसिद्धत्वं, 'अभिसन्धाय', 'न
हेतुधर्म्मिक्यव्यभिचारधियोऽविरोधित्वम्, अत्रैव हेतुमाह, 'साध्या
भावेति, समानविषयत्वेन विरोधितामतमवलम्बेति भावः
स्वयं समानप्रकारकधिय एव विरोधित्वोपगमादुपदन्तीति ।

तत्त्वचिन्तामणिः ।

अथ पर्व्वतवृत्तिधूमव्यापको वह्निरिति परामर्शो-
यदि तदा पर्व्वतीयधूमं प्रति व्यापकतायाः पर्व्वत-
धूमसामानाधिकरण्यनैयत्यात् पर्व्वतवह्निः परामर्श-
विषय एवेति किमनुमेयमिति चेत्, तर्हि पर्व्वतीय-
धूमे नियतसाध्यसामानाधिकरण्यस्य व्याप्यत्वस्य भानं
साध्यसासानाधिकरण्यभाननियतमिति व्याप्यत्वभाने-
ऽपि तुल्यम् । यदि च स्मृता व्याप्तिर्धूमेऽवगम्यते
तदा व्यापकत्वेऽपि समानं । वस्तुतस्तु व्यापकत्वं तद्-
वन्निष्ठात्यन्ताभावाप्रतियोगित्वं न तु धूमसामानाधि-
करण्यं, व्याप्यत्वन्तु सामानाधिकरण्यविशेष इति
तवैवानुमितिरफला स्यात् । न चैवं परामर्शस्य

---

(१) 'विरोधस्य' व्यव्यापकताधियो व्यापकताधीप्रतिरोधस्य, इति पा० ।

ुषत्वं न स्याद्व्यापकस्य विशेष्यस्येन्द्रियासन्निकर्षा-
ते वाच्यम् । इष्टत्वात् असन्निकृष्टधूमादाविव
नस एव हि सर्व्वत्र परामर्शः, चक्षुरन्वय-व्यतिरेका-
विधानञ्च पक्षवृत्तिधूमोपनयोपपादनम् ।

दीधितिः ।

'मानस एवेति प्रायिकत्वाभिप्रायेण, तेन क्वचि-
च्छब्दादिना क्वचिच्च साध्येन्द्रियसन्निकर्षात् परा-
मर्शेऽपि न क्षतिः, पक्षे साध्यसम्बन्धस्याग्रहात् ग्रहेऽप्य-
नुमित्साया अनुमितिसम्भवात् ।

गादाधरी विवृतिः ।

मूले 'किमनुमेयमिति सर्व्वत्र वास्तवपक्षीयसाध्यभानमेवानुमान-
फलमित्यभिमानेन, स्मृता व्याप्तिः पक्षतावच्छेदकविशिष्टे साध्य-
सम्बन्धमगृह्णीत्वैव धूमेऽवगम्यते पक्षतावच्छेदकानवच्छिन्नेऽपि
पक्षे साध्यसम्बन्धग्रहादनुमानवैफल्ये वैपरीत्यमेव इत्याह, 'वस्तु-
तस्त्विति, 'न तु धूमसामानाधिकरण्यमिति, येन पर्व्वतीयधूम-
सामानाधिकरण्यस्य वह्नौ भाने तादृशधूमाधिकरणत्वसम्बन्धस्य
तत्र भानमावश्यकमिति गङ्गेतेति शेषः । 'मानसएव परामर्श-
इति योजना, सर्व्वत्र हेतुरिति शेषः । अत्र सर्व्वपदस्यानुमिति-
सामान्यार्थकत्वेऽसङ्गतिः साध्यविशेष्यकस्यापि परोक्षरूपस्य कदा-
चिच्चाक्षुषादिरूपस्य च परामर्शस्यानुमितिजनकत्वसम्भवादत-

आह, दीधितौ 'प्रायिकत्वाभिप्रायेणेति इन्द्रियासन्निकृष्टसाध्यकप्रत्यक्षपरामर्शजन्यानुमितिसामान्याभिप्रायेण इत्यर्थः, साध्येन्द्रियसन्निकर्षसत्त्वे प्रत्यक्षतः साध्यसिद्धेः कथं परामर्शेनानुमितिर्जननीयेत्याकाङ्क्षायां तदुपपादकं हेतुमाह, 'पक्ष इति ।

तत्त्वचिन्तामणिः ।

अथ जनकज्ञाने उपसर्जनतया भातस्य पक्षस्य पर्व्वतादेरनुमितौ प्राधान्येन भानं न स्यात्, न हि जनकज्ञाने उपसर्जनतयावगतं जन्यज्ञाने प्राधान्येन भासते, तथादर्शनात् । न चानुमितेस्तथात्वमसिद्धं पर्व्वतोऽयं वह्निमानित्यनुमितेर्लोकसिद्धत्वादिति चेन्न, पुरुषस्य दण्ड इति ज्ञानानन्तरं दण्डी पुरुष इति ज्ञानजन्यज्ञानदर्शनात् अन्यथा तवापि कथं पक्षविशेष्यकत्वनियमः, न हि कारणीभूतज्ञाने यद्विशेष्यतया भासते तत्कार्य्यीभूतेऽपि तथा, इह भूतले घटो नास्तीति ज्ञानजन्ये घटाभाववद्भूतलमितिज्ञाने तच्च व्यभिचारात् तस्मात् पक्षवृत्तिलिङ्गपरामर्शस्यायं स्वभावो यत्स्वाश्रयविशिष्यिकामनुमितिं जनयति नातथाभूतामेवं मयापि तुल्यमिति ।

BIBLIOTHECA INDICA

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 1355

तत्त्वचिन्तामणि दीधिति-विवृति



TATTVACINTAMANI DIDHITI VIVRITI

BY

GADADHARA BHATTACHARYYA

WITH TATTVACINTAMANI AND DIDHITI

EDITED BY

LATE MAHAMAHOPÁDHYÁYA JADUNATH SARBABHUM AND
MAHÁMAHOPÁDHYAYA KAMAKHYANATH TARKAVAGISA,
Professor, Sanskrit College, Calcutta

VOL III FASC I.

CALCUTTA :
PRINTED BY S V CHATTERJI, SATYA PRESS 16/1, GHOSE LANE
AND PUBLISHED BY THE
ASIATIC SOCIETY, 1, PARK STREET,
1912.

त्वनिर्णयादीति ; आदिपदादिज्जयपरिग्रहः । तत् कार्यकारित्वात्; मपरिकरहेतुप्रयोज्यकार्यप्रयोजकत्वात् । प्रयोजकत्वञ्च, जनक-तावच्छेदकादिसाधारणमिति स्वविषयकज्ञानकार्यं प्रति स्वस्य तथात्वमक्षतमेव। तत्त्वनिर्णयः, प्रमितकोटिनिश्चयः । तत्र व्या-प्ति पक्षधर्मतादिविशिष्टप्रकृतहेतुज्ञानमिव तद्विपरीतकोटिसाधकस्य हेत्वाभासत्वज्ञानमप्युपयुज्यते । प्रतिबन्धकीभूतविपरीतकोटिव्या-प्यवत्ताज्ञानेऽप्रामाण्यग्राहकत्वादित्युभयोस्तत्त्वनिर्णयप्रयोजकत्वं । अथवा* तत्त्वनिर्णयः साध्यवत्ताज्ञाने प्रमात्वनिश्चयः । तत्रानुमापक-हेतोर्व्याप्त्यादिविशिष्टस्वरूपस्य हेतुत्वज्ञानमिव विपरीतकोटिसाधक-हेतोर्दुष्टत्वज्ञानमप्युपयुज्यते । प्रकृतसाध्यप्रकाप्रामाण्यग्राहकविप-रीतकोटिसाधकहेत्वदुष्टत्वप्रकृष्टविघटकत्वात् । विजयप्रयोजकत्वञ्च, हेत्वाभासस्य स्वज्ञानाधीनपरीक्षहेतुदोषोद्भावनद्वारा । व्याप्त्यादि-विशिष्टहेतोश्च स्वज्ञानाधीनसभ्यायप्रयोगद्वारा बोध्यम् ॥

मूलोक्तलक्षणान्तं † दुष्टहेतुलक्षणेऽतिव्याप्तिः । यथार्थ-ज्ञाननिष्ठानुमितिप्रतिबन्धकतावच्छेदकविषयतात्वयत्वपर्याप्तस्य स-मूहालम्बनविषयतात्वयोदासीनपदार्थवारणाय प्रथमलक्षणे विय-

---

* तत्त्वपदस्य प्रमात्वव्याप्यकत्वात्, प्रमितकोटिनिश्चयत्वे स्वरसाद्यपि यत आह स्वज्ञेति ।

† स्वहेतुकानुमितिप्रतिबन्धकयथार्थज्ञानविषयीभूतं यत् तदभावो न कोऽपि हेत्वं । स प्रकृतसाध्यवान् ।

घणीयतया बाधादिज्ञानप्रतिबन्धकतायां प्रायश्चो* हेतुविषयतायाअनवच्छेदकत्वात् ,तच्च † हेतोरव्याप्तिश्च । यद्विषयकत्वेनेत्यादिलक्षणे च तृतीयाया अवच्छेदकत्वार्थकतया सुतरां तथेत्यत आह यथाश्रुतमिति ‡ । इदं एतल्लक्षणत्रयं । ननुहेतुवदाभासन्तदुति'व्युत्पत्त्या हेत्वाभासपदस्य दुष्टहेतुपरत्वाद्दुष्टहेतुनिरूपणस्यैव प्रतिज्ञातत्वात्तल्लक्षणमेवाकाङ्क्षितमतस्तदनुक्तौ मूलस्य न्यूनता । अन्यविधव्युत्पत्त्या हेत्वाभासपदस्य हेतुदोषपरत्वसम्भवेपि तेचेत्यादिना दुष्टहेतूनामेव विभजनाद्दुष्टहेतुनिरूपणस्याप्रतिज्ञातत्वे तदसङ्गतेः । एवं दुष्टहेतुनिरूपणस्याप्रकृतत्वे दुष्टहेतूनां विभागानर्हतया तेषां सङ्करेण विभागव्याघातशङ्कायामनवतारात् उपाधेयसङ्करेणेत्यादि ग्रन्थस्योपाध्यसङ्करेण विभागोपपादनपरस्यासङ्गतिरित्यत आह तल्लक्षणेति । तादृशदोषवत्त्वञ्चेत्यर्थः । दुष्टहेतूना लक्षणमित्यनुषज्यते स्फुटमिति शेषः । तथा च दुष्टहेतुनिरूपणस्य प्रकृतत्वेपि दोषलक्षणे कृते तद्रूपदुष्टहेतुलक्षणस्य स्फुटतया लाभेन दोषलक्षणा-

---

* धूमोवह्निमान् धूमादित्याद्यनुमितौ बाधप्रतिबन्धकतायां हेतुविषयतायां अवच्छेदकत्वात् प्रायश्च इत्युक्तं ।

† सच्चाच्च गन्धप्रागभावावच्छिन्नघटीयगन्धवान् पृथिवीत्वादित्याद्यसङ्कीर्णबाधस्थलेऽव्याप्तिरन्यत्र व्यभिचारादिज्ञानमादाय लक्षणसम्भवादिति भाव ।

‡ अनुमितिप्रतिबन्धकयथार्थज्ञानविषयीयच्च इतिव्युत्पत्त्या दुष्टहेतुलक्षणत्वस्य सम्भवतीत्यत उक्तं यथाश्रुतमिति ।

भिधानस्य तत्र तात्पर्य्यात् नोक्तानुपपत्तिरितिभावः। तदभिप्रायेणैवेति * दुष्टहेतुलक्षणाभिप्रायेणैवेत्यर्थः।

तत्तानुमितिपदं, अनुमितिनिष्ठकार्य्यतानिरूपक-सम्बन्धितयानुमितितत्कारणज्ञानपरं, साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारकानुमिति परं वा।

अनुमितिपदस्यानुमितिसामान्यपरत्वे† असम्भवात् यत्किञ्चिदनुमितिपरत्वेऽतिप्रसङ्गात् ‡। प्रकृतपक्षसाध्य § हेतुकानुमितिपरत्वं सावश्यकं। तथा च व्यभिचारादावव्याप्तिः वह्निर्धूमव्यभिचारीत्यादिज्ञानाभावस्य पर्व्वतोधूमवानित्यनुमित्यजनकत्वात्। लक्षणया

---

* अत्रेदं बोध्यं तदभिप्रायेणैव इत्यस्य दुष्टहेतुलक्षणाभिप्रायेणैव इत्यर्थकत्वे ह्रदोऽयमह्रदोवेत्यादि दूरवर्त्यसम्बादकवचनमनुचितं नेत्यादि यत्नसम्बादस्यैवोचितत्वात्। किन्तु दोषस्वरूपदुष्टलक्षणाभिप्रायेणेत्यर्थोबोध्य। तथा च दुष्टलक्षणकरणे नेत्यादियत्नासङ्गतेरभावे ह्रदोऽयमह्रदोवेत्यादियत्नस्यासङ्गतिः।

† असम्भवमिथ अनुमितित्वव्यापकत्वनिरूपितसम्बन्धेन अनुमितिनिष्ठप्रतिबध्यत्वनिरूपिते पर्व्वतोवह्निमानित्यादौ घटाभावत्वप्रकारादावतिव्याप्तिः। तस्यापि मूलम् घटवद्भिन्नानुमितिप्रतिबध्यकत्वादित्यतआह अनुमितिपदस्येत्यादि।

‡ अनुमिति पदस्यानुमितिसामान्यपरत्वेऽतिप्रसङ्गादिति क्वचित् पाठः।

§ अत्र हेतुकत्वदर्शन हेतुप्रकारकनिश्चयजन्यानुमितित्वस्याभाव अग्निव्याप्य महानसीयधूमवत्त्वाभाववान पर्व्वत इत्याकारकनिश्चयोत्तरजायमानपर्व्वतो महानसीयवह्निमानित्यनुमितित्वव्यापकप्रतिबध्यतावच्छेदकघटाभावत्वप्रकारकज्ञानविषयत्वात् महानसीयधूमाभाववत्पर्व्वतत्वादि।

स्य तादृशानुमितिजनकज्ञानमात्रपरत्वेच बाधादावव्याप्तिः। बाधादिज्ञानस्य परामर्शाप्रतिबन्धकत्वात्। अतोऽनुमिति पदमज-हत्स्वार्थलक्षणया तदुभयपरतया व्याचष्टे तत्रेति। तादृश लक्षण-वाक्य इत्यर्थः। लक्षणघटकतावच्छेदकमुभयसाधारणमनुगतरूप-माहानुमितिनिष्ठकार्य्यतानिरूपकसम्बन्धित्वेनेति। अनुमितिपदस्य प्रकृतपक्षतावच्छेदकविशिष्टे प्रकृतसाध्यतावच्छेदकावच्छिन्न-प्रका-रक-प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकानुमितिपरत्वं स्वयमेव दर्श-यिष्यति। अतोन वह्न्यमाणातिप्रसङ्गः। निरूपकत्वञ्चात्र यदि प्रतियो-गित्वं, तदा कार्य्यस्य कार्य्यताप्रतियोगित्वाभावादनुमित्यसम्भवः, अतः सम्बन्धिपदं सम्बन्धिद्वयसाधारणस्य तत्*साक्षात्कारजनक*साक्षात्-कारविषयतात्मक‡ निरूपकत्वस्य लाभाय। अत्र पर्वतोवह्निमान्

---

* तत्पद अनुमिति निष्ठकार्य्यता परम्।

† अनुमितिनिष्ठकार्य्यतासाक्षात्कारं प्रति अनुमितितत्कारणपरामर्शयो साक्षात्कारोहेतु सम्बन्धिद्वयनिरूपितपदार्थसाक्षात्कार प्रति सम्बन्धिद्वयसाक्षात् कारोहेतुरित्यवश्य वक्तव्यत्वात् अन्यथा घटमूतलसंयोगसाक्षात्कारापत्ति। एतत् सर्व्वेषुदिक्षुत्वाद्द तत्तत्साक्षात्कारजनकेत्यादि।

‡ अत्र तादृशसाक्षात्कारजनकसाक्षात्कारविषयत्व तादृशसाक्षात्कारजन-कतावच्छेदकमुख्यविशेष्यतात्मकत्व अतो न केवल पर्व्वतोवह्निमानित्यनुमितिविष-यकसमूहालम्बनज्ञानो वह्निमानित्यनुमितिविषयकसाक्षात्कारविषयत्वमादाय पर्व्व तपक्षकवह्न्यनुमितिस्थले वह्न्यभावबद्धत्वादिदोषत्वापत्ति। अत्र यत्र स्थलविशेषे साध्या-वच्छिन्नानुमिति साध्यतावच्छेदके प्रविष्टा तत्र सर्व्वेषामेव दोषाणां तादृशानुमित्यप्रतिबन्धक-तया प्रतिबध्यतायां तादृश यद्दत्वव्यापकत्वनिरूपकत्वे सत्यवच्छेदात्वम्। व्यापक त्वनिवेशे तदाश्रीमघटादावतिव्याप्तिरित्यादिदूषणावकाश इति बोध्यम्।

ह्रदश्च तथेत्यादि समूहालम्बनानुमित्यादिविरोधिह्रदनिष्ठवह्न्यभावादि रूपबाधादेः पर्वतादौ धूमादिना वह्न्यादिसाधने दोषतामप्रसङ्गः। प्रकृतानुमितिनिष्ठकार्यतानिरूपकसम्बन्धिग्रहत्वस्य कस्यापि प्रति बध्यतानवच्छेदकतया तदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतानिवेशनासम्भवात् तथाविधग्रहत्वव्यापकप्रतिबध्यतानिवेशे च अनुमित्यविरोधिनि व्यभिचारादौ परामर्शाविरोधिनि बाधादौ चाव्याप्तिः। उभयविरोधिपक्षाप्रसिद्धादावेव साहश्यप्रतिबध्यतानिरूपकज्ञानविषयत्वसत्त्वादसः कल्पान्तरमाह साध्यव्याप्येति। प्रकृत पक्षतावच्छेदकविशिष्टपक्षे प्रकृतसाध्यतावच्छेदकावच्छिन्नप्रकारकानुमितिसामान्यपरमित्यर्थः। एवञ्च साहश्यसमूहालम्बनानुमितेर्व्याप्त्यादिविषयकतया व्यभिचारज्ञानादिप्रतिबध्यत्वान्न व्यभिचारादयसंग्रहः। ह्रदादौ वह्न्यादिविषयकसमूहालम्बनादिप्रतिबन्धकतामादाय - दर्शितातिप्रसङ्गस्य वारणाय सामान्यपदं। तथा च साहश्यानुमितित्व-व्यापकप्रतिबध्यतानिरूपितप्रतिबन्धकतावगाहियथार्थज्ञानविषयत्वं पर्यवसितार्थः। एवञ्च साध्यतावच्छेदकावच्छिन्नादि प्रकारकानुमितिसामान्यालम्बनीयां पर्वतोवह्निमान्वह्निव्याप्यधूमवां श्चेत्या-नुमितौ ह्रदेन वह्निमानित्यादिनिश्चयस्याप्रतिबन्धकत्वात्, बाध-स्याप्रतिपक्षस्वरूपासिद्ध्याश्रयासिद्धिध्वस्यासिद्धिवारणाय प्रकृतपक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकत्वनिवेशः। द्रव्यत्वादिना ह्रदादिविशे-ष्यकानुमितौ तथाविधनिश्चयस्याप्रतिबन्धकत्वाच्चोप तादवस्थ्यमतः

पक्षतावच्छेदकावच्छिन्नत्वोपादानं । अवच्छेदकत्वञ्च, तत्पर्य्याप्यधिकरणत्वं । तेनातेजस्वी पर्व्वतोवह्निमानित्यादौ विशिष्टपर्व्वतत्वादिमति वह्न्याद्यभावरूपबाधस्य, काञ्चनमयः पर्व्वतोवह्निमानित्यादौ च, आश्रयासिद्धेः शुद्धपर्व्वतत्वाद्यवच्छिन्नपक्षकानुमित्यविरोधित्वेपि नासंग्रहः ; एवमग्रेपि बोध्यं । साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकत्वानिवेशे, परामर्शाविरोधितया बाधसत्प्रतिपक्षयोरव्याप्तिः । तत्र प्रकृतसाध्यतावच्छेदकावच्छिन्नत्वस्यानुपादानेपि तद्दोषतादवस्थ्यं । वह्नित्वावच्छिन्नाभावादिनिश्चयस्य धूमजनकतेजस्वी वह्निव्याप्यधूमवांश्च इदमित्याद्यनुमित्यप्रतिबन्धकत्वात् । साध्याप्रसिद्धव्याप्तिवारणप्रयोजनकत्वोपपत्तेर्नन्तु तदुपादानस्येति तु न सत् । वह्निर्न काञ्चनमय इत्यादिनिर्णयस्य पक्षे शुद्धवह्नित्वादिना वह्न्याद्यनुमित्यविरोधित्वेपि, द्वितीयदले प्रकृतसाध्यतावच्छेदकावच्छिन्नाभावसत्त्वात्तस्य काञ्चनमयवह्निव्याप्यधूमवान् पर्व्वत इत्यनुमितिविरोधितया; तत्र लक्षणगमनात् । द्वितीयदलप्रवेशात् व्यभिचारविरोधसाधनाप्रसिद्धिस्वरूपासिद्धिषु नाव्याप्तिः । तत्रापि साध्यतावच्छेदकावच्छिन्ननिरूपितव्याप्तिविशिष्टत्वनिवेशाद्व्यभिचारविरोधयो र्नाव्याप्तिः । वह्निर्धूमव्यभिचारीत्यादिज्ञानदशायामपि द्रव्यत्वादिना धूमादिनिरूपितव्याप्तेर्भानसम्भवात् तद्दोषतादवस्थ्यमतोव्याप्तौ साध्यतावच्छेदकावच्छिन्नीयत्वनिवेशः । अन्वयव्याप्तिव्यतिरेकव्याप्तौ विशिष्योपादाय तदुभयविशिष्टहेतुप्रकारकत्वमेव निवेश्यं । एकमात्रव्याप्यु-

पादानं * साधारणानुपसंहारिलक्षणेऽन्यतरासंग्रहप्रसङ्गादित्यत्रे-
व्यक्तीभविष्यति । तादृशव्याप्तिघटकतानिरूपितहेतुप्रका-
रतायास्तत्साध्यकतर्कानुमितिजनकतावच्छेदकप्रकारतावै-
नानुगमस्य निवेशनन्तु न सम्भवति । साध्याभाववद्वृत्तित्व-
ज्ञानदशायां केवलव्यतिरेकव्याप्त्यादिप्रकारकहेतुमत्ता ज्ञानोत्पत्त्या
साधारणादेस्तादृशप्रकारता-ग्रहेऽनुमिति सामान्य-विरोधित्वा-
भावाद्व्याप्तिविशिष्टविषयकत्वमात्रस्य तद्विशिष्टहेतुतावच्छेदका-
वच्छिन्नविषयकत्वमात्रस्य वा निवेशे स्वरूपासिद्धव्याप्तिरतः
पक्षांशे तादृशव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्न प्रकारकत्व-
निवेशः । पक्षांशे व्याप्तिविशिष्टप्रकारकत्वमात्रनिवेशेपि सदोष-
तादवस्थ्यं । धूमाभाववान् ह्रद इत्यादिज्ञानस्य द्रव्यत्वादिना हेतु-
मत्ताज्ञानाविरोधित्वात् । साधारण्याद्यव्याप्तिश्च । वह्नित्वाव-
च्छिन्ने धूमाभाववद्वृत्तित्वादिग्रहस्य धूमादिव्याप्तिविशिष्टतद्व्याप्ति-
त्वावच्छिन्नप्रकारकज्ञानाविरोधित्वादतोहेतुतावच्छेदकावच्छिन्न-
त्वनिवेशः । पक्षांशे साध्यादिप्रकारकस्य सत्कारादेराहार्यज्ञानादेश्च
बाधादिज्ञानाप्रतिबध्यत्वादसम्भव इत्यत एवाहार्यानुमितित्वव्याप-

---

* अत्रमाधारण्याय परस्परनिरूपितनिरूपकभावापन्नविषयतात्वाश्रयज्ञानत्वे
यादृश इति तत् प्रतियोगितासामान्यमादाय केवलान्वयिन्यप्रसिद्धस्य प्रतियोगितासम्बन्धेन
बाधकत्वग्रहाभावकालेपि आगमादाय व्यवहारसम्भवादिति दिक् ।

कतानिवेशः । साध्यव्याप्यहेतुधर्मितावच्छेदकक साध्यवत्ताज्ञान-
स्यैव साध्यव्याप्यहेतुमान् पक्षः साध्यवानित्याकारकतया तादृशा-
कारलिङ्गनस्वरसात्तादृशहेतुविशिष्टपक्षतावच्छेदकावच्छिन्न विशे-
ष्यक-साध्यतावच्छेदकावच्छिन्न-प्रकारकानुमितित्व-व्यापकप्रति-
बध्यत्वस्य लक्षणघटकत्वोपगमे, पर्वतत्वादवच्छेदेन वह्न्यादेः सा-
ध्यत्वे, तत्सामानाधिकरण्येन साध्याभावादेरदोषत्वप्रसङ्गः । सामा
नाधिकरण्यमात्रावगाहिबाधादिज्ञानस्य शुद्धपर्वतत्वावच्छेदेन
वह्न्यादिज्ञानं प्रत्येव प्रतिबन्धकतया, धूमविशिष्टपर्वतत्वावच्छिन्न-
धर्मिकवह्न्यादिज्ञानाप्रतिबन्धकत्वादिति तदुपेक्षितं। न च विशेष्य-
तावच्छेदककोटौ धूमादेरधिकस्य भानेपि शुद्धपर्वतत्वावच्छिन्नसंयो-
गादेर्यत्र संसर्गता तत्र पर्वतत्वसामानाधिकरण्येन वह्न्यभावादिज्ञान-
स्य प्रतिबन्धकत्वमावश्यकं तादृशानुमितेरपि शुद्धपर्वतत्वावच्छेदेन-
वह्न्याद्यवगाहित्वादिति वाच्यं। धर्मितावच्छेदकावच्छेदेन विशिष्ट-
बुद्धौ धर्मितावच्छेदकतापर्याप्तयधिकरणधर्मावच्छिन्नत्वमेव संसर्गां-
शे भासते नतु तदेकदेशावच्छिन्नत्वमपि । तद्धर्मावच्छिन्नविशेष्यता-
निरूपिततदेकदेशव्यापकत्वावच्छिन्नसंसर्गताया अप्रामाणिकत्वात् ।
अथ लिङ्गोपधानमते हेतोः सर्व्वत्रैव धर्मितावच्छेदकतया भानात्ता-
दृशसंसर्गताभ्युपगम आवश्यकः । अन्यथा शुद्धपर्वतत्वावच्छे-
देन हेतुमत्ताज्ञानस्थले हेतुविशिष्टपर्वतत्वावच्छिन्नसंयोगादिसंसर्ग-
कानुमितेरेवोपगमे पर्वतत्वसामानाधिकरण्यमात्रावगाहिबाधादि-
ग्रहकालेपि तत्र तथाविधसाध्यनिश्चयवतोऽनुमित्यापत्तेः । नहि

सामानाधिकरण्येन बाधसिद्धौ: सत्यामनुमितिं * क्वचिदुपैति। तादृग बाधादिग्रहस्य क्वचिदप्यनुमितौ प्रतिबन्धकत्वासम्भवात् तेषां हेत्वाभासतापिलयापत्तिरेति चेदेवमपि लिङ्गानुपधानमते तादृग्-विषयतायां मानाभाव एव। अन्यथापि लिङ्गानुपधानमताभिप्रायकत्वान्मतेऽनुमितेः सर्वत्रैव तथाकारकतया, तादृगाकारकत्वस्याव्यावर्तकतया, अनुमितिपदस्य तादृगनुमितिपरत्वदर्शनासङ्गतेः॥

केचित्तु लिङ्गानुपधानमतेऽनुमितिपदस्य तदुभयपरत्वं व्याख्याय यथाश्रुतपरतानिर्वाहाय लिङ्गोपधानमतमाश्रयन्ते साध्यव्याप्येत्यादिना। इत्याकारकानुमितिपरं, अनुमितेरित्याकारकतामताभिप्रायकमिति व्याचक्षते †॥

तेनैकत्र हेतौ व्यभिचारादिग्रहेऽप्यन्यत्र पक्षधर्मतादिबलेनानुमित्युत्पादेन, व्यभिचाराद्ग्रहादिज्ञानेनान्यथा-

---

* अतएव विमति कज्जलकृष्णत्वादिरनुमानपक्षतावे कुसुमाञ्जलौ बाधाख्ये व्यापि विमतित्वघटेण पक्षतायाम् मतौ बाधादिरुक्त। अन्यथा विमतित्वसामानाधिकरण्येन बाधसत्त्वेपि हेतुविमितिविमतित्वावच्छेदेन सत्यनेऽनुमितौ बाधकाभावादसङ्गत्यापत्तिरिति भाव।

† तन्मिश्रे एतन्मतेपक्षतावच्छेदकावच्छिन्नपक्षविषयतायां एकत्रैव निवेशेन सङ्घात्मावच्छिन्न तत्पक्षकत्वस्य हृदये वह्निमत्त्वलिङ्गक एव व्याप्तिनिर्वाहे उदयन वह्नित्वसामान्यत्वलिङ्गक धूमपर्वत सदृश्यादिके समूहालम्बनानुमितिपरत्वे साङ्घविषयतायां एकधर्मिवत्त्वेन व्याप्तिरवसङ्गत।

सिद्धत्वाच्च । व्यभिचारादिग्रहाभावस्यानुमित्यजनकत्वेऽपि न क्षति रिति वदन्ति ।

व्याख्याप्रयोजनं स्फुटयति तेनेति । एकत्र, वह्नित्वादेकधर्मावच्छिन्ने । व्यभिचारादीत्यादिना स्वरूपासिद्धिपरिग्रहः । अन्यस्य परामर्शोत्तरद्वह्नित्वादिरूपापरधर्मावच्छिन्ने व्याप्तिपक्षधर्मतावगाहिज्ञानात् । व्यभिचारादिति । व्यभिचारादिग्रहाभावस्यानुमित्यजनकत्वेपीत्यनेन सम्बन्धः । यत्र यद्रूपावच्छिन्ने व्यभिचारज्ञानोत्पत्तिद्वितीयक्षणे कथञ्चित्तद्रूपावच्छिन्नलिङ्गकपरामर्शस्तत्र क्षणैकव्याजेन अनुमित्युपगमात्र तत्र व्यभिचारोदयिनः । ननु तद्धर्मावच्छिन्नलिङ्गकानुमितौ तद्धर्मावच्छिन्नधर्मिकव्यभिचारज्ञानाभावस्य हेतुत्वोपगमान्नव्यभिचारः । तद्धर्मावच्छिन्नलिङ्गकत्वञ्चाव्यवहितोत्तरत्वसम्बन्धेन तद्रूपावच्छिन्नधर्मिकव्याप्त्यादिज्ञानविशिष्टत्वं । तादृशसम्बन्धेन व्यभिचारज्ञानविशिष्टं यत्तदन्यत्वमेव वा जन्यतावच्छेदकं वाच्यं । तेन धूमश्चाप्य वह्निमानयमित्याकारकशाब्दादिपरामर्शोत्पत्ति * द्वितीयक्षणे यत्र लौकिकसन्निकर्षजन्यो वह्निर्धूमव्यभिचारी धूमव्याप्येऽनवानित्याकारकसमूहालम्बनप्रवृत्तजन्यानुमितेरुक्तसम्बन्धेन वह्नित्वावच्छिन्नधर्मिकव्याप्त्यादिज्ञानविशिष्टत्वेपि

---

* अत्र द्वितीयक्षण साधारण मेवाव्यवहितोत्तरत्व निवेशमन्यथा विनश्यद्रूपस्य परामर्शोत्तरानुमितेरुक्त व्याप्तिज्ञानविशिष्टत्वाभावादिति ।

नः इतिरत्र चाह्न व्यात्यादीति। कृतकारणताकव्याप्त्यादिज्ञान-सत्वे व्यभिचारज्ञानाद्यभावव्यतिरेकेणानुमितिव्यतिरेकस्यासिद्धत्वा-दिति भावः। व्याप्तिज्ञानादेर्व्यभिचारज्ञानाभावादिना अन्यथा-सिद्धत्वशङ्कातु * प्रागेव निरासता। न चतिर्न व्यभिचारादाव-व्याप्तिः। यत्रासद्धेतुविशेषे तादृग्यानुमितेरर्मासद्धित्वदलदोषे-ष्वव्याप्तेर्वक्ष्यमाणतया † दूषयथाश्रुतव्याख्यायामनिर्भरत्वनाय-वद्न्तीति॥

पर्व्वतोनिर्वह्नि धूमो वह्नेरभिधेयत्व' प्रमेयत्वस्य व्यभिचारीत्यादिभ्रमादनुमितिप्रतिबन्धादाह यथा-र्थेति॥

पर्व्वतोवह्निमान् धूमादित्यादिसद्धेतुस्थले बाधादिभ्रमविषये ऽतिव्याप्तिवारकतया यथार्थपदं सार्थकयति। पर्व्वतोनिर्व्वह्नि-रिति। अत्र इति पदस्य त्रितयस्थले सम्बन्धाद्भ्रमत्रितयलाभः। प्रत्येकभ्रममादायैवातिप्रसङ्गभङ्गात् तादृशसमूहालम्बनभ्रमपर्य-न्तानुधावनवैफल्यात् तत्परत्वासङ्गतिरितिध्येयम्।

प्रथम भ्रमोऽनुमितौ विरोधी। अन्त्यौ च तज्जनकज्ञाने तथा,

---

* तस्यभिचार इति भाव।

† यत्र व्यभिचार ज्ञाने सति व्याप्तिज्ञानस्य सति सत्यनुमित्यनुत्पादात् यत्र व्याप्तिज्ञानसत्वेऽपि व्यभिचारज्ञानाभावेनापि सत्यनुमित्युत्पादादित्यादयः।

तयोरपि प्रथमेऽन्यत्र प्रसिद्धस्य साध्याभाववद्वृत्तित्वस्य धूमाद्यंशे भ्रमत्वं अत्रैव प्रमेयत्वाभाववद्वृत्तित्वस्याप्रसिद्धेरा न तद् भ्रमत्वं । किन्त्वभावांशेऽनुयोगितावि शेषसम्बन्धेन साध्यस्य भ्रमत्वमित्येता-दभ्युपेत्य शिष्यव्युत्पादनायानेकविधभ्रमकथनं ॥

एतन्मते यदभिधेयत्वं प्रमेयत्वस्यव्यभिचारीत्यत्र स्वरूपसम्बन्धा-वच्छिन्नप्रमेयत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रमेयत्वभ्रमो-वाच्यः । प्रतियोगितांशे साध्यतावच्छेदकावच्छिन्नत्व-साध्यतावच्छे-दकसम्बन्धावच्छिन्नत्वयोः साध्यभावयदवृत्तित्वरूपव्याप्तिघटकतया तदंशे तदुभयावगाहिव्यभिचारज्ञानस्यैव व्याप्तिज्ञानविरोधित्वात् । एवञ्च भेदादौ प्रमेयत्वावच्छिन्नप्रतियोगिताकत्वस्य प्रसिद्धावपि स्वरूपसम्बन्धावच्छिन्नतादृग्प्रतियोगिताकत्वाप्रसिद्धा तादृशसम्ब-न्धेन भ्रमानुपपत्तिः । प्रतियोगितांशे सम्बन्धविशेषावच्छिन्नत्वस्य भ्रमइत्यपि न युक्तं । तस्य सम्बन्धघटकतया तत्प्रकारकत्वघटित तद्भ्रमत्वानुपपत्तेः । नच तेन रूपेण प्रतियोगिताप्रकारकएवात्र भ्रमोविवक्षितः । नतु तदवच्छिन्नप्रतियोगिताकत्वसंसर्गक इति वाच्यं । लाघवात् * प्रतियोगितासंसर्गकज्ञानस्यैवानुमितिहेतुतया तत्प्रकारकव्यभिचारज्ञानस्याकिञ्चित्करत्वात् । अत्राहुः स्वाव-च्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन—

---

* अत्रावधेयं तादृग् सम्बन्धेन विशिष्टाभावादि किंतु यद्वत्त्वाभावादेरन्यथा पर्वतादौ महानसीयवह्निर्नास्तीति मतीतिवत् वह्निर्नास्तीति प्रत्यय स्यादितिभाव ।

साध्यतावच्छेदकवत्त्वमेवाभावस्य* साध्याभाववदवृत्तित्वरूपव्याप्ति-घटकं लाघवात्। एवञ्च तादृशसम्बन्धेनाभावांशे साध्यतावच्छेदक-प्रकारकव्यभिचारज्ञानस्य व्याप्तिग्रहविरोधितया घटत्वादेः प्रमेयत्वेन तादृशसम्बन्धेन मेयत्ववादेरभावांशे भ्रमात्मक एव तथा-विधो यह इति न किञ्चिदनुपपन्नम्†॥

प्रथमे साध्याभाववदवृत्तित्वज्ञानविरोधी हेतौ साध्याभाववद्-वृत्तित्वरूपव्यभिचारस्य भ्रम, द्वितीये तदप्रसिद्धया व्यापकसामा-नाधिकरण्यग्रहविरोधी साध्यतावच्छेदके हेतुसमानाधिकरणा-भावप्रतियोगितावच्छेदकत्वस्य भ्रमोऽभिमत। असमानप्रकारक-ज्ञानस्याविरोधितया द्विविधव्यभिचारसंग्रहाय द्विविधव्याप्ति-विषयकसमूहालम्बनज्ञानस्यैव लक्षणे निवेश्यत्वात्। न च हेतुः साध्यस्य व्यभिचारीत्यत्र साध्यतावच्छेदके हेतुसमानाधिक-रणाभावप्रतियोगितावच्छेदकत्वस्य दुर्लभतया, तदवगाहिज्ञान-व्याभिधेयत्वं प्रमेयत्वस्य व्यभिचारीत्याकारकता नोपपद्यत इति वाच्यं। यतोऽभाववद्वृत्तित्व समानाधिकरणाभावप्रतियोगितावच्छेदकत्वं हयमेव हेतुः साध्यस्य व्यभिचारीत्यत्र व्यभिचारपदार्थः

---

* अत्र तादृशसम्बन्धेन साध्यतावच्छेदकविशिष्टाभाववदवृत्तित्वस्यैव व्याप्तिग्रहे महानसीयवह्न्यभावमादाय वह्निमान् धूमादित्यादावाप्ति अवच्छिन्नप्रतियोगिता-कत्वसम्बन्धेन वह्नित्वादिविशिष्टस्य महानसीयवह्न्यभावादेरधिकरणीभूतपर्वतादौ धूमादिवृत्तित्वादिति ज्ञेयम्।

† एतन्मतेऽन्वयितावच्छेदकरूपेणान्वयव्युत्पत्तिं विना मेयत्वप्रवृत्तिधर्मावच्छि-न्नं विना एतदनुपपन्नमिति तु विभावनीयम्।

तत्र प्रथमस्याभिचारतात्पर्यग्रहस्थले व्यभिचारपदार्थैकदेशे ऽभावे-ऽनुयोगितारूपषष्ठ्यर्थस्य तत्र प्रकृत्यर्थतावच्छेदकवत्त्वाद्य वच्छिन्ननिरूपितस्वसम्बन्धेन प्रकृत्यर्थस्यान्वयः । मत्वर्थीयार्थस्य स्वरूपसम्बन्धवान्, तस्य चाभेदेन प्रथमान्तार्थेऽन्वयः । द्वितीयतत्प-दार्थपरवाक्यस्थले च तदेकदेशसामानाधिकरण्ये हेतुपदार्थान्वित-प्रथमार्थनिरूपितत्वस्यान्वयः । षष्ठीप्रकृतिधर्मंपरतया षष्ठ्यन्तार्थस्य साध्यतावच्छेदकनिष्ठत्वस्य तादृशान्वयबललभ्यहेतुसमानाधिकर-ण्याभावप्रतियोगितावच्छेदकत्वे तस्य च तद्धितार्थसम्बन्धिन एक-देशे घटकत्वसम्बन्धे सम्बन्धिनश्चाभेदेन प्रथमान्तार्थेऽन्वयः । एव-मुक्तवाक्यात्तत्र साध्यतावच्छेदके हेतुसमानाधिकरणाभावप्रति-योगितावच्छेदकत्वस्यापि लाभात्तत्र तदवगाहिभ्रमस्य दर्शिता-कारकतासम्भवादित्यपि वदन्ति ॥

भ्रमादिति पञ्चम्यर्थः प्रयुक्तत्वं तस्य प्रतिबन्धपदार्थेऽनुत्पादे-ऽन्वय । यथार्थेतीति । यथार्थपददानेन स्वाधिकरणप्रकारा वच्छिन्ना या या विषयता तदनिरूपकत्वस्य सर्वांशे प्रमात्वस्य विवक्षणीयतया दर्शितभ्रमाणां किञ्चिदंशे प्रमात्वेपि न तमादाय दोष इति भाव. ॥

ननु प्रतिबन्धकज्ञानविषयव्यभिचारादिघटकसा-ध्यादेरपि प्रत्येकं हेत्वाभासत्वापत्तिः । अथ विशिष्ट-विषयक ज्ञानं प्रतिबन्धकं तद्घटकञ्च न विशिष्टमिति

चेत्तर्हि यथार्थेति व्यर्थं । भ्रमविषयविशिष्टबुद्धि-
प्रसिद्धत्वादित्यनुशयेमाह यदिति ।

अत्र यथार्थपदेन सद्धेतुस्थलेऽनुमितिविरोधिभ्रमविषय-साध्याभावादावतिप्रसङ्गवारणेऽपि, असद्धेतुस्थले तादृशभ्रमाविषय-दोषघटकसाध्यादेः प्रत्येकं दोषत्वापत्तिर्दुर्व्वारैव । तदर्थं प्रकारान्तरानुसरणेन, तत एव पूर्व्वदोषस्यापि वारणसम्भवे यथार्थ-पदं व्यर्थमिति दोषस्य दुरवधरतया तस्यैव यथार्थपदाघटित लक्षणान्तरानुसरणबीजत्वमाह तन्मिति । एकदेशस्यापि विशिष्टघटकतया हेत्वाभासपदार्थत्वस्वेष्टत्वादाह प्रत्येकमिति । प्रत्येकपर्य्याप्तसाध्यतावच्छेदकावच्छिन्नस्येत्यर्थः । हेत्वाभासता-पत्तिः, हेत्वाभासपदार्थत्वापत्तिः । यद्रूपावच्छिन्नज्ञानस्यानु-मित्यविरोधित्वे तद्रूपावच्छिन्ने हेत्वाभासत्वव्यवहारस्य तद्रूपा-वच्छिन्नभ्रमजनकहेतौदुष्टत्वव्यवहारस्य चानुदयेन दोषापत्तिर्न सम्भवतीति भावः । यादृशविशिष्टविषयकत्वं तादृशानुमिति-विरोधितानतिरिक्तत्वमिति तत्त्वमिति विवक्षया न साध्यादावति-व्याप्तिरित्याशयेनाग्रहते अथेति । विशिष्टविषयकं साध्याभाव-त्वविशिष्टसाधनादिविषयकमेव, तद्घटकत्वञ्च तादृश-विशिष्टघटकप्रत्येकपदार्थविषयकत्वञ्च न विशिष्ट, न तादृग विशिष्टनिरूपितं । तथा च प्रत्येकपदार्थविषयकत्वस्य प्रतिबन्ध-कतायामतिरिक्तत्वात्साध्यादिरिति भावः । व्यर्थमिति यथार्थपदादानेपि सद्धेतुस्थलेऽतिव्याप्तिवारणसम्भवात् । ननु तथा

भ्रमविषयप्रत्येकपदार्थस्योक्तरीत्या वारणेपि तद्विषयविशिष्टेऽति व्याप्तिरत आह भ्रमविषयेति। अप्रसिद्धत्वादिति। तथा च भ्रान्तिव्याप्तिरिति भावः॥

केचित्तु दुष्टानामेव हेतूनां एतानि लक्षणानि, तत्र तृतीयमिव प्रथममपि भ्रायमानव्यभिचारादेः प्रतिबन्धकत्वमभ्युपेत्य। तदर्थश्च, तादृशाभावप्रतियोगिनो ये व्यभिचारादयस्तत्प्रकारकयथार्थज्ञान विषयत्वमत्रैव तत्त्वमित्यस्य तद्वत्त्वमित्यर्थः। आद्यस्यैव वा दुष्टहेतुलक्षणत्वमिति प्राहुः॥

केचित्त्विति। नन्वादस्य दुष्टहेतुलक्षणत्वे दोषेष्वतिव्याप्तिस्तोषामप्यनुमितिविरोधियथार्थज्ञानविषयत्वात्। न च ह्रदादि पक्षक-वह्न्यादि-साध्यकस्थले वह्न्यभाववद्ह्रदादिरूपदोषाणामपि दुष्टहेतुतया लक्ष्यत्वमेवेति वाच्यं। तद्रूपावच्छिन्नपक्षक तद्रूपावच्छिन्न साध्यकतद्रूपावच्छिन्नहेतुकस्थले तेन रूपेण दुष्टस्य लक्षणं। यदि तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिविरोधियथार्थज्ञानविषयत्वमात्रं। तदा ह्रदत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यकधूमत्वावच्छिन्नहेतुकानुमितिप्रतिबन्धकप्रमाविषयवह्न्यभाववद्ह्रदादीनां धूमत्वादिना दुष्टत्वाभावादतिव्याप्तिरित्याशङ्कां परिहर्तुमुद्दाहृत्याभावप्रतियोगिनं चेत्यादि बहुव्रीहिसमासमाश्रित्य तादृशाभावप्रतियोगिप्रकारकयथार्थज्ञानविषयत्वमर्थं व्याख्या-

स्यति। तज्ज्ञायमानदोषप्रतिबन्धकतामत एव संगच्छतेऽतस्तद्-बलम्बेनाह नवेति। तेषु लक्षणेषु मध्ये इत्यर्थः। तृतीय लक्षणस्य सर्व्वमत एव ज्ञायमानदोषप्रतिबन्धकताभिप्रायकतया दृष्टान्तत्वेनोपन्यासः। तदर्थमेति। प्रतियोग्यन्तेन व्यभिचारादि-दोषानादाय लक्षणं सङ्गमनीयमिति दर्शयितुं व्यभिचारादय-इति। न तु तेन रूपेण लक्षणघटकत्वमित्यवधेयं। एवञ्च यथार्थं पदादानेदुष्टत्वभ्रममादाय प्रकृतहेतुभिन्नेऽतिप्रसङ्ग * इति यथार्थपदसार्थक्यम्। यद्यपि पर्व्वतत्वाद्यवच्छिन्ने वह्नित्वाद्यव-च्छिन्नसाधने धूमत्वावच्छिन्नोदुष्ट इत्यादेः सर्व्वतो दुष्टत्वव्यवहारस्य नापत्तिः, तत्र तत्पक्षसाध्यहेतुकानुमितिप्रतिबन्धकदोष-प्रकारकज्ञानविषयत्वस्यैव प्रत्येतव्यत्वात् तादृशानुमितिप्रति-बन्धकत्वाधव्यभिचारादेरप्रसिद्धत्वात्। ह्रदादौ वह्न्यादिसाधन मादाय च सर्व्वत्रैव दुष्टत्वव्यवहारदृष्ट्या धूमसाधने वह्नित्वे-नायं दुष्ट इत्यादौ वह्नित्वाद्यवच्छिन्नहेतुकधूमाद्यनुमितिप्रतिबन्धक

---

* नन्वत्र समवेते वह्न्यभावत्वावच्छिन्नविषयज्ञानात् भ्रमोत्पत्तावपि यथार्थ पदं सार्थकं। तथाच कथमयं भ्रमो न सङ्गच्छते। अत्र समवायत्वमेव निवेश्य समवा-यावच्छेदेन व्याप्त्यादिवैयर्थ्यात्। अत्र केचित् संयोगाभावत्वघटितपक्षतावा-दावश्याश्रित्य। साहश्यविशिष्टविषयताया संयोगसादृश्यैति प्रकारसमवे सत्वात् अलक्षणा-वर्णनाय समवायत्वनिवेशव्यावृत्तकतया यथार्थपदवैयर्थ्यमाहुः। वस्तुतस्तु चित्र मेतत्पक्षे निरवच्छिन्नविशेषणतया संयोगाभावत्वपक्षस्य बाधतया साहश्यविशिष्ट विषयताया प्रमात्मकसमवेतत्वात् समवायत्वनिवेश्यालक्षणकता इति साहश्य-विशिष्टत्वस्य संयोगाभावस्य कथनेऽलक्षणात्।

दोषप्रकारकज्ञानविषयत्वस्य प्रत्ययात् वक्ष्यमाणसम्बन्धावच्छिन्न-साद्ध्यानुमितिप्रतिबन्धकधूमाभाववह्नित्वविशिष्ट वह्न्यादिरूप-प्रसिद्धदोषप्रकारतानिरूपितभ्रममादाय रासभादित्वयेणापि तथा व्यवहारः स्यात् । न च तत्र विशेष्ये तृतीयान्तार्थवह्नित्वविशिष्य-भानाद्रासभे तदाधेन नायमतिप्रसङ्ग इति वाच्यं । तथा सति दोष-पदार्थघटकानुमितौ वह्नित्वावच्छिन्नहेतुकत्वलाभात् तल्लाभानु-रोधेन हेतुप्रकारकज्ञानजन्यानुमितिप्रतिबन्धकरूपदोषपदार्थघटक-हेतौ वह्नित्वविशिष्टरूपतृतीयार्थस्य तत्प्रकारकतायाम्वा स्वाव-च्छिन्नत्वार्थकतृतीयार्थलभ्यवह्नित्वावच्छिन्नत्वस्यान्वय इत्येवोप-गन्तव्यत्वात् । न च विशिष्टे वह्नित्वादिधर्मावैशिष्ट्यबोधकपद समभिव्याहारस्थले दोषार्थकधातोरेव वह्नित्वावच्छिन्नहेतुकानु-मितिप्रतिबन्धकोऽर्थः । अथवा अनुमित्यर्थकसाधनशब्दस्यैव वह्नित्वाद्यवच्छिन्नहेतुकानुमितिरूपविशेषलाक्षणिकत्वं । धात्वर्थे ऽनुमित्यन्तर्भावे साधनपदार्थान्वयप्रसङ्गात् तथा च विशेष्य एव तृतीयार्थवैशिष्ट्यान्वयोपगमात्तोक्तातिप्रसङ्ग इति वाच्यं । एवमपि वह्निना धूमसाधने रासभो दुष्ट इत्यादिव्यवहारस्य भ्रममादायाति प्रसङ्गादिति यथार्थपदसार्थक्यं ।* अथवा इतरभेदानुमापकमेवेदं

---

* यथार्थपददानेपि वह्निमान् द्रव्यादित्यादौ दोषकूटभावावच्छिन्नद्रव्यादिरूपसव्य भिचारस्य साद्ध्यद्रव्यत्वादिमत्वसम्बन्धेन धूमादि सत्त्वेनापि सत्त्वेन द्रव्यत्वाव च्छिन्नेन वह्निसाधने द्रव्यत्वावच्छिन्न दुष्ट इत्यपेव द्रव्यत्वावच्छिन्नेन वह्निसाधने धूम त्वावच्छिन्नो दुष्ट इत्यस्यापि व्यवहारस्य प्रसङ्गात् । तदुपावच्छिन्नलिङ्गकानुमितिप्रति बन्धकप्रकारकभ्रमविषयत्व तदुपावच्छिन्नस्य दुष्टसाध्यव्यवहारनियामकमिति वक्तव्य । अतोक्तदोष इति कथ यथार्थपदमित्यसरसादाह अथवेति ।

लक्षणं । तथा च पर्व्वतपक्षकधूमसाध्यकवह्निहेतुकदुष्ट-लक्षणस्य तथाविधानुमिति-विरोधिज्ञानविषय-व्यभिचारादि--भ्रममादाय सद्धेतावितरभेदव्यभिचारित्वात् ॰ यद्यर्थपदसार्थक्यं । ज्ञानत्वात्र ज्ञानविषय-प्रकृतहेतुतावच्छेदकत्व-सम्बन्धावगाहि-ग्राह्यं । तेन प्रकृतहेतुभिन्नस्यापि सम्बन्धान्तरेण दोषप्रमाविषयत्वेपि नाति प्रसङ्गः । अपेक्षाबुद्ध्यसम्बन्धेनैव तद्धत्वं वाच्यं । अत्र ज्ञायमान पक्ष-निष्टसाध्याभावत्वादिना बाधादिदोषाणां प्रतिबन्धकता न सम्भवति । साध्याभावत्वादिना पदार्थान्तरस्यैव यत्र ज्ञानं तत्र दोषा-णामज्ञायमानतयाऽविरोधित्वेनानुमित्यापत्तेः । किन्तु ज्ञानीय-प्रकृतावच्छेदकावच्छिन्नविषयतानिरूपितसाध्याभावत्वावच्छिन्न विषयतावत्त्वेन तादृग्विषयतया ज्ञानविशिष्टत्वेन वा । तच्च रूपं तादृग्भ्रमविषयपदार्थान्तरसाधारणमेवेति । तेनैव तादृग्-भ्रमदशायां विरोधित्वापत्तिः । एवञ्च सद्धेतूनामनुमिति प्रतिबन्धकतावच्छेदकनिरूक्तविषयतान्यूनिरूक्तवह्न्याभावादि प्रमा-विशेष्यत्वादतिव्याप्तिरितिचेन्न । यद्रूपावच्छिन्नविषयतासामान्यं प्रतिबन्धकतावच्छेदकं , तद्रूपविशिष्टप्रकारकप्रमाविशेष्यत्वमेव विवक्षणीयं । सदोषवह्निमान् धूमादित्यादौ च तादृग्रूपं सद-विशिष्टवह्न्याभावत्वादिकं , सदे वह्निर्नास्तीत्यादिज्ञाननिरूपित तद्रूपावच्छिन्नविषयतासामान्यस्यैव सदत्वावच्छिन्नविषयता-निरूपितवह्न्याभावत्वावच्छिन्नविषयतात्वेन दोषनिष्ठानुमिति-प्रतिबन्धकतायामवच्छेदकत्वात् । सद्धेतुस्थले च न केवलवह्न्य-भावत्वादिकं सदा । सदवच्छिन्नविषयतासामान्यान्तर्गतधर्म्म-

विषयकज्ञाननिरूपितताट्शविषयतानामनुमितिप्रतिबन्धकतावच्छेदकत्वात् । पर्व्वतविशिष्टवह्नेरभावत्वादिविशिष्टस्य न किञ्चिदस्तु प्रसिद्धमिति नातिप्रसङ्गः । दृतोयमपि लक्षणमनयैव रीत्या परिष्कार्य्यमिति । यद्यपि अस्य दुष्टहेतुलक्षणत्वे प्रायमानदोषप्रतिबन्धकतामतानाश्रयणेपि तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबन्धकप्रमाविषयतद्धेतुतावच्छेदकत्वं तद्रूपावच्छिन्नपक्षसाध्यहेतुकस्थले तेनैव रूपेण दुष्टत्वमित्यर्थंकतामुपगम्य, यथार्थपदसार्थक्यमुपपादयितुं शक्यते । तथापि दुष्टस्य दोष घटितत्वानुरोधेन तत्मतमवलम्ब्य षष्ठीसमास आदृत इति ।

ननु द्वितीयतृतीयलक्षणयोर्दोषतिव्याप्तिरव्याप्तिश्च क्वचिद्धेतौ यत्पदेन दोषस्यैवोपादेयतया तत्त्वस्य तन्मात्रघटितत्वादत आह तत्त्वमित्यस्येति । प्रथममात्रस्य दुष्टहेतुलक्षणत्वेनैवोपपत्तौ चरमयोर्दोष लक्षणत्वमेवोचित । तत्त्वमित्यस्य यथाश्रुतार्थकत्वानुरोधादतस्तथैवाद्यस्यैववेति । दृष्टग्रव्याख्यायानिर्दोषत्वात् प्राहुरित्युक्तं ॥

लिङ्गमविवक्षितं यद्विषयत्वेन याट्शविशिष्टविषयत्वेन तेनानुमितिप्रतिबन्धकपक्षविशेष्यकभ्रमविषये साध्याभावादौ सङ्केतवादिनिष्ठे नातिप्रसङ्गः ।

लिङ्गज्ञानस्येति । लिङ्गांशनिवेशस्य* निर्व्वाहकतया तस्या-

---

* वस्तुतस्तु सर्वत्रैव साध्यतावच्छेदकादिरूपेण हेत्वसाध्यादिविषयकज्ञानमादाय लक्षणमगतार्थमिति निर्व्वाहकत्वमुक्तमिति ।

विवक्षितत्वमाह लिङ्गमिति। यद्दिपदलेनेत्यत्र दृतीयार्थोऽव-च्छेदकत्वं तच्च यद्यनतिरिक्तवृत्तित्वरूपमिदानीं निविश्यते तदाऽस-म्भवः। विशिष्टस्यानतिरिक्तत्वा वह्नाभावविशिष्टह्रदादिरूपदोष-विषयकत्वस्य मुह्रदलाद्यवच्छिन्नविषयकज्ञानेपि सत्वेनानुमिति-प्रतिबन्धकतातिरिक्तवृत्तित्वादतः स्वरूपसम्बन्धरूपमेव तदार्थं। तथा च पर्व्वतोवह्निमानित्याद्यनुमितिप्रतिबन्धकज्ञानविषयवह्ना-भावादावतिव्याप्तिस्तद्विषयकत्वस्यापि प्रतिबन्धकतावच्छेदकघट-कत्वात्। असम्भवभयेन चावच्छेदकतापर्य्याप्तिनिवेशासम्भ-वात्। अतोयद्दिपदलेनेतिपदं व्याचष्टे यादृशविशिष्टविषय-त्वेनेति। यद्रूपावच्छिन्नविषयत्वेनेत्यर्थः। एवञ्च तत्त्वमि-त्यस्य तद्रूपावच्छिन्नत्वमर्थः। व्याख्याप्रयोजनं स्फुटयति तेनेति। यत्प्रकारकत्वेन प्रतिबन्धकत्वमित्युक्तौ पक्षविशेषणकज्ञान-माद्राय वह्नयभावादौ नातिप्रसङ्गसम्भवः। पर्व्वतादावतिप्रसङ्ग-सम्भवेपि यत्सम्बन्धावच्छिन्नयन्निष्ठप्रकारतात्वेनानुमितिविरो-धित्वं, तेन सम्बन्धेन तदत्वस्य दुष्टताव्यवहारनियामक-त्वोपगमे, पर्व्वतादिविशेषणकयद्वह्नयभावज्ञानस्य विशेषणतावि-शेषावच्छिन्नाधेयतासंसर्गावच्छिन्नपर्व्वतनिष्ठप्रकारतात्वेन प्रति-बन्धकत्वात् तेन सम्बन्धेन पर्व्वतादिमतायाः पर्व्वतमहान-न्यतरत्वादिरूपसंशये सत्वेपि, प्रसिद्धधूमादिरूपहेता वसत्वाभाव दुष्टता व्यवहारापत्तेरयोग इति, तदनुरोधेन पक्षविशेषणकेत्युक्तं। भ्रमपद निश्चयसामान्यपरं तेन सदे-त्वादीत्या दपदरात्मनाध्यगृह्यपक्षकदुष्टहेतौ प्रतिबन्धकप्रमा-

विषयसाध्याभावादेव सत्वेपि गालिप्रसङ्ग इति उक्तव्याख्याने ऽनतिरिक्तवृत्तित्वमेवावच्छेदकत्वं विवक्षणीयं । विशेषणीभूत-यद्वह्यभावाद्यविषयके ह्रदत्वादिना ह्रदादिविषयकज्ञाने वह्नाभावविशिष्टह्रदत्वावच्छिन्नविलक्षणविषयतानिरूपकत्वस्यासत्वे-नोक्तासम्भवानवकाशात् । तथाच केवल वह्नाभावत्वाद्यवच्छिन्नवि-षयताकत्वस्य प्रतिबन्धकतातिरिक्तवृत्तित्वादतिप्रसङ्ग इत्यर्थः ॥

अवच्छेदकत्वञ्च, ह्रदानतिरिक्तवृत्तित्वं । तेन विशिष्टस्यासत्त्वेऽपि भ्रमात् प्रतिबन्धेऽपि न क्षतिः । विशेषणीयस्य तादृशविशिष्टान्तराघटितत्वेन । तेन प्रमेयत्वादिविशिष्टे सव्यभिचारादौ नातिप्रसङ्गः ।

नन्वेवं स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशेऽयमेवातिप्रसङ्गो दुर्वारः । अप्रामाण्यज्ञानाभावविशिष्टयद्रूपावच्छिन्नविषयकनिश्चयत्वं प्रति-बन्धकतावच्छेदकतापर्याप्त्यधिकरणमीदृशयत्किञ्चया तादृशातिप्रस-ङ्गवारणे पुनरसम्भवः । वह्नाभावत्वादिना घटाद्यवगाहिनोवह्नि-भाववान् ह्रद इत्यादिज्ञानस्यापि प्रतिबन्धकतया तत्साधारण्यानु-रोधेन वह्नित्वावच्छिन्नप्रकारतानिरूपिताभावत्वावच्छिन्नप्रकारता-निरूपितह्रदत्वावच्छिन्नविशेष्यताक निश्चयत्वेनैव प्रतिबन्धकताया वाच्यतया वह्नाभावविशिष्टह्रदत्वाद्यवच्छिन्नविषयतायास्तादृश-प्रकारतानिरूपितह्रदत्वाद्यवच्छिन्नविषयतात्वेनावच्छेदकत्वेपि अ-प्रामाण्यज्ञानाभावादिविशिष्टवह्नाभावविशिष्टह्रदत्वाद्यवच्छिन्नवि-

यथताकनिरूपयत्वावच्छेदकतावच्छेदकतायामधिकरणत्वादतः द्वितीयायां अनतिरिक्तवृत्तित्वरूपावच्छेदत्वार्थकत्वं स्फुटयति अवच्छेदकत्वेति। एवं अनतिरिक्तवृत्तिघटकत्वं समुदायः। न च विशिष्टविषयकत्वस्यानतिरिक्तसंसर्गयादौ सत्वात् पुनरसम्भव इतिवाच्यं। ज्ञानपदस्यात्र ज्ञानपदसमानार्थकप्रमात्वस्यज्ञानाकलन्दितनिरूपणपरं, षष्ठ्यर्थप्रकारीयत्वं तस्य यद्विषयकत्वेऽन्वयः। एवञ्च साहचर्यनिरूपितत्वविशिष्टं साहचर्यविशिष्टविषयकत्वमनुमितिमत्तिरूपितत्वं साहचर्यस्यापि विषयतोपयोगितया असम्भवाभावात्। अनतिरिक्तवृत्तित्वं, स्वव्यापकतत्कत्वं। अतु तच्छून्यावृत्तित्वं साहचर्यनिरूपितत्व विशिष्टस्य विशिष्टविषयकत्वस्य विशेषणीभूतविशिष्टविषयकत्वानतिरिक्ततया तस्यातिप्रसक्तत्वे विशिष्टे तन्निरूपनतिप्रसक्तत्वस्य दुर्घटत्वात्॥

यत्तु प्रतियन्धकतागून्यसाहचर्यनिरूपितत्वमेवानतिरिक्तवृत्तित्वं। अतोनोक्तरीत्या असम्भव इति तदसत्। तत्रापति मूलोक्तस्य ज्ञानपदस्य वैयर्थ्यादुद्देश्यावच्छिन्ना या वक्ष्यमाणविशिष्टकदत्वावच्छिन्नविषयकयत्किञ्चिज्ज्ञानीयविषयता तन्निरूपकत्वस्य प्रतियन्धकतागून्यसाहचर्यनिरूपितत्वेन एकदत्वावच्छेदेऽतिप्रसङ्गाच्च। मन्मते चानुमितिप्रतियन्धकतायाःसाहचर्यनिरूपितत्वविशिष्टकदत्वावच्छिन्नविषयतात्वावच्छिन्नव्यापकतानिरूपितत्वातिप्रसङ्गानवकाशात्॥

अथैवमपि जातित्वादिना कदत्वादिविषयकस्य ज्ञातिमान् पञ्चभावानित्यादिज्ञानस्यापि पञ्चभावत्वादिना एकदत्वावच्छिन्न

विषयकतया तस्य च ह्रदोवह्निमानित्यादानुमित्यविरोधित्वादक्षः-
क्षम् । अलवान् वह्निमानित्यादिस्थलीयदोषासंग्रहेण यदि-
शेषितधर्मावच्छिन्नपक्षतादिस्थलीयस्य किञ्चिद्विशिष्टघटित
स्यासंग्रहेण च पक्षतावच्छेदकादंशेऽन्याप्रकारकत्वादिनिवेशस्या-
वश्यकत्वात्, तादृग्विशिष्टाघटकपदार्थाविषयकत्वस्य ज्ञानविशेषण-
त्वोपगमे सर्वमाकाशवदित्यादिस्थलीयबाधादौ तदघटकाप्रसिद्ध्या
अव्याप्तिः । यद्यद्रूपावच्छिन्नस्य यस्य यस्य यादृग्विशिष्टघट-
कता तत्तद्रूपावच्छिन्नतत्तन्निष्ठविषयतानिरूपितकिञ्चिदवच्छिन्नविष
यताशून्यत्वं ज्ञाने निवेश्यं। जातित्वाद्यवच्छिन्नस्य ह्रदत्वादेर्न
ह्रदाभावयद्वृत्त्वावच्छिन्नघटकतेति जातित्वाद्यवच्छिन्नह्रदत्वादि
विषयता तादृग्विषयतानिरूपितैव तच्छून्यत्वञ्च नोक्तज्ञानस्येति न
दोष इत्यपि न सत्। तथासति ह्रदोजात्यभाववान्नित्यादिस्थलीय-
बाधादेरेव दुःसंग्रहत्वात् जातित्वादिना ह्रदत्वादिरूपधर्मिता-
वच्छेदकावगाहिनो ज्ञातिमान्ज्ञातिमान्नित्यादिज्ञानस्य जाति-
त्वाद्यवच्छिन्नह्रदत्वादिनिष्ठधर्मितावच्छेदकतारूपविषयतायां नि-
रूक्तविषयतानिरूपितत्वविरहेण तादृग्ज्ञानस्यानुमित्यप्रतिबन्ध-
कस्य शून्यत्वान्तेनावारणात्। एवं यद्रूपावच्छिन्नविषयतासं
तादृग्विशिष्टविषयतासमानाधिकरणाभावप्रतियोगितावच्छेदकं
तद्रूपावच्छिन्नविषयताशून्यत्वस्य ज्ञाने विशेषणतया साम-
ञ्जस्यात्। अप्रतिबन्धकज्ञानविषयतावच्छेदकजातित्वादिविशे-
षितह्रदत्वादिघटिततद्रूपावच्छिन्नविषयितावच्छिन्नाभावस्य

दोषाश्रयविशिष्टविषयतासामान्याधिकरण्यात् तज्ज्ञानस्याहार्यत्वा-
दिति। विशिष्टस्य विशिष्टविषयकत्वस्य सत्त्वेऽपि वह्न्यभाववत्त्वादिना
घटाद्यवगाहिभ्रमेऽसत्त्वेऽपि तथाच विशिष्ट विषयकत्वेन प्रति-
बन्धकता न सम्भवतीति भावः। भ्रमाप्रतिबन्धेऽपि तादृश-
भ्रमस्यानुमित्यनुत्पादप्रयोजकत्वेऽपि न क्षतिः नीलयुक्तत्वापर्याप्ति-
निवेशेऽपि असम्भवस्तदनिवेशे पूर्वोक्तातिप्रसङ्गोवा।

' ननु विशिष्टदोषघटकीभूततदेकदेश्यविषयतायां स्वरूप-
सम्बन्धरूपावच्छेदकत्वसत्त्वेऽपि, बाधविशिष्टविषयतासामा-
न्यस्य बाधावच्छेदकत्वविवक्षया अतिप्रसङ्गवारणसम्भवात्
तदेव कथं न विवक्षितमिति। नच सामान्यपदस्य व्यापकतार्थ-
कतया प्रतिबन्धकतायच्छेदकतायां विशिष्टविषयतात्वव्याप-
कत्वं प्रवेश्यं, तदपेक्षया प्रतिबन्धकतायां विशिष्टविषयता
व्यापकत्वनिवेशनमेवोचितमिति वाच्यं। यतोवह्न्यभावविशिष्ट-
ह्रदादिनिरूपितविषयतायां अनुमित्यप्रतिबन्धकसंशयाहार्यप्रमा-
माणज्ञानाक्रन्दितज्ञानसाधारण्यतया नानुमितिप्रतिबन्धकतायां
तद्व्यापकत्वमित्यनाहार्यप्रमाणज्ञानानाक्रन्दितनिश्चयत्वविशि-
ष्टायाविशिष्टविषयतायां व्यापकत्वं प्रतिबन्धकतायां भवता
वक्तव्यमेवं। तदपेक्षया लाघवेन च स्वरूपसम्बन्धरूपावच्छेदक
तायां बाधादिरूपदोषविषयतात्वव्यापकत्वं वक्तुमुचितं। तथा सति
निश्चयत्वाद्यनिवेशात्, समानाकारकज्ञानस्य विषयितायाः भेद
स्याप्रामाणिकतया संशयादिज्ञानीयविषयितायामपि निश्चयत्वा-
दिविशिष्टदोषत्वेन प्रतिबन्धकतावच्छेदकतया बाधादिरूपदोष-

निरूपितविषयतात्वव्यापकतायाः सत्त्वात् । नच वह्न्यभाव-
वान् ह्रदो वह्निमानित्याद्याकारीयवह्न्यभावविशिष्टह्रदादिविष-
यिता नानाकार्यज्ञानसाधारणी, ताट्याकार्यज्ञान समानाकार-
कानाकार्यज्ञानानामसिद्धेः ह्रदीवह्न्यभाववानित्यनाकार्यज्ञानीयवह्न्य-
भावविशिष्टह्रदादिविषयतायाश्च वह्न्यादिप्रकारतानिरूपितताट्-
याकार्यज्ञानीयविशिष्टह्रदादिविषयतायाभिन्नत्वात् तयाचानाका-
र्यत्वविशिष्टविषयतायां एव प्रतिबन्धकतावच्छेदकतया न प्रति-
बन्धकतावच्छेदकतायांदर्शिताकार्यज्ञानीयविषयितासाधारणविशि-
ष्टविषयितात्वव्यापकत्वमिति वाच्यं तथासति अनाकार्यज्ञानीयवि-
शिष्टविषयितात्वव्यापकताया एव विवक्षणीयत्वात् तावतापि संभ-
वान्यत्वाप्रामाण्यज्ञानानाक्रान्तित्वाप्रवेशेन लाघवज्ञानपाताच् ।
नैवं स्वरूपसम्बन्धरूपावच्छेदकत्वप्रवेशे पाषाणमयत्वाद्यवच्छेदेन
वह्न्यभाववत्तानिश्चयविशिष्टस्य पाषाणमयत्वादिविशिष्टस्य पक्षादे-
र्ज्ञानस्य वह्न्यनुमितिप्रतिबन्धकतया तदवच्छेदकविषयितानिरूपा-
पाषाणमयत्वविशिष्टपक्षादावतिव्याप्तिः । अनतिरिक्तवृत्तित्वरूपावच्छे-
दकत्व निवेशपक्षे ताट्यविशिष्टविषयतायाः पाषाणमयत्वावच्छे-
देन वह्न्यभाववत्तानिश्चयाविशिष्टज्ञानसाधारणतया अनुमितिप्रति-
बन्धकतातिरिक्तवृत्तित्वेनातिप्रसङ्गानवकाशात् । नचानतिरिक्त-
वृत्तित्वरूपावच्छेदकत्वनिवेशपक्षेपि जलाद्यवच्छेदेन वह्न्यभाव-
वत्ताघटितस्य वह्न्यभाववज्जलादिमद्वृत्तिजलादिविशिष्टस्य ह्रदा-
दिरूपपक्षस्य जलवान्वह्न्यभाववान्नित्यादिज्ञानसहितस्य जल-
वांश्च ह्रद इत्यादिज्ञानस्य ताट्यज्ञानविशिष्टताट्यज्ञानत्वेनैव

प्रतिबन्धकतया ताहग्यप्रतिबन्धकताशून्यज्ञानाविषयत्व सन्-
प्रतिपद्यात्मनारमकस्य वारणाय ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य
प्रतिबन्धकतायामवश्यं निवेशनीयतया तमतेवि तत्र नाति
प्रसङ्ग इति वाच्यं। ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य प्रतिबन्ध-
कतावियेषणत्वे प्रतिहेतुव्यापकसाध्याभावसमानाधिकरणतेऽ-
नुमत्पक्षरूप सत्प्रतिपक्षाव्याप्तेः। साध्याभावांशे तदा-
पकतावच्छेदविशिष्टसङ्कल्पज्ञानत्वेन स्वतन्त्रसाध्याभावधर्मिक
तदृव्यापकतावच्छेदविशिष्टसङ्कल्पज्ञानसाधारण्यानुरोधेनावश्यकत्वय-
प्रतिबन्धकतयैवोपपत्तेः ताहग्यविशिष्टज्ञानस्य ज्ञानवैशिष्ट्या-
नवच्छिन्नप्रतिबन्धकतान्तरे मानाभावादुक्तविशिष्टेतिप्रसङ्गस्तु
विवक्षणीयविशिष्टान्तराघटितत्वनिवेशनेनैव वारणीयः। नच
ज्ञानद्वयसाधारण्यप्रतिबन्धकतायाः प्रत्येकज्ञानविषयविशिष्ट-
विषयकत्वं नानविच्छिन्नत्वरूपावच्छेदकत्वघटकतया च दण्डि-
तविशिष्टघटकस्य प्रत्येक ज्ञानविषयस्य न निरुक्तविशिष्टात्मकते-
ति निरुक्तविशिष्टान्तराघटितत्वमुक्तविशिष्टस्याक्षतमेवेतिवाच्यं।
वस्तुमात्रविशिष्टान्तराघटितत्वस्येव ताहग्यविशिष्टविषयकनिश्च-
यविशिष्टयाहग्यविशिष्टविषयकनिश्चयत्वं प्रतिबन्धकतासन्निवि-
ष्टमिति, ताहग्यविशिष्टद्वयाघटितत्वस्यापि निवेशनीयतया उक्त-
विशिष्ट वारणसम्भवात्। नचैवं ताहग्यविशिष्टद्वयघटितोक्तसत्प्रति-
पक्षेऽव्याप्ति स्यात् प्रतिहेतुव्यापकतावच्छिन्नसाध्याभाव प्रतिहेतु-
विशिष्टपक्षात्मकनिरुक्तविशिष्टद्वयघटितत्वादिति वाच्यं। सत्प्रति-
पक्षघटकताहग्यविशिष्टद्वयविषयताभिन्नत्वनिरुक्तविशिष्टद्वयविषयता-

शून्यप्रसोतिविषयत्वस्य विशिष्टहयाघटितत्वार्थकत्वात् । यत्र सत्प्रतिपक्षाप्रसिद्धि स्तत्र भिन्नान्तमनुपादेयमेव, साध्यादिभेदेन लक्षणभेदात् । भ्रमात्मकज्ञानीयविषयतासाधारण्यरूपेणैव वा प्रतिहेतुव्यापकताविशिष्टसाध्याभावादि विषयतोपेया ।

वस्तुतस्तु दर्शित विशिष्टस्य सत्प्रतिपक्षरूपता, नस्वीक्रियते ऽपितु हेतुतावच्छेदकरूपाघटितसाध्याभावाभाववदवृत्तिमत्प-क्षाभावकविशिष्टस्यैव व्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्टस्य तत्तरीत्या संग्रहे तदर्थव्यापकसाध्याभावकालीनतद्धर्मविशिष्टपक्षा-दिव्यावृत्तिरप्ययका स्यादित्यविशेषेण व्यापकताघटितविशिष्ट म त्रयालक्ष्यताया एव युक्तत्वात् नचोक्तप्रयासमपेक्ष्य ज्ञानवैशि-ष्ट्यावच्छिन्नप्रतिबन्धकतानिवेशनमेवोचित मिति वाच्यं । एव-मपि प्रकृतहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वघटितस्य मतभेदेनासाधारण्यविरोधरूपस्य विषयतायाः पक्षधर्मि-क प्रकृतहेतुमत्ताज्ञानवैशिष्ट्यावच्छिन्नप्रतिबन्धकतायामेवाऽवच्छे दकत्वात् प्रतिबन्धकतायां ज्ञानवैशिष्ट्यानवच्छिन्नत्वनिवेशा-वश्यकत्वात् । दर्शितातिप्रसङ्गवारणाय च निरुक्तविशिष्टहयघटित-त्वस्यैव निवेशनीयत्वात् । नच पक्षवृत्तित्वविशेषितं प्रकृ-तहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यादिरूपं वाच्यं पक्षवृत्तित्वाघटितविशिष्टविषयताया अप्रतिबन्धकज्ञाने साधारणतया प्रतिबन्धकतानवच्छेदकत्वात् तादृशस्य चासाधा-रण्यादेः पक्षवृत्तित्वविशिष्टप्रकृतहेतु साध्यव्यापकाभावप्रति-योगित्वविशिष्टप्रकृतहेत्वादिरूपनिरुक्तविशिष्टहयघटिततया निरु-

त्वविशिष्टव्याप्यघटितत्वनिवेशोपि न सम्भवतीति वाच्यं । पक्षत्वशिलादावघटितविशिष्टस्यैवासाधारण्यादिरूपलाया विरोधोपि फलतः प्रतिरोध एव तदन्यत्वेन वा विरोधि विशेषणीय मिति पङ्क्तिव्याख्यानावसरे सम्पादनीयत्वादिति निष्कर्षः ॥

नन्वनतिरिक्तवृत्तित्वरूपा वच्छेदकत्वनिवेशेऽपि व्यभिचारादिघटितपदार्थान्तरेतिव्याप्तिस्तद्विषयकत्वस्यापि प्रतिबन्धकतानतिरिक्तवृत्तित्वादत आह विशेषणीयत्वेति । ताद्रूप्यलक्षणमिति शेषः । ताद्रूप्यविशिष्टेति । अनुमितिप्रतिबन्धकतायां यद्रूपावच्छिन्नविषयकत्वमवच्छेदकं तद्रूपावच्छिन्नेत्यर्थः । व्यभिचारत्वाद्यवच्छिन्नस्य व्यभिचारत्वादि रूपताद्रूप्यरूपावच्छिन्न घटित्वादेश्च व्यतोऽन्तरेति । स्वावच्छिन्नाविषयक प्रतीति विषयतावच्छेदकावच्छिन्नार्थकं । यतः व्यभिचारादेर्मेयत्वविशिष्ट व्यभिचाराद्यभिन्नत्वेपि न क्षतिः । तद्घटितत्वं तदविषयकप्रतीतिविषयत्वं एवञ्चानुमितिप्रतिबन्धकतायां याद्दग्रूपावच्छिन्नविषयकत्वमवच्छेदकं ताद्रूप्यं यत्स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं तदवच्छिन्नार्थकं समुदितार्थः । यद्रूपावच्छिन्ने लक्षणं सङ्गमनीयं तदेव पदार्थः । भवति हि व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकीभूता ये बाधत्वादय स्तदवच्छिन्नाविषयक प्रतीतिविषयतावच्छेदकं व्यभिचारत्वादीति तदवच्छिन्ने लक्षणसङ्गतिः । मेयत्वविशिष्ट व्यभिचारत्वादेः स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकव्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छे-

दैकत्वाभावान्नतदवच्छिन्नेऽतिव्याप्तिः । मेयत्वविशिष्टव्यभिचारत्वाद्याश्रयावि-
षयकत्वस्य व्यभिचारत्वाद्यवच्छिन्नविषयक प्रतीतौ दुर्घटत्वात्त-
द्दोषः स्यादतः स्वाश्रयाविषयकत्वमुपेक्ष्य स्वावच्छिन्नाविषयकत्व
निवेशः ।

स्वावच्छिन्नाविषयक प्रतीति विषय ह्वत्तित्वस्य तादृश धर्म्म
विशेषणत्वे, व्यभिचारत्वादेरपि मेय त्वादिना व्यभिचारत्वाद्यवच्छि-
न्नाविषयक प्रतीति विषये व्यभिचारादौ वर्त्तमानत्वादसम्भव इत्यत
स्तादृश विषयतावच्छेदकत्वेन धर्म्मोविशेषित. । प्रमेयं गगनवृ-
त्तित्वादित्यादौ व्यभिचारत्वाद्यवच्छिन्नाविषयक प्रतीति विषयता-
वच्छेदकं यद्गगनाभावयन्मेयत्वादि, तदाश्रयाविषयक प्रतीत्य प्रसि-
द्धाव्यभिचारादौ तादृश प्रतीति विषयत्वस्य दुरुपपादतया व्या-
प्तिरतस्तदवच्छिन्नाविषयकत्व निवेश. । अत्र च तादृश विशिष्टा-
न्तरा विषयक प्रतीति विषयतावच्छेदकत्वस्य, दोषतावच्छेदक
धर्म्म विशेषणतापेक्षया ज्ञानस्येत्यत्रज्ञान पदार्थे तादृशविशिष्टा-
न्तराविषयकत्व निवेश एवोचित' । एवञ्च निरुक्त वक्ष्यमाण कल्पे
यद्विषयक निश्चयस्येत्यत्र निश्चयएव तद्विवेश्य लाघवादित्यवधेय ।

अत्र धूमस्यभिचारिवह्निमान् धूमवान् वह्नेरित्यादौधाधादे
र्व्यभिचारादि घटिततया तत्रा व्याप्तिः । नच यद्रूपावच्छिन्न

विषयकत्वं स्वावच्छिन्नविषयकत्वावच्छिन्न प्रतिबन्धकता सामान्या-
वच्छेदक साहश रूपान्तरावच्छिन्नाघटितत्वस्य विवक्षितत्वान्नदोषः।
व्यभिचारस्य च ज्ञानाधि विषयकत्वान्यूनसृष्टि व्याप्तिज्ञान प्रतिबन्ध-
कसाश्च्छेदकविषयिताकत्वेपि साहश प्रतिबन्धकता सामान्यान्स
र्गानुमितिप्रतिबन्धकसाश्च्छेदकविषयिताकत्वविरहेण साहश
घटितत्वस्या किञ्चित्करत्वादितिवाच्यं, व्यभिचारत्वादि विशिष्ट-
विषयकत्वावच्छिन्न प्रतिबन्धकता सामान्यावच्छेदकविषयिता
निरूपकतावच्छेदकस्य तदवच्छिन्नाविषयक प्रतीति विषयतावच्छे-
दकस्या ऽसिद्धाऽसम्भवा द्व्यभिचारत्व मेयत्व विशिष्ट व्यभि-
चारत्वादिरेवतथाविध विषयिता निरूपकतावच्छेदकत्व.तू तस्यच
व्यभिचारत्वा वच्छिन्ना विषयक प्रतीति विषयतावच्छेदकत्वा
भावात् ॥ नच स्वावच्छिन्नविषयकत्वावच्छिन्न प्रतिबन्धकता सामा-
न्यावच्छेदक विषयिता निरूपकतावच्छेदकः कथित् स्वावच्छि-
न्नाविषयक प्रतीति विषयतावच्छेदकीयस्य एवम्भूतं यद्यत्तस्वं,
प्रमेयत्व विशिष्ट व्यभिचारत्वादि, तदवच्छिन्नाविषयक प्रतीति
विषयतावच्छेदकत्वस्यविवक्षणीयतया न दोष इति वाच्यं तथा
सति धूम व्यभिचारि वह्निमान् धूमवान् वह्नेरित्यादौवाधाय
वच्छिन्न घटक तावच्छेदकस्य धूमश्यभिचारिवह्निमत्वादेः
स्वावच्छिन्नाविषयक प्रतीति विषयतावच्छेदकीभूतस्वावच्छिन्नविष-
यक वावच्छिन्न प्रतिबन्धकतासामान्यावच्छेदक विषयिता निरू
पकतावच्छेदक व्यभिचारत्वकत्वादव्याप्तेर्दुर्वारत्वात्। नच स्वाव
च्छिन्नविषयितावच्छिन्न प्रतिबन्धकता सामान्यावच्छेदकीभूतं

यत् किञ्चित् विषयित्व यादृश यादृश धर्मावच्छिन्ना निरूपित तादृश धर्मावच्छिन्नाविषयक प्रतीति विषयत वच्छेदक यत्स तद्रूपावच्छिन्नत्व मेव समुदितार्थ । मेयत्व विशिष्ट व्यभिचार त्वादव च्छिन्नविषयकत्वावच्छिन्न प्रतिबन्धकता सामान्यावच्छेदकी भूताया शुद्धव्यभिचारत्वादवच्छिन्न निरूपित विषयिताया मेयत्व विशिष्ट व्यभिचारत्वावच्छिन्ननिरूपितत्वेन तदवच्छिन्ना विषयक प्रतीति विषयतावच्छेदकत्वस्य च स्वाश्रयसत्वेन मेय त्व विशिष्ट व्यभिचारत्वादे स्वपदेनोपादातुमशक्यत्वात् । व्यभि चारत्वादिविशिष्टविषयकत्वावच्छिन्न प्रतिबन्धकता सामान्यावच्छेदि काया कस्याश्चिदपि विषयत या व्यभिचारत्वादि विशिष्टा निरूपितत्वासम्भवात् तादृश विषयिताया यादृश यादृशविशिष्टा निरूपितत्व मेयत्व विशिष्ट व्यभिचारत्वादेरेव तादृशत्वात् , तद वच्छिन्नाविषयक प्रतीति विषयतावच्छेदकस्य व्यभिचारत्वादे स्वपदेनोपादातुं शक्यत्व चन कश्चिद्दोष । अथवा यद्धर्मावच्छिन्न विषयत्वावच्छिन्न प्रतिबन्धकता सामान्यावच्छेदकीभूत विषयिता त्व यद्धर्मावच्छिन्न निरूपितत्व व्याप्य तद्धर्मवत्त्व मेव समुदि तार्थं इति वाच्य, बाधविशिष्ट व्यभिचारत्वावच्छिन्नेऽति प्रसङ्ग । तादृश धर्मावच्छिन्नविषयकत्वावच्छिन्नबाधज्ञान प्रतिबन्ध-कताया केवलव्यभिचार विषयिताया , तादृश व्यभिचारज्ञान प्रतिबन्धकतायाश्च केवलबाध विषयिताया अनवच्छेदकत्वेन बाध विशिष्ट व्यभिचारत्वादवच्छिन्नविषयिताया एव तथाविध प्रतिबन्धकता सामान्या वच्छेदकत्व , तस्याश्च तादृश धर्मविशिष्ट

तद्घटकतावच्छेदकविशिष्ट निरूपितत्वव्याप्यत्वकल्पात् प्रथम कल्पेन पदेन परमकल्पेयत् पदेनतस्योपादान सम्भवात ।

अथ वह्नाभावादि धर्मितावच्छेदकक यद्वादि प्रकारक धूमेरिय धूम व्यभिचार विशिष्ट यद्वादि धर्मितावच्छेदकक्य धूमव्याप्यतया यद्वादि प्रकारक पक्षतायाश्चाद्रव्यत्वेन्या मन्मिन तादृग पक्षतायच्छेदकावच्छिन्न पक्षक ममूहालम्बनानु मिते रप्रसिद्धा तादृगानुमिति प्रतिबन्धकता घटित यथा श्रुत लक्षणस्य तद्रूपावच्छिन्न पक्षक यद्वादि हेतुक दोषेऽव्याप्ति स्वय मेव वक्ष्यति तदारणप्रयासे छधेति चेत्भवतुतावदेव, तथापि विशेषगुणाभाववान् घटोगुणसामान्याभाववानित्यादौ विशेष गुणवद्घटादिरूपा श्रयासिद्धिय तत्सामानाधिकरण्येन तदवच्छेदेन वा विशेष गुणत्व, तस्याञ्च गुणत्वरूपसामान्यधर्मावच्छिन्ने घटत्व व्याप कता घटितोक्त बाधस्य न प्रवेश, विशेष गुणत्वेन घटत्व व्यापकताया स्तत्र प्रवेशेऽपि सामान्य रूपेण व्यापकताया स्तद-भावादिति न तादृग सिद्धसाधन प्रसङ्ग इत्युच्यते तथापि विशेष गुणाभाववान् द्वितीयक्षणावच्छिन्नो घटोगुणसामा न्या भाववानित्यादौ द्वितीयक्षणावच्छिन्ने घटेविशेषगुणवत्त्वरूपा श्रयासिद्धौ तदवच्छिन्ने घटे गुणवत्त्वरूप बाध प्रवेश स्यावश्य कत्वात् लक्षणेव तत् समुदायावश्यकतया उक्तविशेषणदा नानुपपत्ति । वस्तुतस्तु अत्र वह्नीत्यादि निरूक्ष्ट कल्पेमेयत्व

विशिष्ट व्यभिचारादि वारणाय विशिष्टान्तरा घटितत्वस्य निवेश नीयतयातन्मते दर्शित बाधाद्य संग्रहोदोष एव। एतेन स्वावच्छिन्न निरूपित विषयितावच्छिन्नयत् किञ्चित् प्रतिबन्धकतावच्छेदक विषयितात्व विशिष्ट निरूपित विषयितात्व व्यापक स्वावच्छिन्न निरूप्यताकत्वं समुदितार्थः। मेयत्व विशिष्ट व्यभिचारत्वादिकं नैताद्दृशं तदवच्छिन्नविषयकत्वावच्छिन्न प्रतिबन्धकतावच्छेदक व्यभिचारादिविषयितात्वस्य तदवच्छिन्ननिरूप्यत्वाव्याप्यत्वादुक्तस्थले च विशेषगुण विशिष्ट घटादि रूपाश्रया सिद्धादि विषयकत्वावच्छिन्न विशिष्ट पक्ष ग्रहादि निरूपितयत् किञ्चित् प्रतिबन्धकता यच्छेदक विषयतात्व विशिष्ट निरूपित विषयितात्वस्य ताद्दृशाश्रया सिद्धादि निरूपितस्य व्याप्यत्वात्तत्र लक्षण समन्वयः। प्रतिबन्धकतायां यावत्त्वानिवेशादोक्तरीत्या बाध विशिष्ट व्यभिचारादा वति प्रसङ्गः। स्वावच्छिन्ना निरूपिता यादृश यादृशविशिष्ट विषयिता, तादृश विशिष्टविषयितानवच्छिन्नप्रतिबन्धकतावच्छेदकस्वावच्छिन्न विषयिताकोदोधर्म्म स्तद्वत्त्वं समुदितार्थः। मेयत्व विशिष्ट व्यभिचारत्वादिकं नैता दृशं स्वं तदवच्छिन्ना निरूपित शुद्ध व्यभिचारत्वाद्य वच्छिन्नविषयितावच्छिन्नाया मेव प्रतिबन्धकतायां तदवच्छिन्न विषयितायाश्चच्छेदकचात् उक्तस्थले ताद्दश विशिष्ट बाध विषयकत्वस्य तद् निरूपित व्यभिचारविषयितानवच्छिन्नायाश्चनु मिति प्रतिबन्धकतातदवच्छेदकत्वा लक्षण समन्वय इति परास्तं यद्विषयक निश्चयस्य विरोधिविषयिता प्रयुक्त इत्यादि निष्कृष्ट फलेऽनु मिति प्रतिबन्धकताया अघटकत्वात प्रतिबन्धकतायां

विशिष्टान्तर विषयकत्वानवच्छेदकत्व विशेषणदानस्य सम्भवेन यत् पदार्थस्य लाक्षण पदार्थान्तर वा घटितत्वेन विशेषणीय तथा-उक्तबाधा व्यासेरसम्भवपरीहारात् ॥

अत्र केचित् स्वसजातीय विशिष्टान्तरा घटितत्व मेव यत् पदार्थे विशेषणं देयं। साजात्यञ्चहेत्वाभास विभाजक रूपेण, तच्चरूप बाधत्व व्यभिचारत्वादि, तेन रूपेण व्यभिचारादेर्न बाधादि साजात्य मिति व्यभिचार घटित बाधादीनाञ्चामि.। नचैवं यद्विषय कनिश्चयस्य विरोधि विषयता प्रयुक्त उभयाभाव स्तत्त्वमित्यत्र विरोधि विषयता प्रयुक्तपदस्यवैयर्थ्यं । घटादे. लाक्षण रूपेण सजातीयत्वा भिमिद्धेवाति प्रसङ्गाभावादिति वाच्यं स्वस-जातीय विशिष्टान्तर घटितं यत्वं तदविषयक प्रतीति विषय त्वस्य विवक्षयाऽनुयोगिनिरुक्तत्वानन्तर्भावेण पदार्थान्तरेष्वति प्रसङ्ग वारकतयातद्दल सार्थक्यात् नच व्यभिचार विशिष्ट मेयत्वादेर्हेत्वा भासत्वधिरहाद्धेत्वाभा सविभाजक रूपेण सजातीया प्रसिद्धा तस्य स्वपदेनोपादातुमशक्यतया मेयत्वविशिष्टव्यभिचारादेरियत्त्वपदेनो पादेयतया तद्विषयतया तत्रेति प्रसङ्ग इति वाच्य विशिष्टान्तरा घटितत्वेना घटितस्य साध्यसाधनप्रहाविरोधिज्ञाननिष्ठविषयिता सम्बन्धेन व्याप्तिपक्षप्रतिबन्धकता नतिरिक्तवृत्तित्वादि रूपस्य व्यभि चारादि विभाजकस्यात्र निवेशात्तादृश रूपस्य च व्यभिचार वि-शिष्ट मेयत्वादि साधारणत्वादित्याहु । अत्रेदं वोध्य प्रतियोगि नि स्वत्वान्तर्भावेण तादृश लक्षण करणेपि व्यभिचार घटित बाधा दायव्यासिवारण मशक्य मेव तत्र सजातीय विशिष्टान्तर घटितं

यत् स्व धूम व्यभिचारि वह्निमत्त्वं, तदघटितत्वस्य तदघटित
बाधादावसत्त्वात् यदि तदघटितत्वम् तदपर्याप्त विषयता
पर्याप्त्यधिकरणच तत्त तत्र सुघट मेव एकदेशापर्याप्त
विषयताया अपि समुदाये पर्याप्तिरिष्यते तदाप्य व्याप्ति
दुर्ग्रह निरुक्त व्यभिचारत्वेन सजतीय विशिष्टान्तर घटित स्वा-
दृश बाध एवतदपर्याप्तविषयतायास्तत्रा भावात्। नच स्ववृत्ति
यावद्बाधाभावविभाजक रूपेण साजात्य निवक्तणीय। तथाच
बाधा द घटक व्यभिचारादौ बाधत्वाद्यसत्त्वान्न तादृश बाधादि
सजतीयत्व अतस्तत् सग्रह सभव इति वाच्य एव सति बाध
विशिष्ट व्यभिचारादौ स्ववृत्ति बाधत्व व्यभिचारत्वादियावद् धर्म्मेण
व्यभिचार बाधादौ सजातीयत्वा प्रसिद्धा ऽतिव्याप्ते तस्मात् व्यभि-
चारादि घटित बाधादे. सग्रह प्रकारोऽग्रे प्रदर्शनीय एवादरणीय।
मेयत्व विशिष्टव्यभिचारादौ* तादृश व्यभिचारत्वाद्यवच्छिन्ने। नाति
प्रसङ्ग मदोष व्यवहार प्रसङ्ग.। अत्र मेयत्व विशिष्ट व्यभिचारो
दोष इत्यादि व्यवहाराभावान्नेष्टापत्तिः सम्भवति। नच विशिष्टव्यभि
चारे शुद्धव्यभिचारत्वादिना दोषवत्त्वात्ततत्योक्तविशेषणदानेऽपि
तादृश व्यवहारापत्तिर्दुर्व्वारेति, तन्नेष्टापत्तौ व्यर्थ विशेषण मिति
वाच्य दोषादि पदस्य निरुक्त विशेषणावच्छिन्नानुमिति प्रतिबन्धक
तावच्छेदक स्वावच्छिन्न निरूपितविषयताकत्वेनान्वयितावच्छेदक
धर्म्मबोधकतायाव्युत् पन्नतया प्रकृतेव मेयत्व विशिष्ट व्यभिचार-
त्वादिरूपस्यान्वयितावच्छेदकस्योक्त विशेषणस्यैवेनाति प्रसङ्गा

---

* दीधितौ मेयत्वविशिष्टव्यभिचारो ग्रन्थेषु तत्रैवाभिप्रायभेदः ।

भावादिति हृदयम्। अन्वा श्रया सिद्धादिभ्यस्ते पक्षतावच्छेदका भाववत् पक्षकत्वादिक मेव दोषस्यैव हेतुनिष्ठतया हेतोर्दु ष्टत्व व्यवहार निर्वाहकत्वात् तादृग धर्मस्य तादृशा भाववत्पक्षा दिरूप तादृग विशिष्टान्तर घटि त तया व्याप्ति रित्यतआह

एवञ्च पक्षतावच्छेकादि विरहविशिष्टः पक्षः पक्ष-निष्ठत्वविरहोवा। साध्याभाववद्वृत्तिसाधनं, साधन-वद्वृत्ति साध्याभावोवा हेतुदोषोयेन केनापि सम्बन्धेन तद्वांश्च प्रकृतोहेतुर्दुष्टः।

एवञ्चेति तादृश विशेषणदानेचेत्यर्थः आदिपदात् साध्यादि परिग्रहः पर्व्वतादिधर्मिकत्वाश्रनमयत्वादिविशिष्टबुद्धौ पर्व्वतः काञ्चनमयत्वाभाववानित्यादि धर्मिविशेष्यक निश्चयस्येव पर्व्वते काञ्चनमयत्वं नास्तीत्यादि धर्मिविशेषणक निश्चयस्यापिविरोधि त्वमानुभविक मतस्तद्विषयस्यापि, दोषत्व माह पक्ष निष्ठ इति आधेयतासम्बन्धेन पक्षविशिष्ट इत्यर्थः। समुच्चयार्थ कोवाकारः साधनवद्वृत्तिः साध्याभाव इति। साध्याभाववद्वृत्तित्वप्रकारक-ज्ञानं साधनधर्मिकव्याप्तिग्रह प्रतिबन्धकं, साधनवति साध्याभाव इति ज्ञानेऽपि साधने साध्याभाववद्वृत्तित्वं तुल्यवित्तिवेद्यतयानिय-मतो भासत इत्यभिप्रायेण। साधनवति साध्याभाव इति ज्ञानस्या समानविशेष्यकस्यापि प्रतिबन्धकत्वमिति प्राचीनमताभिप्रायेणवेदं। दोष इति न पक्षत यष्टेदका भाववत् पक्षकत्वादिक मिति गुप्तः।

तया वा लक्ष्यत्वावच्छेदकतया व्याप्तिरिति भावः अनुपपत्तावच्छेदकाभाववत् पक्षादीनां हेत्वप्रवृत्तित्वात् कथं हेतौ दुष्टता, व्यवहार इत्यत आह येनकेनाप्योक्ति । एक ज्ञानविषयत्वादिनेत्यादिः । तद्ज्ञानदण्डिज्ञः, दुष्टः इष्टपदप्रतिपाद्यः, तथाच हेतोः साहश्यदोषानधिकरणेऽपि नक्षतिः । दुष्टत्वादौसामान्यमः सम्बन्धिन एवनिष्ठार्थत्वात् नचैवमेकज्ञान विषयत्वादिनावह्नयभाववदृक्षादिरूपदोषस्य धूमादौसत्वेपि पर्वतादौवह्नयादि साधनेतस्य दुष्टव्यवहारापत्तिरिति वाच्य यत्पदावच्छिन्नपक्षसाध्यहेतुवाचकपदसमभिव्याहारस्थले तदवच्छिन्नपक्षसाध्यहेतुकानुमिति प्रतियन्धकतावच्छेदक स्वावच्छिन्ननिरूपितविषयिताक धर्मावच्छिन्न सम्बन्धी दुष्टपदेन बोध्ये दृष्ट्या व्युत्पत्त्या पूर्व्वव्यवहारेपि पूर्व्ववदेव वह्नयाभूमसाधनेरासभो दुष्टइत्यादि व्यवहारोनिरुक्तदोषमात्रस्य दुष्टत्वव्यवहारविषयतावच्छेदकत्वे दुर्व्वार इति । प्रकृतहेतुतावच्छेदक विशिष्ट सम्बन्धीनिरुक्तार्थतावच्छेदकोवाच्य एतन्नाभाय प्रकृतोहेतुरित्युक्तं । इदंतु. साधने धूमोदुष्टइत्यत्रदृक्षदत्वावच्छिन्नपक्षकवह्नित्वावच्छिन्नसाध्यक धूमत्वावच्छिन्नलिङ्गकानुमिति प्रतिबन्धकतावच्छेदकस्वावच्छिन्ननिरूपितविषयिताक धर्मावच्छिन्न सम्बन्धीधूमदृक्षत्वबोध , तत्र प्रतिबन्धकतावच्छेदकस्वावच्छिन्नविषयिताक धर्मविशिष्ट पद दुष्पधात्वोर्थः । साधनपदं लक्षणया धूमत्वावच्छिन्नहेतुकानुमितिपरं, तत्रदृक्षदृति समभ्यर्थदृक्षत्वावच्छिन्नपक्षतालक्ष्य, वह्नेरितिपदस्यार्थसम्बन्धित्वावच्छिन्न साध्यकत्वसम्बन्ध', साहश्यानुमित्यन्वित समभ्यर्थ निरूपितत्वसा दुष्पधात्वमँ

कदेशेप्रतिबन्धकत्वेऽन्वय. । एवञ्च पर्व्वतेवह्नेः साधने धूमोदृष्ट इत्यत्र पर्व्वतत्वावच्छिन्नपक्षतावच्छेदकत्वावच्छिन्न साध्यकधूमत्वावच्छिन्नहेतुकानुमिति प्रतिबन्धकतावच्छेदक स्वावच्छिन्नविषयतासाक धर्म्मविशिष्ट सम्बन्धी धूमस्त्वेव प्रतीयते, तत्र तादृग धर्म्मया प्रसिद्ध एवेतिमतया व्यवहारः । पक्षविशेषादिक तत्तत्साध्य धूमं दृष्ट इति व्यवहार स्वसाधित स्यतएवेतिदिक ॥

साधनलिष्ठसाध्याभावव्यधिकरणत्वादेरेवव्यभिचारतया प्रसिद्धि नैतुतद्विशिष्ट साधनादेरनौलतस्य दोषत्वमितिकश्चिद्दाह व्याचष्टेपि लक्षण सन्यर्थंवान्येयाति प्रसङ्गात् तादृगग्रन्थमुपन्य स्यति

यादृग धर्म्मिणि, यादृशधर्म्मवत्ताज्ञान मनुमिति प्रतिबन्धकं, तद्धर्म्मिण, तादृगधर्म्मवत्त्वं, हेतुदोष इत्यपि कश्चित् ।

यादृगेति । यद्रूपावच्छिन्नेत्यर्थक । इदं, ज्ञानत्वावच्छिन्नं । तस्य धर्म्मिण, तद्धर्म्मावच्छिन्नस्य, तेनसम्बन्धेनेति शेष' । तादृग धर्म्मक-त्व, तद्रूपावच्छिन्नधर्म्मवत्त्वं । साधनादिविशेषणक साध्याभावव्यधि-करणत्वादि विशेषक ज्ञानस्य सामान्यव्याप्यादिज्ञान प्रतिबन्धकत्वेपि साध्याभावव्यधिकरणत्वादेराधेयतासम्बन्धेन साधनीयत्वादिकं न दोषः, साधनादेः साध्याभावव्यधिकरणत्वादि धर्म्मताविरहात् । अत्रा प्यवच्छेदकत्व पूर्व्ववत् स्वरूप सम्बन्ध विशेषः । पक्षतावच्छे-दकावच्छिन्ननिष्ठ केवलाभावत्वावच्छिन्नवत्त्वादाविति प्रसङ्गात्तद्व-

च्छिन्नधर्मिकतद्रूपावच्छिन्नवत्ता ज्ञानत्वस्यापि प्रतिबन्धकतावच्छेदकोटि प्रविष्टत्वा दवच्छेदकतापर्य्याप्ति विषयणेतु ह्रदत्वावच्छिन्ननिष्ठवह्न्यभावत्वाद्यवच्छिन्नत्वे ऽयासेः, वह्नित्वादिना घटाद्यवगाहिनीह्रदोनवह्निमानित्यादि निश्चयस्य ह्रदोवह्निमानित्याद्यनुमितिप्रतिबन्धकतया ह्रदत्वावच्छिन्न विशेष्यक वास्तववह्न्यभावत्वावच्छिन्नप्रकारकनिश्चयत्वेन न प्रतिबन्धकता इति वक्तुतद्विशेष्यकवह्नित्वावच्छिन्न प्रकारता निरूपिताभावत्वावच्छिन्नप्रकारताकनिश्चयत्वेनैवातस्तादृश मेव रूप प्रतिबन्धकतावच्छेदकता पर्य्याप्त्यधिकरणं, नतुह्रद-त्वावच्छिन्न धर्मिकवह्न्यभावत्वावच्छिन्न प्रकारकत्वमिति यद्रूप-पुरैनवह्न्यभावत्वाद्युपादानं न सम्भवति, पर्व्वतोवह्न्यभाववान्नि-स्यादौपर्व्वतत्वावच्छिन्न निष्ठवह्नित्वावच्छिन्न रूपबाधादेरसंग्रहभये-न यद्रूपावच्छिन्नधर्मीति यद्रूपावच्छिन्नप्रकारतानि रूपित यद्रूपावच्छिन्नप्रकारताक निश्चयत्वेन प्रतिबन्धकता तद्रूप विशिष्टे तद्रूपावच्छिन्न विशेषित तद्रूपावच्छिन्नवत्त्वं दोष इत्यादि विवक्षाया असम्भवात । अत्र साधननिष्ठसाध्याभाव वद्वृत्ति त्वादेरिवसाध्याभाववद्वृत्ति साधनादेरपिदोषत्वेचतिविरहात् एता-वानायासोऽनर्थक इत्यलमस्मत्सूचितः ॥

अथ पर्व्वतत्वेन पक्षत्वे, वह्नित्वेन साध्यत्वे, वि-शिष्टधूमत्वेन च हेतुत्वे, पर्व्वतादेः काल्पनिकत्व विरहो, ह्रदस्य वह्निधूमशून्यत्वं, मेयत्वस्य केवलधूम

स्य वा वह्निव्यभिचारो, विशिष्ट धूमस्य वा पर्व्वतीय-वह्नि व्यभिचारो नदोषः। न वा तत् सम्बन्धेन तव तस्य हेतोर्दुष्टत्वं, अतस्तद्धर्म्मावच्छिन्न तत् पक्षक तद्धर्म्मावच्छिन्न तत् साध्यक तद्धर्म्मावच्छिन्न तद्धेतुकानुमितिं प्रतिबन्धकत्वं वाच्यम्।

यथा व्याख्यात यथा श्रुतार्थं निर्व्वह्निः पर्व्वतोवह्निमानित्यादौ प्रकृत पक्षतावच्छेदक विशिष्टे पक्षतासाध्यतावच्छेदकावच्छिन्न प्रकारकानुमितेर प्रसिद्धा व्याप्तिर्दर्शयिष्यते, तत्रविशिष्य पक्षतावच्छेदकाश्रय प्रवेशे ना प्रसिद्धितत्पक्षविशेष प्रयोजन माह पर्व्वेति। पर्व्वसादेः काञ्चनमयत्वविरह इत्यादौ पर्व्वस्य नदोष इति सम्बुध्यते। तथाचपक्षतावच्छेदकाश्र प्रवेशे पूर्व्वोक्त युक्तया असम्भवात् तदाश्रयाय यत् किञ्चिद्धर्म्मावच्छिन्नपक्ष साध्य-हेतुकानुमितिसामान्य प्रतिबन्धकत्व मेव निवेश्य मिति पर्व्वतोवह्निमान धूमादित्यादौपर्व्वतादिनिष्ठकाञ्चनमयत्वा भावा-दावति व्याप्तिःतस्यापि काञ्चनमयत्वादि सहित पर्व्वतत्वादि रूपयत्किञ्चिद्धर्म्मावच्छिन्न पक्ष साध्यहेतुकानुमिति प्रतिबन्धक ज्ञानविषयत्वादितिभावः। आदिपदञ्च वक्ष्यमाण संग्राहकं। प्रकृ-तानुमित्यविषयपदार्थाभावे इति व्याप्तिं सूचयित्वातद्विषय साध्या-भावे, तां सूचयति इदमेवेति। इदनिष्ठं वह्निगून्यत्वं धूमशून्यत्व-मेवेत्यर्थः। इदादि निष्ठाभावेऽपि व्याप्तिसूचनञ्च पक्षतापक्षतावच्छे-दकावच्छिन्न पक्षत्व रूप समुदायदलस्यैवा निवेशे बोध्यं।

महानसीयेति महानसीय वह्न्यभावीमहानसीयधूमाभावीवेत्यर्थः अत्रापि व्याप्तिसूचनञ्च प्रकृतसाध्यतावच्छेदक, प्रकृतहेतु तावच्छेदकयोरनिवेशेबोध्यं ॥

इदमुपलक्षणं साध्यहेत्वोरनिवेशेऽपि जलत्वाभावादावतिव्याप्ति वोध्या । प्रकृतहेतुतावच्छेदकावच्छिन्नहेतुकत्वानिवेशे, पक्षधर्मतां ज्ञानप्रतिबन्धकतामादायाति व्याप्ति सूचयित्वा , व्याप्तिज्ञानप्रतिबन्धकतामादायातिव्याप्तिं सूचयति मेयत्वस्येति । वह्नि व्यभिचारइत्यनेनान्वयः । अत्रापि व्याप्ति स्लाइगदल समुदायस्यैव अनिवेशेबोध्या। प्रकृतहेतुकत्वनिवेशेपिएतद्दोषस्यशक्यवारणतयाहेतुतावच्छेदक नि-वेशनायाह केवलधूमस्येति । वह्निशून्यदेशान्तरवृत्तिधूम-व्यक्तिव्यावर्त्तकविशेषणानवच्छिन्नेत्यर्थः । साध्यतावच्छेदका-निवेशे पूर्व्वंसाध्यवत्ता ज्ञानविरोधिन्यतिव्याप्ति र्दर्शिता, इदा-नीं व्याप्तिज्ञानविरोधिन्यतिव्याप्ति दर्शयति विशिष्टधूमस्यवा पर्व्वतीयवह्निव्यभिचार इति, दोष लक्षण इव दुष्ट लक्षणे-ऽपि पक्षतावच्छेदकादिनिवेशस्यावश्यकतां दर्शयति नवातत् सम्बन्धेनेति । तत्पर्व्वतत्वावच्छिन्ने , वह्नित्वावच्छिन्नवह्निसाधने । तेन विशिष्टधूमत्वावच्छिन्नस्य । पक्षादीपक्षतावच्छेदकादेर्यो हेत्व सम्बन्धेन विशेषणत्वं यत्राभिमतं तत्र तत् सम्बन्धेन तदवच्छिन्नत्वं निवेश्य मिति सूचयितुं तत्पक्षकेत्युक्तं, पक्षतावच्छेदकादि निवेशेपक्षादि निवेशस्या प्रयोजकत्वादिति । वाच्यं, तद्रूपावच्छिन्नपक्ष साध्यहेतुक दोष लक्षणे निवेश्यतीयं ।

तथा च निर्व्वह्निः पर्व्वतोवह्निमान्, पर्व्वतावृत्ति वह्निमान् वा, तदृव्यभिचारिणः, पर्व्वतावृत्तिर्व्वा धर्म्मादित्यादौ न कोपि हेत्वाभासः स्यात् ताद्दशानुमितेरप्रसिद्धत्वात्।

तथाचेति, निर्व्वह्निः पर्व्वतोवह्निमान् इत्यत्र पक्षतावच्छेदक निर्व्वह्नित्व विशिष्ट पर्व्वते, वह्नि वैशिष्ट्यावगाहित्वे मनुमितिर्न सम्भवति स्वविरोधिधर्म्मधर्म्मितावच्छेदकक स्वप्रकारकानेकार्थ्यज्ञानत्वानभ्युपगमात्। पर्व्वतः पर्व्वतावृत्तिवह्निमान् इत्यत्र पर्व्वते पर्व्वतावृत्तित्व रूपसाध्यतावच्छेदकावच्छिन्नप्रकारकत्व मनुमितेर्न सम्भवति तस्मिन् स्वावृत्तित्वादयवच्छिन्न प्रकारकानेकार्थ्यज्ञानत्वानुमविरुद्धत्वादेवं पर्व्वतो वह्निमान् वह्निव्यभिचारिण इत्यत्र वह्निव्यभिचारित्व रूपहेतुतावच्छेदकावच्छिन्न वह्निव्याप्यत्व वैशिष्ट्यावगाहित्व मनुमितेर्न सम्भवतीति पूर्व्वोक्त युक्तेः। पर्व्वतोवह्निमान् पर्व्वतावृत्तेरित्यत्र पर्व्वतेपर्व्वतावृत्तित्वरूपहेतुतावच्छेदकावच्छिन्न वैशिष्ट्यावगाहित्वं नानुमितेः सम्भवति तस्मिन्नुक्तेरिति, यथाविधधितानुमित्य प्रसिद्धि प्रयोजकभेदेन नानास्थले व्याप्ति कथनं। नकोविच्छेत्वाभासः स्यादिति, तथाचाप्राथंक्यरूपनिग्रहस्यागत्वेन तथाप्रयोक्तृनिग्रहोपपत्तावपि, निर्व्वह्नित्वेन पर्व्वते वह्नेः साधने धूमोदुष्ट इत्यादि व्यवहारोदुरुपपाद इति भावः। सादृश्यानुमितेस्तथा

विवक्षितानुमितेः । अप्रसिद्धत्वादिति । आहार्य्य-रोचज्ञानानुपगमा दिति भावः ॥

अत्र वदन्ति यद्विषयकनिश्चयस्य विरोधि विषयता प्रयुक्त स्तदुत्तरमनुमितावनाहार्य्य मानसज्ञाने वा, पक्षतावच्छेदकविशिष्टपक्षे, साध्यतावच्छेदक विशिष्ट साध्यवैशिष्ट्यावगाहित्वस्य, साध्यतावच्छेदक विशिष्ट साध्यनिरूपित व्याप्तिविशिष्टहेतुतावच्छेदक विशिष्ट हेतुमत्तावगाहित्वस्य च, द्वयोर्व्यतिरिक्तत्वं हेतुदंषत्वं ।

यद्विषयकनिश्चयश्चेति, यद्रूपावच्छिन्नविषयकनिश्चयश्चेर्थः । उत्तरपदस्योत्तरकालोनार्थकतया, तदुत्तर मिति धातूपस्थाप्यानुमिति रूप क्रियाविशेषण मतोद्वितीया। अग्रिमकाले ताद्दशज्ञान रूपक्रिया विशेषणं, अतोज्ञानपदमपिसार्थकं । तत् पदञ्च, तादृश निश्चय परामर्शकं । उत्तरपदस्था व्यवहितोत्तरार्थकं । कालाध्वनोरत्यन्तसयोग इत्यनेनद्वितीयाधिकारणे, उत्तरपदस्य उत्तरकाल परत्वादिति तु न युक्तं, व्यापकतात्मकस्यात्यन्तसंयोगस्य प्रकृतेऽविवक्षितत्वादिति । अनुमितौअनुमितिसामान्ये । द्वयोर्व्यतिरिक इत्यभि सम्बन्धः । तत्त्वं, तद्रूपावच्छिन्नत्वं। अत्र च तज्ज्ञानानन्तरज्ञाननिष्ठ तादृशोभयाभावेतज्ज्ञानीयाया एव विरोधि विषयिताया:

प्रयोजकत्वात् विरोधि विषयितायां तादृग् निश्चयीयत्व कथं स्वरूप कीर्तन मात्रं, नतु गृह्यमाणघटकं। तथाच यद्रूपावच्छिन्न निश्चयाश्रयावच्छिन्नोत्तरानुमितिसामान्यस्य विरोधि विषयितां प्रयुक्तोभयाभावघटत्वं, तादृगवच्छिन्नत्वं दोषत्वमिति समुदितार्थः। वह्न्यभावविशिष्ट ह्रदावच्छिन्न विषयक निश्चयानन्तरं ह्रदोवह्निमान् वह्न्याप्य धूमवांश्चेत्याकारकानुमितेः कदाचिदयमनुत्पत्त्या घटादावनुमितिप्रति तादृग निश्चयाश्रयावच्छिन्नोत्तरानुमिति सामान्यात्प्रति ह्रदत्वादि विशिष्टे यत् वह्नित्वाद्यवच्छिन्नवैशिष्ट्यावगाहित्वं, वह्नित्वावच्छिन्नव्याप्तिविशिष्टधूमत्वावच्छिन्नवैशिष्ट्यावगाहित्वञ्च, तदुभयाभावघटत्वमत्र मेय, तत्र तादृग निश्चयीय विरोधिविषयितायुक्तत्वमपि, स्वनिरूप्त प्रतिबध्यतावच्छेदक धर्मेण स्वानन्तरोत्पन्नतादृगनिष्ठप्रतिबध्यतावच्छेदक धर्माभाव प्रयोजकत्वात्, तत्र ह्रदत्वादि विशिष्टविशेष्यकत्वावच्छिन्नवह्नित्वादि विशिष्ट प्रकारकत्वावच्छिन्न प्रतिबध्यता निरूपित प्रतिबध्यतावच्छेदकी भूतायां, ह्रदत्वावच्छिन्नविशेष्यकत्वावच्छिन्नवह्नित्वावच्छिन्नभावीय प्रकारितायास्तादृगवह्नित्वादि विशिष्ट प्रकारकत्व घटितो भावाभावितथात्वात्। नच तादृगविशिष्ट प्रकारकत्वमात्रेण विरोधि निश्चय प्रतिबध्यतावच्छेदक, अपितु तद्विशेषितानाहार्य्य ज्ञानत्वं, तत् कथं तत्प्रकारकत्वाभावस्य तथाविध विरोधि विषयिता प्रयुक्तत्वमिति वाच्य, विशिष्टाभावप्रयोजकस्य विशेष्यवन्निष्ठविशेषणाभाव प्रयोजकत्वात् अनाहार्य्यज्ञानत्वाद्याश्रयानुमिति निष्ठ तादृग्य विशिष्ट प्रकारकत्वाभावस्य, विरोधिविषयिता प्रयुक्तत्वात्तेरिति

क्षदीवह्निमान् धूमादित्यादौ वह्नित्वावच्छिन्ने लक्षणसमन्वयः । निर्व्वह्निः पर्व्वतोवह्निमानित्यादौ तादृशानुमितेरप्रसिद्धावपि वह्निमत् पर्व्वतादिरूपाश्रयासिद्ध्यादिविषयकनिश्चयानन्तरप्रसिद्धघटाद्यनुमितिषु अन्यत्र प्रसिद्धपक्षतावच्छेदक विशिष्टविषयकत्वावच्छिन्नसाध्यतावच्छेदकविशिष्टप्रकारकत्वघटितोभयाभावत्वमक्षतमेवेति तत्र लक्षणसमन्वयः । न चाहार्य्यज्ञानमात्र प्रसिद्धस्य निर्व्वह्नि पर्व्वतत्वावच्छिन्नविशेष्यकं वह्नि प्रकारकज्ञानत्वस्य विरोधिविषयकज्ञानप्रतिबध्यतानवच्छेदकतया तादृशधर्म्मावच्छिन्ने वह्न्यादिप्रकारकत्वस्याभावे विरोधिविषयतासम्बन्धेन प्रसिद्धघटाद्यनुमितिषु अन्यत्र प्रसिद्धपक्षतावच्छेदकविशिष्टविषयकत्वावच्छिन्नसाध्यतावच्छेदकविशिष्टप्रकारकत्वघटितोभयाभावत्वमक्षतमेवेति तत्र लक्षणसमन्वयः । न चाहार्य्यज्ञानमात्र प्रसिद्धस्य निर्व्वह्नि पर्व्वतत्वावच्छिन्नविशेष्यकं वह्नि प्रकारकज्ञानत्वस्य विरोधिविषयकज्ञानप्रतिबध्यतानवच्छेदकतया तादृशधर्म्मावच्छिन्ने वह्न्यादिप्रकारकत्वस्याभावे विरोधिविषयतासम्बन्धेन प्रसिद्धघटाद्यनुमितिषु अन्यत्र प्रसिद्धपक्षतावच्छेदकत्वेपि तदवच्छेदकस्य पर्व्वतत्वावच्छिन्ने वह्नित्वावच्छिन्नाभावप्रकारकज्ञानत्वस्यैव वह्निविशिष्टपर्व्वतविषयकज्ञानप्रतिबध्यतावच्छेदकतया व्याप्यत्वाभावप्रयोजकस्य सुतरां व्याप्याभावप्रयोजकतयातादृशविशिष्टविशेष्यकत्वावच्छिन्नवह्न्यादिप्रकारकत्वाभावे तादृशदोषविषयितासम्बन्धेन विरोधिविषयतासम्बन्धस्यावश्यकत्वात् । नचविरोधिज्ञानासत्त्वेपि निर्व्वह्निः पर्व्वतोवह्निमानित्यादिज्ञानस्यानुत्पत्त्या दृष्टादि घटित तादृशाहार्य्यज्ञानसामग्र्याभावस्यैव निश्चिकीर्षितविशिष्टे वह्नित्वेनिश्चयानिश्चयाभावप्रयोजकत्वं मतु विरोधिविषयितस्य, क्वचिदप्यङ्गत्वादिति वाच्यं । प्रमाणाधिकरणतायामेव विरोधिविषयतासम्बन्धस्य निवेश्यतया अधिकरणतासम्बन्धाभावभेदेनाधिकरणभेदेन भिन्नतया विरोधिज्ञानानन्तरोत्

पदप्रवृत्तौ साहश्यवैशिष्ट्यावगाहित्वाभावाधिकरणतायां विनिगमना विरहेण पूर्व्वज्ञानोपस्थितिविरोधिविषयितायाः अपि प्रयोजकत्वात् ॥

यद्विरोधिविषयतासम्बन्धेन क्वाद्दशोभयाभावस्तत्त्वमित्येतावन्मात्रे कृते ह्रदोयद्भावानित्यादिस्थानीययद्भावाभावादिविशिष्टह्रदादि-विषयितायाः एव तदन्यतरावच्छिन्नाभावत्वादि विशिष्ट विषयितायाः अपि प्रतिबध्यतावच्छेदकसंसर्गावच्छेदकसंसर्गावच्छिन्नप्रतियोगितायाः अपि प्रतिबध्यतावच्छेदकस्य ह्रदत्वादिविशिष्टे यद्भावादि वैशिष्ट्यावगाहित्वस्य विरुद्धप्रयोजकतया बाधायैकदेशे यद्भावाद्यवच्छिन्नाभावादिरूपविशिष्टे ऽति-व्याप्तिरिति यद्विषयक निश्चयान्यथासिद्धोत्तरानुमिति सामान्यस्य विरोधिविषयितासम्बन्धेनोभयाभावत्वं निवेशितं। नच याद्दश विशिष्टविषयितासामान्यस्य प्रयुक्ताद्दशोभयाभावत्वमित्येव सम्यक् ह्रदत्वादिविशिष्टविषयितासामान्यान्तर्गतायां ह्रदत्वादि स्थानीयविषयितायामुभयाभावप्रयोजकत्वासम्भवादतिव्याप्तेरनव-काशादितिवाच्यं। पाषाणमयोन यद्वह्निमानिति ग्रामसङ्गि-तस्य पर्व्वतः पाषाणमय इतिज्ञानस्य पर्व्वतोयद्वह्निमानितिज्ञान प्रतिबन्धकतया ग्रामभेदेन विषयितामेदाभावात् पाषाणमयत्व-विशिष्ट पर्व्वतादि विषयितासामान्यस्यैव उभयाभावप्रयोजक-त्वात् पाषाणमयत्वविशिष्ट पर्व्वतादावतिव्याप्तेर्दुर्व्वारत्वात्। ह्र-दोयद्भावानित्यादिह्रदादिविषयकनिश्चयानन्तरोत्पन्नघटाद्यनु-मितौ विरोधिविषयितासम्बन्धेनोभयाभावसत्त्वात् केवल ह्रदादा-वतिव्याप्तिरतः सामान्यपदं पूरणीयं। तथाहि ह्रदादि निश्चयानन्तरोत्पन्नानुमिति सामान्यान्तर्गतायां ह्रद इत्या-

दिनिश्चयानन्तरजात ह्रदोवह्निमान् वह्निव्याप्यधूमवांश्चेत्या-
द्यनुमितौ विरोधिविषयिताप्रयुक्तताद्दशोभयाभावात्सत्त्वात्राति-
व्याप्तिः । ह्रदत्वादिना वह्न्यभावविशिष्ट ह्रदादिविषयक निश्चया-
नन्तरमुक्तसमूहालम्बनानुमित्युत्पत्त्या ताद्दशविशिष्टस्यापि दोष-
त्वानुपपत्तिरतोयत्पदं यदूपावच्छिन्नपरतयोपवर्णितं । वह्न्य-
भावविशिष्ट ह्रदादिविषयकस्य ह्रदोवह्निमान्नवेत्यादि ज्ञान-
स्यानन्तरं ताद्दश समूहालम्बनानुमित्युत्पत्त्या तद्दोषताद्दशस्य
मतो निश्चयेति । अनाहार्य्याप्रामाण्यज्ञानानास्कन्दित संशयान्य
ज्ञान परं, तेनाहार्य्यस्याप्रामाण्यज्ञानास्कन्दितस्यापि दोष
विषयकनिश्चयस्यानन्तरं ताद्दशानुमित्युत्पत्तावपि न क्षतिः ।
दोषविषयकनिश्चयनाशे सति ताद्दशानुमितेरुत्पत्त्या तद्दोषापत्ति-
रतोऽव्यवधान निवेशः । एवं दोषविषयकलौकिकनिश्चयाव्यवहित
पूर्व्वमनुमित्युत्पत्त्या तद्दोषः स्यादत उक्तरेति । तत्सामानाधिकर
ण्यमनुमिती निवेश्यमत एकस्य बाधनिश्चयानन्तरमन्यस्यानु-
मितावपि न क्षतिः । बाधादिनिश्चयानन्तरं पक्षतावच्छेदका-
वच्छिन्ने साध्यादिप्रकारकस्याहार्य्यस्य लौकिकस्य च प्रत्यक्षस्य
उत्पत्त्या ज्ञानसामान्यमुपेत्यानुमितिसामान्यनिवेशः । यत्
पक्षक यत्साध्यकयद्धेतुकस्थले याद्दशदोषविषयकनिश्चया-
नन्तरं कस्याप्यनुमितिर्न जाता तत्र ताद्दशानुमितेरप्रसिद्धया
ऽव्याप्तिरतोऽनुमितिस्थलेऽनाहार्य्यदोषविषयेणाजन्य ज्ञानं निर्देश्य
कल्पान्तरमाह।नाहार्य्येति । तथाच यत्र ताद्दशानुमित्यप्रसि-
द्धिस्तत्र तथा विधमानसोपनीतभानादिकमादायैव लक्षणं सङ्ग-

मनीय मिति भावः । बाधादि मिथ्यानन्तरं बाध्यं साध्यादिप्रकारकप्रत्यक्षोत्पत्त्याऽसम्भवोऽव्याप्तिर्वक्तव्य बाधज्ञानाद्या-र्येति । अङ्गे न पीत इत्यादिमिथ्यानन्तरं अङ्गादौ पीतत्वा-दिप्रकारकस्य दोषविशेषजन्यचाक्षुषादेरुत्पत्त्या गौः पीतः अङ्गं खादित्यादिस्थलीयबाधादाव्याप्तिरतोमानसेति । मानसपदं दोषविशेषाजन्यज्ञानपरं, तेन नाहं गौर इत्यादिमिथ्यानन्त-र्मिथ्याज्ञानजन्यवासनादिरूपदोषविशेषजन्याक्षविशेष्यकगौरत्वादि-प्रकारकमानसज्ञानस्योत्पत्तावपि नाहं गौरश्यामत्वादित्यादिस्थली-यबाधादौ नाव्याप्तिः । एतेन बाह्यपक्षसाध्यहेतुक स्थले य द्विषयकनिश्चयानन्तरं विरोधिसामग्र्यादिवशेन मानस ज्ञानं क्वापि न जातं तत्राव्याप्ति रित्यपि निरस्तं । तत्राप्यनुमिति शाब्दबोधादिकमादाय लक्षणगमनसम्भवात् । पक्षतावच्छे-दकेत्यादिदलद्वयनिवेशस्य व्याहतिः पूर्वोक्तरीत्या बोध्या । विरो-धिविषयिताप्रयुक्तत्वनिवेशप्रयोजनं स्वयमेवाग्रे वक्ष्यति । यत्र विशेष्यविशेषे समूहालम्बनज्ञानं न कस्यापि जातं तत्र पक्ष-तावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहित्वविशिष्टसाध्यव्याप्ति-विशिष्टहेतुवैशिष्ट्यावगाहित्वाभावरूपविशिष्टाभावाप्रसिद्धया व्या-प्तिरतोविशिष्टाभावमुपेत्योभयाभावनिवेशः कृतः । तादृशोभया-भावप्रयोजकविरोधिविषयितावत्त्वं यद्रूपविशिष्ट विषयकत्वव्यापकं तद्रूपावच्छिन्नत्वं दोषत्वमित्यस्य सम्यक्षेऽपि यथासन्निवेशे न वैयर्थ्यं । ननुकाञ्चनमयः पर्वतोवह्निमानित्यादौ पक्षतावच्छे-दकविशिष्टपक्षाद्यप्रसिद्धा विशिष्टपक्षे विशिष्टसाध्यादिवैशिष्ट्या-

अगाहित्वावच्छिन्नसिद्धिरित्याशयेनासिद्धादावव्याप्तिरित्यत आह ।

पक्षतावच्छेदकवैशिष्ट्यादिकञ्च वैज्ञानिकं न तु वास्तविकं ग्राह्यं । व्याप्तिज्ञान्वयतो व्यतिरेकतश्च ग्राह्या, तादृशावगाहित्व प्रसिद्धिराहार्य्यज्ञान एवाभ्युपेतव्या अनन्यगतिकत्वात् ।

पक्षतावच्छेदकेति । आदिपदात् साध्यतावच्छेदकवैशिष्ट्यादिपरिग्रहः । वैज्ञानिकमिति तत्तत्प्रकारेणज्ञायमानत्वरूपमित्यर्थः, तथा च पर्व्वतादेः काञ्चनमयत्वादिवैशिष्ट्यस्य वास्तविकस्य विरहेऽपि तेन रूपेण ज्ञायमानत्वमादाय लक्षणसमन्वय इति भावः । नच ह्रदो न वह्निमानित्यादिनिश्चयानन्तरं जायमाने ह्रदोद्रव्यं जलमयोवह्निमानित्याद्याकारक समूहालम्बने ह्रदत्वादिना ज्ञायमाने वह्न्यादिवैशिष्ट्यावगाहित्वसत्त्वादसम्भव इति वाच्यं । पक्षतावच्छेदकावच्छिन्ना या पक्षनिष्ठविशेष्यता तन्निरूपिता या साध्यतावच्छेदकावच्छिन्ना साध्यप्रकारता याच साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारतानिरूपितत्वाप्यत्वप्रकारतानिरूपितहेतुतावच्छेदकावच्छिन्नप्रकारता तत्प्रतियोगित्वयोरवगाहित्वात्तद्वैन विवक्षणात् विशिष्टविषयाप्रसिद्धावपि पर्व्वतादौ काञ्चनमयत्वाद्यवगाहिभ्रमविषयतायां व्यधिकरणकाञ्चनमयत्वाद्यवच्छिन्नायाः प्रसिद्धया लक्षणसमन्वयात् । व्याप्तिप्रकारतास्थलेच निरूप्यनिरूपकभावापन्ना व्याप्तिघटक-

साध्यपदार्थप्रकारता निवेशनीया। तेन धूमवान्पर्वतो वह्नित्वादौ-
वह्निव्यापकधूमसामानाधिकरण्यरूपव्याप्तेरप्रसिद्धावपि न क्षतिः।
नन्वत्र व्याप्तिपदेनान्वयव्याप्तिर्विवक्षिते तदा व्यतिरेकव्याप्ति
ज्ञानविरोधिनि हेत्वादिनिष्ठाभावप्रतियोगित्वादिरूपानुपसंहा-
रित्वेऽव्याप्तिस्तज्ज्ञानस्यान्वयव्याप्तिज्ञानाविरोधित्वात्। व्यतिरेक
व्याप्तिविवक्षणे च हेतुनिष्ठसाध्याभाववद्वृत्तित्व साध्यतावच्छे-
दकनिष्ठहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वादावव्या-
प्तिः, तज्ज्ञानस्य बाध्याभावावगाहितया व्यतिरेकव्याप्ति
ज्ञानविरोधित्वे मानाभावादत आह व्याप्तिपदेति। अन्वयत
अन्वयनिरूपिता प्रकृतहेतुनिष्ठा साध्यनिरूपितेति यावत्। सा-
त्यन्ताभावान्योन्याभावभेदेन भिन्ना अव्यभिचरितत्वहेतुव्यापक
साध्यसामानाधिकरण्यरूपा नानाविधैव बाध्या अतोऽत्यन्ताभावा-
दिगर्भव्याप्तिज्ञाने अन्योन्याभावादिगर्भव्यभिचारज्ञानस्य व्याप-
कत्वादिज्ञाने साध्याभाववद्वृत्तिहेत्वादिज्ञानस्य बाध्याभावाव
गाहितया अविरोधित्वेऽपि न क्षतिः। व्यतिरेकतः व्यति-
रेकनिरूपिता साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपा
बाध्या व्याप्तिपदेन विवक्षणीया, तथा च तत्तद्व्याप्ति प्रका-
रता निरूपितहेतुतावच्छेदकावच्छिन्नप्रकारता प्रतियोगित्व
कूटाभावो निवेशनीय इति भावः। ननु निर्वह्निः पर्वतो-
वह्निमानित्यादौ पक्षतावच्छेदकविशिष्टे साध्यतावच्छेदक-
विशिष्टवैशिष्ट्यावगाहित्वमेवाप्रसिद्धमिति तत्र कथं लक्षणसमन्वय
इत्यत आह नाद्यभावगाहित्वप्रसिद्धिरिति, आद्यार्थज्ञान

एवञ्च । निर्व्वह्नित्वविशिष्टपर्व्वते यद्विप्रत्यक्षं जायतामित्याकारकेच्छाजन्य प्रत्यक्ष एवेत्यर्थः ।

एवञ्च वस्तुमात्र निश्चयानन्तरं निर्व्वह्निविशिष्टे वह्नेरग्रहेऽपि न क्षतिस्तस्य विरोध्यविषयकत्वात् । एवं साध्यनिश्चयोत्तरं तस्यानुमितावपि, मानमज्ञानाविरोधित्वात् ।

विरोधिविषयितायुक्तत्वनिवेशनप्रयोजनमाह एवञ्चेति । विरोधिविषयितायुक्तत्व निवेशेत्यर्थः, न क्षतिः न निर्व्वह्निः पर्व्वतो वह्निमानित्यादौ घटादावतिव्याप्तिस्तस्य घटादिनिश्चयस्य विरोध्यविषयकत्वात् स्वानन्तरोत्पन्नानुमितिसामान्यनिष्ठतादृशोभयाभावप्रयोजक विरोधिविषयिताकत्वविरहात् । वह्निमत् पर्व्वतादि विषयक समूहालम्बनात्मक घटादि निश्चयानन्तरजातज्ञाननिष्ठतादृशोभया भाववत्त्वस्य तज्ज्ञानीय विरोधि विषयिता प्रयुक्तत्वेऽपि घटादि निश्चयाव्यवहितोत्तरानुमितिसामान्यान्तर्गतसमूहालम्बनात्मकघटादिनिश्चयाव्यवहितोत्तरानुमितेर्विरोधिविषयिता प्रयुक्तोभयाभावत्वविरहात्तातिव्याप्तिरिति भावः । प्रयोज्य प्रयोजकभावश्चानुभवसिद्धः स्वरूपसम्बन्धविशेषः । विरोधिपदप्रयोजनमाह एवमिति । अननुमितावपीति । न क्षतिः तस्य विरोध्यविषयकत्वादित्यनुषज्यते । न क्षति र्न साध्यवत् पक्षेऽतिव्याप्तिः । विरोधिविषयितापदेन तादृशोभयाभावत्वति

योगितावच्छेदककोटौ यद्रूपावच्छिन्नाये यद्रूपावच्छिन्नवैशि
ष्ट्यावगाहित्वं निविष्टं तद्रूपावच्छिन्नविषयितानिरूपित तद्रू-
पावच्छिन्नाभावत्वव्याप्यान्यतर विषयिताया साध्यविशिष्ट पक्ष-
विषयतान्य विषयताया सा विवक्षितत्वादिति भाव । नच
सिषाधयिषाधीनाया साध्यनिश्चयानन्तर समूहालम्बनानुमितौ
साहचर्योभयाभावासत्वात् सिद्धिविषयेऽतिप्रसङ्ग एव नास्ति।
एव पक्षे साध्यनिश्चयान्तर तदतिरिक्तविषयक साध्य
विषयकानुमितत्वोत्पादेऽपि पक्षाग्रे साध्याग्रे वाऽधिकावगाहिन्या
अनुमिते साध्यधर्मितावच्छेदककान्यविधेयकानुमिते साध्या
वच्छिन्नपक्षविधेयकानुमितेर्वोत्पत्त्या सत्योभयाभावासत्वादपि
नातिप्रसक्तिरिति वाच्य। यत्र विषयविशेषे सिषाधयिषा
वलात् सिद्धान्तरं साहचर्यानुमिति कदापि न जाता तत्रैवाति
व्याप्तिसम्भवात् । द्वितीय कल्पे सिषयिषामात्र निवेश्य
नतु विरोधिविषयितापर्य्यन्तमित्याशयेनाह मानसज्ञान इति
साध्यनिश्चयेत्यादि ॥ क्रोडपत्रमिद ।

प्रमेयत्वविशिष्टव्यभिचारादि वारणाय यथा श्रुत विशिष्टा
भावटितत्वनिवेशे उपदर्शित व्यभिचारघटित बाधाद्य श्रुते
विशिष्टान्तरविषयित्वाप्रयोज्यत्वविषयिताप्रयोज्यसाहचर्योभयाभाव
प्रयोजकाभावाधिकरणताकत्वरूप साहचर्यविशेषणं निवेशनीय ।
प्रमेयत्वविशिष्टव्यभिचारादिविषयिताप्रयोज्याया उक्तोभयाभाव
प्रयोजकव्याप्यावगाहित्वाभाववत्ताया एव व्यभिचारादिविष
यिताप्रयोज्यत्वनिवेशेन प्रमेयत्वविशिष्ट व्यभिचारादौ न विशिष्टा

न्तरविषयित्वाप्रयोज्यत्वविषयिता प्रयोज्यनिरूक्तोभयाभावप्रयोज-
काभावाधिकरणताकत्वमिति नातिप्रसङ्गः । उपदर्शितव्यभिचारा-
दिघटितबाधादि विषयिताप्रयोज्यायाः पक्षे साध्यावगाहित्वा-
द्यभावाधिकरणतायास्तद्घटकव्यभिचारादिविषयित्वाप्रयोज्यतया
तत्संग्रहः । नच विशिष्टपक्षे विशिष्टसाध्यवत्ताग्रहप्रतिबन्धक-
तावच्छेदिकाया स्तादृशबाधादिविषयतान्त.पातिव्यभिचारादि-
विषयिताया अपि तादृशबाधादिविषयिताप्रयोज्यायां विशिष्टपक्षे
विशिष्टसाध्यवैशिष्ट्यावगाहित्वाभावाधिकरणताया प्रयोजकतया
तादृश बाधादे र्दु.संग्रह इति वाच्यं । यत्किञ्चिद्विशिष्टान्तर-
विषयितात्वव्यापकरूपावच्छिन्नाप्रयोज्यत्वनिवेशेन तत्संग्रहसम्भ-
वात् व्यभिचारादिविषयतायाबाधविषयतान्त पातिविषयतामात्र-
वृत्तिरूपेणैव उपदर्शितसाध्यवत्ताग्रहप्रतिबन्धकतावच्छेदकतया
तेनैव रूपेण तादृश साध्यावगाहितानिरूढवत्ता प्रयोजक-
त्वात्तादृशस्य च रूपस्य बाधादिविषयतानन्त.पातिव्यभिचारा-
दिविषयतासाधारण्यव्यभिचारादि रूपविशिष्टविषयतात्वाव्याप-
कत्वात्तद्व्यापकरूपावच्छिन्नाप्रयोज्यत्वस्य उक्तबाधादिविषयिता-
प्रयुक्तसाध्यावगाहित्वाभाववत्तायामक्षतत्वात् । मैयत्वविशिष्टव्यभि-
चारादि विषयतायाः येन रूपेण व्याप्त्यादिग्रहप्रतिबन्धकतावच्छे-
दकता तद्रूपेण निरुक्तविषयतात्वव्यापकेन मैयत्वविशिष्टव्यभि-
चारादि विषयतान्त:पातिव्यभिचारादिविषयतात्वेन मैयत्व-
विशिष्ट व्यभिचारादि विषयताप्रयोज्यव्याप्त्यावगाहित्वाभाव-
वत्तायाः नियमात. प्रयोजकत्वान्नातिप्रसङ्गः । बाधसत्-

प्रतिपक्षादिविषयकज्ञानस्य नानाविधबाधविषयकज्ञानस्य
यानन्तरं जायमानायामनुमितौ या बाधादिविषयतानियोज्या-
भावाधिकरणता तस्या विशिष्टान्तरविषयितानियोज्यत्वेऽपि
स्वपूर्ववर्तिज्ञानीयविशेषविषयतायाः एव स्वनिष्ठप्रतिबध्यता-
च्छेदकधर्माभावाधिकरणतानियोजकत्वात्तत्तैकविध बाधादिज्ञा-
नानन्तरज्ञातज्ञाने या तत्तद्बाधादि—विषयिता—प्रयोज्याव-
च्छिन्नाभावाधिकरणता तस्या विशिष्टान्तरविषयित्वानियोज्यतया
बाधादौ लक्षणसमन्वयः । अभिचारघटितबाधादि विषयिता-
प्रयोज्यायां दीधितिकारोक्तोभयाभावाधिकरणतायां व्याप्यत्व-
गाहिताविरहप्रयोज्यत्वेन यत्किञ्चिद्विशिष्टान्तरविषयित्वानि-
यतकक्षपावच्छिन्नबाधादिविषयतान्तःपाति अभिचारादिविषयिता-
प्रयोज्यत्वनियमात्तत् भंगप्रहाय तादृशोभयाभाव—प्रयोजक्ता-
भावाधिकरणतायाश्चैवनिवेशः । तथा सति दीधितीभयाभावाधि-
करणतायां उक्तावच्छिन्नअभिचारादि विषयित्वप्रयोज्यत्व-
नियमेपि तादृशोभयाभावप्रयोजक साध्यादिमत्ताज्ञानगाहित्वा-
भावाधिकरणतायां तत्तत्कपावच्छिन्नअभिचारादिविषयत्वाप्रयो-
ज्यत्वेन तादृशबाधादौ संग्रहः । बाधादिविषयितानियोज्यस्य
साध्यादिमत्ताज्ञानगाहिताविरहस्य सत्प्रतिपक्षादिरूपविशिष्टान्तर-
विषयताप्रयोज्यत्व नियमादसम्भवः स्यादित्युभयाभावप्रयोजकाभावे
विशिष्टान्तरविषयत्वाप्रयोज्यत्वमनिवेश्य तादृशाभावाधिकरण-
तायां तन्निवेश्य । तथा सति अधिकरणताया अधिकरणभेदेन
भिन्नतया पूर्ववर्तिनिश्चितप्रतिबन्धकताश्रयैकधर्मस्य तदुप-

रोत्पत्ति निष्ठप्रतिबध्यतावच्छेदकधर्म्माभावाधिकरणतायोजकत्वे-
नैव बाधादिनिश्चयानन्तरोत्पन्नानुमितिनिष्ठसाध्यादिमत्त्वावगा-
हित्वाभावाधिकरणतायाः प्रकृतिपक्षान्याङ्गबाधादि विषयतायाः
अप्रयोजकत्वेन सामञ्जस्यात् । एतत्पर्य्यन्तं क्रोडं ॥

अथैतादृशोभयाभावयत्वघटितलक्षणकरणेऽपि केवल निर्व्व-
ह्नित्वादिपक्षतावच्छेदककक्षवह्न्यादि साध्यकस्थलीय निर्व्वह्निनिष्ठव-
ह्न्यभावादिरूपबाधादिरूपदोषेऽव्याप्तिस्तादृशबाधादिरूपदोषज्ञान-
स्याप्रतिबन्धकतया तदीयविषयतायाः प्रतिबन्धकतानवच्छेदक-
तया तथाविधोभयाभावाप्रयोजकत्वात् तस्य दोषत्वानुपगमे तत्र
हेतोर्दुष्टत्वव्यवहारानुपपत्तेः दृष्टापत्तौ निर्व्वह्निः पर्व्वतोवह्निमा-
नित्यादावपि तत्सम्भवेन एतादृशप्रयासवैफल्यात् । नच तत्र अभा-
ववान् पक्षिमानित्यनाहार्य्यज्ञानस्य प्रसिद्धया तत्प्रतिबन्धकी-
भूताभाववान् निर्व्वह्निरित्यादिज्ञानविषय एव दोष इति वाच्यं ।
अभाववत्त्वसामानाधिकरण्येन निर्व्वह्नित्वग्रहस्य तादृशवह्नि-
मत्त्वग्रहविरोधित्वात् अभाववत्त्वावच्छेदेन वह्न्यादिमत्ता-
ग्रहविरोधित्वेऽपि तादृशवह्न्यादिमत्तावगाहित्वस्य वह्न्यभावादि
मत्त्वरूपपक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यावगाहित्वाव्याप
कतया तदवच्छिन्ननिरूपितप्रतिबन्धकतावच्छेदक विषयिता
या तथाविधोभयाभावाप्रयोजकत्वात् तद्विषयस्य दोषत्वानु-
पपत्तेः । अभाववत्त्वावच्छेदेन निर्व्वह्नित्वग्रहस्य भ्रमरूपतया
तद्विषयविशिष्टस्याप्रसिद्धेः । एवं वह्निमान्निर्व्वह्निरित्यादि स्थली-
यदोषे निश्चयात्मकस्यापि निर्व्वह्निमद्विन्नवह्निमत्त्वादेरेव तत्र दोषत्व

सम्भवात् तद्विषयकस्य ज्ञानस्य क्वचिदपि प्रतिबन्धकत्वायोगात्। एवं यत्र निर्वह्निः पर्व्वतोवह्निमानित्वादौ पर्व्वतत्वादि सामानाधिकरण्येन वह्नाभावादिमत्त्वस्य पक्षतावच्छेदकावटक-ता तत्र पर्व्वतत्वसामानाधिकरण्येन वह्नादिमत्त्वं न दोषः विशिष्टपक्षग्रहाद्यविरोधित्वेनाप्रयोजकत्वादिरूपत्वानुपपत्तेः। उ-क्तरीत्यैतल्लक्षणानाक्रान्तत्वाच्च। पर्व्वतत्वाद्यवच्छेदेन वह्नाभा-दिमत्त्वञ्चाप्रसिद्धं वह्निशून्यपर्व्वतादेरपि सत्वात्। नापि पर्व्वतत्वादिसामानाधिकरण्येन निर्वह्निपर्व्वतत्वाद्यवच्छेदेन वा वह्नाभावादिमत्त्वरूपबाधादि दोषः तज्ज्ञानस्य पक्षतावच्छे-दक विशिष्टे साध्यवैशिष्ट्यावगाहित्वेव्याप्यवृत्तिविषयतावटितधर्म्मा-वच्छिन्नाप्रतिबन्धकतया तत्र लक्षणगमनायोगात्। नापि पर्व्व-तत्वावच्छेदेन वह्नाभावादिमत्त्वं, अप्रसिद्धत्वादिति तत्र को दोषः। यत्तु प्रयुक्तत्वं व्यापकत्वं यद्विषयकनिश्चयनिष्ठविरोधि विषयिताया उभयाभावव्याप्यत्वञ्च, स्वाश्रयतादृशनिश्चया व्यव-हितोत्तरानुमितित्वसम्बन्धेन तादृशसम्बन्धत्वाभावेवतदुत्तरमनु-मितावित्यलं। एवञ्च विरोधिविषयकयद्विषयक निश्चया-व्यवहितोत्तरानुमितित्वव्यापक स्वादृशोभयाभावत्वं। इति पर्य्यवसितं। एवञ्च निर्वह्नि पर्व्वतोवह्निमानित्यादिस्थलीयबाधादि विषयिताया स्वरूपसम्बन्धरूपोभयाभावप्रयोजकत्वासम्भवेऽपि उभयाभावप्रतियोगितावच्छेदककोटौ यद्रूपावच्छिन्नविशेष्यक-यिद्रूपावच्छिन्नप्रकारकत्वं निविष्टं तद्रूपावच्छिन्नविशेष्यक तद्रूपावच्छिन्नाभावतद्व्याप्यान्यतरप्रकारकत्वस्यैव विरोधिविष-

यत्वार्थकतया ' तत्र 'लक्षणे सुसमन्वयमेव ताट्टशप्रयोजक-
त्वस्यानिवेशात् । नचैवं वस्तुमात्रेऽतिव्याप्ति र्दुर्व्वारैव ताट्टशो-
भयाभावस्य विरोधिविषयकसमूहालम्बनरूपघटादिविषयक नि-
श्चयाव्यवहितोत्तरानुमितित्वव्यापकताया अक्षतत्वादिति वाच्यं ।
विरोधिविषयितानतिरिक्तवृत्तित्वं यद्विषयिता तच्छालिनिश्चयस्य
निश्चयान्तेन 'विवक्षणाद् घटादि विषयिताया स्तत्र निरुक्त-
विरोधिविषयितानतिरिक्तवृत्तित्वविरहात् । नचैवं विरोधि
विषयितानतिरिक्तवृत्तित्वं दीयविषयिता तत्त्वमित्येतावतैव साम-
ञ्जस्ये शेषवैयर्थ्यमिति वाच्यं । यत्र पर्व्वतत्वादिसामानाधिकर-
ण्येन वह्नयादेः साध्यता तत्र पर्व्वतत्वादि सामानाधिकरण्येन
वह्न्यभावादिमत्त्वविषयिताया निरुक्तविरोधिविषयितानतिरिक्त
वृत्तितया तत्त्वातिव्याप्तिवारकतया शेषसार्थक्यात् । तदुपादाने
ताट्टशवह्न्यभावादिमत्त्वविषयकनिश्चयानन्तरं पर्व्वतत्वादि सा-
मानाधिकरण्येन वह्न्याद्यनुमित्युत्पत्त्या ताट्टशानुमितौ तया
विधोभयसत्त्वेनातिव्याप्त्यनवकाशादिति तत्तुच्छं । निर्व्वह्निः
पर्व्वतोवह्निमानित्यादौ यत्र पर्व्वतत्वादिसामानाधिकरण्येन
वह्न्यभावादेः पक्षतावच्छेदकता तत्र पर्व्वतत्वसामानाधिकर-
ण्येन वह्न्यादिमत्त्वस्य विशिष्टपक्षग्रहाविरोधित्वादाशया सिद्ध-
साधनस्य हेत्वाभासान्तरताभयेनासम्भवल्लक्ष्यभावस्य निरुक्तविरो-
धिविषयितानतिरिक्तवृत्तिविषयिताकतयाऽतिव्याप्तेः ताट्टशो-
भयाभाव प्रतियोगितावच्छेदकगर्भं यद्रूपविशिष्टे येन सम्ब-
न्धेन यद्रूपावच्छिन्नवैशिष्ट्यं निविशते तद्रूपावच्छिन्नविशेष्य-

कतत्संसर्गकतद्रूपावच्छिन्नप्रकारकानुमितित्वावच्छिन्न प्रति-
बध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वरूपविरोधित्वस्य विष-
यितायां निवेशेतु शेषवैयर्थ्यं उक्तरीत्या निर्व्वह्निर्व्वह्निमान्नि-
त्यादि स्थलीयदोषे व्याप्तिश्च। यत्तु पक्षतावच्छेदकविशिष्टे
निरूपितसाध्यहेतुवैशिष्ट्यावगाहिनियताहत्तिविषयितैव विरोधि-
विषयितापदार्थः तथाच यत्किञ्चितताद्दशविषयिताशालि नियः
योत्तरानुमितित्व व्यापकीभूताभावस्तत्त्वमिति समुदितार्थः।
नियतत्वञ्च विशेषणविशेष्यतावच्छेदकभावापन्नविरोधिकोटि-
द्वयप्रकारकैकधर्म्मिविशेष्यकज्ञानान्य ज्ञानत्वं। कोटिद्वये विशे-
षणविशेष्यतावच्छेदकभावापन्नत्वनिवेशात् निर्व्वह्निः पर्व्वतो-
वह्निमानित्यादौ पक्षतावच्छेदकविशिष्टे साध्यादिवैशिष्ट्यग्रहस्य
एकत्र विरोधिद्वयप्रकारकत्वनियमेऽपि न ताद्दशवैशिष्ट्यावगा-
हिनियताप्रसिद्धिः। यदीयविषयिता, ताद्दशनिश्चयाहत्तिमत्त्वमित्ये-
तावति क्षते ह्रदोवह्निव्याप्यधूमवानित्यादौ ह्रदादिनिष्ठवह्न्यभावा-
दिमत्त्वेऽतिव्याप्तिर्व्वह्न्यादिव्याप्यवत्तानिश्चयस्यापि वह्न्यादिनिश्च-
यवत् कार्य्यसहभावेन वह्न्यभावादिपक्षविरोधित्वाद् वह्न्यभावादि
मत्त्वविषयितायां ताद्दशनिश्चयाहत्तित्वादिति न शेषवैयर्थ्यमिति।
तदपि न वह्निव्याप्यवान् वह्निव्याप्यव्याप्यवांश्च ह्रदोवह्न्यभाववा-
नित्येताद्दशाहार्य्यज्ञानोपगमेन वह्न्यभावादिमत्त्वविषयिताया
वह्निव्याप्यादिमत्त्वनिश्चयवृत्तितया उक्तातिव्याप्त्यनवकाशेन शेष-
वैयर्थ्यानुपपत्तेः। वह्निमान्वह्निव्याप्यवांश्च ह्रदोवह्न्यभाववान्नि-
त्येताद्दशाहार्य्यसाध्यादिवैशिष्ट्यनिश्चये ह्रदोवह्निमानित्यादि-

स्वलोपवाधादिविषयितायाः सत्त्वेनासम्भवप्रसङ्गाच्च । वह्न्यादि-
रूपधर्मितावच्छेदकानवच्छिन्नवह्न्यभावादिविशेषित ह्रदादि-
निरूपितविषयितायाः साध्यादिनिश्चयाहत्तित्वेऽपि घटादि-
निरूपितायाः अपि दोषविशेषावच्छिन्नायाविषयितायाः साध्यादि-
निश्चयाहत्तितया घटादावुदासीनेऽतिव्याप्तिवारणाय याट्श-
विशिष्टविषयितासामान्यं ताट्शनिश्चयाहत्ति ताट्शविशिष्टनिरू-
पितविषयितायाः एव विरोधिविषयितेत्यनेन विवक्षणीयतया
अप्रतीकारात् । भ्रमान्यहत्तियदीयविषयितासामान्यं ताट्श-
निश्चयाहत्ति तदीयविषयितात्वविवक्षणेन निर्व्वाहेऽपि विरोधियदि-
षयितायाश्चानिश्चयोत्तरानुमितिसामान्ये हयो व्यतिरेक इत्य-
नभिनाय यद्विषयकनिश्चयस्येत्यादि वक्ष्यमाणस्य ग्रन्थका-
रीयरीतिविरुद्धत्वात् । एतेन विषयिताया उभयाभावप्रयो-
जकत्व ताट्शोभयाभावप्रतियोगितावच्छेदकं यद्रूपविशिष्टे येन
सम्बन्धेन यद्रूपावच्छिन्नवैशिष्ट्याधिकरणत्वघटितं तद्रूपावच्छिन्न
विशेषकतत्संसर्गकतद्रूपावच्छिन्नप्रकारकत्वविशेषितेनानुमितित्वे-
नानार्य्यलौकिकसन्निकर्षाद्यजन्यज्ञानत्वेन वा अवच्छिन्ना या
प्रतिबध्यता सन्निरूपितप्रतिबन्धकतावच्छेदकत्वं । एवञ्च याट्श-
विशिष्टविषयिता, निरुक्तप्रकारविधोभयाभावप्रयोजकतायाश्चाट्श-
त्वमेव लक्षणं । विषयितादौ विरोधित्वादिक्षयनन्तु स्वरूपा-
ख्यानमात्रमेव इति प्रलपित मध्यनादेयमेव । निर्व्वह्निर्व्वह्नि-
मानित्यादिस्थलीयदोषस्य उक्तयुक्त्या दुःसंग्रहात् । अत्र केचित
कश्चिदित्यस्याग्निमत्त्वस्य इवात्रापि कक्षे न दीधितिकृतोऽनि-

भैरः निर्व्वह्निर्व्वह्निमानित्यादिस्थलीयदोषासग्रहेणासरसस्याग्नि-
कल्पे कश्चिदित्यनेनेवात्रापि कल्पेऽदन्तीत्यनेन सूचितत्वात्। ।
निर्भरस्तु केचिदित्यादिकल्पएव अतएव तत्प्रकर्षबोधनायप्राहुरि-
त्युक्तमिति। परंतुघटाभावादिधर्म्मितावच्छेदकवह्न्यादिमत्वज्ञान
मपि तद्धर्म्मधर्म्मितावच्छेदकवह्न्यभावादिमत्वज्ञानप्रतिबन्धकत्वेकल्प-
नीये धर्म्मितावच्छेदकभेदेनानन्त तत्कल्पनप्रयुक्तलाघवानुरोधेन ध-
र्म्मितावच्छेदकमनिवेश्यानाहार्य्यवह्न्यादिविशिष्टबुद्धित्ववह्न्यभावादि
निश्चय त्वाभ्या समानधर्म्मितावच्छेदकत्वप्रत्यासत्त्येव प्रतिबध्य प्रति-
बन्धक भाव कल्प्यते। एवञ्च तद्देशनिष्ठस्य पूर्व्ववर्त्तिप्रतिबन्धकज्ञान
निरूपित प्रतिबन्धकतावच्छेदकसम्बन्धस्य उत्तरवर्त्तिज्ञाननिष्ठ प्रति-
बध्यतावच्छेदकसम्बन्धेन तद्देशासम्बन्धित्वं प्रति प्रयोजकतया वह्न्य
भावादिनिष्ठवह्न्यभावादि प्रकारकज्ञानीयधर्म्मितावच्छेदकताख्य
विषयतायास्तदुत्तरोत्पन्नानाहार्य्यवह्न्यादि प्रकारकज्ञानस्य वह्न्य-
भावादिधर्म्मितावच्छेदकाकत्वविरहप्रयोजकत्वाद्वह्न्यभावादिवि--
शिष्टे वह्न्यादिबुद्धित्वावगाहित्वविरहस्य वह्न्यभावादिधर्म्मितावा-
च्छेदकताक वह्न्यभावादि प्रकारक निश्चयविषयितायुक्तत्व
मवत मेवेति ताट्टग्निश्चयविषयस्य दोषत्वमव्याहतमेव। नच
धर्म्मितावच्छेदकनिष्ठ प्रत्यासत्त्या विपरीत ज्ञानस्य प्रतिबन्धकत्वे
निर्व्वह्निविशेष्यकवह्निज्ञान जायतामित्याकारकेच्छाजन्यनिर्व्वह्नि-
र्व्वह्निमान्घटाभाववान्य वह्निमानित्याद्याधिकाहार्य्यज्ञानस्य विप-
रीतज्ञान प्रतिबध्यतावच्छेदकाक्रान्ततया घटाभाववान् वह्न्या
भाववानित्यादि निश्चयकाले तथाविधेच्छासत्त्वे घटाभावविशिष्ट

विशेष्यकवह्निज्ञानं जायतामित्याकारकेच्छां विनैव तादृशज्ञा-
नापत्तिरिति वाच्य। यतः सामान्यतोवह्न्यादिज्ञानेच्छाविशिष्टा-
न्यत्वरूपमनाहार्य्यत्व न प्रतिबध्यतावच्छेदककोटौ निवेश्यतोयं
किन्त्वाहार्य्यज्ञानोत्पत्त्यर्थं विशेष्यतानिष्ठं यत्स्वविषयतावच्छे-
दकत्व तदवच्छेदकतावच्छेदकत्वसम्बन्धावच्छिन्नप्रतियोगिता
कवह्न्यादिज्ञानेच्छाविरहस्य या स्वाव्यवहितपाक्षणावच्छिन्ना-
धिकरणता तद्विशिष्टधर्मितावच्छेदकताया एव प्रतिबध्यताव-
च्छेदकसम्बन्धत्वमुपेयते तादृशेच्छाविरहस्य प्रतिबन्धकविशे-
षणत्वमेव वा विशेषणताविशेष-धर्मितावच्छेदकतासम्बन्धघटित-
सामानाधिकरण्यसम्बन्धेनोपगन्तव्यं, उक्तस्थले च घटाभावादौ
तादृशेच्छाविरहस्य सत्त्वान्नोक्तापत्तिरधिकमन्यत्रानुसन्धेयमिति
वदन्ति।

तादृशपक्षे तादृशसाध्यवैशिष्ट्यस्य तादृशसाध्य-
निरूपितव्याप्तिविशिष्टतादृशहेतुवैशिष्ट्यस्य चावगाहि-
ना ज्ञानस्य यद्विषयकं ज्ञानं विरोधिविषयकं तत्त्वं
तादृशज्ञानविरोधित्वं वा हेतुदोषत्वं, ज्ञानविरोधि-
त्वञ्च तद्विषयविषयकग्रहविरोधिग्रहविषयत्व। एवं-
विधैव रीतिरुत्तरत्र सर्व्वत्र सव्यभिचारलक्षणादा-
वनुसर्त्तव्या इत्यपि केचित्।

निर्वह्निः पर्वतोवह्निमानित्यादिस्थलीयदोषसाधारण्याय प्रकारान्तरेण लक्षणं वर्णयतां केषाञ्चिन्मतमाह, 'तादृशपक्ष-इति पक्षतावच्छेदकविशिष्टपक्ष इत्यर्थः, 'तादृशसाध्येति साध्यतावच्छेदकविशिष्टसाध्येत्यर्थः, 'तादृशहेतिति हेतुतावच्छेदक-विशिष्टहेतित्यर्थः, 'ज्ञानस्य विरोधिविषयकं यद्विषयकं ज्ञानमिति योजना, 'ज्ञानं' ज्ञानसामान्यं,तेन घटादिविषयकस्य यस्य कस्यचित् समूहालम्बनज्ञानस्य तादृशज्ञानविरोधिबाधादिविषयकत्वेऽपिनाति-प्रसङ्गः, स्वावच्छिन्नविषयकत्वव्यापकतादृशज्ञानविरोधिविषयिता-कधर्मवत्त्वमिति तु फलितार्थः, अत्र च विषयितानिष्ठं स्वरूपसम्ब-न्धात्मकतादृशज्ञानविषयविषयकग्रहप्रतिबन्धकतावच्छेदकतात्मक-तादृशज्ञानविरोधित्वमेव निवेशनीयं न तु विषयनिष्ठं निर्व्याध्य-तादृशज्ञानविरोधित्वं, तस्यैव लक्षणत्वसम्भवेन शेषवैयर्थ्यप्रसङ्गात्, अत्र च विषयनिष्ठस्य निर्व्याधितादृशज्ञानविरोधित्वस्यैव तद्-पेक्षया लघुतया तदेवाह, 'तादृशज्ञानविरोधित्वं'वेति, तादृशज्ञान-विरोधित्वं यदि तादृशज्ञानप्रतिबन्धकतायच्छेदकस्वावच्छिन्न-विषयितानिरूपितधर्मवत्त्वं तदा पूर्वनिरुक्तयथाश्रुतमूलार्थ एव पर्य्यवसानात् निर्व्वह्निः पर्व्वतोवह्निमानित्यादिस्थलीयदोषाव्याप्ति-तादवस्थ्यमिति तन्निर्व्वक्ति, 'ज्ञानविरोधित्वेति, 'तद्विषयविषयकेति, तथाच निर्व्वह्निः पर्व्वतोवह्निमानित्यादौ तादृशज्ञानविरोधि-ज्ञानाप्रसिद्धावपि तद्विषयविषयकस्य निर्व्वह्निः पर्व्वत इतिज्ञानस्य प्रतिबन्धकं यद्वह्निमान् पर्व्वतइतिज्ञाने तद्विषयतासामानाधिकरण्येन यद्वह्निमत्पर्व्वतादिरूपतत्स्थलीयाश्रयाश्रिताद्यौ लक्षणसमन्वयः।

अथ घटवद्भूतलादिरूपोद्देश्यनपदार्थविषयकसमूहालम्बना
त्मकपक्षतावच्छेदकावच्छिन्नविशेष्यक--साध्यतावच्छेदकविशिष्ट-
साध्य-तद्व्याप्यहेतुप्रकारकज्ञानविषयविषयकघटवद्भूतलादिज्ञान
प्रतिबन्धकज्ञानविषयघटाभाववद्भूतलादावतिव्याप्ति । नव
पक्षतावच्छेदकावच्छिन्नविशेष्यक-साध्यतावच्छेदकविशिष्टसाध्य-
तन्निरूपितश्यामिविशिष्टहेतुतावच्छेदकावच्छिन्नप्रकारकग्रहत्वव्या
पकविषयिताघटितधर्म्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकता
वच्छेदकत्वावच्छिन्नविषयिताकधर्म्मवत्त्वनिवेशान्न दोष घट-
वद्भूतलादिविषयितायास्तादृशग्रहत्वाव्यापकत्वादिति वाच्य ।
यत. पर्व्वतादौ वह्निमत्साध्यनवगाहिनो निर्व्वह्नि पर्व्वत
इतिज्ञानस्य या वह्निप्रकारकत्वादिनिरूपिता निर्व्वह्नित्वादि
प्रकारितानिरूपितपर्व्वतादिविषयिता सैवानार्य्यत्वविशिष्ट
तया वह्निमान् पर्व्वतइत्यादिज्ञानप्रतिबध्यतावच्छेदिका तस्याश्च
निर्व्वह्नि पर्व्वतोवह्निमानित्याहार्य्यज्ञानसाधारण्ये मानाभावात्
आहार्य्यज्ञानसामग्र्यास्तादृशविषयिताप्रयोजकत्वासिद्धे विप
रीतज्ञानाभावघटितायास्तादृशविषयिताप्रयोजकानाहार्य्यज्ञानसा
मग्र्याश्चाहार्य्यज्ञानाजनकत्वात् तादृशग्रहत्वव्यापिका च वह्नि
मत्त्वादिप्रकारितानिरूपिता तादृशपर्व्वतादिविषयिता सा च न
प्रतिबध्यतावच्छेदिकेति निर्व्वह्नित्वादिप्रकारितानिरूपितपर्व्व
तादिविषयितात्वेन* निर्व्वह्नि पर्व्वत इत्यादिज्ञानीयविषयितापि

---

* व्यापकतावच्छेदकधर्म्मप्रकारणाव्यापकस्यापि व्यापकत्वस्वीकारात् ।

तथाविधग्रहत्वव्यापिकेति चेत् तर्हि विषयितात्वादिना घटत्वद्-भूतलादिविषयितानामपि तद्व्यापकतया उदासीनपदार्थवारण-मशक्यं। नैवं, यद्रूपावच्छिन्ने यद्रूपावच्छिन्नप्रकारकत्वत्वावच्छिन्नं तादृशग्रहत्वव्यापकं तद्रूपावच्छिन्नविशेष्यक-तद्रूपावच्छिन्नप्रकारक-ग्रहत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वावच्छि-न्ननिरूपितविषयिताकधर्मवत्त्वस्य विवक्षणीयतया सर्वसामञ्ज-स्यादिति दिक्। अत्र चाम्बरसूत्रनाथ 'केचिदिति, स च उक्त-युक्त्या निर्वह्निर्वह्निमानित्यादिस्थलीयदोषासंग्रहेण। नच धर्मि-तावच्छेदकत्वप्रत्यासत्त्या वह्निप्रकारकज्ञानं प्रति वह्न्यभावप्रकारक ज्ञानस्य प्रतिबन्धकतायां निर्वह्निर्वह्निमानित्याकारकज्ञानप्रतिबन्धकतामादाय लक्षणसमन्वयस्तत्रापि सम्भवतीति वाच्यं। तादृशप्रतायां पर्वतोवह्निमानित्यादौ वह्न्यभाववदुद्धुद्यादेर्दोषताप्रसङ्गात्*।

केचित्तु यादृशपक्षक-यादृशसाध्यक-यादृशहेतौ यावन्तो दोषाः सम्भवन्ति तावदन्यान्यत्वं, एक-

---

* न चैवं कथं तादृशग्रहत्वव्यापक यद्रूपावच्छिन्नप्रकारकत्वत्वावच्छिन्न तादृशविषयिताघटितधर्मावच्छिन्नप्रतिबध्यतेत्यादि वक्तव्यं तथाच हृदो वह्निमानित्यादिज्ञानीयवह्निप्रकारिताया पर्वतीवह्निमानित्यादिज्ञानीयवह्निप्रकारिताव्यापकतया तद्घटितधर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदिका वह्न्यभावत्वावच्छिन्नप्रका-रिता न तु वह्न्यभाववदुद्धुदत्वविषयिता इति वक्तव्यं तथातित्यातिरिति वाच्यं। अप्र-सिद्धिविशेषणत्वस्यावच्छेदकत्वनिवेशात्।

माचदोषस्थले च तत्त्वमेव हेत्वाभासत्वं । स-
चातिरिक्त एवान्योन्याभाव इति न वैयर्थ्यं । पञ्च-
विधभेदोक्तिस्तु तत्सम्भवस्थलाभिप्रायेण व्यभिचारादेः
साध्यादिभेदनियन्त्रितत्वात् शब्दाभेदमात्रस्य चा-
किञ्चित्करत्वादिति प्राहुः ।

'यादृशेति सर्व्वत्र यद्रूपावच्छिन्नार्थकं, 'तावदन्यान्यत्वमिति, अत्र च यादृशपक्ष साध्य-हेतुकस्थले यादृशदोषज्ञानस्य प्रतिबध्यज्ञानं प्रसिध्यति यथा निर्व्वह्निः पर्व्वतोवह्निमान् धूमादित्वादौ वह्नियिशिष्टपर्व्वतादिरूपाश्रयासिद्धि धूमाभावविशिष्टनिर्व्वह्निरूपस्वरूपासिद्धयादीनां ज्ञानस्य, तत्र तादृशदोषाणां ग्राह्याभावतद्ग्राह्यरूपतद्घटकभेदेन विशेषण-विशेष्यभावभेदेन च भिन्नानामनुगतेन विशिष्टपक्षे विशिष्टसाधनवैशिष्ट्यग्रहविरोधित्वरूपासिद्धित्वादिनैव तादृशान्यान्यत्वघटकभेदप्रतियोगिविधया निवेशेन तु वह्निविशिष्टपर्व्वतत्व-निर्धूमत्वविशिष्टनिर्व्वह्नित्वादिना, प्रयोजनविरहात्, यादृशदोषविषयकज्ञानस्य प्रतिबध्यज्ञानम प्रसिद्धं यथा तत्स्थलीयस्य * निर्व्वह्निर्व्वह्निमानित्यादिस्थलीयस्य च बाधादेर्ज्ञानस्य, तादृशदोषाणामगत्या वह्न्यभावविशिष्टनिर्व्वह्नित्व-वह्न्यभावव्याप्यविशिष्टनिर्व्वह्नित्व-निर्व्वह्निनिष्ठवह्न्यभाव-

---

* निर्व्वह्निः पर्व्वतोवह्निमानित्यादिस्थलीयस्येत्यर्थः ।

त्व-निरूपितवृत्तिभावव्याप्यत्वादिनाननुगतरूपेणैव सिद्धिः। अत्र च विशिष्टभिन्नभिन्नत्वस्य शुद्धविशेष्यसाधारणतया * सर्वमाकाशवदित्यादावाकाशाभावविशिष्टसर्वादिरूपबाधादिभिन्नत्वस्याप्रसिद्धतया च तत्तद्विशिष्टनिरूपितविषयितान्यतमविषयितानिरूपकतावच्छेदकधर्मवत्त्वमेवाभिमतं। अयञ्च प्रकारो यादृशपक्ष-साध्य-हेतुकस्थले उक्तसमूहालम्बनानुमितेरप्रसिद्धिस्तत्रैवादरणीयः। यत्र तु तत्प्रसिद्धिस्तत्र लाघवाद्ययाश्रुतमूललक्षणमेव साधीयः, शब्दभेदस्याकिञ्चित्करतायाः स्वयमेव वक्ष्यमाणत्वादित्यवधेयं। यत्राप्ययासिद्धादिरेकविध एव दोषः प्रतिबध्यज्ञानञ्च प्रसिद्धं महानसत्ववान् पर्वतोवह्निमान्धूमादित्यादौ तत्र विशिष्टवैयधिकरण्यविरोधित्वादिरूपाप्ययासिद्धित्वादेरेव दोषसामान्यलक्षणत्वसुचितं न तु महानसत्वाद्यभावविशिष्टपर्वतत्वाद्यवच्छिन्नतादृशाभावव्याप्यविशिष्टपर्वतत्वाद्यवच्छिन्नभिन्नभिन्नत्वस्य निरुक्तसमूहालम्बनानुमितिविरोधित्वस्य च गौरवादित्याशयेनाह, 'एकमात्रदोषस्थल इति एकविध एव यत्र दोषस्तद्विषयकज्ञानप्रतिबध्यज्ञानञ्च प्रसिद्धं तादृशस्थल इत्यर्थः, तेन ग्राह्याभाव-सहकार्यभेदेन विशेषण-विशेष्यभावभेदेन च सर्वत्र दोषाणां नानात्वसम्भवादेकमात्रदोषस्थलस्याप्रसिद्धत्वेऽपि पर्वतान्यः पर्वतोवह्निमान् धूमादित्यादावेकविधमात्रदोषस्थले ग्राह्याभाव-तदा-

---

* पक्षाभावविशिष्टह्रदादिभिन्नभिन्नत्वस्य ह्रदादिसाध्यकस्थलेत्यर्थः विशिष्टवैयधिकरण्यादतिरिक्तत्वात्।

प्यरूपघटकादिभेदेन विभिन्नाश्रयासिद्धयादीनामनुगमकरूपाभावे-
नान्यतमत्वस्य लक्षणताया आवश्यकत्वेऽपि न क्षति । 'तत्त्व' तादृ
शत्वं निरुक्ताश्रयासिद्धित्वादिकमिति यावत् । इदमुपलक्षणं
यत्र परामर्शविरोधिनो व्यभिचार-विरोधासिद्धयस्त्रयोदोषा न तु
बाध-प्रतिरोधौ पर्व्वतोवह्निमान् ह्रदत्वादित्यादौ परामर्शविरो-
धित्वमेव सामान्यलक्षण, यत्र च बाध-प्रतिरोधासिद्धयोदोषाः
न तु व्यभिचार-विरोधौ ह्रदोवह्निमान् धूमात् काञ्चनमय-
ह्रदोवह्निमान् धूमात् ह्रद काञ्चनमयवह्निमान् धूमात् ह्रदोवह्नि-
मान् काञ्चनमयधूम दित्यादौ च तत्र विशिष्टपक्षे विशिष्टसाध्य-
विशिष्टसाधनयोर्वैशिष्ट्यावगाहि यज्ज्ञान तद्विरोधित्वमेव तथा,
एव यत्र व्यभिचारासिद्धी एव दोषौ काञ्चनमय पर्व्वतो
धूमवान् वह्नेरित्यादौ तत्र विशिष्टपक्षविषयक-व्याप्तिविशिष्ट
साधनग्रहविरोधित्वादिक तथेत्यपि बोध्य । ननु तत्तद्धर्म्मावच्छि-
न्नभिन्नभिन्नत्वरूपलक्षणघटकतत्तद्धर्म्माणा भागासिद्धतया हेत्वा-
भासमामान्येतरभेदानुमापकत्वेऽपि व्यभिचारावारकतया तद्वि-
तरामर्थैयर्थ्यम् इत्यत आह, स चेति, स चान्योन्याभावोऽतिरिक्त-
एवेति योजना। 'स च' तत्तद्धर्म्मावच्छिन्नप्रतियोगिताकभेदकू-
टावच्छिन्नप्रतियोगिताकः, 'अतिरिक्तः' तत्तद्धर्म्मातिरिक्त, तथाच
धर्म्मिभेदान्न वैयर्थ्यं । तत्तद्धर्म्मावच्छिन्नभेदमात्रावच्छिन्नप्रतियो
गिताकान्योन्याभावस्य स्वप्रतियोगितावच्छेदकीभूतभेदप्रतियोगि

---

* तत्तद्धर्म्मावच्छिन्नभिन्नभिन्नत्वरूपान्यतमत्व श्रवैयर्थ्यं मत्यय ।

तावच्छेदकतत्तद्धर्मस्वरूपत्वेऽपि तादृशभेदकूटावच्छिन्नप्रतियोगिताकभेदस्य नानाधर्मेषु कल्पनापेक्षया तद्विशिष्टस्यैकस्य भेदस्य लाघवेन कल्पयितुं युक्तत्वादित्यभिप्राय । एतच्च यथाश्रुताभिप्रायेण, तत्तद्धर्मावच्छिन्ननिरूपितविधयितान्यतमविधयितानिरूपकतावच्छेदकधर्मस्वरूपस्य लक्षणत्वे चाधिकविशेषणकतया विशेषणसार्थक्यमित्यवधेयम् । ननु साध्यादिभेदेन लक्षणभेदे ह्रदोवह्निमान् धूमादित्यादिश्लोकस्य लक्षणस्य पञ्चविधहेत्वाभाससाधारण्यासम्भवात्ताद्दशलक्षणाक्रान्तानां पञ्चविधत्वोक्तयसङ्गतिरित्यत आह, 'पञ्चविधहेतूक्तिरिति पञ्चविधत्वोक्तिरित्यर्थः, 'तत्सम्भवस्थलेति यत्र पञ्चानामेव हेत्वाभासानां सम्भवः गौरश्वो घटत्वादित्यादौ तत्-श्लोकलक्षणाक्रान्तस्य पञ्चविधत्वाभिप्रायेणेत्यर्थः । ननु लक्षणाननुगमादितरभेदानुमाने भागासिद्धिरित्यत आह, 'व्यभिचारादेरिति, 'साध्यादिभेदनियन्त्रितत्वात्' साध्यादिभेदनियन्त्रितलक्षणतावच्छेदकत्वात्, तथाच लक्षणस्यैव लक्ष्यतावच्छेदकधर्म्यननुगमान्न भागासिद्धिरिति भावः । नन्वेवमप्यनुगतोयमसम्भवान्नायं प्रकारः साधीयानित्यत आह, 'शब्दाभेदस्येति । इदं पुनरिहावधेयं, तावदव्याप्यत्वं इतरभेदानुमापकमेव न तु दोषपदप्रवृत्तिनिमित्तं, तथा सति निर्वह्नित्वविशिष्टे वह्निसाधने धूमोद्भूतत्वादौ दुष्टपक्षस्य वह्न्यभावविशिष्टनिर्वह्नित्वाद्यवच्छिन्नसाध्यतमवदर्थक-तया निर्वह्नित्वविशिष्टे वह्निसाधने इत्यादेरनन्वितार्थकत्वप्रसङ्गात्, किन्तु हेत्वन्यनिर्वह्नित्वविशिष्टविशेष्यक-वह्न्यनुमितिप्रयोजकत्वार्थकत्वासम्भवात्, किन्तु अभावप्रयोजकभ-

मान्यवृत्तिविषयितानिरूपकत्वमेव तथा, उक्तस्थले च प्रकारता प्रकारतानिरूपितव्याप्तिप्रकारतानिरूपितधूमत्वावच्छिन्नप्रकारतायाश्चोभयमेव साधनपदार्थः, प्रकारतारूपपदार्थेऽपरपदार्थैक-देश्यग्नित्वप्रकारतानिरूपकप्रकारतायाश्च पक्षान्तर्वह्निपदप्रति-पाद्यस्य वह्निनिष्ठत्वस्य स्वरूपसम्बन्धेन, साधनपदार्थोक्तप्रका-ताद्ये च समभ्यर्थस्य निर्वह्नित्वविशिष्टविशेष्यताया निरूपित-त्वसम्बन्धेनान्वयः, साधनपदोत्तरसप्तम्या निरूपकत्व द्वित्वस्यार्थः, निरूपकत्वे च निरुक्तसाधनपदार्थयोः पृथगन्वयः, तदन्वित-निरूपकत्वे च द्वित्वान्वयः, द्वित्वान्वितताश्रयनिरूपकत्वयोश्च दोषपदार्थघटकाभावेऽन्वयः, तथाच निर्वह्नित्वविशिष्टविशेष्य-तानिरूपितवह्निप्रकारतानिरूपकत्वस्य ताट्टशविशेष्यतानिरूपिता या वह्निप्रकारतानिरूपितव्याप्तिप्रकारतानिरूपितधूमत्वावच्छिन्न-प्रकारता तन्निरूपकत्वस्य च द्वयीरभावप्रयोजकभ्रमान्यवृत्ति-विषयितानिरूपकत्वानित्येवान्वयबोधः। प्रतिबन्धकीभूतभ्रमविष-यितानिरूपकाभावादिमत्त्वमादाय पर्व्वते वह्निसाधने धूमोदृष्ट-त्वादिप्रयोगवारणाय विषयितायां भ्रमान्यवृत्तित्व निवेशितं। दोषघटके केवलसाध्याभावादौ दोषव्यवहाराभावात् अत्रायं दोष-त्वादौ स्वविषयकनिश्चयाव्यवहितोत्तरानुमितिनिष्ठताट्टयोभया-भावाधिकरणतात्व व्यापकविरोधिविषयिताप्रयोज्यताकधर्म्म एव दोषपदार्थ इति दिक्।

स्यादेतत्, शब्दोऽनित्य. शब्दत्वात् इत्यत्रासाधा-

णोऽव्याप्ति सर्वसाध्यवद्व्यावृत्तेरभावात्, एवं शब्दोऽनित्यः कृतकत्वादित्यस्य सत्प्रतिपक्षे नित्यत्वव्याप्याद्रव्यत्वादावपि पक्षस्य तदभावविरहादित्याशङ्क्य तयोरलक्ष्यत्वेन निराकृतं, 'दशावि-शेष इति, 'हेतोः' सद्धेतोः, 'असाधारणः' पक्ष-मात्रवृत्तिः, सत् प्रतिपक्षोविरोधिपरामर्शो यस्य स तथा, तायोर्दशाविशेषे हेतौ सर्वसाध्यवद्व्यावृत्त-त्वस्य पक्षे साध्याभावव्याप्यवत्त्वस्य च भ्रमदशायां, 'आभासत्वात्' अनुमित्यजनकत्वात्, 'तद्बुद्धेः' हे-त्वादौ साध्यवद्व्यावृत्तत्वादिबुद्धेः, प्रतिबन्धकत्वं परमायाति, न तु तद्विषयस्य दोषत्वं, असत्त्वात् अन्यथा बाधभ्रमेणानुमित्यनुदयात् तस्यापि दोषत्वं स्यात्, कोहि साध्याभाव-तद्व्याप्यवत्ताभ्रमयोरनुमिति-विरोधित्वे विशेषः। निर्युक्तिकस्तु प्रवादेन ज्ञेयः।

असाधारणस्य पक्षवृत्तित्वे सति साध्यव्यापकीभूताभाव प्रतियोगितात्मकस्य सत्प्रतिपक्षस्य च पक्षनिष्ठसाध्याभाव-व्याप्यस्वरूपस्य बुद्धेर्विरोधिविषयकतया साध्यवत्ताज्ञानविरो-

धिलं निर्व्विवादमेव, एवञ्च तज्ज्ञानदशायां हेतोरनुमित्य-जनकत्वात्तदुच्छेदः प्रतिबन्धकत्वमावश्यकमित्येतादृशयथाश्रुतार्थपरस्य 'दशाविशेषदलादिमूलस्यानुत्थितिः अन्यथा साधारणादिज्ञानस्य प्रतिबन्धकतायाऽपि व्यवस्थापयितुमुचितत्वादतस्तादृशमूलमन्यथा व्याख्यातुमवतारणिकामाह, 'स्यादेतदिति, 'इत्यत्रासाधारणे' एतत्स्थलीयासाधारणरूपदोषे हेतुविशेष्यकभ्रमविषये सर्व्वसाध्यवद्वृत्तित्वात्मके, 'अव्याप्तिरिति, तद्विषयकत्वस्य निरुक्तानुमित्यप्रतिबन्धकहेत्वविषयकज्ञानसाधारणतया तादृशप्रतिबन्धकतातिरिक्तवृत्तित्वादिति भावः। ननु केवलं सर्व्वसाध्यवद्वृत्तित्वं न दोषः अपितु साधनवृत्तित्वविशेषितं; तादृशविशिष्टविषयकत्वन्तु न प्रतिबन्धकतातिरिक्तवृत्तीत्यतआह, 'सर्व्वेति, 'तत्र' हेतौ, 'असत्वात्' अवृत्तेः, साध्यवति पक्षे हेतोर्वृत्तेरिति शेषः, तथाच तादृशविशिष्टस्याप्रसिद्धा तस्य दोषत्वासम्भवेन प्रसिद्धस्याविशिष्टसाध्यवद्वृत्तित्वस्यैव तत्र दोषतायाऽऽवश्यकत्वमिति भावः। 'अद्रव्यद्रव्यत्वादाविति असमवेतद्रव्यत्वादावित्यर्थः, असमवेतत्वस्य ध्वंससाधारण्यतया नित्यत्वव्याप्यत्वासम्भवादिशेष्यांशनिवेशः। अत्राप्यनन्तरं अव्याप्तिरित्यनुषज्यते, तद्विषयकत्वस्य पक्षविषयकज्ञानसाधारणतया प्रतिबन्धकातातिरिक्तवृत्तित्वादिति भावः। ननु केवलं नित्यत्वव्याप्याद्रव्यद्रव्यत्वादिकं न तत्र दोषः अपितु पक्षनिष्ठतावृत्तैव तादृशविशिष्टविषयकत्वञ्च प्रतिबन्धकतानतिरिक्तवृत्त्येवेत्यत आह, 'पक्षस्येति, तथाच पक्षघटितविशिष्टाप्रसिद्धया पक्षाघटितस्यैव दोषत्वमावश्यकमिति भावः।

'तयोः' तादृशस्यलीयदोषत्वेनाभिमतयोरुक्तधर्म्मयोः । गन्धौ-नित्यः गन्धत्वादित्यादौ गन्धत्वादिविशेषकनित्यत्वव्याप्यत्वादि-ज्ञानविषयविशिष्टस्य प्रसिद्धा तत्राव्याप्तेः गन्धानाश्रयत्वाद-लक्ष्यत्वाभ्युपगमेन तत्परोक्षादव्याप्त्यसम्भवदुक्तिकत्वात् हेतु-पदं महेतुपरतया व्याचष्टे, 'हेत्वोरिति, 'साध्यवद्भावाहत्त-त्वादिरूपासाधारण्यस्य साध्याभावव्याप्यवत्पक्षकत्वरूपमत्-प्रतिपत्तिलत्वस्य चासम्भवादसाधारण-मत्प्रतिपक्षपदे अन्यथा व्याचष्टे, 'असाधारण इति, 'तथा' प्रकृते मत्प्रतिपक्षपदार्थे, सदे-त्वौर्दृष्टत्वरूपाभासत्वायोगादाभासपदमन्यथा व्याचष्टे, 'आभासत्वा-दिति, 'तदुक्तेरित्यत्र तत्पदस्य हेतुपरत्वं न सम्भवति सत्प्रति-पक्षस्थले प्रतिबन्धकज्ञानस्य हेतुविषयकत्वानियमाद्धेतुविष-यकत्वकथनस्याप्रयोजकत्वाद्बुद्धिपदस्यापि बुद्धिसामान्यपरत्वं न सम्भवति हेत्वादिमात्रविषयकज्ञानस्याप्रतिबन्धकत्वादतस्तत् पदस्य हेतु-पक्षोभयपरतया बुद्धिपदस्य साध्यवद्भावहत्त्व-साध्या-भावव्याप्यवत्त्वावगाहिबुद्धिपरतया तद्बुद्धिपदं हेतुविषयकसाध्य-वद्भावहत्त्व-पक्षविषयकसाध्याभावव्याप्यवत्ताबुद्धिपरतया व्याचष्टे, 'तद्बुद्धे रिति, तयोरलक्ष्यतालाभाय हेत्वोरित्यनन्तरं स्तम एवकारो-ऽत्र योजनीयः, तदयमर्थो भाव्य व्याचष्टे, 'प्रतिबन्धकत्वं परमायाती-ति, 'परं' केवलं, एवकारव्यवच्छेद्यं स्फुटयति, 'न त्विति, 'तद्विष-यस्य'* तादृशबुद्धिविषयस्य, 'दोषत्वं' दोषलक्षणलक्ष्यत्वं, 'असत्त्वात्' लक्ष्यताप्रयोजकस्यासत्त्वात्, प्रतिबन्धकीभूतज्ञानप्रमात्वस्यैव तद्विषय

* प्रतिबन्धकीभूतज्ञानविषयस्येत्यर्थः ।

लक्ष्यताप्रयोजकत्वादिति भावः। 'असत्त्वात्' विशिष्टस्याप्रसिद्धत्वा-दिति तु नार्थः, एकदेश एवाव्याप्तेराशङ्कितया विशिष्टाप्रसिद्धेस्तद-लक्ष्यतानिर्व्वाहकत्वविरहेणानुपयोगात्। 'अन्यथा' प्रतिबन्धकीभूत-भ्रमविषयस्यापि दीपत्वे,'बाधभ्रमेण' पक्षे साध्याभावभ्रमेण, 'तस्य' तद्विषयसाध्याभावादेः। नन्वेवमुत्कर्षस्थले दृष्टान्तविशेषे हेतोर्दुष्टता-प्रवादोनोपपद्यत इत्यतआह, 'निर्युक्तिकस्खलति।

यत्तु ज्ञानस्य यदनुमितिप्रतिबन्धकतावच्छेदकं तद्दत्त्वं तत्प्रकारकप्रमाविषयत्वञ्च लक्षणार्थः। तच्च द्विविधं विषयरूपं साधारण्यादि, बाधे च प्रमित-साध्याभाववान् पक्षः, तद्विषयत्वेन ज्ञानस्यानुमिति-प्रतिबन्धकत्वात्। अविषयरूपञ्च विरोधिसामग्री-कालीनत्वादिकं, तद्दत्त्वञ्च ज्ञानस्यैव तद्विषयस्य हेतोरपीति। तन्न, तद्दत्त्वं हि हेतोर्नाभेदेन, बाधे तदभावात्। अतएव नाश्रयतया, वह्निव्यभि-चारिद्रव्यत्वादिमति धूमेऽतिप्रसङ्गाच्च, साध्याभाव-वत्पक्षस्यैव साध्याभाववद्वृत्तिहेतोर्ज्ञानस्य प्रति-बन्धकत्वात् साधारण्यादिविषयकत्वस्य ज्ञाननिष्ठ-स्यैव प्रतिबन्धकतावच्छेदकत्वात्। सत्तादिसा-

ध्वंसे ज्ञाने अतिप्रसङ्गाच्च यथाकथञ्चित् तद्वत्त्वं चातिप्रसञ्जकत्वात्, विरोधिसामग्रीसमवहितोऽपि च लिङ्गपरामर्शो न स्वसाध्यकानुमितेः प्रतिबन्धको-मणिसमहितो वह्निरिव दाहस्य।

उपदर्शितस्थलेऽपि दण्डाविशिष्टे हेतोर्दुष्टत्वमङ्गीकुर्वन्तस्तत्-साधारण्याय लक्षणमन्यथा व्याचक्षते ये तन्मतमुपन्यस्य दूष-यति, 'यस्मिन्' 'ज्ञानस्येति, षष्ठ्यन्तार्थस्य यत्पदार्थेऽन्वयः, तथाच ज्ञानसम्बन्धित्वविशिष्टं यद्रूपावच्छिन्नं यत्किञ्चित्सम्बन्धेन[*] अनु-मितिप्रतिबन्धकतावच्छेदकमित्यर्थः, अत्राप्यवच्छेदकत्वे अनति-रिक्तप्रसित्वं उक्तयुक्तेः, तत्पदमुभयत्र यद्रूपविशिष्टपरं, 'लक्षणार्थः' व्युत्क्रमेण लक्षणयोरर्थः। नन्वेवमपि कथं दर्शितसत्प्रतिपक्षा-दौ लक्षणसमन्वयः तत्र प्रतिबन्धकतावच्छेदकीभूतविशिष्टविषयक-लक्ष्यासिद्धेः कथं वा व्यभिचारादिकमादाय सव्यभिचारादावेव लक्षणगमनं व्यभिचारादिविषयकत्वस्यैव प्रतिबन्धकतावच्छेदक-तया व्यभिचारादेरतथात्वादित्यत आह, 'सद्धेति सद्धाप्रति-बन्धकतावच्छेदकत्वेत्यर्थः, [†]सद्धामात्रकार्यप्रतिबन्धकतामादाया-दित्याया सद्धेतोर्दुष्टताया असम्भवं व्युत्पादयितुमाह,'बाधे चेति बा-धज्ञाननिष्ठप्रतिबन्धकतायाश्चेत्यर्थः, अवच्छेदक इति शेषः, पक्षस्य बाधत्वं साध्याभावत्वं निविशते न तु वैशानिकं' इति सूचयितुं

---

* विशिष्ट-स्वरूपावच्छिन्नसम्बन्धेनेत्यर्थः।

† धर्मविशिष्टज्ञानमात्रेत्यर्थः।

च्छेदको न तु तद्विशिष्टद्रव्यत्वादि. तदाश्रयश्च न धूमादिरित्याश्रयं निराकरोति, साध्याभाववदिति, 'साध्याभाववद्वृत्तिहेतोर्ज्ञानमेति लाघवहेतुविषयकज्ञानमेत्यर्थः, तथाच वह्न्यभाववद्वृत्तिद्रव्यत्वादिकमपि विषयतया अवच्छेदकमिति भावः। ननु धूमादेर्महानसीय-धर्मिणोऽपि वह्नौ साध्ये धूमोदृष्ट इत्यादिव्यवहारस्य नापत्ति-सम्भव उक्तयुक्त्या तद्धेतुकानुमितिविरोधिदृष्टत्वस्यैव तत्र दुष्टताव्यवहारनियामकत्वात् अन्यथा तत्राप्यप्रतीकारादित्यतः अन्यत्वानिप्रसङ्गमाह, 'साधारण्यादिविषयकत्वस्येति, 'ज्ञान-निष्ठस्य' ज्ञानवृत्तित्वविशिष्टस्य, 'सत्तादीति सत्तावान् ज्ञाना-दित्यादौ ज्ञानहेतुकसत्ताद्यनुमितिप्रतिबन्धकतावच्छेदक ज्ञाना-भे सत्ताद्यभाववद्वृत्तित्वावगाहित्वमादाय सत्त्वे साध्ये ज्ञान दुष्टमित्यादिव्यवहारापत्तेरित्यर्थः, येन केनापि सम्बन्धेन तद्वत्त्व विवक्षणीयमित्यपि दूषयति, 'यथाकथञ्चिदिति, 'अतिप्रसङ्गकत्वा दिति उक्तधर्मिमादाय सत्तादिसाध्यकज्ञाने धूमाद्यभे यद्वह्न्यभाववद्वृ त्तित्वावगाहित्व एकज्ञानविषयत्वादिसमन्वेन तद्वत्त्वमादाय वह्न्यादि साध्यकधूमादावपि दुष्टत्वव्यवहारापत्तिरित्यर्थः, सत्प्रतिपक्षस्थले विरोधिसामग्रीसमकालोनत्वेन प्रतिबन्धकतामादाय यत्किञ्चित्सत्त्व-मुपपादित तद्दूषयति, 'विरोधिसामग्रीति, न स्वसाध्यकानुमिते प्रतिबन्धक इति न स्वजन्यानुमितिप्रतिबन्धक इत्यर्थः, कारणत्वप्रति बन्धकत्वयोरैक्यानभ्युपगमादिति हृदयं। विभिन्नरूपेण तदुभयस्यै कालोपगमे प्रतिबन्धिसूचनायाह,'मणीति, न प्रतिबन्धकद्वयमुपजय-ते, तथाच विरोधिकोट्यनुमितिसामग्रीकालोनत्वेन परामर्शादीना

मनुमितिप्रतिबन्धकत्वे मणिसमवहितत्वेन वह्न्यादीनामपि दाह-प्रतिबन्धकत्वापत्तिः, मणिसमवहितत्वापेक्षया लाघवेन मणित्वे-नैव प्रतिबन्धकता कल्पतां इति चेत्, तर्हि विरोधिसामग्रीकालीन-त्वापेक्षया लाघवात् तादृशसामग्रीत्वेन विरोधिपरामर्शत्वे-नैव वा प्रतिबन्धकत्वं प्रकृतेऽपि कल्पयितुमुचितमिति कथं विरो-धिसामग्रीकालीनत्वमादाय लक्षणं सङ्गमनीय तस्य प्रतिबन्धकता-तिरिक्तवृत्तित्वादिति भावः ।

अथ यद्धर्मविशिष्टज्ञाने सत्यवश्यमनुमितिप्रति-बन्धः तदेवात्र प्रतिबन्धकतावच्छेदकमुक्तं भवति च प्रतिबन्धकीभूतविरोधिसामग्रीकालीनत्वादिविशिष्टे परामर्शे तथा इति चेत्, न वा कालादिसाधारण-कारणघटिता सामग्री क्वापि प्रतिबन्धिका विशेषत-मूल तत्सत्त्वे कार्योत्पादस्य दुर्वारत्वात्। किन्तु विरोधिपरामर्शस्तथा। यदि च तत्सत्त्वेऽपि तत्-साध्ये बाधावतारे नानुमितिप्रतिबन्धः प्रामाणिक-स्तदा अप्रामाण्यग्रहाभावस्येव तदभावस्यापि वैशि-ष्ट्यान्तत्र निवेश्यतां, यथा च भ्रम-प्रमासाधारणविरोधि-परामर्शसत्त्वे नानुमितिस्तथा तथाविधबाधादिग्रहे-

पीत्यतिप्रसङ्गः। नचातीतादौ लिङ्गे विरोधिसमवधानकालीनत्वमपि।

कार्योत्पत्तिव्याप्यतावच्छेदकत्वरूपं प्रतिबन्धकतावच्छेदकत्वमेवाभिप्रेत्य विवक्षितं न तु कारणीभूताभावप्रतियोगितावच्छेदकत्वरूपं, तच्च विरोधिसामग्रीकालीनत्वेऽप्यक्षतमेवेत्याह, 'अग्रेत्यादिना, 'यद्यपीति यादृशधर्मविशिष्टनिश्चयाव्यवहितोत्तरक्षणत्वव्याप्यकोऽनुमित्युत्पादस्तादृशरूपपरमेवेत्यर्थः॥* निश्चयत्वनिवेशात् बाधादिविषयकसंशय-संस्काराव्यवहितोत्तरक्षणे कदाचिदनुमित्युत्पादेऽपि न क्षतिः, 'अत्र' एतल्लक्षणे, 'प्रतिबन्धकतावच्छेदकमुक्त्वा' प्रतिबन्धकतावच्छेदकपदेन विवक्षितं, 'भवति चेति,विरोधिकोव्यनुमितिसामग्र्याः प्रतिबन्धकत्वकथनं प्रतिबन्धकसमवधानाव्यवहितोत्तरक्षणे कार्योत्पादस्यावश्यकतया विरोधिसामग्रीकालीनत्वस्य निरुक्तप्रतिबन्धकतावच्छेदकताया आवश्यकत्वदर्शनाय, 'तथा' अवश्यमनुमित्युत्पादः, विरोधिसामग्र्याः प्रतिबन्धकत्वं यदुक्तं तदेवादौ दूषयति, 'न चेति न क्षीत्यर्थः, 'कालादीति घटितान्त' हेतुगर्भविशेषणं, तथाच कारणसमुदायः सामग्री, सा च क्वचिदपि न प्रतिबन्धिका कालादिसाधारणकारणानामपि तदन्तर्निविष्टत्वात् तेषाञ्च प्रतिबन्धकतावच्छेदककोटौ निवेशस्य निष्फलत्वात् प्रतिबध्यकार्य्येऽपि तेषामनुगुणत्वादित्यर्थः। सत्यतिप्रसङ्गे विरोधिकोव्यनुमिति-

---

* तादृशधर्मवत्त्वमित्यर्थे इति पा०।

नीनश्चानस्य फलानुत्पादनियतत्वात्तादृशसामग्रीकालीनत्वस्य निरुक्तप्रतिबन्धकतावच्छेदकत्वं दुरपह्नवमेव, एवं विरोधितया-विधपरामर्शकालीनत्वमादायापि दशाविशेषे सत्प्रतिपक्षितस्य हेतोर्दुष्टत्वमुपपद्यत एवेत्यगो विरोधिपरामर्शकालीनत्वसमग्रीबाधादिभ्रमकालीनत्वमादाय सहेतावतिव्याप्तिमाह, 'यथा-चेति, 'तथाविधेति विरोधिभ्रमसाधारणेत्यर्थः, 'अपीत्यनन्तरं 'नानुमितिरित्यनुषज्यते, तथाच तादृशबाधादिकालीनत्वमपि निरुक्तप्रतिबन्धकतावच्छेदकत्ववदुभयत्वेवेत्यतोऽतिप्रसङ्ग इति बाधादेरनित्यदोषतायाः केनाप्यनुपगमेन दृष्टापत्त्यनवकाशादिति भावः।

यद्यपि यद्विषयत्वेन ज्ञानस्य अनुमितिप्रतिबन्धकत्वं तद्वत्त्वेन वाच्यं, सत्प्रतिपक्षे च विरोधिव्याप्त्यादिकमेव तथा, तद्वत्त्वमपि हेतोस्तज्ज्ञानरूपसम्बन्धेन तस्य समूहालम्बनरूपतया हेतुद्वयविषयत्वादिति, तदपि तुच्छं, साध्याभाववत्पक्षविषयत्वेन साध्याभाववत्पक्षज्ञानप्रमात्वविषयत्वेन वा* ज्ञानस्य प्रतिबन्धकत्वं तस्य च साध्यवत्यपि पक्षे सम्भवादतिव्याप्तेः। विशिष्टविषयत्वेन प्रतिबन्धकत्वं विशिष्टस्य तत्त्वाप्रसिद्धमिति चेत्, तत् किं सर्व्वत्र सत्प्रति-

---

* तद्वैशिष्ट्यज्ञानत्वप्रमात्वविषयत्वेन वेति पा०।

पक्षे साध्याभावव्याप्यवान् पक्षः प्रसिद्धः यथाकथञ्चित्-सम्बन्धेन तद्वत्त्वस्यातिप्रसक्तं धुमादेरपि ज्ञानरूपेण तदाश्रयाश्रयत्वादिना वा सम्बन्धेन व्यभिचारादि-मत्त्वात्, यादृशसम्बन्धावगाहित्वेन ज्ञानस्य प्रति-बन्धकत्वं तेन तद्वत्त्वस्य न सर्वत्र सत्प्रतिपक्षिते हेतावस्ति च क्वचित् सङ्केताविति कृतं पल्लवितेन ।

विरोधिपरामर्शकालोनत्वमादाय सर्वत्र सत्प्रतिपक्षिते दुष्टत्व' नोपपादयितुं शक्यत इत्याह, 'न चेति नहीत्यर्थः, 'अतीतादा-विति, तथाचातीतादिसङ्केतौ विरोधिपरामर्शदशायां भवन्मत-सिद्धं सत्प्रतिपक्षितत्वं नोपपद्यत इति भावः । सत्प्रतिपक्षिते सङ्केतौ विरोधिव्याप्यवत्पक्षस्याप्रसिद्धावपि प्रतिबन्धकी-भूतभ्रमविषयप्रसिद्धविरोधिव्याप्यादिरेव वा दोष इति मतं दूषयति, 'यदपीति, 'यद्विषयकत्वेनेति, तृतीयार्थः स्वरूप-सम्बन्धरूपावच्छेदकत्वं, न त्वनतिरिक्तवृत्तित्वं, तथा सति विरोधिव्याप्यादेर्दोषत्वानुपपत्तेः, प्रतिबन्धकतायां 'ज्ञानत्व-विशेषणं कामिनीजिज्ञासादिनिष्ठप्रतिबन्धकतावच्छेदक-धर्मेऽतिप्रसङ्गवारणाय । ननु विरोधिकोटिव्याप्यत्वस्य पर्व-तोवह्निमान्धूमात्, पर्वतीन वह्निमान्जलत्वादित्यादौ प्रतिबन्ध-कीभूतज्ञानविषयसमवायादिसम्बन्धावच्छिन्नपक्षधर्मतायाश्च सत्ते हेतावभावात् कथं तस्य दुष्टत्वमतआह, 'तद्वत्त्वमपीति विरो-

पक्षे साध्याभावव्याप्यवान् पक्षः प्रसिद्धः यथाकथञ्चित्-सम्बन्धेन तद्वत्त्वञ्चातिप्रसक्तं धुमादेरपि ज्ञानरूपेण तदाश्रयाश्रयत्वादिना वा सम्बन्धेन व्यभिचारादि-मत्त्वात्, याहशसम्बन्धावगाहित्वेन ज्ञानस्य प्रति-बन्धकत्वं तेन तद्वत्त्वञ्च न सर्व्वत्र सत्प्रतिपक्षिते हेतावस्ति च क्वचित् सङ्केताविति कृतं पल्लवितेन ।

विरोधिपरामर्शकालीनत्वमादाय सर्व्वत्र सत्प्रतिपक्षिते दुष्टत्वं नोपपादयितुं शक्यत इत्याह, 'न चेति नहीत्यर्थः, 'अतीतादा-विति, तथाचातीतादिसङ्केतौ विरोधिपरामर्शदशायां भवन्मत-सिद्धं सत्प्रतिपक्षितत्वं नोपपद्यत इति भावः । सत्प्रतिपक्षिते सङ्केतौ विरोधिव्याप्यवत्पक्षस्याप्रसिद्धावपि प्रतिबन्धकी-भूतभ्रमविषयप्रसिद्धविरोधिव्याप्यादिरेव वा दोष इति मतं दूषयति, 'यदपीति, 'यद्विषयकत्वेनेति, द्वतीयार्थः स्वरूप-सम्बन्धरूपावच्छेदकत्वं, न त्वनतिरिक्तवृत्तित्वं, तथा सति विरोधिव्याप्यादेर्दोषत्वानुपपत्तेः, प्रतिबन्धकतायां 'ज्ञानानि-ष्ठत्वविशेषणं कामिनीजिघ्रासादिनिष्ठप्रतिबन्धकतावच्छेदक-धर्म्मेऽतिप्रसङ्गवारणाय । ननु विरोधिकोटिव्याप्यत्वस्य पर्व्व-तोवह्निमान्धूमात्, पर्व्वतोन वह्निमान्जलत्वादित्यादौ प्रतिबन्ध-कीभूतज्ञानविषयसमवायादिसम्बन्धावच्छिन्नपक्षधर्म्मतायाश्च सत्वे हेतावभावात् कथं तस्य दुष्टत्वमतआह, 'तद्वत्त्वमपीति विरो-

ष्यिथाव्याप्तिमत्त्वमपीत्यर्थः, 'तज्ज्ञानरूपेति स्वविषयकज्ञान-विषयतावत्त्वेत्यर्थः, तत्त्वस्यविशेषस्याविवक्षितत्वादिति भावः। तादृशसम्बन्धवत्ता प्रकृतहेतावुपपादयति, 'तस्येति विरोधि-व्याप्यादिज्ञानस्येत्यर्थः', 'समूहालम्बनरूपतयेति। नचैवं क्रमि-कपरामर्शस्थले सप्रतिपक्षतानुपपत्तिरिति वाच्यं। तत्रापि तादृशव्याप्यादिप्रकृतहेतुविषयकपरमेश्वरज्ञानादिकमादाय तद-क्तोपपत्तेः। 'साध्याभाववत्पक्षविषयकत्वेन' साध्याभावप्रकारक-पक्षावगाहित्वेन, 'साध्याभावत्पक्षज्ञानेति साध्याभावप्रकारक-पक्षज्ञानाशे ममात्वविषयकत्वेनेत्यर्थः, मतभेदेन विकल्पः, 'तस्य' तादृशज्ञानस्य, 'साध्यवत्यपि पक्षे' पक्षे साध्यवत्यपि सति पक्षस्य साध्यवत्त्वे सत्यपीति यावत्, पर्वतीयवह्निमान्-धूमादित्वादौ ममात्मकबाधादिज्ञाननिष्ठप्रतिबन्धकतावच्छेद-कविषयितानिरूपकवह्न्याभावादेः स्वविषयकज्ञानविषयत्वादि-सम्बन्धेन वैशिष्ट्यस्य हेतौ सत्त्वादिति भावः। इदमुप-लक्षणं, वह्निमान् धूमादित्वादौ विरोधिपरामर्शशून्यकाले-ऽपि तद्विषयविरोधिव्याप्यादिकमादायापि हेतोर्दुष्टत्वप्रसङ्गो-बोध्यः, तत्रापि पक्षे तद्विशिष्टविशेषणकसमूहालम्बनज्ञान-सम्बन्धेन हेतौ तद्वैशिष्ट्यसम्भवात्। अनतिरिक्तवृत्तित्वरूपमेवाव-च्छेदकत्वं विवक्षणीयमित्यभिप्रायेण बाधभ्रमप्रतिबन्धकतामा-दायातिप्रसङ्गस्य उद्धारमाशङ्क्ते, 'विशिष्टेति साध्याभाव-विशिष्टपक्षविषयकत्वमेव प्रतिबन्धकतानतिरिक्तवृत्ति न तु सा-ध्याभावादिमात्रविषयकत्वमित्यर्थः, 'विशिष्टस्य' साध्याभाव-

विशिष्टपक्षः, 'तत्र' बाधस्थले सत्प्रतिपक्षस्थले, सर्व्वत्र तादृशविशिष्टं प्रसिद्धमित्यभिमान', भ्रम निराकरोति, 'तत्किमिति, पक्षावृत्ति-साध्यकसत्प्रतिपक्षे साध्याभावव्याप्यविशिष्टपक्षस्य प्रसिद्धत्वात् 'सर्व्वत्रेति, 'सत्प्रतिपक्षे' सत्प्रतिपक्षतया भवन्मतसिद्ध इत्यर्थः, 'प्रसिद्ध इति, तथाचानतिरिक्तावृत्तित्वरूपमवच्छेदकत्वं विवक्षितु-मयक्यमिति दर्शितातिव्याप्तिर्दुर्व्वारेवेति भावः। तद्दत्त्वघटक-सम्बन्धं वितर्क्यापि दूषयति, 'यथा कथञ्चिदिति, 'अतिप्रसक्तं' सद्धेतुसाधारणं, तथाच पर्व्वतादौ वह्न्यादिमत्त्वे साध्ये धूमादौ दुष्टताव्यवहारापत्तिरिति भावः। तादृशसम्बन्धस्य धूमादिरूप-सद्धेतुसाधारणत्वं स्फुटयति 'धूम देरिति, 'ज्ञानरूपेण' स्वविषयक-ज्ञानविषयत्वेन, 'तदाश्रयाश्रयत्वादिना, आदिना एककालीन-त्वादिपरिग्रहः, 'व्यभिचारादिमत्त्वात्' वह्न्यभाववदवृत्तित्वस-त्त्वात्। ननु यादृशसम्बन्धावच्छिन्नयत्प्रकारतानिरूपितधर्म्मि-विशेष्यताशालित्वेन ज्ञानस्य प्रतिबन्धकत्वं तेन सम्बन्धेन तद्दत्त्व-मेव दुष्टत्वमिति वाच्यं। एवञ्च स्वरूपसम्बन्धावच्छिन्नसाध्याभाव-वदवृत्तित्वादिप्रकारतानिरूपितहेतुविशेष्यताशालित्वेनैव व्यभि-चारादिज्ञानस्य प्रतिबन्धकतया तेन सम्बन्धेन तद्दत्त्वस्य च प्रकृत-हेतावभावात् नातिव्याप्तिरित्याशङ्कां निराकुरुते, 'यादृशेति, 'सर्व्वत्र सत्प्रतिपक्षित इति, ह्रदोवह्निमान् धूमादित्यादिस्थले धूमादिरूपहेतौ व्याप्यतावटक समवायादिसम्बन्धेन वह्न्यभावव्या-प्यधूमत्वादिमत्तायाः सत्त्वात् 'सर्व्वत्रेत्युक्तं। 'क्वचित् सद्धेताविति सद्धेतुतदभावयां क्वचिदित्यर्थः, पर्व्वतो वह्निमान् धूमादित्यादौ

विरोधिपरामर्शसमवधानदशायामपि प्रतिबन्धकतावच्छेदक-प्रकारतासंशयप्रतिबन्ध-तद्भ्रमाद्यादेः तादृशप्रकारतावच्छेदक-स्वरूपादिसम्बन्धेन धूमादिहेतुत्वादितिभावः।

यत्तु ज्ञानसम्बन्धेन तद्धेतुत्वमेव दुष्टत्वं ज्ञानञ्च विशिष्टव्यवहाराद्यनुरोधात् कदाचिदेव क्वचिदेव कस्यचित् सम्बन्धः, एवञ्च विरोधिशङ्कादेर्ज्ञानं विरोधिपरामर्शदशायामेव प्रकृतहेतौ तत्-सम्बन्धः तदैव तत्र दुष्टताव्यवहारात् साध्याभावादेर्ज्ञानन्तु तत्र न कदाचिदपि तथा, परमेश्वरादिसाधारण साध्याभावविशिष्ट-पक्षादेर्ज्ञानन्तु तत्र सर्व्वदैव इति, तत्तु हास्यास्पदमेव, सकला-भियुक्तपुरुषसाधारणस्य नियतव्यवहारस्यासिद्धत्वात् प्रामाणा-विशेषवतां तादृशव्यवहारस्य विपरीतस्यापि सम्भवात्, ज्ञानस्य नियतसम्बन्धत्वासाधकत्वादिति।

'यद्यपीति, स्थाणुत्वाभावस्य तद्ग्राह्यकरादेश्च निश्चये स्थाणुत्वप्रत्यक्ष-शाब्दयोरनुदयात्। नचैवं नर-शिरःकपालं शुचि प्राण्यङ्गत्वादित्यादिनाप्यागम-प्रतिरोधः स्यात्, तत्रानुकूलतर्कभावेन बलवत्तरा-गमविरोधेन च व्याप्तिनिश्चयस्यानुमितेश्चानुत्पत्ते-रितिभावः। [illegible]म्युच्चयमानं प्रत्यक्षं प्रत्यानु-मानिकवाध् शाब्दं

लमिति नरशिरःकपालस्य शुचित्वानुमापकेन तत्सदृशिकप्राण्यङ्ग-
त्वपरामर्शेन स्वतः फलद्वारा चागमजन्यशौचबोधविरोधः स्यादि-
त्यर्थः, स चानुभवविरुद्धः तत्र प्राण्यङ्गत्वज्ञानदशायामपि शाब्दा-
शौचज्ञानस्यानुभवसिद्धत्वादिति भावः। समाधत्ते, 'तत्रेति ता-
दृशाशौचज्ञानप्राक्काल इत्यर्थः, अनुकूलतर्काभावेन व्याप्तिनिय-
यस्य मन्वत्तरागमविरोधेनानुमितेश्चानुत्पत्तेरिति योजना, एवञ्च
वास्तवव्याप्यधर्मस्य येन केनापि रूपेण ज्ञानमेव न विरोधि
किन्तु व्याप्यत्वरूपेण यत्र च प्राण्यङ्गत्वस्य ज्ञानेऽपि व्याप्तिग्राह-
कतर्कविरहेण व्यभिचारशङ्कया शौचव्याप्यत्वेन तज्ज्ञानं न सम्भ-
वति कारणान्तरविरहेण यत्र व्यभिचारशङ्काविरहस्तत्र कथञ्चि-
द्व्याप्तिग्रहेऽपि गृहीताप्रामाण्यकागमतात्पर्यविषयविपरीतविषय-
कत्वेन तत्राप्रामाण्यं गृह्यते तथा च तादृगप्राण्यङ्गत्वज्ञानं न शौचानु-
मितिजनने शाब्दाशौचज्ञानप्रतिबन्धे वा प्रभवतीति समुदितार्थः।
आगमे प्रामाण्यग्रह एव शिष्टपरिग्रहादिनैव भवति, यावच्च तादृश-
परामर्शे नाप्रामाण्यं गृह्यते तावद्भवत्येवागमप्रवृत्तिरिति भावः।
'यद्वेत्यादिग्रन्थेन बाधादिज्ञानस्यानुमित्यतिरिक्तज्ञानाप्रतिबन्ध-
कत्वं व्यवस्थाप्य बाधादेर्लिङ्गासाधारणदोषत्वमेवोपपादितं तत्र
यद्वक्ति, बाधितार्थस्य शाब्दबोधाभ्युपगमेऽनुमितिरप्यन-
पराधासत्याप्रामाण्यग्राहकतया बाधादियहस्य प्रवृत्त्यादिविरोधि-
तोपपत्तेरिति भावः। अत्र कल्पे ग्रन्थकृतोऽनिर्भरमाह, 'यद्वेत्या-
दीति, नन्वानुमानिकबाधादिनिश्चयदशायामपि लौकिकसन्निकर्षा-
दित्, प्रत्यक्षनिश्चयोत्पत्त्या बाधनिश्चयसामान्यस्य प्रत्यक्षप्रतिबन्ध-

कत्वं न सम्भवतीत्यनुमित्यसाधारणप्रतिबन्धकत्वं बाधनिश्चयत्वावच्छिन्नस्याप्यतमतीयद्विषयकनिश्चयत्वेनानुमित्यसाधारणप्रतिबन्धकत्वं तदक्षत्वस्य लक्ष्यतानियोजकत्वाभिप्रायेण 'यद्वेत्यादिग्रन्थस्य बाधे लक्ष्यतोपपादकत्व' सुसंगच्छते इत्यत आह, 'प्रत्यक्षं प्रतीति, समानेन्द्रियजन्यबाधनिश्चयसत्त्वे लौकिकप्रत्यक्षस्याप्युत्पत्तेरानुमानिकेति बाधनिश्चयविशेषणं, 'शाब्दं प्रतीति, तथाच तावतैव लिङ्गासाधारणदोषत्वव्याघात इति भावः । तत्रापि तदप्रतिबन्धकत्वमाशङ्कते, 'योग्यतेति, 'अन्यथासिद्धत्वादिति, बाधादिनिश्चयदशायां योग्यताज्ञानरूपकारणविरहेणैव शाब्दबोधानुत्पादनिर्व्योहादिति भावः । 'तदभावः' बाधादिनिश्चयाभावः, 'तत्त्व' शाब्दबुद्धौ, यद्यपि योग्यतासंशयद्वितीयक्षणे स्मरणाद्यात्मकायोग्यतानिश्चये सति तद्द्वितीयक्षणे शाब्दज्ञानवारणाय तदभावस्य शाब्दबोधहेतुत्वस्यावश्यकत्वं तथापि बाधादिज्ञानस्य शाब्दाप्रतिबन्धकत्वेऽपि निर्विवादोपनीतभाने विशेषप्रतिबन्धकतयैव बाधादेर्लिङ्गासाधारणदोषत्वनिराकरणसम्भवात्तत्त्वेव तन्निराकरोति, 'एवमपीति, 'उपनीतभानविशेषे दोषविशेषाजन्योपनीतभानविशेषं, 'तत्त्वेन' बाधनिश्चयाद्यभावत्वेन, 'दुर्व्वारत्वादिति, बाधादिनिश्चयदशायां अनुमितिरिव तादृशोपनीतभानानुत्पादस्य सर्व्वानुभवसिद्धत्वादिति भावः ॥

इति महामहोपाध्याय-श्रीगदाधरभट्टाचार्य्यविरचिता हेत्वाभासे सामान्यनिरुक्तिदीधितिविवृतिः समाप्ता ॥

कत्वं न सम्भवतीत्यनुमित्यसाधारणप्रतिबन्धकत्वं बाधनिश्चयत्वा-
वच्छिन्नस्याचतमतीयद्विषयकनिश्चयत्वेनानुमित्यसाधारणप्रतिबन्ध-
कत्वं तद्वत्त्वस्य लक्ष्यतात्रयोजकत्वाभिप्रायेण 'यद्वेत्यादिग्रन्थश्च
बाधे लक्ष्यतोपपादकत्वं सुसंगच्छते इत्यत आह, 'प्रत्यक्षं प्रतीति,
समानेन्द्रियजन्यबाधनिश्चयसत्त्वे लौकिकप्रत्यक्षस्याप्यनुत्पत्ते-
रानुमानिकेति बाधनिश्चयविशेषणं, 'शाब्दं प्रतीति, तथाच
तावतैव लिङ्गासाधारणदोषलब्धाघात इति भावः । तत्रापि तद-
प्रतिबन्धकत्वमाश्रयते, 'योग्यतेति, 'अन्यथासिद्धत्वादिति, बाधादि-
निश्चयदशायां योग्यताज्ञानरूपकारणविरहेणैव शाब्दबोधा-
नुत्पादनिर्व्यूढादिति भावः । 'तदभावः' बाधादिनिश्चयाभावः,
'तत्र' शाब्दबुद्धौ, यद्यपि योग्यतासंशयद्वितीयक्षणे स्मरणाद्यात्मका-
योग्यतानिश्चये सति तद्द्वितीयक्षणे शाब्दज्ञानवारणाय तदभावस्य
शाब्दबोधहेतुत्वस्यावश्यकत्वं तथापि बाधादिज्ञानस्य शाब्दा-
प्रतिबन्धकत्वेऽपि निर्विवादोपनीतभाने विशेषप्रतिबन्धकतयैव बा-
धादेर्लिङ्गासाधारणदोषनिराकरणसम्भवात्तथैव तन्निराकरोति,
'एवमपीति, 'उपनीतभानविशेषं दोषविशेषाजन्योपनीतभान-
विशेषं, 'तत्त्वेन' बाधनिश्चयाद्यभावत्वेन, 'दुर्व्वारत्वादिति, बाधादि-
निश्चयदशायां अनुमितेरिव तादृशोपनीतभानानुत्पादस्य सर्व्वानु-
भवसिद्धत्वादिति भावः ॥

इति महामहोपाध्याय-श्रीगदाधरभट्टाचार्य्यविरचिता हेत्वाभासे
सामान्यनिरुक्तिदीधितिविवृतिः समाप्ता ॥

सामान्यनिरुक्तावतिरिक्तविवेचनं ।

अनुमितिकारणीभूताभावप्रतियोगिताश्रयार्थज्ञानविषयत्वमिति लक्षणे भूतपदं षष्ठीसमासनिरासार्थमेवेति बोध्यं। नचानुमितिकारणप्रतियोगिताश्रयार्थज्ञानविषयत्वनिवेशेनैव सामञ्जस्ये अभावपदं व्यर्थमिति वाच्यं। सिषाधयिषाविरहविशिष्टसिद्धभावरूपानुमितिकारणमादाय सिद्धिविषयेऽतिव्याप्तिरतः अभावपदं। तथाचाभावपददानेन तादृगसिद्धभावभिन्नानुमितिकारणप्रतियोगिताश्रयार्थज्ञानविषयत्वं पर्य्यवसितं। नचानुमितिकारणीभूताभावप्रतियोगिताश्रयार्थीयविषयत्वनिवेशेनैव निर्व्याहमम्भवे ज्ञानपदं व्यर्थमिति वाच्यं। कार्य्यमात्रं प्रति कामिनीजिज्ञासा पृथक् प्रतिबन्धिका तथाचानुमितिकारणीभूताभावमध्ये तादृगजिज्ञासाभावस्य प्रविष्टत्वात् तत्प्रतियोगिताश्रयार्थीयत्वस्य कामिनीविषयकज्ञानेऽपि सत्त्वात् अतिव्याप्तिरतोज्ञानपदं, तथेच्छायाः ज्ञानाभिन्नत्वाभावात् नातिव्याप्तिः। कारणतावच्छेदककोटिप्रविष्टाभावप्रतियोगित्वरूपप्रतिबन्धकतामादायाप्रामाण्यादावतिव्याप्तिवारणाय अनुमितिप्रतिबन्धकत्वमुद्देश्य अनुमितिकारणीभूताभावप्रतियोगित्वमुक्तं मणिकारेण। व्याप्ति-पक्षधर्म्मताविरोधितद्विरहवतोदुष्टहेतोः स्मरणादित्युक्तं भट्टाचार्य्येण। न च विरोधिपदं व्यर्थमिति वाच्यं। व्याप्ति-पक्षधर्म्मताघटितत्वावच्छिन्नाभावयत्, सद्धेतोः स्मरणसम्भवेन दोषवारणाय विरोधिपदस्यो-

क्षत्वात् तथाच व्याप्ति-पक्षधर्मतावि रोधी यस्माद्गमाभावः स च व्याप्तिर्नास्ति पक्षधर्मत्वं नास्तीति प्रतीतिसिद्धोऽभाव-एव-स च दुष्टहेताविव वर्त्तते न तु सद्धतौ इति भावः। सप-रिकरं हेतुं निरूप्य इति दीधितिकारणोक्तं, अथाच सपरि-करहेतुं निरूप्य इति समस्तपदं कथं नोक्तं, इति चेन्न, तदा-भासनिरूपणमिति ग्रन्थस्यालग्नकतापत्तेः तत्पदस्य सम-स्तैकदेशपरामर्शकत्वासम्भवादिति भावः। मूलोक्तलक्षणानो दुष्टहेतुलक्षणत्वे दोषेष्वतिव्याप्तिः, यथार्थज्ञाननिष्ठानुमिति-प्रतिबन्धतावच्छेदकविषयताश्रयत्वपर्य्यन्तस्य समूहालम्बनज्ञान-विषयताश्रयोदासीनपदार्थवारणाय - प्रथमलक्षणे अवश्यं विव-क्षणीयतया बाधादिज्ञानप्रतिबन्धकतायां प्रायशो हेतुविषय-ताया अनवच्छेदकत्वात् तत्र हेतावव्याप्तिरिति भट्टाचरे-णोक्तं, अत्र प्रायःपदं ह्रदो वह्निमान् ह्रदादित्यादौ हेतु-विषयताया अवच्छेदकत्वात् इत्यभिप्रायेणोक्तं। यत्तु सरूपा-सिद्धिप्रतिबन्धकतामादाय हेतुविषयताया अवच्छेदकत्वात् क्वयमव्याप्तिरिति तत्तुच्छं, असङ्कीर्णबाधस्थले उत्पत्ति-कालावच्छिन्नो घटोगन्धवान् पृथिवीत्वादित्यादौ हेतुविषयताया-अनवच्छेदकत्वात् तत्र हेतावव्याप्तिरिति भावः। यद्विषयकत्वे-नेत्यादिलक्षणे द्वितीयया अवच्छेदकत्वार्थकतया सुतरां तथेति भट्टाचार्य्येणोक्तं। अत्र ह्रदत्वपुरस्कारेण घटाद्यवगाहिवह्नि-भावान् ह्रद इति ज्ञानीयप्रतिबन्धकतावच्छेदकीभूतघट-विषयतामादाय घटादावतिव्याप्तिवारणाय यद्रूपावच्छिन्न-

विषयत्वं अनुमितिप्रतिबन्धकतावच्छेदकं तद्रूपवत्त्वनिवेश-वय्यकतया सुतरामिति व्यर्थं इतिचेन्न, यद्विषयत्वस्य एतादृश-र्थलाभायैव सुतरामित्युक्तं इतिभावः। अनुमितिपदस्य अनु-मितिसामान्यपरत्वेऽसंभवः यत्किञ्चित्परत्वेऽतिप्रसङ्गात् प्रक्त-तपक्षसाध्यहेतुकानुमितिपरत्वमावश्यकमिति भट्टाचार्येणोक्तं, न-चात्र बाधादावव्याप्तिवारणाय प्रकृतपक्ष-साधकत्वनिवेशः, प्रकृत-हेतुकत्वनिवेशे प्रयोजनाभाव इति वाच्यं। पर्वतो वह्नि-मान् महानसीयवह्नीतरत्वेऽभाववत्पर्वतकालीनधूमादित्यादौ महानसीयवह्नीतरत्वेऽभाववत्पर्वतरूपबाधेऽव्याप्तिः तस्य प्रकृतपक्ष-साधकानुमित्यन्तर्गतायां शुद्धपर्वतोवह्निमान् इत्यनुमितौ प्रति-बन्धकत्वाभावात् अतः प्रकृतहेतुकत्वनिवेशः, तन्निवेशे च प्रकृतपक्ष-साध्यहेतुकानुमितिपदेन महानसीयत्व-वह्नित्वोभय-धर्मावच्छिन्नप्रकारकवह्नित्वावच्छिन्नविषयताशालिन्यनुमितिरेव बा-ध्या तादृशानुमितिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतायाः उक्तबाधे सत्त्वादव्याप्तिरितिभावः। अनुमितिनिष्ठकार्यतानि-रूपकसम्बन्धित्वेनानुमिति-तत्कारणज्ञानपरमितिदीधितिसन्दर्भः, अत्र सम्बन्धिद्वयसाधारणस्य तत्साक्षात्कारजनकसाक्षात्कार-विषयतात्मकनिरूपकत्वस्य लाभाय सम्बन्धिपदमिति भट्टाचार्येणोक्तं; अत्र यद्यपि तदनुयोगित्व-तत्प्रतियोगित्वान्यतरात्मक-निरूपकत्वरूपसम्बन्धनिवेशेनैव तादृशान्यतरावच्छिन्नप्रतिबध्यता-निरूपितप्रतिबन्धकतानिवेशनिर्वाहे कथं साक्षात्कारविषय-तात्मकनिरूपकत्वमुक्तं भट्टाचार्येण, नचान्यतरत्वं भेदघ-

वच्छिन्नप्रतियोगिताकभेदवत्त्वं तथाच गौरवमिति वाच्यं। साक्षात्कारकल्पे जनकत्व-जन्यत्व-व्यापकत्वनिवेशस्यावश्यक-तया अन्यतरत्वकल्पे महल्लाघवं इति वाच्यं। यतस्तत्-कल्पे कार्य्य-कारणभावे गौरव, तथाहि तव हेतुर्दुष्ट इति व्यव-हार प्रति व्यवहर्तव्यज्ञानस्य कारणत्वं तथाच ताट्टशकार्य्यता-नुयोगिना नेतिभेदविशिष्टत्वे सति तत्प्रतियोगिता नेतिभेद-विशिष्टोयस्तदवच्छिन्नप्रतियोगिताकभेदः तद्विशिष्टवदन्यन्निष्ठ-प्रतिबध्यतानिरूपितप्रतिबन्धकताश्रालियथार्थज्ञानविषयत्वेन एवं विनिगमनाविरहेण तत्प्रतियोगिता नेतिभेदविशिष्टत्वे सति अनुयोगिता नेतिभेदविशिष्टोयः तदवच्छिन्नप्रतियोगिताक-भेदः तद्विशिष्टवदन्यन्निष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकताश्रालि-यथार्थज्ञानविषयत्वेन ज्ञानस्य कारणत्वमवश्य व्यक्तव्यं तदपेक्षया साक्षात्कारकल्पे महल्लाघवं तत्र कारणता एकैवेति बोध्यं। एवं अनुमितिनिष्ठकार्य्यतासाक्षात्कारजनकसाक्षात्कारविषयताश्र-यनिष्ठप्रतिबध्यताया एव तत्र निवेशनीयत्वं। साध्यव्याप्यहेतुमान् पक्षः साध्यवान् इत्यकारकानुमितिपरं वैतिदीधितिकारै-रुक्तं। अत्र पक्षपदानुक्तौ बाध-सत्प्रतिपक्ष-स्वरूपासिद्धाश्रया-सिद्धिप्रसिक्तेति भट्टाचार्य्येण। ननु वह्निव्यापकीभूताभावप्रति-योगिजलरूपासाधारणेऽप्यव्याप्तिसम्भवे कथं तन्नोक्तं इति वाच्यं। पक्षपदप्रवेशेऽपि तत्राव्याप्तेरनुद्धारः अतः तन्नोक्तं। केचित्तु साध्य-तदभावव्यापकत्वसंबन्धावच्छिन्नत्वस्यैवासाधारण्यरूपत्वात् अत तन्नोक्तं। ननु स्वरूपासिद्धाश्रयासिद्धौ. कथं अव्याप्तिः द्वितीयदले पक्ष-

पदप्रवेशात् इति वाच्यं। पक्षपदस्य सकृदेव निवेशात्। निवेशस्तु साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपित-साध्याश्रय-हेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपितव्याप्तिमत्त्वेन, वैशिष्ट्यञ्च स्वनिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यता सम्बन्धेन, विशेष्यतावत्त्वञ्च स्वनिरूपकज्ञानीयत्व-साध्यतावच्छेदकावच्छिन्नविशेष्यतानिरूपितत्वोभयसम्बन्धेन। अत्रच्छेदकत्वञ्च तत्पर्याप्त्यधिकरणत्व तेनातेजस्वो पर्व्वतोवह्निमान् इत्यादौ बाधाप्रयोजकादौ नाव्याप्तिरिति भट्टाचार्य्येणोक्तं। नचात्रापि सत्प्रतिपक्ष-स्वरूपासिद्ध्याप्तिसम्भवे कथं तल्लोक इति वाच्य। पूर्व्वोक्तसमुदायस्याश्यकतया तत्र्यप्रत्यस्यापि लाभसम्भवात्। वस्तुतस्तु सत्प्रतिपक्षत्वावच्छेदे नाव्याप्तिः व्यापकसामानाधिकरण्यघटितस्य सत्प्रतिपक्षत्वे तेजोभावव्यापकवह्न्यभाव-समानाधिकरणतेजोभावत्वदतेजस्विपर्व्वते लक्षणगमनात् तज्ज्ञानस्य व्यावर्त्तकदर्शनविधया प्रतिबन्धकतया तज्ज्ञानस्य पर्व्वतो वह्निमान् इत्यनुमितिप्रतिबन्धकत्वात् समानाधिकरणेन नियतस्य अवच्छेदावच्छेदेन बुद्धेरेव प्रतिबन्धकत्वं मतिनियमस्तु बाधादिस्थल एव न तु अवच्छेदकधर्म्मदर्शनस्थले इति तर्कामृते मथुरानाथेन लिखितत्वात्। न च तथापि स्वरूपासिद्ध्याप्तिसम्भवे तल्लक्षणमिति वाच्यं। तत्रापि स्वरूपासिद्धित्वावच्छेदेन अव्याप्तिसम्भवात्। अतेजस्वी पर्व्वतोवह्निमान् घटादित्यादौ अवच्छेदावच्छेदेन घटाभावत्वत्पर्व्वतरूपस्वरूपासिद्धौ लक्षणगमनात्। साध्यतावच्छेदकावच्छिन्नसाध्यप्रकार-